MSS No. 131 Subject Religion

Name of MSS Sivapurānā शिवपुराण

Author - -

Period - - Folios 130

Script Sanskrit Source Prithipal Singh

Missing Folios - -

129

129

129

129

पु[illegible]

...यनमः ॐ नमस्तत् श्रीरामचरणद्वंद्वमद्वंद्वानंदसाधनं नमामि यद्भजो योगासाधारणोपि सुखं गतः १ संगतिः संशयः पूर्वप
क्षः फलं भाष्यस्याः श्रुतयः सर्वाः सन्त्यारोपनवेशोषतः २ व्याख्यायते स्फुटन्यायैर्मतभेदोपि कुत्रचित् उच्यते सुखबोधार्थं श्री
मन्नामिदं ३ इह खलु नित्याध्ययनविधिनाधीतस्वाध्यायमापातज्ञानवंतं पुरुषार्थकामं ऐहिकामुष्मिकफलेषु विरक्तमुप परमं
...सम्मकारिणं कोमुनिः सूत्रयामास अथातो ब्रह्मजिज्ञासेति १ अत्राथशब्देन साधनचतुष्टयसंपत्त्यानंतर्यमुच्यते तथ
...लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिना कर्मफलानामनित्यत्वं परीक्ष्य लोकान् कर्मचितान् ब्रा॰ त्वं
...हृतः कृतेन नित्यवैराग्यं कर्मफलेषु दर्शितं शांतो दांत इत्यादिना शमादिर्न स पुनरावर्तत इत्यादि मुमुक्षा
...तस्य...नंतर्यमेव साधनचतुष्टयसंपत्त्यानंतर्यं अथ यीन्मास कामाधिकारीत्युच्यते अतः शब्देन साधनचतुष्टय
...भावसंपत्...नात्...तत्वेन विषयत्वं ज्ञातं तेन प्रयोजनं ब्रह्मस्मरणं उक्तं भवति एवं च प्रेक्षावत्प्रवृत्त्यंगभूतोधिकारी
...दि समर्पक...पाय...विलवि...ताराद्यावस्मत्रस्य संगतिः श्रवणविधिविषयवेदांतवाक्यैः स्वार्थनिर्णायायास्या
...य...नश्रुति संगतिः एवसवेदास्त्राणां श्रुति संगतिः विशेषतो ब्रह्मपरत्वा सत्ता सर्वनिर्णायकन्यायसंचकत्वान् ब्रह्मविचार
मक...शास्त्र संगतिः एवमग्रेपि शास्त्रसंगतिरुक्ता अथातो ब्रह्मजिज्ञासेत्यादिभिः सूत्रैः सर्वे वेदांताः ब्रह्मपरा इति समन्वयप्रतिपाद
ना...नेषामध्यायसमन्वयाध्यायसंगतिः प्रथमे पादे स्पष्टब्रह्मलिंगानां वाक्यानां विचार्यत्वादयं पादः पादसंगतिः प्रायम्यादस्य सूत्र
...ाधिकरणसंगतिर्नापेक्षितानंतराणां तत्संगतिरेषा अपेक्षितं तच्च तत्तदधिकरणप्रस्तावे वक्ष्यामः तत्र तावदात्मा वा अरे द्रष्टव्यः

प्रानंतर्य

इयं तमि निश्चयः

तत्राधिकरणमुपन्यस्यते तावत् प्रथम
करण...वाक्य...

फलत्वेनोद्दिश्य ब्रह्मविचारो विधीयते

स.टी.

वान् शास्त्रमारंभणीयं अत्र कृत्स्नशास्त्रप्रतिपाद्यं ब्रह्म अध्यायेस्तु श्रुतिवाद्यानि समन्वयाविरोधसाधनफलानि तदुक्तं शास्त्रं ब्रह्म
विचारात्मकमध्यायाः स्युश्चतुर्विधाः समन्वयो विरोधो हो साधनं च फलं तथेति तत्र विवरणमतानुसारिणः सत्रे कर्तव्येति पदस्याध्याहर्त
व्यमिति वदन्ति तथाहि इष्टत्वश्रुति परमपुरुषार्थसाधनं ज्ञानमनूद्य तत्रैव तत्रोपायतया सात्त्विनो ब्रह्मवेद ब्रह्मैव भवतीत्यादिना च भिन्ना ज्ञाने ३
भिन्नात्मविचारयोः साधनत्वेन पक्षप्राप्तौ श्रोतव्य इत्यनेन प्रकृतिलक्षणार्था भिन्नात्मविचारस्य वसाक्षात्कारसाधनमिति निषम्यते
कर्तव्येसुधा श्रीरामवद्हन्तीति निवृत्त एवं च नावेदविन्मनुते तं बृहन्तं तं त्वौपनिषदं पुरुषमित्यादिना ब्रह्मणि प्रमाणान्तराभावान्मनननिदिध्यासन लौकिकपुरुषा
सहकृतं तद्विचारितवेदान्तवाक्यमेव साक्षात्कारहेतुरिति संपद्यते तथा च विचारविध्यपेक्षिताधिकार्यादीनामागमिकेलोपि न्यायेन नहि विधिः पीवकपदमतेः
निर्णीयार्थमिदं सत्रं तस्यानुवादकत्वेनानर्थकं स्यादिति कर्तव्यपदाध्याहारः शास्त्रे पुरुषप्रवृत्तिसिद्धये श्रुतिसारूप्याय च वरणं च स पुरुषप्रवृत्तिर्भवति
निजिज्ञासस्व तत्प्रकृत्या ज्ञानमात्रपर्यायसाध्यं ज्ञानमनहल्लक्षणया बोध्यते पक्षये ध्यास्याध्यविचारो जहल्लक्षणया बोध्यत इति साहश्यं च तत्पदध
नवीनमतं विवरणादिपुराणानुमतेः सिद्धज्ञानमात्रवाचकत्वमंगीकृत्य साध्यज्ञानेपि जहल्लक्षणैवेत्युक्तं तथा चायं सत्रस्य श्रो दितपदं चैतन्नमोक्ष
तोर्थः साधनचतुष्टयसंपन्नस्य ब्रह्मज्ञानाय विचारः कर्तव्य इति ज्ञानस्य मोक्षहेतुत्वं वेदान्तानां विचार्यत्वं चार्थाल्लभ्यते तथा
कृताधिकारिणो मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इत्यार्थिकार्थ इति भिन्नमतानुसारिणस्तु श्रुतिसूत्रयोरेक
रूप्यानियमाभावं विषयप्रयोजनज्ञानादेव पुरुषप्रवृत्तिसिद्धिं श्रवणविधिसंभवं च मन्वानाः कर्तव्येति पदं नाध्याहर्तव्यमिति
वदन्ति तेषां मते साधनचतुष्टयसंपन्नस्य नन्तरं ब्रह्मज्ञाने च्छा भवति कर्मफलस्यानित्यत्वात् ब्रह्मज्ञानात्परमपुरुषार्थश्रवणाच्चेति एम

२

श्रोतव्यो मंतव्यो निदिध्यासितव्य इति वाक्यं द्रष्टव्य इत्यात्मसाक्षात्कारफलमनूद्य तत्साधनत्वेन श्रवणं विदधाति श्रवणं नाम सर्वेषा
मुपनिषद्वाक्यानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूलन्यायविचारः तादृशविचारात्मकवेदान्तशास्त्रमारंभणीयं न वेति सं
देहः सर्वत्र पूर्वोत्तरपक्षयुक्तिद्वयं संशयबीजं द्रष्टव्यं तत्र पूर्वपक्षः शास्त्रं नारंभणीयं विषयप्रयोजनयोरभावात् तथा हि संदिग्धं
विषयः ब्रह्म तु जीवात्मना ब्रह्मात्मना वा न संदिग्धं अहं मनुष्य इत्यनेन सत्यं ज्ञानमनंतं ब्रह्मेति वाक्येन च निश्चितत्वात् न च तत्त्वमस्यादि
वाक्येनैक्यप्रतिभासनादहं मनुष्य इत्यनेन भेदावभासनात्संशयः अबाधिताहं मनुष्यप्रत्ययविरोधेन श्रुतेरुपचरितार्थत्वान्न चाध्यस्ता
त्मविषयत्वमहंप्रत्ययस्य स्वप्रकाश आत्मन्यध्यासायोगात् नापि प्रयोजनं उक्तरूपब्रह्मज्ञानेनापि मुक्तेरदर्शनात्तस्मात् शास्त्रमना
रंभणीयमिति प्राप्ते सिद्धांतः शास्त्रमारंभणीयं विषयप्रयोजनयोः संभवात् श्रुत्यहंमनुष्यप्रत्ययविरोधेन जीवाभिन्नब्रह्मणः संदिग्धत्वे
न विषयत्वात् न च श्रुतेरुपचरितार्थत्वमुपक्रमादिना तात्पर्यलिंगेन सहकृतानेकवाक्यानामुपचरितार्थत्वायोगात् मनुष्योहमिति सा
होपर्यपि भ्रमत्वेन स्वीकारात्केनेत्याद्यंशेपि श्रुतिबलाद्भ्रमत्वमास्थेयमिति नाध्यासानुपपत्तिः किं च न केवलं संदिग्धत्वेनापि तु
विपर्यस्तत्वेनापि विषयत्वं ननु स्वप्रकाशे आत्मनि कथं संदेहादिरिति चेन्न अनाद्यविद्यावशात्तादृशेप्यात्मन्यध्यासस्यानुभव
सिद्धत्वात् स्वरूपज्ञानस्य तदविरोधित्वात् नापि फलाभावः यथावस्तुस्वरूपसाक्षात्कारस्येदानीं संभवेप्यसंभावनादिशंकाकलंकि
तत्वेनाविद्यानिवर्तकत्वाभावेपि श्रवणमनननिदिध्यासनैः शंकायां निरस्तायां ब्रह्मसाक्षात्कारेणाविद्यानिवृत्तौ प्रतिबंधका
भावात् तथा च श्रुतिः तरति शोकमात्मवित् एतद्यो वेद निहितं गुहायां सोऽविद्याग्रंथिं विकरतीह सोम्येति तस्माद्विषयफलसंभ

...कुतः श्रुतिबलात् असंगो ह्ययं पुरुषः अन्योऽन्तर आत्मा इत्यादि श्रुतिबलादिति भावः

गौणार्थकत्वा...

श्रुत्यहंप्रत्ययोर्विरोधेन १

अध्यासकाले

श्रौतोर्थः ज्ञानस्य विचारसाध्यत्वाद्विचारकर्तव्यतास्ति यत इति विचारकर्तव्यतार्थिको वेति अत्र विचारणारंभवादिन उपायांतर
साध्या मुक्तिरिति फलं सिद्धांतिनस्तु विचारसंभवाद्ब्रह्मज्ञानसाध्यैव मुक्तिरिति फलफलिभावो द्रष्टव्यः १ एवं प्रथमसूत्रे ब्रह्ममीमां
सायाः प्रतिपादितत्वात्तस्याश्च लक्षणप्रमाणसमन्वयाविरोधसाधनफलविषयत्वेनानेकविधत्वेपि प्रथमं ब्रह्मणः प्राधान्या
त्तल्लक्षणार्थमिदं सूत्रं जन्माद्यस्य यतः अस्य पूर्वाधिकरणेन संदिग्धत्वात् ब्रह्मविचार्यमित्युक्तमयुक्तं जन्मादेरन्यनिष्ठत्वेन ब्र
ह्मणो लक्षणाभावेन स्वरूपस्य वाभावादित्येवंरूपाक्षेपसंगतिः एवं पूर्वाधिकरणसिद्धांतयुक्तिमुत्तराधिकरणपूर्वपक्षयुक्तिं चा
वलंब्य यथासंभवमाक्षेपसंगतिस्तत्र तत्र बोध्या दृष्टांतप्रत्युदाहरणसंगती च सर्वत्र संभवतः प्रकृते तु यथा संदिग्धत्वेन हेतुना
ब्रह्मविचार्यं एवं जन्माद्यन्यनिष्ठत्वेन हेतुना ब्रह्मलक्षणं नास्तीति दृष्टांतसंगतिः यथा विचार्यत्वे हेतुर्न तथा लक्षणसद्भा
वे हेतुरस्तीति प्रत्युदाहरणसंगतिः पूर्वपक्षे ब्रह्मलक्षणपरीक्षणाभावात्तत्र फलं अस्य दृंविषयवाक्यं यतो वा इमानि भूतानि जा
यंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति भृगुं प्रति श्रूयमाणानि संशयः तथा च श्रूयमाणानि संति
भौ अभिसंविशंतीति वाक्यार्थः अत्र श्रूयमाणजन्मादिकं ब्रह्मलक्षणं न वेति संदेहः जन्मादेः प्रपंचनिष्ठत्वेन ब्रह्मसंबंधाभावान्न ल
क्षणमिति प्राप्ते न च सत्यं ज्ञानमित्यादिवाक्यस्थसत्यादिकं लक्षणं भवत्विति वाच्यं लोकसिद्धभिन्नार्थानामेकब्रह्मलक्षणत्वेना
त्वा न्वयसिद्धेरिति प्राप्ते अभिधीयते जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणं तटस्थं सत्यादिकं स्वरूपलक्षणं न च लोकसिद्धभिन्नार्थत्वा
त्सत्यादीनामेकब्रह्मलक्षणत्वमप्रसिद्धमिति वाच्यं सत्यादिपदानामखंडार्थत्वेनैकब्रह्मपर्यवसायित्वेन सत्यादीनां लक्षणत्व

जन्मस्थितिभंगरूपतद्गुणस्य १

स्वे दंभवादिति सूत्रार्थस्तु जन्मादि यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः जन्मस्थितिभंगं समासार्थः पूर्वस्तत्रास्य ब्रह्मपरानुषंगः त

३ दध्याहारः तेनास्य प्रत्यक्षादिसु पस्थितस्य प्रपंचस्य जन्मस्थितिभंगं यतो भवति तद्ब्रह्मेत्यर्थः यद्यप्यभिचाराज्जन्मादिकारण

त्वमस्ये कुलत्व कारणं संभवति तथापि ऊर्णनाभ कुलमात्रनिमित्तं तु पादानसिद्ध्यर्थं त्रितयग्रहणं न चलपग्रहणेनैव तत्सिद्धेः शेषवैय उपादानत्व ३

कमी ५ र्थ्यमिति वाच्यं न ह्युपादानत्वं कुलत्वमतेनोच्यते किंतु प्रकृतिविकारन्यायेनाद्वितीयब्रह्मसिद्ध्यर्थं एवं च भवतु ब्रह्मोपादानं कुला

लवद्भिरेव तान्यस्य वा तु राज्यस्थितौ राजवत्त्वान्यस्य वा स्थितौ कर्तास्ति सा शंका माभूदिति त्रितयग्रहणं कृतमिति २ एवं जग

त्कारणत्वेन ब्रह्मणः सर्वज्ञत्वमर्थादुक्तं तदापि कं सर्वज्ञत्वं नेरणसमर्थयितुमाह शास्त्रयोनित्वात् ३ शास्त्रं वेदः तद्योनित्वं

तत्कर्तृत्वमस्य कल्पवृक्षकर्तृत्वादपि ब्रह्मसर्वज्ञमिसपः अत्र सर्वज्ञत्वनिर्धारणं पूर्वपक्षफलं तन्निर्धारणं सिद्धांतफलं अ

पवेदस्यानित्यत्वाद्ब्रह्मणाविभयोनित्वानेति शंकामपाकर्तुं शास्त्रयोनित्वमुच्यते अस्मिन्नप्यसंभ्रांतप्रतिज्ञये वसंगतिः प

र्वसूत्रोक्तजगत्कारणत्वस्यैव समर्थनात् अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद इत्यादिवाक्यमस्य

स्य विषयः अस्मिन्नित्यसिद्धस्य ब्रह्मणो निश्वासइवानायासेनैव वेदः सिद्ध इत्यर्थः अत्र ब्रह्म वेदं करोति न करोतीति वेति संदेहे न क वेदरूपया ४

रोतीति वाचा विरूपनित्ययेति नित्यत्वश्रवणात् अस्मिन्मंत्रे विरूपेति स्वतःसंबोधनित्यया वाचा स्तुतिं प्रेरयेति प्रार्थ्यते अना

दिनिधना नित्या वागुत्सृष्टा स्वयंभुवा आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तय इति स्मृतेः अतो न वेदकर्तृत्वं ब्रह्मण इति न च गद्यो नित्य ग ३

मिति प्राप्ते ब्रूमः निश्वसितन्यायेन वेदोत्पत्तिश्रवणात् तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे इति सर्वं यतो हेयमानाद्यज्ञा

त्वात्स्याद्ब्रह्मणो नज्ञिरे इति वेदकर्तृत्वप्रतीतेर्विभ्रयोनित्वं एतत्स्तुतये नवा चसादिश्रुतिस्मृती तु अर्थवादत्वं न च वेदस्य सकर्तृत्वे ग्र ३

स्वभावत एव यथा स्थानिस्मरंति न येस्य रस्तुत्वात् वेदरूपाः स्यासाभवंति

र्कमृतः सर्वज्ञ इति सर्वज्ञकल वेदस्य कर्तृत्व...

दुःखनिवृत्तेः २ संभवति न सिद्धब्रह्मपरो वेदान्तः किं प्रवृत्तिनिवृत्तिपरस्यैव शास्त्रत्वेन सिद्धब्रह्मपरत्वे शास्त्रत्वं च न संभवति नापि प्रयोजनवत्त्वम् अहं ब्रह्मा आत्मा ब्रह्म भवति
स्मीति ज्ञानेन सत्यपि प्रयोजने संसारदर्शनात् यद्येवं भवतु ज्ञानात् प्रयोजनसिद्धिस्तर्हि मननादिविधानं न स्यात् तस्मादात्मेत्येवोपासीत ब्रह्म
वेद ब्रह्मैव भवति ब्रह्मभवनकामो [redacted] ब्रह्मवेदनं कुर्यादित्येवमादिषु विधिषु कोसावात्मेत्याकांक्षायां तत्समर्पकत्वे
तेन सर्वे वेदान्ता उपयुज्यन्ते उपासनासाध्यश्च मोक्ष इति उच्यते तत्तु समन्वयात् तद्ब्रह्म साक्षाद्वेदान्तप्रतिपाद्यं कुतः समन्वयादित्य उपासनया जन्यता ५
र्थः न तावदुपासनासाध्यो मोक्षः उपासनायाः कार्यत्वेन तत्साध्यमोक्षस्यापि कार्यत्वमनित्यत्वं च स्यात् विधेयकर्मफलभोग
दशायां शरीरस्यावश्यकत्वेन मोक्षेपि शरीरं स्यात् किंवा शरीरं वा वसंतं न प्रियाप्रिये स्पृशतः इति श्रुतेः स्वप्रियाप्रियस्पर्शनि शुभाशुभकर्मफले ६
षेधो न स्यात् मोक्षस्य धर्मफलत्वेन तस्य वा प्रियस्य विद्यमानत्वात् श्रुत्यर्थस्तु वस्तुतो शरीरं सन्तमात्मानं वैषयिके सुखदुःखे नैव स्पृ
शतः वाचं संसदयारण्यादिति ननु धर्मजन्याया शरीरत्वाख्यमोक्षातिरिक्तसुखादिनिषेधपरमिदं वाक्यमिति चेन्न अशरीरं शरीरेष्वनवस्थे अ
ष्ववस्थितं महान्तं विभुमात्मानं मत्वा धीरो न शोचति अप्राणो ह्यमनाः शुभ्रः असंगो ह्ययं पुरुष इत्यादिश्रुतिभ्यो शरीरत्वस्य स्वा
भाविकत्वावगमात् श्रुतीनामयमर्थः वस्तुतोऽस्थूलशरीरं तत्र हेतुः शरीरेष्विति अनवस्थेष्वनित्येषु अवस्थितं नित्यं तत्र वेदे त
सं महान्तमिति आपेक्षिकं महत्त्वं वारयति विभुमिति मत्वा मंतव्यभेदं प्रसाह आत्मानमिति ईदृशमात्मानं मत्वा धीरो भवति न
हि तन्मतिं विना धीरत्वं तत्र शोकापत्तिः सिंतं संसारं नानुभवतीत्यर्थः सूक्ष्मशरीराभावे श्रुतिरप्राण इति क्रियाशक्तिमान् प्राणो ...वित् ३
स्य वस्तुतो नास्तीति तन्निषेधात् तत्प्रधानानि सर्वाणि कर्मेन्द्रियाणि निषिद्धानीत्यभिप्रायेण हि शब्दः ज्ञानशक्तिमन्मनोस्य व
स्तुतो नास्तीति तन्निषेधात् तत्प्रधानानि ज्ञानेन्द्रियाणि सर्वाणि निषिद्धानि अत एव शुभ्रः शुद्ध इत्यर्थः सैपत्तत्र किंचित्स्पर्शनं ता

सर्वाणि प्रधानोये भुतानि विषयसहितानि

तत्र आत्मा तत्र स्वप्नावस्थायां यत् किंचित्
तेन स्वप्नावस्थानुभूतवस्तुना आत्मा
अनन्वागतः पागतिस्पृष्टकालीनस्य
वस्तुनोऽभावात् १

स॰ टी॰

५

गतत्वेन नभवतीति समाद्दिष्टं न कर्मसु कर्त्तात्मेत्युक्तेर्थे हेतुरुच्यते असंगइति श्रुत्या मूर्त्तेम्मूर्त्तेतरेण युज्यमानं संदेते आत्मानुभूते

तोन्न मत्तेन स्थूलसूक्ष्मशरीरादिना केनचिद्युज्यते तेनाकर्त्तेत्यर्थः एवं स्वाभाविकाशरीरत्वापरपर्यायमोक्षात्मत्वं ब्रह्मणि सुरवादि

स्पर्शाभावे श्रुत्यन्तरमपि अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च [redacted] यत्तत्पश्यसि तद्वदेति

धर्माधर्मफलात्सुखदुःखाद्धर्माधर्मफलाद्दुःखात्कृतात्कार्यात् अकृतात्कारणाद्भूतादतीताद्भव्याद्भाविनः चशब्देन वर्त्तमानाद्यन्यत्रान्यदि

त्यर्थः एतत्त्वं पश्यसीति पावनं यस्य भूतं पश्यसि तद्वदेति मृत्युप्रतिवचने तत्सावचनं अपिच मोक्षस्य कर्मफलत्वे स्वर्गादिव

न्मुमुक्षुरपारमतत्त्वं नस्यात् ब्रह्मवेद ब्रह्मैव भवति सोऽपुनरावर्त्तते नास्य कर्माणि तस्मिन्दृष्टे परावरे आनंदं ब्रह्मणो विद्वान्नबिभेति कुत

श्चनेति अभयं वै जनक प्राप्तोसि तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत् तत्र को मोहः कः शोकः एकत्वमनुपश्य

तः तदेतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेहं मनुरभवं सूर्यश्चेतीत्यादीनां ब्रह्मविद्याकाले सर्वमोक्षश्रवणपत्तीनां बाधश्चस्यात् कर्म

फलानां कालांतरभावित्वनियमात् श्रुतीनां चैवं तुल्यं मोक्षमसे तेन वेदसाक्षात्कारेणैतत्सर्वं ब्रह्म भवति तस्मिन्परमात्मनि प

रिकरणं अवरेकार्यं तद्दृष्टे प्रतिविहितं भवति साक्षात्कृतवतस्तस्य विदुषः अभुक्तफलानि कर्माणि क्षीणानि भवंति ब्रह्मणोऽभयमा

नंदं विद्वान्भयहेत्वभावान्नबिभेति पाभवतीत्यादिः श्लोकार्थः हे जनक त्वमभयं प्राप्तोसि नतत्साक्षात्कारबलात् यस्मिन्

देहजलेक्षत्वं विदं ब्रह्मजीवात्मनेतराचार्येणबोधितमात्मानमेव सर्वकल्पनातीतमवेत् विदितवत् कथं अहं ब्रह्मास्मीति पश्यन्नी

तिन तस्मात्ज्ञानात् ज्ञानकृतात्सर्वं जगदादिनिष्प्रसादं ब्रह्मपूर्णात्मनास्थितमासीत् यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः इ॰

ति यः सर्वात्मभावो विद्यायाः फलेनोक्तः तत्रात्मनि तद्दृष्टिकाले वा तदात्मैकत्वं समुपश्यतः शोकाद्युपलक्षितः संसारो नेतित्सरल

अत्र कर्तेपदं ब्रह्मलेति

तत् एष

५

प्रतिपेदे इति पदेन संबध्यते २

यततत्

द्यं ब्रह्मसंततरान्मत्वेनावस्थितमहमस्मीति पश्यन् अस्मादेव दर्शनात् पृथिव्यामेवास्थः परं ब्रह्मविद्याध्वंसहागमनि पेदे प्रतिपन्नवानिति लें२ हशब्दः किल
निःशब्दो व्यवधानेन संबध्यते तत्र चास्मिन्दर्शने स्थितः सर्वात्मभावप्रकाशकानहं मनुरभवमित्यादीन्मंत्रोऽश्नरदर्शीत्यत्र ब्रह्मधीर्नि —
विधेयानत्वं तेन नैवधर्मितिगम्यते तथाहि त्वं हि नः पितायोऽस्माकमविद्यायाः पारं तारयसि श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकम२ परं ३
त्मविदिति सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमार र
त्यादिः श्रुतयाब्रह्मविद्याया अविद्यानिवृत्तिद्वारा मोक्षहेतुत्वं दर्शयंति अविद्यानिवर्तकत्वं प्रमाणवस्तुपरतंत्रज्ञानस्यैवेति न विधेयत्वं च ५
विद्यायास्तत्त्वेन विधेयसाध्यमिति श्रुतीनामेषोऽर्थः भरद्वाजादयः षट् ऋषयः परं विद्यायाः पिप्पलादाख्यगुरुं विद्यानिष्क्रयायमेस्मर
नुतुष्टुवुः परं पारयेति प्रणम्योचिरे त्वं हि नः पितेति नित्यं त्वमस्माकं पिता ब्रह्मदेहस्याजरामरणस्य विद्यया जननपितृत्वात्ता
तु देहमात्रजनकाः पितरः जनयितृत्वमपि विद्ययैवाविद्यानिरासादि साह यस्त्वमस्मान्नेहारषेः परं अपुनरावृत्तिरूपपारं तार२ विद्याम ८
यसि मायपसि विद्याप्लवेनेति श्रुतं ह्यस्मादिना रयत्विसनमुपक्रमस्य शेषमुपसंहारस्यमितिभेदः मेमया भगवद्दृशेभ्यः भगव
ति तुल्येभ्यः श्रुतमेव यथातत्त्वमवित्तरशोकं मनस्तापं अकृतार्थबुद्धिं तरतीति सोऽहमनात्मवित् शोचामि अतस्त्वं मा शोचं तं शोकसागरस्य पारं
मनन्तारयितुं प्रापयतु भगवानात्मज्ञानोडुपेनेति नारदेन प्रार्थितः सनत्कुमारः तस्मै नारदाय मृदितकषायाय वैराग्यादिना क्षालित२ रागादि ४
कषायाय तमसः अविद्यायाः पारं परमात्मतत्त्वं दर्शितवानिति ननु ब्रह्मत्वेव विधेयमस्तु मुक्तेः फलत्वसत्त्वात् न च मोक्षरूपत्व ३
...कारकत्वाद्विधेयत्वे ब्रह्मत्वे देहत्वादिनाकर्मत्वममतीति रिति चेन्न फलासंभवस्योक्तत्वाद्ब्रह्मणः कृतिसाध्यत्वाभावेन
विधेयत्वानुपपत्तेश्च नापि कर्मत्वं किं विदिक्रियाकर्मत्वमुतोपासनाकर्मत्वं नाद्यः अन्यदेव तद्विदितादथो अविदितादधि

कर्मफलानां कालांतरभोक्तृत्वात् मोक्षस्य विद्यासमकालत्वात्
इति फलासंभवस्योक्तत्वात् २

स.
६

येनेदं सर्वं विजानाति तं केन विजानीयात् इत्यादिना विदिक्रियाकर्मत्वप्रतिषेधात् नाद्वितीयः तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपास
त इत्युपासनाकर्मत्वप्रतिषेधात् श्रुत्यर्थस्तु तद्ब्रह्म विदिताकार्यात् अन्यदेव अथो अपि अविदितात्कारणात् अन्यदेव अधिउ
परिष्टाद्वा अन्यदिति येन प्रमात्रादयः सर्वं वस्तु लोको जानाति तं केन करणेन जानीयात् करणस्याविषयत्वात् ज्ञातृप्रश्नेनेदं तस्मा ज्ञेयः२
न्न ज्ञाताज्ञेयः किंतु साक्षीति यद्वाचानभ्युदितं येन वागभ्युद्यत इत्यविषयत्वमुक्त्वा तदेवेति प्रमात्रादेः कल्पनामयोपाध्यात्मभूतं
ब्रह्म महत्त्वमिति त्वं विद्धि यदुपाधिविशिष्टदेवतादिकमिदमित्युपासते जनाः नेदं तद्ब्रह्म विद्धीत्यर्थः इति अब्रह्मणोऽकर्मत्वं ग
म्यते यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां न दृष्टेः द्रष्टारं पश्येः न विज्ञातेर्विज्ञातारं विजा
नीया इत्यादिश्रुतयः अविषयत्वं बोधयन्ति यस्य ब्रह्मामतं अविषय इति निश्चयः तस्य तन्मतं सम्यक् ज्ञातं यस्य तु मतं विषयतया
ज्ञातं न स वेद ब्रह्म नासौ तद्वेद भेदधीमत्त्वात् एवमेवेति नियमार्थमुक्तार्थमनुवदति अविज्ञातमिति श्रुतिः विषयतया ज्ञा
तमेव ब्रह्म सम्यग्ज्ञानविशेषज्ञानवतां ज्ञातमेव विषयतया यथावज्ज्ञानवतामिति बुद्धिमान् विषयतया न जानाति सर्वत्र तु विष
यतया ज्ञातं नेति तात्पर्यार्थः दृष्टेः चक्षुर्जन्यायाः कर्मभूताया द्रष्टारं स्वभावभूतनित्यदृष्ट्या व्याप्तारं दृश्यमानया दृष्ट्या न पश्येः वि
ज्ञाते बुद्धिधर्मस्य निश्चयस्य विज्ञातारं साक्षिणं तथैव विषयाविज्ञात्या विज्ञातारं न विजानीया इति मैत्रेयीं प्रति याज्ञवल्क्यवचनं
न विषयत्वे कथं शास्त्रप्रमाणकत्वमिति चेन्न तज्जन्याविद्याभ्रान्तिध्वंसरूपातिशयत्वेन तद्विषयत्वसंभवादिति किंच न तावद्विधेय
क्रियया साध्यत्वं मोक्षस्य मोक्षस्य स्वरूपत्वेनानादित्वात् न विकार्यो अविकार्योऽयमुच्यते इति स्मृतेः नाप्याप्यः नित्याप्तत्वात् नापि सं
स्कार्यः निर्गुणत्वेन गुणाधानलक्षणसंस्काराभावात् नापि दोषापनयः संस्कारः संभवति ब्रह्मणि क्रियाया अभावेन तस्य निःशक्रिय त्यम
त्वेन देहादिसंघातः ६

ज्ञाताज्ञेयो न भवति ४

प्रमात्रादीनां ४

मैत्रेयीं प्रति याज्ञवल्क्यवचनं

तामानाधिकरण्ययोरेव कार्यकारणभावइतिनेमातरि

ब्रह्मणि

पादोषापगमायोगात् अन्यनिशङ्क्विषयात्मसंस्कारायोगात् ~~अन्यस्मिन्देहे विषयभोगसंस्कारायोगात् अन्यनिर्दिष्टविषयात्मकृतसं~~
स्कारयोगात् न चदेहादिनिशङ्क्विषयात्मनिसंस्कारोदृष्टइति वाच्यं देहादिसंहतनिशङ्क्विषयात्तस्यैवसंस्कार्यत्वेनसकलभोक्तृत्वं चेसंभव
गमात् तथाचश्रुतिः आत्मेन्द्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणइति आत्मीयंशरीरमात्मेत्युच्यते तथाचशरीरादिसंयुक्तमात्मानं
भोक्तेतिमनीषिणःआहुरित्यर्थः यद्वा आत्मेतिभोक्तेत्याहुरितिसंबंधः इन्द्रियेत्यादिक्रियाविशेषणं आत्मनिदोषाभावाद्वचनदोषनिवृ
त्तिः संस्कारःसंभवतिनिर्गुणत्वनिर्दोषत्वेश्रुतिरेवमानं तथाहिएकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतान्तरात्माकर्म्माध्यक्षः
त सर्वभूताधिवासःसाक्षीचेताःकेवलोनिर्गुणश्च सपर्यगाच्छुक्रमकायमव्रणमस्नाविरंशुद्धमपापविद्धमिति अनयोर्मन्त्रयोरयमर्थः — १
र्थः मन्त्रिचयस्यब्रह्मणःस्वरूपमात्मनोभेदप्रसाह एकइति जाड्यंप्रसाह देवइति तानयनदस्यर्थः आदित्यादिवैषम्यंचाह सर्वेति — स्त्रि
नोहेर्निमित्तिनप्रतीयतेतथाह गूढइति अनादिमायया छन्नइत्यर्थः ततइदुतावद्विन्नत्वेनपरिछन्नत्वेनेत्याह सर्वव्यापीति नभो
वृतादस्यव्याप्यतेति सर्वभूतेति सर्वेषुभूतेषुवंतःस्थितस्यतन्त्वाक्रियाकर्तृत्वेनात्वेत्याह कर्मेति सर्वकर्म्मसाक्षीत्यर्थः सर्वभूतेषिवसा — कात्मेनेयतततन्त्र
दित्वाभूतानां नारम्यगुणकःसोद्वितीयत्वमाशंक्याह सर्वेतिसर्वेषांभूतानामधिवासोधिष्ठानं नचकल्पितमधिष्ठानादन्यतरमित्यर्थः — धिष्ठानात् अर्थो नरूनास्ति१०
तत नेकस्यतस्यकर्तृत्वेनबाध्यत्वं अपितुकर्तृत्वमपीत्याह साक्षीति साक्षित्वेहेतुमाह चेताइति चित्स्वभावइत्यर्थः केवलोद्वयवर्जितः — ति
अद्वितीयः निर्गुणोज्ञानादिगुणरहितः चकारोदोषाभावसमुच्चयार्थः गुणदोषाभावेमन्त्रान्तरंसपर्यगादिति सःपरमेश्वरोऽणि — न्
भूतान्नीतिप्रकृतात्मापरितःसमन्तात् अगात् सर्वगतइत्यर्थः शुक्रमित्यादिशब्दाःपुल्लिंगत्वेननेयाःसर्वत्रपक्रमात् शुक्रो
दीप्तमान् अकायोलिंगशरीररहितः अव्रणःअक्षतःअस्नाविरःअनाशिरःअम्यांस्थूलशरीराभावउक्तःशुद्धोरागादिगुणरहि

अव्रणस्नाविरशब्दाभ्यां१

सू॰ नः अथापविदोषमोधर्म्मविधुरः इतिनतस्यान्नसंस्कारोपिमोक्षः नतस्मान्नकर्तव्य विधिशेषतयाअर्थोदयासंभवः यत्तुसिद्धेब्रह्मसादि
७ लिंगाभावान्नशक्तिग्रहः इतितन्नप्रवृत्तिनिवृत्तीएवलिंगमितिननियमः पुत्रस्तेजातइत्यादौहर्षादिलिंगेनापिशक्तिग्रहसंभवात् य
त्तुमहसादिपरस्यैववाक्यत्वमिति तदपिनाहितनशासनात्दृष्टान्तानांशास्त्रत्वानुपपत्तेः नापिफलाभावः ब्रह्मात्मसाक्षात्कारस्यैवमो
क्षफलकत्वात्तादृशसाक्षात्कारार्थंमननादिसार्थकंचेतिनकथंचिदपिविधिप्रवेशः ब्रह्मात्मावगतेः ब्रह्मसादिनिरपेक्षतया
मोक्षहेतुत्वमुक्तंश्रुतिरपिदर्शयति आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदिति अयंपर
रु मात्माहमस्मीतिपरोक्षतयापरिकल्पितंयोविजानीयात् आत्मसाक्षात्कारेहिलभ्येयातपतिचेच्छन्तुः स्वातिरिक्तमात्मनः किं —
न फलमिच्छन्कस्यवापुत्रादेःकामायफलायतत्प्रलोभेनशरीरंतप्यमानंअनुतप्यतेतदुपाधिः सन्संज्वरेत्तप्येतेति ननुअशरीरत्वमोक्षस्य
स्वाभाविकत्वासिद्धेर्धर्मजन्यत्वमित्युक्तंतत्पुनःशरीरदशायामशरीरत्वस्याभावेनधर्म्मजन्यत्वसंभवादितिचेन्नसशरी
रत्वस्यमिथ्यात्वेनाशरीरत्वस्यस्वाभाविकत्वात् तथाचब्रह्मविद्विषयाश्रुतिः तद्यथाहिनिर्ल्वयिनीवल्मीकेमृताप्रत्यस्ताशयीत
श्रु॰ एवमेवेदं शरीरंशेतेअथायमशरीरोमृतःप्राणोब्रह्मैवतेजएवेति सचक्षुरचक्षुरिवसकर्णोकर्णइवसवागवागिवसमनाअमनाइवस ए
प्राणोप्राणइवेतिच अतएवश्रुतावहंब्रह्मास्मीतिज्ञानेसत्यपिमुक्तिर्नदृश्यतेकिंतुयथापूर्वंसंसारित्वमेवेति शंकापिपरिहृता
भवति श्रुतेस्तात्पर्यंतुअत्रब्रह्मसमश्नुत इतिपूर्ववाक्येजीवन्मुक्तिरुक्तासजीवन्मुक्तोदेहस्थोपिपूर्ववन्नसंसारीतितत्रदृष्टान्तमाह
तद्यथेति नन्वत्रजीवन्मुक्तदेहेदृष्टान्तो यथेतियथालोके अहिनिर्ल्वयनीसर्पविमुक्तत्वक्वल्मीकेप्रत्यस्ताप्रक्षिप्ता
मृताप्राग्वत्सर्पेणात्मत्वेनागृहीतावर्त्तते एवमेवेदं विदुषःशरीरंप्राग्वदात्मत्वेनागृहीतंतिष्ठतीत्यर्थः त्वचासाम्यंशरीरस्या एम

त्वं सर्पसाम्यं विदुषो दर्शयति अत्रैवेति तथा दार्ष्टान्तिकोपि शब्दः यथा प्रसिद्धां त्वचामहिरहमिति नाभिमन्यते तथायं जीवन्मुक्तो देह
मोपि न तत्राहंधियमादधातीत्यशरीरः अशरीरत्वादेवामृतः देहाभिमानवतोहंमतिः निरुपाधिकः सन् प्राणितीति प्राणः
साक्षी स च ब्रह्मैव तत्त्वचेतनो विज्ञानज्योतिः अनयोः स्थूलदेहस्योभयोर्दृष्टान्तं दर्शयित्वा सचक्षुरचक्षुरिति श्रुत्या लिंगशरीरस्य मिथ्या
त्वं दर्शयति वस्तुतोऽचक्षुरपि बाधितचक्षुराद्यनुवृत्त्या सचक्षुरिवेत्यादि योजनात्तस्मादद्वैतात् साक्षादेव ब्रह्मणि समनुगन्तव्यानवि
हितोस्ति सिद्धं ब्रह्मस्वरूपं तत्रैव समन्वयात् प्रमाणकमिति ४ एवं चतुर्भिः सूत्रैः सर्वज्ञं सर्वशक्ति जगत्कारणं वेदान्तप्रतिपाद्यं ब्रह्मे
त्युक्तं तदनुपपन्नं ब्रह्म चेतनं चेदिति संशयः तत्र सांख्याः कूटस्थब्रह्मणो ज्ञानक्रियाशक्त्यभावात् जगत्कारणत्वं प्रधानस्य तु तत्त्व
त्वाज्जगत्कारणत्वं सत्त्वगुणमादाय ज्ञानशक्तिमत्त्वं त्रिगुणत्वात् क्रियाशक्तिमत्त्वं ब्रह्मण एकत्वान्न क्रियाशक्तिः तस्मात् सर्वज्ञत्वं सर्व
शक्तिः प्रधानमचेतनं हेतुवादकोऽचेतनार्थं निवदंति तन्मतनिरासायेदं सूत्रमारभ्यते ईक्षतेर्नाशब्दं ५ सांख्यपरिकल्पितं प्रधानं ज
गत्कारणं न भवति तत्र हेतुरशब्दमिति हेतुगर्भं विशेषणमेतत् अशब्दत्वादवेदप्रमाणकत्वादित्यर्थः वेदाप्रमाणकत्वे हे
तुः ईक्षतेरिति धातुवाच्यं ईक्षतिशब्देन लक्षणया धात्वर्थलक्षणापरः ईक्षितृत्वश्रवणादित्यर्थः अस्य चाक्षेपसंगतिः फलं च प्र
धानेनास्य पूर्वपक्षे सिद्धान्तेन तु ब्रह्मैकात्म्यमिति विवेकः सदेव हि सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यु
पक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्र प्रधानस्यैवोपक्रमे ईक्षितृत्वश्रवणं विरुध्यते ईक्षणस्य चेतनधर्मत्वात् न च ब्रह्मणो
ज्ञानक्रियाशक्त्यभावः अविद्यामहिम्ना सर्वज्ञत्वाद्युपपत्तेः स सप्रधानपरमाण्वादिरकर्ता ईश्वरः सोऽद्वितीयः ईक्षतेति पातंजलमत
निराकरणार्थं श्रुतावेकमिति पदं उपादानस्य चेतनत्वार्थं तदैक्षतेति उपादानत्वार्थं तु बहु स्यामिति एवमेवैतरेयश्रुतिः आ
त्मत्वेनैकमग्र इत्यादि हत्वारोपः ६

जगत् त्रिगुणं सर्वं स्वरूपं स्वमेव रूपं वा दित्यनुमानेन सिद्ध स्य प्रधानस्यानुवा दका [illegible] ... रूप ... रोपः संवद्गुणा ...

संघातादेव कार्यं जायते ०

स तेन तथा ने देवु प्रधानस्य प्रतिपादनं कुत्रापि न कृतं वद्

ब्रह्मणः कारणत्वं न संभवति ज्ञानक्रियाशक्त्यभावात् ५

दि

ईक्षता ईक्षणकर्तार

तत्स्वरूपं परप्रधानं तस्य परमाणुर्नोचर

[redacted]

द्वितीयेन जीवेन सहितः
सद्वितीयः जीवात् भिन्नः २

... रहुश्चालि नीन आरोपाधिकरणवु ७

सू·दे· त्मावाइदमेकएवाग्र आसीन्नान्यत्किंचनमिषत्सईक्षतलोकान्नुसृजाइतिसइमाल्लोकानसृजतेतीक्षणपूर्विकामेवसृष्टिमाचष्टे

४ मिषद्वत्तत्त्वाकांतमितिपावत् एवंसर्वत्रेक्षणपूर्वकसृष्टिश्रवणाद्ब्रह्मैवजगत्कारणमिति ५ नवीक्षणमात्रेणनत्रतत्जगत्कारण

मितिनिश्चयः तत्तेजऐक्षतताआपऐक्षंतेत्यचेतनयोरप्तेजसोरीक्षणश्रवणात् नतस्ममभिव्याहारलाघवेनपरिक्षनिर्गाणइति गौणेत्वस्यात्म मि व्याहारादि

गौणइत्युच्यते गौणश्चेन्नात्मशब्दात् ६ असौनसाविवप्रधानेपीक्षतिगौण[illegible]इतिचेन्नकुतः आत्मशब्दात् आत्मशब्दस्य श्रव

णादित्यर्थः सदेवसोम्येदमग्रआसीदित्युपक्रम्यतदैक्षततत्तेजोसृजतेतितत्तेजोबन्नानांसृष्टिमुक्त्वातद्देवप्रकृतंसदीक्षितृतानिच

रत्नाभि तेजोबन्नानिदेवताशब्देनपरामृश्याह सेयंदेवतैक्षतहंताहमिमास्तिस्रोदेवता अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणी

तिश्रुतिः तत्रयदिचेतनंप्रधानमेवेक्षितृतदा सेयंदेवतैक्षतेतितस्यैवपरामर्शात् तस्मात्तेनजीवकीर्तनमनुपपन्नंस्यात् आत्माहि प्रधानरूपत्वेन जीवोन प्रधानरूपः

स्वरूपंचेतनोजीवः अचेतनस्यात्मत्वंप्रधानस्यनजीवविषयःआत्मशब्दउपपद्यते सयएषोणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआ

त्मातत्त्वमसिश्वेतकेतोइतिश्वेतकेतोर्जीवस्यात्मनातादात्म्योपदेशात् नहिचेतनस्यचेतनेनाभेदःशंकाभ्यंकः तेजः नचासेनतोगौणा

नतत् गौणं प्रायो यत्र प्रकरणे तत्प्रकरणं तत्साहचर्यपठितत्वेन तत्र पठितत्वात् ५ क्षणश्रवणात्तत्साहचर्यपठितत्वेनतदैक्षतेत्यस्यापिगौणत्वमेवेतिवाच्यं संशयपक्षस्यतदवस्थत्वात्पाठस्यनिश्चायकत्वात् प्रकृतेनतुगौ

णमुख्ययोर्गौणस्यजघन्यत्वेनसंशयाभावात् अतएवभगवान्जैमिनिः विशेषेप्रायदर्शनादिति संशयपक्षस्यलेप्रायदर्शनस्यनि

श्चायकत्वमाह अचेतनेसत्त्वेनेवंमुख्यत्वेकिंचित्कारणमस्तीतिगौणमीक्षणंकूलपिपतिषतिवत् श्रुतस्यतुआकाशवायुव ती

दे त्स्थानलादेवसुपकांते सच्छब्दवाच्यंब्रह्मतेजःसृष्टवदितिमहत् तस्यात्मापरामृश्यते सेयमिति सन्निहितेक्षितृपरामर्शादेव

तेति अलौकिकमुक्तमीक्षणमभिनयति हंतेति सृष्टाकेनोक्तानितेजोबन्नानिपरामृशति इमाइति सृष्टभूतास्तिस्रोदेवता राम ८

तस्मिन्सत्यदार्थे निष्ठा च भेदज्ञानं यस्य सत न्निष्ठस्तस्य

मपास्यत्वश्रवणात्यर्थः सत्त्वं तेन परोक्षत्वाद्देवताशब्दप्रयोगः तासां व्यवहारांगत्वं कथमित्यत आह अनेनेति अनेन सर्वसंसारानुभूतेन प्रलयात्पूर्वीयाः स्थितं सामान्यं सद्विद्या ३ ... येन १

तानाः २ प्राणभृतिहेतुना जीवेनान्तः प्रविश्य देवतासर्गानंतरं नामरूपे चेति विस्पष्टमासमन्तात्करवाणीति परा धीरेवं तेक्षतवतीत्यर्थः ता २

यं स्वरूपेण संसारित्वे मा गुरित्यर्थः दुर्विज्ञेयमिति यावत् एतदात्म्यमेतदात्मकं भावभवितृभेदात् परमसूक्ष्मं सर्वात्मकं तदेव

मुख्यस्वरूपं सत्यं परमार्थिकं तत्त्वं स एवात्मा स्वं स्वरूपं निरुपचरितस्वरूपं हे श्वेतकेतो त्वं च संसारी नासि किं तु तदेव ब्रह्मेति सम्यग्योजना ६ न

चात्मशब्दोऽपि प्रधाने गौणः न तु नानार्थकत्वमुख्यो वेत्यत आह तन्निष्ठस्य मोक्षोपदेशात् ७ न प्रधानमात्मशब्दवाच्यं तत्त्व

मसि आत्मेति प्रकृतं सद्गुणीमानं आरोप्य तत्त्वमसि श्वेतकेतो इति श्वेतकेतोश्चेतनस्य मोक्षोपदिष्टस्य तन्निष्ठतामुपदिश्य आ

चार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये इति मोक्षोपदेशात् यदि ह्यचेतनं प्रधानं सच्छब्दवाच्यं मुमुक्षुं च

श्वेतकेतुं चेतनं तत्त्वमसीति शास्त्रं ग्राहयेत् हे श्वेतकेतो चेतनोऽचेतनोऽसीति तदा शास्त्रं प्रमाणं पादे चेतनोऽसीति व्याप्यमानं मोक्षा

त् व्याहन्येत अनर्थं च यातो यादृशास्त्रमुक्तं प्रलापो भवेत् न ह्यानिष्टं तस्मादात्मशब्दश्चेतनपर इति सैषा परोक्षप्रतिबं

धकनिवृत्तिमाह श्रुतिरिति चार्यवानिति उक्तममित्यर्थः एवं बन्धनिवृत्त्या देहादिदृष्टेरपि निवृत्तिर्मोक्षो आरब्धकर्मणां तद्दृष्ट्यानु देहादिदृष्टेरनुवृत्ति १०

वृत्तिमाह तस्येति कथं तर्हि प्रारब्धकर्मनिवृत्तिरित्याशंक्य भोगादित्याह यावदिति प्रारब्धस्य तावदेव भुक्त्वा देहादिध्वंसः इत्याशं

क्याप्रतिबन्धादित्याह श्रोतेति उत्तमपुरुषस्तत्त्वमयं तत्त्वमधमपुरुषे दर्शनादिति ७ ननु स्थूलारुंधतीन्यायेन प्रधानोपदेशः स्यादि स

आत्मोपदेशोऽयमस्तु तत्राह हेयत्वावचनाच्च ८ यदि नात्मैव प्रधानं सच्छब्दवाच्यं स आत्मा तत्त्वमसीति इहोपदिष्टं स्यात् स उपदे त

ष्टा गौणात्मज्ञानपात निष्ठो मा भूदिति मुख्यमात्मानमुपदिदिक्षुः शास्त्रं तस्य हेयत्वं ब्रूयात् यथारुंधतीं दिदर्शयिषुः तत्समीप

छा०
२

स्यतां यमाहं पृष्टं गुरुतेनदृष्टिरत्वर्थः एकविज्ञानात्सर्वविज्ञानोपक्रमविरोधसमुच्चयार्थश्चशब्दः तथाहि उत तमादेशमप्रा
क्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृ
न्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सोम्य स आदेशो भवतीति वाक्यैकविज्ञानात्सर्वविज्ञानोप
क्रमः अयमर्थस्तु विरुध्यते प्रधानत्वान्नानाविधकार्यज्ञानेऽपि भोक्तृवर्गज्ञानासंभवादिति अयमर्थस्तु हे श्वेतकेतो येन श्रुतेन शास्त्र
तोऽश्रुतमपि श्रुतं भवति येन मतेन तर्कितान्यदमतमपि मतं भवति येन विज्ञातेनान्यदविज्ञातमपि विज्ञातं भवति तमादेश
आदिश्यत इत्यादेशः शास्त्राचार्यैकगम्यं वस्तु प्राक्षाः एवं वा न सितमाचार्यमिति पितृवाक्यार्थः अन्यज्ञानादन्यज्ञेयमि
ति पुत्रो ब्रूते कथं नु भगवः इति कार्यस्य कारणानन्यत्वमित्याह यथेति ज्ञातेऽपि मृत्पिण्डे कथं तद्विकारधीरित्यत आह वा
चेति यो विकारः स वागालम्बनमुच्यते परं न वस्तुतोऽस्तीत्यर्थः तत्र हेतुः नामधेयमिति नाममात्रमेव नार्थतोऽस्तीत्यर्थः नहि मृ
द्रूपाभेदे घटनाशे मृदोऽपि नाशः स्यादित्याह मृत्तिकेति घटो मृद्भिन्नत्वेन निर्वक्तुं न शक्यत इति सत्ततोऽभिन्न एवं मन्तु घटा
द्युपेत इति न दोष इति । २ हरेव सोम्येति सच्छब्दवाच्यप्रधानमित्यापि न भवतीत्याह स्वाप्ययात् तदेव सच्छब्दवाच्यमात्मानाम
तु स्वप्नान्तं मे सोम्य विजानीहि यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो
भवतीत्येषा श्रुतिः पुरुषस्य लोकप्रसिद्धं स्वपितीति नाम निर्वक्ति स्वशब्देन सच्छब्दवाच्यात्मा परामृश्यते स्वं प्रत्यपीतो भवति ली
नो भवति अपि पर्वस्मरणे लेपाभावात्सुषुप्त्यवस्थायामुपाधिकृतविशेषाभावात्स्वात्मनि प्रलीन इवेति स्वमपीतो भवतीत्यु
च्यते तथा च तत्रायं स्वस्मिन्प्रकृते सच्छब्दवाच्यात्मनि अप्ययात् लयश्रवणादिति तत्र परस्य प्रधानस्य स्वशब्देनोक्तत्वाच

यत्र स्व पुरुष
स्वपिति एतत
इति स्वपिति
स्वं ह्यपीतो भव
तीति पा ४

ए
म
ए नं जीवं ४

राम
९

बृहदारण्ये
तनोचेतनस्यैव्यतीति विरुद्धस्वात् श्रुत्यंतरं च तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेना ईश्वरेण
त्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति सुषुप्तस्यापि चेतने प्ययं दर्शयति अतोप्यस्मिन्नप्ययः सर्वेषां चेतनानां चे
तनस्तस्य द्वाच्यजगत्कारणं १ किंच गतिसामान्यात् १ गतेः सर्वेषु वेदांतेषु चेतनकारणावगतेः समत्वादित्यर्थः न हि क्व
चिदपि विरुद्धमुपलभ्यते कुत्रचिद्वाक्ये चेतनकारणं कुत्रचिदचेतनमिति किंतु सर्वत्र चेतनमेव कारणमुपलभ्यते यथाग्ने कौषीतकीब्रा
स्मा॰ ५ र्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका इति
तस्माद्वा एतस्मादात्मन आकाशः संभूतः आत्मन एवेदं सर्वमिति आत्मन एष प्राणो जायते इत्याद्याः श्रुतयः आत्मन एव का
रणत्वं दर्शयंति आत्मशब्दश्चेतनपर इत्युक्तं यथाग्नेरित्यादेरयमर्थः विस्फुलिंगाः प्रसंगात्पश्य ज्वलत इति विप्रतिष्ठेरन् नानागति
नेर्दिशो विप्रसृताः स्फुलिंगाः क्षुद्रा इत्यर्थः यथायतनं यथागोलकं विप्रतिष्ठंते विविधमुत्पद्यंतीति यावत् प्राणेभ्यो अनंतरमा
दित्यादयो देवास्तदनुग्राहकास्तेभ्यो नंतरं लोकांतर इति लोका विषया भवंतीत्यर्थः प्राणो हिरण्यगर्भः १ किंच श्रुतत्वाच्च ११
कारणशब्देन ५ सर्वज्ञत्वेन सर्वज्ञेश्वरो जगतः कारणमिति श्वेताश्वतराणां मंत्रोपनिषदि ज्ञः कालकालो गुणी सर्वविद्य इति सर्वज्ञमी
श्वरं प्रक्रम्य स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः इति ज्ञः सर्वज्ञः स कारणमिति कारणत्वोक्तेः
सर्वज्ञत्वविशेषतः सर्वविद्यः सः सर्वज्ञः कारणं तस्य सर्वेश्वरत्वमाह करणेति करणानींद्रियाणि तेषामधिपाः स्वामिनो जीवास्ते
षामधिपः परमेश्वरः तस्य सर्वहेतुत्वमाह नचेति सर्वजीवान्यतीश्वरत्वं हिरण्यगर्भस्याप्यस्तीति ततो विशेषमाह नचाधिप इति
तस्य नियंता नास्ति यं न स्वस्य नियंता नास्तीत्यर्थः तस्मात्सर्वज्ञं ब्रह्म जगत्कारणं नाचेतनं प्रधानमस्मदेहेति सिद्धं अस्मिन्नधिकरणे गुणास्
हिरण्यगर्भस्य ईश्वरः परमात्मनः
परमाण

स.ह. त्राणि यह नन्वेवमेष्यानंदस्यारंभश्रुतत्वाद्ब्रह्मैव तदेतैः सूत्रैः सर्वेषां वेदांतानां सर्वज्ञसर्वशक्तिब्रह्मपरत्वं समर्थितं किमपरमवशि
१० दु ष्टं परयमुत्तरसूत्रसंदर्भ इति चेदुच्यते निर्विशेषब्रह्मणः स्वरूपेणोपदेशायोगात् किंचिदुपाध्युपहितत्वेनोपदेश इति व
क क्तव्ये तत्र कस्मिन्वाक्ये उपाधिर्विवक्षितः कस्मिन्वाक्ये न विवक्षित इत्याकांक्षायां नहि वचनार्थमुत्तरसूत्रसंदर्भोऽर्थवानि
तिनेव सविशेषं निर्विशेषं च ब्रह्माभ्यधत्त यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति अथ यत्रान्यत्पश्यति अन्यच्छृ
णोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतं अथ परत्वेन नमः सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन्यदा
स्ते इत्यादिसविशेषवाक्यानि यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति
स भूमा निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं अमृतस्य परं सेतुं दग्धेंधनमिवानलं स एष नेति नेत्यात्मा अस्थूलमणिव...सादि न
निर्विशेषवाक्यानि ब्रह्मणो द्विरूपतां दर्शयंति तत्र कानिचित्क्रममुक्त्यर्थान्युपासनानि कानिचिदभ्युदयार्थानीति बोध्यं भू
मा खलु यत्र यस्यां खल्वविद्यावस्थायां तु स्वमपि द्वैतं सदिव भाति तत्र नरः संसारी सन् इतर[illegible]पश्यति इत्यादिना चरमुपाधिम
दल्पं वदतीत्यर्थः यस्मिन्नात्मनि द्रष्टृमारे चक्षुरादिनानुसंधत्ते तदल्पं परिच्छिन्नमुपहितमित्यर्थः यावत् भूम्नो लक्षणं च विशेषां
तरमाह यो वा इति अथेति द्योतितो विशेषो नेन नमस्कारेण: सर्वज्ञ ईश्वरेण नामरूपादिकं विश्वं निर्माय तत्र प्रविश्य जीवरूपे
णाभिवदनादिकं कुर्वन्यो वर्तते स अंतर्यामी तं विद्वानिहैवामृतो भवतीत्यर्थः यत्र यस्यां विद्यावस्थायामस्य विदुषः सर्वं कर्त्रा
सी दि आत्मा निरेकरणात् सदेवोत्तत्र केन करणेन कं विषयं को वा कर्त्ता पश्येदिति आक्षेपार्थ्यं वहायं मनोपाधिकं तत्त्वमित्यर्थः य
त्र भूम्नि स्थितो विद्वानन्यद्द्रष्टव्यं चक्षुषा न पश्यति अन्यच्छ्रोतव्यं श्रोत्रेण न शृणोति न चान्यन्मंतव्यं ज्ञातव्यं वा मनसा बुद्ध्या वा एम
१०

(कृ वा)

...विशेषवाक्यानि निर्विशेषवाक्यानि द्विरूपतां सगुणरू यतां निर्गुणरूपतां चे७

तस्माल्लक्ष

मनुते जानातीति भूमा दहसा यंगो वो निरतिशयमहत्त्वसंपन्नः परमात्मेत्यर्थः निष्कलं निरंशं अत एव निष्क्रियं निष्क्रियत्वादेव शां
तं परिणामरहितं मनसैव निरवद्यं रागादिरहितं धर्मादिरहितं निरंजनमित्यर्थः यद्वा निष्कलत्वान्निरंजनं जडसंबंधशून्यमित्यर्थः य
थावदाहमयः सेतुर्नदीकुल्यादिषु कूलप्राप्तिहेतुः तथा संसारसागरस्य परं ब्रह्म तत्प्राप्तस्यामृतस्य वा मोक्षस्य सुषुम्भिव्यक्तं सत्ताध
नेतत्तु वस्त्ववस्थितं वाकोऽस्य ज्ञानस्य कथं नाशस्तत्राह दग्धेति यथा दग्धेंधनोऽग्निः शाम्यति तथा ज्ञानमपीत्यर्थः इतीदमर्थे इदं तु इ
दं तेति निषेधावधिभूतमात्मेत्यर्थः तथा सविशेषनिर्विशेषपरं वाक्यांतरमपि न्यूनमन्यत्स्यात् न संपूर्णमन्यदिति अस्यार्थः निष्प्र
पंचारस्य तु पासं गुणानां स्यात् न्यूनं परिच्छिन्नं तस्मान्निष्प्रपंचमुक्तोपसंपत् त्रिधापरिच्छेदशून्यसच्चिदानंदात्मकं संपूर्णमपरि
च्छिन्नमिति सर्वं सप्रपंचस्तगुणवाक्ये गुणविवक्षा तत्रोपासना भवति यत्र तु श्रूयमाणेपि गुणा न विवक्षिताः स्तद्वाक्यं तेषु ब्रह्म परमे
द्वैति निर्णयापयमुत रहूचतं दभ्रुतिफलितं ११ आनंदमयोऽभ्यासात् १२ पूर्वेना वस्तवेषां वेदान्तानां निर्गुणब्रह्मपरत्वमुत्सर्गतः सिद्धंत
त्सगुणवाक्यदर्शनेनापोत्सगुणवाक्यविचारः प्राप्तः तमपोहयदमधिकरणं निर्गुणविचारात्मकमारभ्यते यद्यप्यपवादापवाद
कत्वादस्य सगुणविचारानन्तर्यं युक्तं तथापि पूर्वाधिकरणे संशयाभावात्सापवादनिष्कामक इस्तु केश्मान्तरात्मानंदमय इत्यत्र म
यड्विकारप्राचुर्यं च मुख्यत्वात् संशयविकारप्रायपाठे निश्चायकोस्तीति पूर्वाधिकरणसिद्धांतयुक्ताभावेन प्रवृत्तत्वात् सुराल्पेत
भागसंगतिरस्तीति सगुणविचारात्प्रागिदमारभ्यते पूर्वपक्षे जीवस्यानंदमयत्वेनोपास्तिः फलं सिद्धांते निर्गुणब्रह्मप्रमितिरिति सि
द्धांतगर्भोऽयं कृदर्शिमेतत् भयत्रोपासित्रिरिति विवेकः तैत्तिरीयके अन्नमयप्राणमयमनोमयविज्ञानमयकोशचतुष्टयानंतरं तस्माद्वा ए
तस्माद्विज्ञानमयादन्योऽन्तर आत्मानंदमय इति श्रूयते तत्र संशयः किमानंदमयशब्देन ससंज्ञानमिति प्रकृतं परं ब्रह्मोच्यते उ

बाधकं विना नियमः उत्सर्गः ८
ता
ए

...पोद्य निवेद्य
...कृते वोपृत्ति
...धिकरणे...

वे.स्या २

लक्षणश्चजीवइतिप्राप्तं तस्यपूर्वोक्तस्यविज्ञानमयस्यएषआनंदमयएवशारीरः +

१आनंदमयस्य

सदू ताम्नमयादिविकारवद्ब्रह्मणोप्यंतरंजीवइति तत्रान्नमयादिविकारप्रायपाठात्तस्यप्रियमेवशिरःमोदोदक्षिणः पक्षइत्यादिनापि

११ पाद्यवयवयोगात् तस्यैषएवशरीरआत्मेतिशारीरआत्मेतिश्रुत्यर्थः एवंप्राप्तउच्यते आनंदमयोभ्यासात् १२ आनंदमयोपर

मात्माभवितुमर्हति कुतः अभ्यासात् आनंदमयशब्दस्यब्रह्मण्येवबहुकृत्वोभ्यासादित्यर्थः तथाहि आनंदमयप्रस्तुत्य रसो

वैसः इति तस्यैवरसत्वमुक्त्वोच्यते रसंह्येवायंलब्ध्वानंदीभवति कोह्येवान्यात्कःप्राण्यात्यदेषआकाशआनंदोनस्यात् एषह्ये

वानंदयातिसैषानंदस्यमीमांसाभवति एतमानंदमयमात्मानमुपसंक्रामति आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनेति आ

नंदोब्रह्मेतिव्यजानादितिबहुधाभ्यासःश्रूयते नचानंदपदस्यैवाभ्यासोनानंदमयपदस्येतिवाच्यं वसंतेवसंतेज्योतिषायजेते वाक्यैकदेशेन वाक्यंलक्ष्यतेदृ

त्यत्रज्योतिःपदस्यज्योतिष्टोमपरत्ववत् आनंदपदस्यानंदमयपरत्वात् श्रुत्यर्थस्तु रसःसारआनंदइत्यर्थः अयंजीवःपूर्णानंदः

सर्वसाक्षीसर्वमेरकोनस्याद्येत्तर्हिप्राणादेश्चेतनस्यचेष्टानयुक्तेत्याह कोह्येवेति अन्यात्जीवेत्प्राण्यात्निश्वसेत् यत्यदि आनंद

इत्यनंतोमेरकश्चनिशेषः आनंदपितत्वादपिपरमानंदत्वमित्याह एषह्येवेति आनंदयतीत्यर्थः एषएवधनीपरंधनिनंकरोति यातीतिदीर्घ छांदसंदृ

दा५ लोकेतद्वत्तस्यपमानंदः परमानंदयतीति यत्तुप्रायपाठानंदमयस्यविकारत्वमिति तत्रस्थूलारुंधतीन्यायेनान्नमयादिविका

य रणमुख्यात्मप्रदर्शनस्यात्मज्ञानायत्वेनानंदमयस्यसर्वांतरत्वात्तएवान्मसवधारणात् अनंतरमन्यस्यात्मनोनुपदेशात् सर्वांत

रत्वमवगम्यते विज्ञानकोशाद्यवयवोपाधिकप्रियाद्यवयवयोगोनविरुध्यते ब्रह्मणोन्नमयादिकोशपरंपरयाशारीरत्वमप्युपपन्न

मेवशारीरजीवप्रतिबिंबत्वादीश्वरस्यतस्मादानंदमयःपरमात्मा १२ विकारशब्दान्नेतिचेन्नप्राचुर्यात् १३ ननुनानंदमयंब्रह्मकु

तःविकारार्थकमयट्प्रत्ययाद्ब्रह्मणआनंदविकारत्वानुपपत्तेरितिचेन्नकुतः प्राचुर्यात्मयटः प्रकृतेआनंदप्राचुर्यवाचकत्वा एम

११

विंबप्रतिविंबयोश्चाभेदएव २ आनंदमयस्य ३

दिसर्थः १३ अमरः प्राचुर्यार्थकत्वे हेत्वंतरमाह तद्धेतुव्यपदेशाच्च १४ नमानंदं प्रतिब्रह्मणो हेतुत्वव्यपदेशादित्यर्थः एषह्येवानंद
ना याति इति ब्रह्मणः आनंदहेतुत्वं व्यपदिश्यते योग्यानंदयति स प्रचुरानंद इति प्रसिद्धं १४ इतश्चानंदमयः परमात्मेत्याह मांत्रवर्णिक
मेव च गीयते १५ यतब्रह्मविदाप्नोति परमित्युपक्रम्य सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायामित्यस्मिन्मंत्रे सर्वांतरत्वेनोक्तं
मांत्रवर्णिकं ब्रह्म अन्योंतर आत्मानंदमय इति गीयते मंत्रब्राह्मणयोरेकार्थत्वात् यद्यप्यत्र व्याख्यानव्याख्येयभावाभावेन मंत्र
ब्राह्मणाभावः तथापि ब्राह्मणस्य व्याख्यानरूपत्वेन व्याख्येयमंत्रप्रत्युपपत्तेः प्रकृते उपेयोपायभावोस्तीति मांत्रवर्णिकमित्यु
क्तं १५ इतश्चानंदमयः परमात्मा न जीव इत्याह नेतरोऽनुपपत्तेः १६ ईश्वरादितरो जीवो नानंदमयः कुतः अनुपपत्तेः सोकामयतेतित्य
ष्टेः प्राग्बहुस्यां प्रजायेयेति स्वात्मकर्तृत्वं स तपोतप्यत स तपस्तप्त्वा इदं सर्वमसृजतेति सृष्टिहेतुत्वं च श्रूयते तत्र सर्वस्यानुप
पत्तेरित्यर्थः जीवत्वे न तस्य शरीरसाध्यत्वादीक्षणानुपपत्तिर्बोध्या श्रुतेरितरः शब्दः ईक्षणापरः १६ किंच भेदव्यपदेशाच्च १७ ना
नंदमयो जीवः कुतः जीवानंदमययोर्भेदेन व्यपदिश्यमानत्वादित्यर्थः तथा श्रूयते रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीत्यानं
य दमयस्य लब्धव्यत्वेन जीवस्य लब्धृत्वेन भेदव्यपदेशः नहि लब्धैव लब्धव्यो भवति १७ नन्वानंदमयशब्देन प्रधानमुच्यतां तत्राह का
माच्च नानुमानापेक्षा १८ अनुमीयत इत्यनुमानं अनुमानैकगम्यं प्रधानमित्यर्थः आनंदमयत्वेन कारणत्वेन वा प्रधानस्यनाप
क्षा न स्वीकारः कुतः कामात् आनंदमयाधिकारे सोकामयतेति कामेक्षणश्रवणादित्यर्थः न ह्यचेतने प्रधाने कामः संभवति ईक्ष यि
णेनोपात्तमित्यत्र निराकृतमपि प्रधानं गतिसामान्यप्रपंचनाय पुनर्निराकृतमिति बोध्यं १८ अस्मिन्नस्य च तद्योगं शास्ति
१९ इतश्च न जीवो न प्रधानं वानंदमयशब्दः यस्मादस्मिन्नानंदमये प्रकृत आत्मनि प्रतिबुद्धस्य जीवस्य तद्योगं तदात्मनायोगस्त

मस्तानोति

त्स्येन तादात्म्यहीनेऽनात्मे + ३
दृश्यभिन्ने स्वसंबंधितयाऽध्यस्तेंद्रियजाते नापंचीकृतभूतकार्येणाः

सदे १२ योगलक्षणा यतिर्मुक्तिरित्यर्थः तं शास्ति शास्त्रं तस्मादित्यर्थः यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्ये निरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंद त्स्ये १
ते अथ सोऽभयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति शास्त्रं अस्यार्थः यस्यामेकाज्ञानाव
स्थायामेव विद्वानेतस्मिन् ब्रह्मणि पंचीकृतभूतपंचकेन तत्कार्येण समष्टिस्थूलदेहेन विराजा दृश्यशब्दात्मकेन तादात्म्यस्त्येये
अनिरुक्तो सत्यं घतद् इति निरुक्तानि भूतसूक्ष्माणि तैश्चाभेदवर्जितेऽनिरुक्ते निःशेषलयस्थानं निलयनं सकलतत्कार्यसंस्काराधाराविं लयनं ४
मे ५ द्यानंदरूपे प्रकर्षेण स्थितिं पुनरावृत्तिरहितां लभते अथ भयं यथा स्यादित्युक्तं नेति अथेति ज्ञानफलमुक्त्वाज्ञानाभावे व्य ५
दोषमाह श्रुतिः यदा हीति यदाऽस्मिन्नानंदमये ब्रह्मणि अल्पमप्यंतरमतादात्म्यस्वरूपं पश्यति तदा संसारभयान्न निवर्तते इ
त्यर्थः इदं शास्त्रं प्रधानपरिग्रहे जीवपरिग्रहे वा न घटते इति तस्मादानंदमयः परमात्मेति सिद्धं एकदेशिमतं भगवत्पादास्तु मय
अभ्यस्यमानानंदपदस्यानंदमयलक्षणां अन्तरात्मानंदमय इत्यानंदरूपस्य प्राचुर्यार्थकत्वे ब्रह्मणो दुःखलवप्रसंगः स्या
दिति प्रचुरानंदलक्षणं ब्रह्मपुच्छं प्रतिष्ठेति ब्रह्मपदस्यावयवविशेषलक्षणेति मुख्यत्रितयत्वे घनं विकारप्रायपाठपरित्या
गमेकदेशिमते स्यात् स्वपक्षे तु ब्रह्मपुच्छमित्यत्र पुच्छपदस्यावयवप्रायपाठपरित्यागमात्रमिति मत्वानानंदमय इति मयडि
कारार्थकत्वमिति वदंतः सूत्रमन्यथा व्याचक्रुः आधिकरणारचना तु ब्रह्मपुच्छं प्रतिष्ठेत्यत्र किमानंदमयावयवत्वेन ब्रह्मोच्यते
उत स्वप्रधानत्वेनेति ब्रह्मपुच्छशब्दाभ्यां संशयः ईक्षत्यधिकरणे संशयाभावात् प्रायपाठस्य न निश्चायकत्वमिति तु पुच्छपदस्या
वयवाधारत्वयोर्लक्षणसामान्यात् संशये अवयवप्रायपाठस्य निश्चायकत्वमिति प्रत्युदाहरणसंगतिः प्रयोजनं च पूर्ववदुक्तं तत्र
पुच्छशब्दादवयवत्वेन प्राप्ते उच्यते आनंदमयोऽभ्यासात् आनंदमयशब्देनानंदमयवाक्ये ब्रह्मपुच्छं प्रतिष्ठेत्यत्र विद्यमानं ब्रह्म पर दम

आनंदमयोऽभ्यासा
त् विकारशब्दान्ने
ति चेन्न प्राचुर्यात्
तद्धेतुव्यपदेशाच्च
मांत्रवर्णिकमेव च
गीयते नेतरोऽनुपपत्तेः मे ६ स्वपदे शाब्दिकामात्रे नानुमानापेक्षा अस्मिन्नस्य च तद्योगं शास्ति इत्यत्र सूत्राणि ४ स्थ १

पूर्वपदे जीवस्यानंदमयत्वेनोपास्तिः फलं १२
सिद्धांते निर्गुणब्रह्मप्रमितिरिति सिद्धांत
गत्या एकदेशिमते तन्मयत्वोपास्तिरिति विवेकः २

संतमेनं ततो विदुः १

ते मुपलक्ष्यते ब्रह्मस्वरूपं स्वप्रधानं ब्रह्मपरं कुतः अभ्यासात् असन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेदेत्यादौ ब्रह्मरूप
द स्याभ्यासात् पक्षपुच्छशब्दो ऽवयवपरत्वमिति तत्राह विकारशब्दान्नेति चेन्न प्राचुर्यात् विकारशब्दो ऽवयवपरः पुच्छशब्दान्न तत्स द
मानाधिकरण्यं ब्रह्मस्वरूपं स्वप्रधानं ब्रह्मपरमिति चेन्न कुतः प्राचुर्यादवयवशब्दोपपत्तेः प्राचुर्यं चात्रावयवप्रायप्रयोगः एवं चान्न
मयादीनां पुच्छानामेवं पवानुक्तावानंदमयस्यापीतरावयवोक्तौ पुच्छस्य बुद्धौ सन्निधानात् पुच्छमपि ब्रह्म पुच्छमित्युक्तं श्रुत्या नहि ब्र
ब्र ह्मणो मुख्यं पुच्छत्वमानंदमयस्य परमात्मपक्षेपि पुच्छं संप्रतिस्वस्य पुच्छतानुपपत्तेस्तस्माद्ब्रह्म पुच्छवत्पुच्छं सर्वाधिष्ठानं प्रतिष्ठा
परायणं लौकिकस्यानंदजातस्य आधार इत्यर्थः सर्वाधारत्वात्प्रतिष्ठापदस्य समभिव्याहारादाधारलक्षणा युक्तेति इतश्च पुच्छ
शब्देनाधारो लक्ष्यते [illegible] तद्धेतुव्यपदेशाच्च तस्य ब्रह्मणो विकारजातं प्रति हेतुत्वेन इदं सर्वमसृजत इति वाक्यव्यपदेशादित्य
र्थः नहि स्वविकारमानंदमयं प्रति ब्रह्मणो ऽवयवत्वं संभवति मुख्यतः इति स्वप्रधानं ब्रह्म पुच्छत्वेनैव विवक्षितमिति मांत्रवर्णि
कमेव च गीयते यत्सत्यं ज्ञानमित्यादि मंत्रवर्णप्रकाशितं ब्रह्म तत् ब्रह्म पुच्छं प्रतिष्ठेति ब्राह्मणवाक्ये स्वप्रधानत्वेन गीयते मंत्रब्राह्म
णयोरैकार्थ्यादित्यर्थः इतश्चानंदमयो ऽत्र न प्रतिपाद्यः तस्य वैषयिकप्रियाद्यवयवयोगेन स्वप्रधानत्वाद्यनुपपत्तेरित्याह नेतरो ऽनुपप
त्तेः ब्रह्म पुच्छं प्रतिष्ठेत्यत्र ब्रह्मणः स्वप्रधानत्वेनेतरः कुतः अनुपपत्तेः ब्रह्मणो ऽवयवत्वे ऽवयवि आनंदमयो ऽत्र प्रतिपाद्य इति वक्तव्यं न
हि तत्संभवति सावयवस्याप्यानंदमयस्य सो ऽकामयतेत्याद्यनुपपत्तेरित्यर्थः अतो ब्रह्मणः स्वप्राधान्यं इतश्चात्र पुच्छवाक्ये ब्रह्म स्वप्रधानमि
त्याह भेदव्यपदेशाच्च रसं ह्येवायं लब्ध्वानंदी भवति अयमानंदमयो जीवो रसशब्दितं ब्रह्मानंदं प्रति विविक्तं लब्ध्वानंदी भवतीति ल
ब्धृलब्धव्ययोर्भेदव्यपदेशादित्यर्थः इतश्च ब्रह्मपुच्छक आनंदमयो ऽत्र न प्रतिपाद्य इत्याह कामाच्च नानुमानापेक्षा कामयत

[illegible]नंदमयस्य जीवस्य यदाद्येवैषएतस्मिन्नित्यादि शास्त्रं तद्योगं मुक्तिं शास्तीत्यर्थः तस्मादा ३+

सू.वृ. इतिकाम आनंदमयस्य ब्रह्मत्वं दर्शनेनानुमानेनानंदमयस्यापि ब्रह्मत्वमपेक्षितं यं विकारार्थकमयट्विरोधादित्यर्थः अनुमानप्रका

१३ रस्तु आनंदमयशब्दो ब्रह्मपरः आनंदशब्दत्वात् आनंदो ब्रह्मेत्यत्रत्यानंदशब्दवदिति इतोपि ब्रह्मपुच्छवाक्ये ब्रह्मत्वप्रधानमित्या

ह अस्मिन्नस्य च तद्योगं शास्ति अस्मिन् पुच्छवाक्ये ब्रह्मणि प्रत्ययस्यानंदमयस्यात्रापि प्रतिपाद्यत्वात् पुच्छब्रह्मैवात्र प्रधानं निर्वि

शेषं ज्ञेयमिति सिद्धं १९ अंतस्तद्धर्मोपदेशात् २० पूर्वत्र ब्रह्मपरमानंदमयपरमानंदपदाभ्यासश्रुतिमुख्यत्रितयात्मिकवहु

प्रमाणावशान्निर्गुणं ब्रह्म निर्णीतं यथा तद्वत्तद्रूपवत्त्वादि बहुप्रमाणात्संसारी हिरण्मयः पुरुषोस्त्विति पूर्वमिद्धांतयुक्त्या पूर्वप

क्षोर्थ्यनात दृष्टांतरूपावांतरसंगत्या पूर्वसिद्धनिर्गुणब्रह्मसमन्वयापवादकमिदमारभ्यते फलं च पूर्ववत्तरपक्षयोरुपास्तिरेव

पारसमाप्तिपर्यंतं छांदोग्ये श्रूयते अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात्स

र्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदितिनाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्म

भ्यो य एवं वेदेत्यधिदैवतमथाध्यात्मम य एषोंतरक्षिणि पुरुषो दृश्यत इ[illegible] उपास्तिप्रस्तावार्थोथ शब्दः य एष शास्त्रप्रसि त्यादि

द्ध आदित्यमंडलमध्यवर्तित्वेनाधस्य वकथनं परमात्मन उपास्यत्वं इष्टः हिरण्मयः ज्योतिर्मयः तत्रावहितधियामनुभव

प्रमाणयति दृश्यत इति हिरण्यपदं ज्योतिः परं सुवर्णपरमपि आ प्रणखान्नखाग्रं चक्षुषोर्विशेषमाह तस्येति कपर्मर्कट

स्यासः पृष्ठभागो भस्मतं तेजस्वी तत्तुल्यं पुंडरीकं तथा तं तेजस्वि तथास्य देवस्याक्षिणी नेत्रे ध्यानार्थमेव नाम करोति तस्येति

नामनिर्वक्ति स इति उदित उदतः स कार्यः सर्वपापास्पृष्टत्वमर्थः ध्यानफलमाह उदेति अधिदैवतं देवतामधिकृत्योपास्तिवाक्य

त मित्यर्थः अधिदैवध्यानोत्तरं नंतरं आत्मानं देहमधिकृत्यापि तदुक्तिरित्याह अथेति एतादृशस्यानद्वयस्य स्वं पुरुषमधिकृत्य सरूप एम

१३

त.ग्रा ४

वत्वश्रुत्यात्सर्वपाप्मास्पर्शश्रुत्या च संशयः किमयं पुरुषो विद्याकर्मातिशयवशात्प्राप्तोत्कर्षः कश्चित्संसारी उत नित्यसिद्धः परमे
श्वर इति किं तावत्प्राप्तं संसारीति कुतः हिरण्यश्मश्रुरित्यादिरूपवत्त्वश्रवणात् अक्षिपुरुषस्यापि तस्यैतस्य तदेव रूपं यदमुष्य
रूपमिति रूपवत्त्वश्रवणात् ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यादित्यपुरुषस्य स एष ये चैतस्मादर्वाञ्चो लोका
स्तेषां चेष्टे मनुष्यकामानां चेत्यक्षिपुरुषस्य चैश्वर्यमर्यादाश्रवणाच्च नहि परमात्मनो मर्यादावदैश्वर्यं युक्तं सर्व एष सर्वेश्वर इति श्रु
तेः ततः आदित्यग्रहणः अमुष्मादादित्यादूर्ध्वगानां लोकानामीशिता देवकामानां देवभोगानां चेत्यर्थः एतस्माच्चक्षुषोऽर्वाग्गतानां
लोकानामीशिताक्षिपुरुषः मनुष्यभोगानां चेत्यर्थः तस्मान्नाक्ष्यादित्ययोरन्तः पुरुषः परमेश्वर इति प्राप्ते उच्यते अन्तस्तद्धर्मोप
देशात् य एषोऽन्तरादित्ये य एषोऽन्तरक्षिणीति च श्रूयमाणः परमेश्वर एव न संसारी कुतः तद्धर्मोपदेशात् तस्य परमेश्वरस्य ये ध
र्मास्ते धर्मा अस्मिन्वाक्ये उपदिश्यन्ते इत्यर्थः तद्यथा तस्योदिति नामेत्यादिना सर्वपाप्मविरहेणादित्यपुरुषस्य नामाभिधायेतरेव नामाक्षिपुरु
षस्यातिदिशति यन्नाम तन्नामेति तत्र सर्वपाप्मराहित्यं ब्रह्मधर्मः स एष सर्वक्रतून्तामत उक्थ्यतद्यजुस्तद्ब्रह्मेति ऋगाद्यात्मत्वं नि
र्धारयति श्रुतिः तच्च सर्वात्मकत्वं ब्रह्मणः सर्वोपपद्यते ऋगित्यादेरयमर्थः तच्छब्देन पुरुषपरामर्शः विधेयापेक्षया स्त्रीलिंगव्यप
देशः उक्थं शस्त्रविशेषः तत्साहचर्यात् सामस्तोत्रं उक्थादन्यच्छास्त्रं ऋक् ब्रह्म त्रयो वेदा इति एवं सर्वगानगीयमानत्वं श्रुतो निर्दि
श्यते यश्चेमे वीणायां गायन्त्येतं ते गायन्तीत्यादौ हिरण्यश्मश्रुकेशादिकं मायिकं परमेश्वरस्य लोकानुग्रहार्थमुपपद्यते इति न
तेन विरोधः तस्मादक्ष्यादित्ययोरन्तः परमात्मा २० किं च भेदव्यपदेशाच्चान्यः २१ आदित्याक्ष्णोरन्तः श्रूयमाणपुरुष आदित्यशरीरा
भिमानिनो जीवादन्यः कुतः भेदव्यपदेशात् आदित्यशरीराभिमानिनां जीवादन्यस्य परमात्मनोऽन्तर्यामितयान्तर्यामिब्राह्मणे भेदेन

मी

आदित्यमंडलस्थस्य २

स्त

अन्तर्यामि...

ब्रह्मधर्मसत्वात्

आकाशत्रीत्यतोरवल्म्यं

आकाशशब्देनब्रह्मैवमहाभूतं तत्सृष्टावादिलिंगात् २

सू॰ ९४ व्यपदेशादित्यर्थः य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्य

मृत इत्यादिश्रुत्यन्तरे तयोर्भेदव्यपदेशाच्चापि आन्तरशब्दश्रुत्याप्रसिद्धिज्ञानात्सर्वेश्वर एवादित्यादिस्थ उपास्य इति सिद्धं २१

आकाशस्तल्लिङ्गात् २२ एवमप्यभिचारिब्रह्मलिङ्गेनापहतपाप्मत्वादिना रूपवत्त्वादिकमन्यथा नीतं इह तु लिङ्गादाकाशशब्द

श्रुत्यपेक्षया दौर्बल्यं श्रुतिः ५ श्रुतिरन्यथा नेतुं न शक्यते लिङ्गापेक्षया श्रुतेः प्रबलत्वादिति प्रत्युदाहरणसंगत्येदमारभ्यते छांदोग्ये श्रूयते अस्य लोकस्य का

गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाका

शः परायणमिति तत्रोभयत्राकाशशब्दप्रयोगदर्शनात्संशयः किं भूताकाशमत्राकाशशब्देनाभिधीयते उत परं ब्रह्मेति परेष

आकाश आनंदो न स्यादित्यादिवेदे ब्रह्मण्याकाशशब्दप्रयोगः भूताकाशे रूढ इति विषयवाक्यार्थस्तु शालावत्सनामकः कश्चन

ऋषिर्जैवलिं राजानं पृच्छति अस्येति सर्वस्य प्रपंचस्य किमधिकरणमिति प्रश्नार्थः जैवलिरुत्तरमाह आकाश इति कथं भूतआ

काशः सर्वजगत्प्रतिष्ठानत्राह सर्वाणीति भूताकाशव्यावृत्तये हेतुत्वेन रमाह आकाशो हीति तत्रैव हेतुत्वं तर आकाश इति अपोसि

द्वाक्यार्थः तत्ररूढ्या भूताकाश इति युक्तं न च वाक्यशेषानुपपत्तिः आकाशाद्वायुरित्यादौ तस्यापि वाय्वादिकारणत्वश्रवणात्

तस्माद्भूताकाश इति प्राप्ते ब्रूमः आकाशस्तल्लिङ्गात् २२ आकाशशब्देन ब्रह्मणो ग्रहणं युक्तं कुतः तल्लिङ्गात्तस्य ब्रह्मणो यल्लिङ्गम

हाभूतसर्वभूतादिकं तस्यास्मिन्वाक्ये दृष्टत्वादित्यर्थः ननु इदं भूताकाशस्यापि वाय्वादिकारणत्वदर्शनमिति चेन्न मूलकारणत्व

स्येणोपेत्याह आकाशादेव समुत्पद्यन्ते सर्वाणीति च भूतविशेषणं आकाशं प्रत्यस्तं यन्तीति कारणे लयप्रदर्शनं चानुकूलं स्या

त् ज्यायस्त्वपरायणत्वप्रदर्शनं च ब्रह्मण्येव समंजसं श्रुत्यन्तरं च स्पष्टं ब्रह्मण एव परायणत्वं दर्शयति विज्ञानमानंदं ब्रह्म रातिर्दातुः प

सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इत्यादिवाक्यशेषानुपपत्तिः ५

शालावत्यः ऋषिः जैवलिं राजानं पृच्छति

त्वं

राम

धनस्य१ यजमानस्य१४

प्रस्ताव १ उद्गीथ २ प्रती हार ३
निधन ४ सामस्य पंच भागाः

ण परायणमिति तिरोऽनेर्धनस्य दातुर्यजमानस्य गतिरिति पाठे गतिर्वधुरित्यर्थः किं तस्य एष परोवरीयानुद्गीथस्य एषोऽनंतः इत्युद्गीथे आ
काशरूपदेवताधर्मान्परत्वादीनुपसंहरतीत्येवलिः न ह्यनाकाशेन युज्यते न हि तस्यानंत्यं संभवति श्रुतौ परत्वगुणत उक्तत्वं वे
रीयस्त्वं कालतो वस्तुतश्चापरिच्छिन्नत्वं अनंतत्वं देशतोऽपरिच्छिन्नत्वं द्रष्टव्यं पंचलिंगात् श्रुतिर्बलीयसीति तन्न तत्र जेदर्के कुल
स्य यदत्रनिस्थापनबलीनामनवकाशलिंगश्रुतीनामनुग्रहायस्य कस्याकाशश्रुतेर्बाधस्य युक्तत्वात् तस्मादाकाशशब्दे
प्रसिद्धेवात्र देवतोद्गीथे उपास्यतिति सिद्धं २२ अत एव प्राणः २३ अत्र चातिदेशत्वान्न पृथक् संगस्य पक्षायदा पूर्ववत्राकाशश्रुतेर
व्यभिचारिब्रह्मलिंगोपबृंहितत्वाद्बाधो युक्तः इह तु श्रूयमाणसंवेशनादिलिंगस्य प्राणेऽपि संभवनाद्व्यभिचारिब्रह्मलिंगसह
कारेणाभावात्प्राणश्रुतिबाधो न युक्त इति प्रत्युदाहरणसंगतिः नत्र वाकाशवाक्यानंतरं श्रूयते उद्गीथप्रस्तोतर्या देवता प्रस्ताव॰
मन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते व्यपतिष्यतीति कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि
प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्तेत्यादि अस्यार्थः उद्गीथाधिकारप्रासंगिकं प्रस्तावध्यानमि
ति वक्तुं उद्गीथ इत्युक्तं कश्चिदृषिश्चाक्रायणो नामाक्षनायज्ञाय यज्ञंगत्वाऽज्ञाने वैभवं तस्य प्रकटयन् प्रस्तोतारमुवाचेह प्रस्तोत॰
र्या देवता प्रस्तावं साम भक्तिविशेषं अन्वायत्तानुगता तां सम प्रस्तोता भीतः सन्नचाक्रायणं पप्रच्छ कतमेति तस्य प्रतिवचनं प्राण इति
मुख्यप्राणो वायुर्वा भवतेर्ह्यति सर्वाणि निसंविशंति लीनानि भवंति लयकाले अभ्युज्जिहते जन्मकाले प्राणमभिलक्ष्योद्गच्छंतीति
तत्र प्राणे वर्धनं हि तोऽस्य मनः प्राणस्य प्राणमिति श्रेष्ठे ब्रह्मणि प्राणशब्दप्रयोगात् प्राणे वायौ च प्रसिद्धत्वात् संशयः किमत्र प्रा
णशब्देन ब्रह्माभिधीयते उत वायुविकार इति मनः शब्दत्वात् तेन तत्र सिद्धे तस्य प्राणे परस्मिन्नेव मनः स्थितमित्यर्थः प्राणस्य

सू॰ १५ पंचवृत्तेर्वायुविकारस्य प्राणस्य सत्तास्फूर्तिदर्शनान्मानं मेयविदुत्तेन ब्रह्मजानंतीत्यर्थः तत्र प्रसिद्धेर्बलाद्वायुविकार इति प्राप्ते आकाश
व्यापमानिदिशतिभगवान्सूत्रकारः अत एव प्राणः इति अत एव पूर्वसूत्रोक्तात्तल्लिंगादित्तिहेतोरेव प्राणशब्दं ब्रह्मेत्यर्थः सर्वाणि
ह वा इमानि भूतानि प्राणमेवा[भि]संविशंतीत्यादिना महाभूतसंवेशनादिकं ब्रह्मलिंगं प्राणवाक्ये श्रूयते ननु यदा वै पुरुषः
स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं मनः प्राणं श्रोत्रं स यदा प्रतिबुध्यते प्राणादेवाधिपुनर्जायंत इति श्रुत्या वायुविका
रेपि संवेशनादि श्रूयते इति वाच्यं नहि तत्र महाभूतसंवेशनादि श्रूयते किं त्विंद्रियसंवेशनादिकमेव श्रुतमित्यर्थः तु नोर्हतस्यास
सुप्तस्य वस्थापामित्यर्थः वाक्रूपदमनुक्तकर्मेंद्रियलक्षकं चक्षुः श्रोत्रं धीन्द्रियाणामुपलक्षणं तस्मादनन्यथासिद्धब्रह्मलिंगात्प्रा
णशब्दवाच्यं ब्रह्मैवोपास्यमन्नादेवदेवतेति सिद्धं २३ ज्योतिश्चरणाभिधानात् २४ पूर्वं प्राणवाक्ये ब्रह्मलिंगसत्त्वाद्भवतु ब्रह्मपरता
इहास्य वाक्ये तदभावान्न ब्रह्मपरतेति प्रत्युदाहरणसंगत्या इदमारभ्यते छांदोग्ये श्रूयते अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः
उत्तमेषु ६ पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति अस्यार्थः गायत्र्युपाधिब्रह्मोपास्त्यनंतरमुपा
स्त्यंतरारंभार्थोथशब्दः अतो दिवो द्युलोकात्परः परस्तात् यज्ज्योतिर्दीप्यते तदिदमिति सौरज्योतिष्प्रसंगे कुत्र तद्दीप्यते तत्राह
विश्वतः इति विश्वस्मात्प्राणिवर्गादुपरीत्यर्थः विश्वशब्दस्याकृतिपर्यायत्वेकसंख्या वर्त्तयति सर्वत इति सर्वस्माद्भूरादिलोकात्सर्व
संसारमंडलादुपरीत्यर्थः उत्तमाः न विद्यंते येभ्यस्तेनुत्तमास्तेषु इदं शब्दार्थं स्फुटयति परीति लोकवेदयोर्भौतिकतेजसि ब्रह्म
णि च प्रयोगात्संशयः किमिह ज्योतिः शब्देनादित्यादिकं तेज अभिधीयते उत ब्रह्मेति किं तावत्प्राप्तं भौतिकमिति कुतः प्रसि
द्धत्वात् नो दिवः इत्यादिना मर्यादाविश्रवणाच्च नहि सर्वव्यापिनो ब्रह्मणो मर्यादादिकं युक्तं तस्माद्भौतिकं ज्योतिरिति प्राप्ते ब्रूमः ज्यो एम १५

तिश्चरणाभिधानादिति अत्र ज्योतिःशब्देनात्मब्रह्मैव कुतः चरणाभिधानात् पादाभिधानादित्यर्थः तथा हि ज्योतिर्वाक्यात्पूर्व
वाक्ये चतुष्पाद्ब्रह्म निर्दिश्यते तावानस्य महिमा अतो ज्यायांश्च पूरुषः पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति एतदर्थं तु गा
यत्री वा इदं सर्वं भूतमित्यत्र भूतपृथिवीशरीरहृदयवाक्प्राणाः षड्विधा चतुष्पदा गायत्रीति यदुक्तं तद्व्यपदेशमुपाधिं ब्रह्मणो महिमावि
भूतिः तावान्पावानस्य प्रपंचः तस्य पुरुषस्य ज्यायान् तदेवाह पाद इति सर्वाणि भूतानि अस्यैकः पादः एकदेशः त्रिपादस्यामृतं दिवि
द्योतनवति स्वात्मनि स्थितमिति एवं च यदतः परो दिव इत्यत्र यच्छब्दस्य सर्वनामत्वेन प्रसिद्धार्थवाचकत्वात् सर्ववाक्येषु संबंधित्वेन प्रसि
द्धं ब्रह्म चापि पूर्वसंबंधाद्यच्छब्देन प्रत्यभिज्ञायते तेनोपक्रान्तं ज्योतिरिति तेजः अतः पर इत्यादिना श्रुतं ब्रह्मणो मर्यादादिकमुपासनार्थमि
त्युक्तं ज्योतिःशब्देन ब्रह्मणोऽपि प्रसिद्धेर्वर्तते पुनस्तस्मादिह ज्योतिःशब्दं ब्रह्म २४ छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि द
र्शनं २५ यदुक्तं पूर्ववाक्ये गायत्र्याख्यं छन्द उपाधिकं ब्रह्म अभिधानात् तत्र ब्रह्म प्रत्यभिज्ञायते इति तन्न गायत्री वा इदं सर्वं भूतं यदिदं किंचेति गा
यत्र्याख्यछन्दः प्रकृतत्वात्तस्यैव पादोऽस्य सर्वा भूतानीति भूतपादव्यपदेशेन न ब्रह्मण इति यदुक्तं वाक्ये छन्द एवाभिधीयते न ब्रह्मेति चे
न्न गायत्र्याख्यछन्दोद्वारेण तदनुगतं ब्रह्म सर्वात्मकत्वं प्रतिपाद्यते गायत्री वा इदं सर्वमित्यादिना न ह्यक्षरसंनिवेशमात्राया गा
लं यत्र्याः सर्वात्मकत्वं संभवति तस्माद्गायत्र्याख्यविकारे यदनुगतं ब्रह्म तदेव गायत्री वा इदं सर्वमित्यादिना प्रतिपाद्यत इति निष्कृष्टार्थस्तु छ
रव्य न्दोऽभिधानाद्गायत्र्याख्यं छन्द एव पूर्ववाक्ये प्रकृतत्वान्न ब्रह्मणः प्रकृतत्वमिति चेन्न कुतः तथा छन्दोद्वारेण तदनुगते ब्रह्मणि चेतोऽर्पणा
त्सचित्तसमाधानस्य निगदादभिधानात् तच्च दर्शनात् तथा हि दर्शनं अन्यत्रापि विकारद्वारेण ब्रह्मण उपासनं दृश्यते इति दर्शनं दृष्टमि
त्यर्थः एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते एतमग्नावध्वर्यव एतं महाव्रते छन्दोगा इति तदर्थस्तु एतमेवात्मानं ऋग्वेदिनो महदु
ऋग्वेदिनः उपासते यजुर्वेदिनः सामवेदिनः

सङ्ग १६ स्येयमर्थोनेनच्छन्दसानुगतमुपासतेत्यपनुवेदितोग्नौकृतौ सामवेदितो महाव्रताख्येकृतौ तदनुगतंब्रह्मानुसंदधत इत्येतेनैतरेयेदृष्टे
मित्यर्थः एवंगायत्रीशब्दोब्रह्मलक्षक इति पूर्ववाक्येब्रह्मनिर्दिष्टं यद्गायत्रीशब्दोब्रह्मणिगौणः तथाचसत्यैमितंतभागस्या
यमर्थः यथागायत्रीषडक्षरैः पादैश्चतुष्पदा एवंब्रह्मापिचतुष्पादितिगायत्रीशब्देनाभिधीयते चतुष्पात्त्वगुणयोगात् तथा
गायत्रीसादृश्यमनेनेतोर्पत्तासुप्धानस्यनिगदाद्विधानादिति तथाहि दर्शनमिति छन्दोभिधायीशब्दस्यसादृश्याद्ब्रह्मणिप्रयोगो
दृष्टान्तः तथाहि तेवाएते पञ्चान्ये पञ्चान्येदशसन्तस्तत्कृतमित्युपक्रम्याह सैषाविराडिति अस्यार्थः संवर्गविद्यायामधिदैवम
ग्निसूर्यचन्द्रमोभासितवायोलीयने अध्यात्मंप्राणेवाक्चक्षुःश्रोत्रमनांसीत्युक्तेते वायुनासह पञ्चाधिदैविका आध्यात्मिकेभ्यः प्राणा
क दिभ्योन्ये तथाप्राणादयः पञ्चाधिदैविकेभ्योन्ये एवंतेसर्वेदशसन्तः कृतमित्युच्यते कृतापरपर्यायचतुरायनामकद्यूतगतचतु
जिते रंकं चतारः परायौ त्रकृतेहति अंकापवत्रयः द्वकंपवतद्वा एकंकायवरेक अपएवंकृते दशकेसर्वतन्भावान्नयेयसर्वंजयोभवति
यथाकृते त्रेतादिसंज्ञानि त्र्यंकायादीनिजितानिभवन्तितद्वत् तत्रचतुरायकापरपर्यायचतुरंकायनामकद्यूतस्यकृतमिति सं
ज्ञा सचचतुरंकायोदशात्मकः चतुर्थके युक्त्रपादांस्त्रिषुद्व्येकलयोरेकस्यचान्तर्भावात् वाय्वादयोपिदशत्वपादशत्वसंख्यासादृश्या
द्वाय्वादयः कृतमित्युच्यन्ते एवमेवदशाक्षराविराडिति श्रुताविराण्नामकंछन्दोदशात्मकतासामान्याद्विराट्शब्दप्रयोग इतिम
यानदृष्टं अन्नादश्चतुष्पात्त्वसामान्यान्गायत्रीशब्दप्रयोग इति दृष्टान्तार्थः तस्मात्पूर्ववाक्येब्रह्मैवनिर्दिष्टं नछन्द इतिसिद्धं २५ भू
तादिपादव्यपदेशोपपत्तेश्चैवं २६ इतश्चगायत्रीवाक्येब्रह्मैवप्रतिपाद्यमित्यभ्युपगन्तव्यमित्येवंशब्दार्थः कुतः भूतादिपादव्यपदेशो
पपत्तेः भूतपृथिवीशरीरहृदयैश्चतुष्पदागायत्रीतिव्यपदेशस्यब्रह्मण्येवोपपत्तेरित्यर्थः नह्यक्षरसन्निवेशरूपगायत्र्यांभूता राम १६

देवद्विप्राणि

दिपादस्यपदेशः संभवति किंचतेवाएतेपंचब्रह्मपुरुषा इति श्रुतिः पूर्वंब्रह्मणः प्रकृतत्वेसंगच्छते तथाहिगायत्र्याख्यब्रह्मणोहार्द
स्योपास्त्यंगत्वेनद्वारपालादिगुणविधयर्थंतस्यहवाएतस्यहृदयस्यपंचदेवसुषयः इत्यादिवाक्यं तत्रतेवाएतेपंचब्रह्मपुरुषा इतिश्रु तस्मिन्नूर्ध्वाके २
तेतत्पात्वोपास्त्यंगानांद्वारपालानांहृदयच्छिद्रेषुस्थितानांप्राणादिवायूनांब्रह्मपुरुषत्वोक्तेर्हृदयच्छिद्रेष्वपिब्रह्मसंबंधोवगम्यते इत्य
तोपि पूर्ववाक्येब्रह्मप्रकृतत्वेनहिगायत्रीमात्रस्यैवोपास्यत्वेतदंगानांब्रह्मपुरुषत्वमुक्तं अतोहृदयच्छिद्रेषुब्रह्मसंबंधात्तत्रस्थवायूनां
ब्रह्मपुरुषत्वमितिब्रह्मपुरुषश्रुत्युपपत्तेरिति श्रुत्यर्थस्तुहृदयस्यपंचदेवच्छिद्राणिआदित्यादिनामकैः प्राणादिवायुभिर्देवैः परिपा
लितात्देवसुषित्वंछिद्राणामुपपद्यते तानिहृदयच्छिद्राणिहृदयस्य प्राङ्मुखदक्षिणमुखप्रत्यङ्मुखोदङ्मुखोर्ध्वमुखरूपाणितत्स्थाः
प्राणव्यानापानसमानोदाननामकावायवः क्रमेणादित्यचंद्राग्निपर्जन्याकाशनामकाः पंचब्रह्मपुरुषा इतितस्माद्गायत्रीवाक्येब्रह्मैवप्र
कृतमितिपादयमितिज्योतिर्वाक्येपुसंबंधात्तदेवप्रत्यभिज्ञायत इति सिद्धं २६ उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात् २७ ननुपूर्वस्मि
न्वाक्येत्रिपादस्यामृतंदिवीति सप्तम्याद्युराधारत्वेननिर्दिश्यते अथयदतःपरोदिवोज्योतिरित्यत्रपंचम्यावधित्वेनद्यौर्निर्दिश्यते त
थाचविभक्तिभेदेनोपदेशभेदाज्ज्योतिर्वाक्येप्रत्यभिज्ञानसंभवतीतिचेन्न कुतः उभयस्मिन्नप्यविरोधात् विभक्तिभेदेनोपदेशभेदेपि
प्रत्यभिज्ञाया अविरोधादित्यर्थः प्रधानप्रातिपदिकार्थेनप्रत्यभिज्ञायाः गुणभूतविभक्त्यर्थेनप्रतिबंधकत्वाभावः तस्मात्सर्वंब्रह्मैव
कौक्षेयकाग्नेरुपास्यंज्योतिः शब्दवाच्यमैहिकंतेजइति सिद्धं २७ प्राणस्तथानुगमात् २८ पूर्वस्मिन्नधिकरणेयत्परःसत्रपच्छब्द दतः ३
स्यप्रसिद्धवाचकस्यबलवत्त्वात्तत्रहृतंब्रह्मलिंगंतेजोलिंगापेक्षयाबलवदित्युक्तं नन्वेवमिहकिंचिद्बलवत्संपादकमस्तीतिप्रत्युदा व
रा हरणसंगत्यास्याधिकरणस्यमहाप्रवृत्तिरिदं सत्रप्रधानप्रकृत्यसर्वानुरोधात्गुणभूतप्रत्ययानीतोयथानंदादिहापिस्वतं द्व

ज्योतिश्चरणाभिधानात् २

प्रमाणादिपदार्थभेदप्रतीतौ तत्सोपस्कारब्रह्मरूपेणवाक्यार्थप्रतीतेर्गुणभूततयाअपलापोयुक्तइतिदृष्टांतसंगतिः पदार्थप्रती
तेः स्वातंत्र्यंजनकत्वेन वाक्यार्थप्रतीतेर्गुणत्वं तत्सम्यक्त्वेनेतिबोध्यं अस्तिकौषीतकीब्राह्मणोपनिषदि इंद्रप्रतर्दनाख्यायिका
प्रतर्दनोहवैदैवोदासिरिंद्रस्यप्रियंधामोपजगाम युद्धेनचपौरुषेणचेत्यारभ्याम्नातं तत्र श्रूयते सहोवाच प्राणोस्मिप्रज्ञात्मा
तं मामायुरमृतमित्युपास्स्वेति तथोत्तरत्रापि अथखलुप्राणएवप्रज्ञात्मेदंशरीरंपरिगृह्योत्थापयतीति तथानवाचं विजिज्ञा-
सीत वक्तारंविद्यादित्यादि अंतेचसएषप्राणएवप्रज्ञात्मानंदोजरोमृतइत्यादि अस्यार्थः दिवोदासस्यापत्यंपुमान् दैवोदासिः प्रिय
प्रेमास्पदंधामगृहं तत्प्राप्तौहेतुः युद्धेनेति तत्कारणेनपुरुषकारप्रदर्शनेनच प्रतर्दनोराजाइंद्रस्यगृहंजगामेत्यन्वयः तंदृष्ट्वाइंद्रउवा
च प्रतर्दनवरंतेददामि सहोवाचप्रतर्दनः हेइंद्रत्वमेववरंवृणीष्व यत्त्वंमनुष्यायहिततमंमन्यसइति ततइंद्रउवाच प्राणोस्मीत्या
दि मुख्यप्राणंव्यावर्तयति प्रज्ञात्मेति निर्विशेषचिन्मात्रंव्यावर्तयति तंमामिति इदंचप्राणस्येंद्ररूपेस्वतोत्वलिंगंप्राणस्यमु
ख्यप्राणरूपत्वेलिंगमथखल्वित्यादि वागादीनांदेहधारणाशक्त्यभावनिश्चयानन्तरमयमर्थः प्राणएवायंदेहधारणानुरू
स्थापनंचकार्यमितिप्रसिद्धमितितल्लिंगमुक्तं प्राणस्यजीवत्वेलिंगंनवाचमिति प्राणस्यपरमात्मत्वेलिंगं सएषइत्यादि एवंचप्राणश
ब्दस्यइंद्रप्राणवायुजीवपरमात्मपरत्वलिंगानांविद्यमानत्वात्संशयः किंपरः प्राणशब्दइति तत्रप्रसिद्धत्वात्प्राणवायुपरइति प्राप्ते
२८ उच्यते प्राणस्तथानुगमात् तत्रप्राणोब्रह्मैवकुतः तथानुगमात् तथाब्रह्मपरत्वेन अनुगमात् अवगमादित्यर्थः तथाहि प्रतर्दनेनत्व
मेवहिततमंपुरुषार्थंवृणीष्वेत्युक्तवान् तस्यपरमपुरुषार्थकामस्यप्राणउपास्यत्वेनोपदिश्यते प्राणोस्मीत्यादिना एवंपरमपुरुषार्थत्वेनोप
दिश्यमानः प्राणः कथंप्राणवायुःस्यात् तथास्यसोहमांवेदनहवैतस्यकेनचनकर्मणालोकोमीयते नस्तेयेनन भ्रूणहत्ययेत्यादिब्र

विदुषः मोक्षः नहिंस्यते

सपरिग्रहे घटते श्रीपंते चास्य कर्मीणि तास्मिन् दृष्टे परावरे इत्यादिना ब्रह्मज्ञानिनः कर्मक्षयश्रवणात् तदर्थं तु पोथिकारीमां
ब्रह्मरूपंता प्राप्त तु भवति तस्य विदुषो लोको मोक्षो न मीयते न हि स्वेन महतापि पापेन ज्ञानमाहात्म्येन सर्वस्यापि पापस्य दग्धत्वा
दिति भावः एवं प्रज्ञात्मत्वं च ब्रह्मलक्षणमेव युक्तं एवमुपसंहार आनंदोऽजरोऽमृत इत्यपि ब्रह्मपरत्वे घटते तथा स न साधुना कर्मणा भूयान् भ
वति नो एवासाधुना कनीयान् एष ह्येव साधु कर्म कारयति एष उ एवासाधु कर्म कारयति एष लोकाधिपतिरेष लोकपाल एष लो
केश इति च ब्रह्मण एव संभवंत्य अन्यो हि धर्माधर्मसंस्पर्शत्वं न तत्कारयितृत्वं न ह्येशित्वं च ब्रह्मणेण साधारणलिंगमस्तीति तस्मात्सर्वोपर
पर्यालोचनेन प्राणब्रह्मपर एव प्राणपदमिति २८ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् २९ ननु यदुक्तं प्राणो ब्रह्मेति
तद्युक्तमिति नत्वर्थः कुतः वक्तुरात्मोपदेशाद्वक्तुरिंद्रस्यात्मत्वेनोपदेशादित्यर्थः तथाहि वक्ता हीन्द्रो नाम कश्चिद्विग्रहवान् देवता
विशेषः स्वमात्मानं प्रतर्दनायोपदिशति मामेव विजानीहीत्युपक्रम्य प्राणोऽस्मि प्रज्ञात्मेत्यहंकारवादेन किंच देवतायाः प्राणत्वे
लिंगांतरमस्ति अरुन्मुखान्यतीन् शालावृकेभ्यः अरणपभ्यः न हीदं ब्रह्मणो युक्तं एवमिंद्रप्रतर्दनसंवादस्य यथासंभवं योजनीयमि
ति अत्रोच्यते अध्यात्मसंबंधभूमा ह्यस्मिन्निति हि यस्मादस्मिन्नध्याये अध्यात्मसंबंधस्य परमात्मसंबंधस्य भूमा बहुलत्वं उपल
भ्यत इत्यर्थः तथा यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुरिति प्राणस्यैव प्रज्ञात्मनः परमात्मभूतस्यायुःप्रदत्वेनोपसंहारश्चो
क्तं अशरीरयति न वा प्राचीनसंख्यस्य ... मस्तीति प्राणानां निःश्रेयसमिति श्रुतिराप्त्मानमिंद्रियाणि प्राणोऽशरीरयति प्राणस्या
स्तित्वे स्थितो ह्याणानामिंद्रियाणां निःश्रेयसं स्थितिरिति श्रुत्यर्थः एवमेव न वाचं विजिज्ञासीत वक्तारं विद्यादिति परमात्मानं वक्ता
रमुपक्रम्य तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः
प्रायच्छमिति रु तत् वेदांतवाक्यं तद्दोषां मुखेन वर्त्तते ते अरुन्मुखाः शालावृकेभ्यः +६

खान् यतीन्

सू॰ वृ॰ स एष प्राण एव प्रज्ञात्मानंदोजरोमृत इति वासौ विषयेंद्रियव्यवहारानभिभूतं प्रसंगात्मानमेवोपसंहरति भूतमात्रास्तु तत् त
१८ त्र भूतमात्रादीनां नानात्वं नेमर्पदृष्टांतः यथा लोके प्रसिद्धस्य रथस्यारेषु मध्यवर्तिशलाकासु चक्रोपांतनेमिरर्पिता नाभौ च
पिंडिकायामराअर्पितास्तद्वद्भूतानि पृथिव्यादीनि मात्राः शब्दादयो विषया मीयंत इति मात्राः प्रज्ञामात्रासु सुखस्य बोधकेष्विंद्रियेषु
बुद्धिद्वारा अर्पिताः कर्मेंद्रियेष्वर्पिततद्विषया अर्पितास्तदधीनत्वात्तद्व्यवहारस्य ता (इंद्रियाणि) प्रज्ञामात्राः प्राणे परस्मिन्नर्पिताः प्राणस ष्व
ब्रह्मत्वे लिंगं स एष इति तस्मादध्यात्मसंबंधबाहुल्यात्प्राणात्मकब्रह्मोपदेश एवायं न देवतात्मोपदेश इति सिद्धं २९ कथं तर्
ईदृश हि वक्तुरात्मोपदेश इत्याशंक्याह शास्त्रदृष्ट्या तूपदेशो वामदेववत् ३० इंद्रस्य वक्तुर्मामेव विजानीहीत्युपदेशः शास्त्रदृष्ट्या ज्ञा
तत्वेः अहमेव परं ब्रह्मेति शास्त्रदृष्ट्या पश्यन्नेवमुक्तवानित्यर्थः तत्र दृष्टांतः वामदेववदिति यथा वामदेवः शास्त्रदृष्ट्या अहं
मनुरभवं सूर्यश्चेत्याह तद्वदित्यर्थः यदुक्तमिंद्रस्य तीनिसादिदेवतापरत्वलिंगमिति तन्न यद्दृष्टांतवाक्यास्वज्ञानप्रभावादहमेवं ग न्यद्
भूतोस्मीति दर्शयितुं न वाक्यान्यथोपपादितानि नोचेदरात्प्रभृतः प्रायपञ्चमिसेन स्थकत्वेनाविरोधात्तस्मात्प्राणात्मकब्रह्मपरमेतद्वा
क्यमिति सिद्धं ३० जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ३१ ननु यदुक्तमध्यात्मसंबंधबाहुल्या
न्न देवतात्मा प्राण इति तत्सत्यं तथापि न ब्रह्मपरमेवं वाक्यं किंतु जीवमुख्यप्राणवायुपरमपि कुतः जीवलिंगात् मुख्यप्राणलिं
गाच्च न वाचं विजिज्ञासीत वक्तारं विद्यादिति जीवलिंगं वागादिकरणैर्वेष्टितस्य वक्तुर्जीवस्य विज्ञेयत्वमुपलभ्यते एवं प्राण एव प्रज्ञा
त्मेदं शरीरं परिगृह्योत्थापयतीति प्राणलिंगं देहधारणस्य प्राणलिंगत्वात् तथाहि प्राणसंवादे श्रूयते वागादयः सर्वे प्राणाः प्र
सेकं श्रेष्ठतामात्मनो मन्यमानास्तन्निर्धारयिषयाः प्रजापतिमुपजग्मुः स चनानुवाच यस्मिन्नुत्क्रांते शरीरं पापिष्ठतरमिव भवे राम
१८

ति सषुप्याकंमधेश्रेष्ठश्रुतिनस्मिन्प्रजापतावेवमुक्तवतिवागादिषूत्क्रांतेष्वपि मूकादिभावेन शरीरं स्वस्थमस्तीति मुख्यप्राणा
सौश्रित्वंमिषापांतुवागादीनांमाकुलतातास्मतिप्राणउवाचमामोहमापद्यथप्रतोहमेवैतत्करोमिकिंतत् पंचधाप्राणापा
नादिभेदेनात्मानंविभज्यस्वस्तद्बाणंशरीरंवातिगच्छतीतिवानंवानमेववाणमस्थिरंशरीरमितियावत् तदवष्टभ्यविधारयामी
तिश्रवणान्देहधारणप्राणलिंगमेवमवगम्यतेनुक्तांता श्रुतिस्तुमामोहमापद्यथाहमेवैतत्पंचधात्मानंविभज्यैतद्बाणमवष्ट
भ्यविधारयामीति प्राणवापाःप्रज्ञात्मत्वंकथमितिचेत् ज्ञानेंद्रियाश्रयत्वादितिभ्रमः तस्मादुपक्रमादिपर्यालोचनयाब्रह्मरूपे
कवाक्यत्वेप्रतीतावपिनस्याज्जीवमुख्यप्राणरूपपदार्थप्रतीतिजन्यत्वेनगुणत्वात्सदर्थप्रतीतेस्तत्तज्ज्ञानकतपाप्रधानत्वादेक
वाक्यार्थप्रतीतिप्रयोग्यवासंभेदूरेवन्माध्य इति जीवमुख्यप्राण ब्रह्मणांत्रयाणामुपास्यानांप्रसेकत्वात्तंत्रेणवाक्यार्थत्वमिति
त्रीण्येववाक्यानिनैकंब्रह्मवाक्यमितिचेन्न उपासात्रैविध्यात् त्रीण्युपासनानिप्रसज्येरन्निलयः उपक्रमोपसंहाराभ्यांब्रह्मपरत्वे
नैकवाक्यत्वसंभवतिवाक्यभेदानयुक्तः नचपदार्थप्रतीतेर्मुख्यत्वंतस्यावाक्यार्थप्रतीतिशेषत्वेनतस्याएवप्रधानत्वात् नहिज
अत एव प्राण इत्यत्र प नकत्वमात्रेणप्राधान्यंयुक्तंसन्निपत्योपकारकारणमपिप्रधानतापत्तेः अन्यत्रब्रह्मलिंगवशात्प्राणशब्दस्यब्रह्मणिवृत्तेराश्रितत्वा प्र
च्चेहापिहितत्वेनोपन्यासाद्ब्रह्मलिंगयोगात्ब्रह्मणएववाक्यमुपदेश इति यत्तुजीवादिलिंगमस्तीतितत्सरत्वमिति नन्वप्राणे
व्यापारस्यापिवरमेव्यपणत्वेनदेहधारणस्यापिब्रह्मण्युपचरितुंशक्यत्वेनानन्यथासिद्धप्राणवायुलिंगाभावात् तथाचश्रुतिः
नप्राणेननापानेनमर्त्योजीवतिकश्चनइतरेणतुजीवंतियस्मिन्नेतावुपाश्रिताविति प्राणादिव्यापारस्येश्वरायत्तत्वमाह नापिन
वाचंविजिज्ञासीतेत्यादिजीवलिंगविरोधःजीवस्यब्रह्मणोनन्यत्वेनसर्वोपाधिपरित्यागेनजीवस्यस्वरूपंब्रह्मदर्शयितुंनवाचंविजि

स.ह.
१२

ज्ञासीत्येतस्मादिन्द्रस्य गान्माभिमुखीकरणार्थं उपदेशेन विहन्यते यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि इति श्रुतेः तत्
रणादिरूपाइन्द्रस्य वक्तुर्ब्रह्मत्वं दर्शयति तस्माद्ब्रह्मपरमेवेदं वाक्यं न प्राणादित्रितयपरं एकदेशिनस्तूपासात्रैविध्यादत्रि
नतादिहेतवोऽन्यगादिरूपसाधीनरमाचक्ष्यते तथाहि अश्मयो वा स जीवमुख्यप्राणलिंगयोर्विरोधः कुतः उपासात्रैविध्यात् जी तमि
वधर्मेण प्राणधर्मेण ब्रह्मधर्मेण च सहितस्य त्रिविधस्यापि तस्यैकस्य विवक्षितत्वादित्यर्थः अत्रैतेन वाक्यभेद इति तत्रापुरम
सुपासत्त्वायुः प्राण इति इदं शरीरं परिगृह्योत्थापयति तस्मादेतमेव उक्थमुपासीतेति प्राणधर्मः अथ यथास्यै प्रज्ञायै सर्वा
णि भूतान्येकं भवंति तद्व्याख्यास्याम इत्युपक्रम्य वागेवास्या एकमंगमदूदुहत्तस्यै नाम परस्तात्प्रतिविहिता भूतमात्रा प्रज्ञया वा
चं समारुह्य वाचा सर्वाणि नामान्याप्नोतीत्यादिर्जीवधर्मः ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भू
तमात्रा न स्युर्न प्रज्ञामात्राः स्युर्यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युर्न ह्यन्यतरतो रूपं किंचन सिध्येन्नो एतन्नाना तद्यथा रथस्यारेषु ने
मिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मेत्यादिर्ब्रह्म
धर्मः एतदर्थं तु प्राणो हि भूतानामायुरिति श्रुतेस्तदेण प्राणस्यायुष्ट्वं सिद्धं जीवनस्य तदधीनत्वात्तस्मात्प्राणस्यैव देहायुत्थापकता क
देहादिकमुत्थापयतीत्युक्थं प्राणः एवमायुष्ट्वमनतेर्लोक्यतं प्राणधर्मत्वमर्थः सहवासः सहोत्क्रांतिश्चेत्युक्तानेतयमर्थ शब्दा
र्थः अस्या जीवात्मप्रज्ञायाः संबंधीनि भूत्वा सर्वाणि भूतानि तद्दृश्यत्वेन कल्पितानि वस्तुतो यथैकं भवंति तथा तद्व्याख्यास्या
म इत्युपक्रम्याह वागेवेति बुद्धेः सभासायाः स्वरूपत्वोज्ञानत्वेऽपि विषयितत्वरूप पूर्णं शरीरमिंद्रियसाधनं तत्र नाम प्रपंचं विषयित्वम
हं शरीरं बुद्धेरहंकारलक्षणायाः तथा रूपप्रपंचविषयित्वमहं शरीरं तथा चक्षुरिंद्रियेषु मध्ये वागेवास्याः प्रज्ञायाः देहाद्येकमंगमदू एम
१२

रूपप्रपंचविषयित्वलक्षणोऽर्द्धशरीरे चक्षुरादिना प्रतिविहितासमुपस्थापिता भूतमात्रा रूपाद्यर्थरूपप्रकार
रूपं भवतीत्यर्थः चक्षुरादिना प्रकाशितार्थप्रपंचो बुद्धेरितरभागः २+

दुहन्तउदेइ चिनवतीपूरणामासेत्यर्थः नामात्मकप्रपंचे वाग्द्वारा प्रविष्टा बुद्धिर्नामप्रपंचविषयित्वलक्षणमर्द्धशरीरमाप्नोतीति या
वत् नसामप्रज्ञापाः पुनर्नामकितपरस्तादपरभागैरूपप्रपंचविषयित्वलक्षणपूरणामासेति यावत् एवं वागिंद्रियेणार्थप्रपंचे
न चक्षुर्वात्वप्रज्ञा पूर्णविषयित्वलक्षणं शरीरमाप्य दृष्टीभवतीति सिद्धं तदुपहितचैतन्यद्वारा स्वरूपे दृष्टत्वाध्यासमाह प्रज्ञेपति
तया प्राणवाचं करणभूतेन विराट्लाहवक्रेसध्यासमनुभूय वाचाकरणेन सर्वाणि नामानि वक्त्यत्वेनाप्नोति चक्षुषा सर्वाणि रू
पाणि पश्यतीत्येवं दृष्टत्वमनुभवतीत्यर्थः सर्वभूतविषयकत्वमात्मनि द्रष्टृत्वादिसंपादकत्वं च बुद्धेर्धर्मः इति फलितं चक्षुरेवास्मा
दृष्टादि पर्यायमंतरेणापि संगृहीतः सर्वाधारत्वेन दृष्टादिर्ब्रह्मधर्म इत्याह तावा इति भूतानि पृथिव्यादीनि पंचमात्राश्च शब्दादयः
पंच एता दश भूतमात्राः अधिप्रज्ञं प्रज्ञा इंद्रियाणि तदुत्थज्ञानानि वा अधिकृत्य प्रवर्तंते दश प्रज्ञामात्राः पंचेंद्रियाणि तदुत्थबु
द्धयश्चाधिभूतं भूतानि पृथिव्यादीनि शब्दादीनि च अधिकृत्य प्रवर्तंते एवं भूतमात्राणां ग्राह्यत्वेन प्रज्ञामात्राणां ग्राहकापेक्षत्व दृष्टानां+
मुक्तं प्रज्ञामात्राणां दृष्टानां ग्राहकाणां ग्राह्यभूतमात्रापेक्षत्वं चोक्तं इदमेव विमिथः सापेक्षितं ग्राह्यग्राहकयोः साधयति यद्धी
ति नेदेव स्यादिति नेति ग्राह्यग्राहकत्वेन सिध्यति किन्तु ग्राहकादेव ग्राह्यत्वं विना ग्राहकं न निर्वहतीत्यन्योन्यसापेक्षत्वमित्यर्थः
इदं ग्राह्यग्राहकद्वयं वस्तुतो न भिन्नमित्याह नो इति किं त्वेकस्मिन्नात्मन्यारोपितमिति शेषः तदेवं सार्द्धैकं न व्याख्यातं तस्मान्न प्र
ज्ञाणां एव भेदं प्रयोणोपासनमेकं विवक्षितं अस्य नाम्येवैमयः माणाशरीरत्वादौ उपाधिधर्मेण ब्रह्मोपासनस्याश्रितत्वादिहा
पि तद्युज्यते तस्मादिदं हवाक्यमिति इदमेकदेशिमतमयुक्तं तथाहि किमत्रोपासात्र यविशिष्टं ब्रह्मविधेयं उत ब्रह्मविशिष्टोपास्या
नपंकेनाब्रह्मानुवादेन तद्गाश्रितोपासात्र यं नाद्यः ब्रह्मणः सिद्धत्वेन विधेयायोगात् नापि द्वितीयः वाक्यांतरेण ब्रह्मणो ज्ञातत्वात्

सू.वृ. नापि जीवः ब्रह्मानुवादेनोपास्तिविधावेकविशेष्यावशीकारादुपास्तीनां मिथोऽसंबंधात्सुपास्तिविध्यान्नसावाक्यभेदः स्यादुपप
२० न्नत्वात्तस्माद्धयाध्यास्थानमेव रमणीयमिति सिद्धं ३१ इति श्रीमद्ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमस्याध्यायस्य प्रथमः
पादः १ एकादशामाया अस्मिन्पादे सूत्राण्येकत्रिंशत् एवं प्रथमे पादे स्पष्टब्रह्मलिंगानि वाक्यानि सर्वज्ञसर्वशक्तिजगदुत्पत्ति
स्थितिलयकारणब्रह्मपरतया नीतानि कानिचिद्वाक्यान्यस्पष्टब्रह्मलिंगानि संदिह्यमानानि द्वितीयतृतीयपादाभ्यां ब्रह्मपरत
यानीयंते तत्र द्वितीयपादे प्रायशः उपास्यब्रह्मपराणि विचार्यंते तृतीये ज्ञेयपराणीति विभागः सर्वत्र प्रसिद्धोपदेशात् १ पू
र्वस्मिन्पादे सर्वज्ञत्वादिगुणस्य ब्रह्मणः सिद्धत्वात्तदुपजीव्यांतरस्यास्यानाद्धेतुमद्भावः संगतिः पूर्वोत्तरयोः पूर्वाधिकरणेनास्या हेतु
धिकरणस्यावांतरसंगतिस्तु यथा पूर्वं जीवादिलिंगबाधया ब्रह्मपरत्वमुक्तं ब्रह्मलिंगवशान्न तथेह ब्रह्मलिंगमस्ति किंतु ब्रह्म
णः प्रकरणित्वमेव तत्र यावत्प्रकरणापेक्षया लिंगस्य बलवत्त्वाज्जीवस्य मनोमयत्वादिलिंगमस्तीति तत्परमेवास्त्विति प्रत्युदाहरण
संगतिः षष्ठपादांतरत्वान्नावांतरसंगत्यपेक्षेति सर्वत्राधिकरणे सविशेषवाक्यविचाररूपे पूर्वोत्तरपक्षयोरुपास्तिरेव फलं प
क्षनिर्विशेषवाक्यविचारे तत्र पूर्वपक्षे न तदुपास्तिः सिद्धांते प्रमितिरिति भेदः छांदोग्ये श्रूयते सर्वं खल्विदं ब्रह्म तज्जलानिति शांत
उपासीत अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्या
दि अस्यार्थः सर्वं जगद्ब्रह्मैवेत्यत्र हेतुमाह तज्जेति तस्माज्जायत इति तज्जं तस्मिँल्लीयत इति तल्लं तस्मिन्ननिति चेष्टत इति तदनं तज्जं त+
च तल्लं च तदनं च तज्जलान् अत्र यवलोपश्छांदसः इति शब्दो हेतौ यस्मादेवं तस्मात्सर्वं जगद्ब्रह्मैवेत्यर्थः स क्रतुं कुर्वीतेत्यत्र विहित राम
मुपासनमनूद्य शांतिरूपगुणं विदधाति शांत इति यतो ब्रह्मातिरिक्तं किंचिन्नास्ति अतो द्वेष्यादीनामभावात् शांतः सन्नुपासीतेत्यर्थः २०

उपासन गुणंविधायगुणिविधित्सयापुंमयत्वस्याध्येयोपासनैर्याफलमाह अथेति पुरुषोधिकृतउपासकः क्रतुमयः संकल्पमयः तत्रहेतुः
यथेति ज्ञानंकर्मवायथास्मिन्देहेस्थितःसंकल्पयति तथात्तदनुसारेणफलंपरत्रलभतेतेनसोधिकृतःक्रतुंध्यानंकुर्वीतकिं
ध्येयमित्याकांक्षायामाह मनोमयइतिविभक्तिव्यत्ययेनमनोमयंप्राणशरीरंपरमात्मानंध्यायेदित्यर्थः अत्रमनोमयत्वादेः
प्रकृतब्रह्मसापेक्षत्वनिरपेक्षत्वाभ्यांसंशयः किमत्रमनोमयत्वादिगुणकःशारीरउपास्यत्वेनगृह्यतेकिंवापरमात्मेति किमत्र
युक्तं शारीरइति कुतः अप्राणोह्यमनाःशुभ्रइत्यादिनाब्रह्मणोमनआदिसंबंधनिरासाज्जीवस्यमनआदिसंबंधस्यसंसिद्धत्वा त्र
तस्मान्मनोमयत्वादेःप्रकृतब्रह्मनिरपेक्षत्वात्तद्गुणकःशारीरएवोपास्यइतिप्राप्तेब्रूमः सर्वत्रप्रसिद्धोपदेशात् अत्रपरमेवब्रह्म
उपास्यत्वेनपरिगृह्यतेकुतः सर्वत्रप्रसिद्धोपदेशात् सर्वेषुवेदांतेषुयत्प्रसिद्धंब्रह्मजगत्कारणंतस्यैवात्रसर्वंखल्विदमित्यादिनाउपदे
शादित्यर्थः यदुक्तंमनोमयत्वादिप्रकृतब्रह्मासंबंधीति तन्न मनोमयत्वादेर्विशेष्याकांक्षायांयत्सर्वंखल्विदंब्रह्मेतिप्रकृतंतदे
मनोमयत्वादेः वान्वेतिनाप्रकृतोजीवः अन्यथाप्रकृतहानप्रसंगात् नचतत्रदसंभवःसर्वात्मकत्वेनसर्वस्याप्युपपत्तेरिति १ किंच विवक्षितगुणो
पपत्तेश्च विवक्षिताउपासनायामुपादेयत्वेनोपदिश्यमानागुणाःसत्यसंकल्पादयःतेषांब्रह्मण्येवोपपत्तेरित्यर्थः मनोमयःप्राण
शरीरोभारूपःसत्यसंकल्पःआकाशआत्मासर्वकर्मासर्वकामइत्यादिनाउपदिष्टाःयद्यपिमनोमयत्वादिर्जीवस्यासाधारणंत
थापिसत्यसंकल्पत्वाद्यनुरोधेनसर्वात्मकेब्रह्मणिमनोमयत्वाद्युपपत्तिःजीवधर्मान्ब्रह्मणिदर्शयतिचश्रुतिः त्वंस्त्रीत्वंपुमान
सि त्वंकुमारउतवाकुमारी त्वंजीर्णोदंडेनवंचसि त्वंजातोभवसिविश्वतोमुख इति जीर्णःस्थविरोभूत्वायोदंडेनवंचति गच्छतिसो
पित्वमेवेत्यर्थः अप्राणोह्यमनाइत्यादिश्रुतिस्तुनिर्गुणब्रह्मविषयत्वाविरोधः २ एवंसत्यसंकल्पत्वादीनांब्रह्मण्युपपत्तिमुक्त्वाजीवेतेषा

स०वृ० मनुपपत्तिमाह अनुपपत्तेस्तु न शारीरः ३ तुशब्दोऽवधारणार्थः अत्र मनोमयत्वादिगुणकं ब्रह्मैवोपास्यं न तु शारीरः कुतः अनुप
२१ पत्तेः सत्यसंकल्पत्वादीनां जीवे आञ्जस्येनानुपपत्तेरित्यर्थः ३ शारीरस्य मनोमयत्वादिगुणकत्वाभावे हेत्वन्तरमाह कर्मकर्तृव्य ब्रा
पदेशाच्च ४ न शारीर इत्यनुषङ्गः न शारीरो मनोमयत्वादिगुणक इहोपास्यः कुतः कर्मकर्तृव्यपदेशात् एतमितः प्रेत्याभिसंभवि
तास्मीति एतमिति प्रकृतं मनोमयत्वादिगुणकमुपास्यं कर्मत्वेन व्यपदिशति अभिसंभवितास्मि प्राप्तास्मीति शारीरमुपासकं
कर्तृत्वेन व्यपदिशति न चैकस्यैकस्मिन् शारीरे कर्मकर्तृभाव आञ्जस्येनोपपद्यते तस्मान्न शारीर उपास्यः ४ किंच शब्दवि
शेषात् ५ मनोमयत्वादिगुणः परमात्मैव न शारीरः कुतः शब्दविशेषात् मनोमयत्वादिविशिष्टपरमात्माभिधायकस्य प्रथमां
तशब्दस्य सत्त्वादित्यर्थः तथाहि समानप्रकरणे व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वा एवमयमन्तरात्मन् पुरुषो हिरण्म
य इत्यादौ पुरुषो हिरण्मय इति प्रथमान्तशब्देन परमात्माभिधानं अन्तरात्मन्निति सप्तम्यन्तेन शारीराभिधानं दृश्यमित्याहापि प्रथ
मान्तेन श्रुतो मनोमय इत्यादिशब्दः परमात्मपर एवेति ५ ननु कर्मकर्तृव्यपदेशो न संभवति जीवब्रह्मणोरभेदादित्याशंक्याह
स्मृतेश्च ६ स्मृतिवशाज्जीवपरमात्मनोर्भेद इत्यर्थः ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि माय
येत्याद्यास्मृतिः कल्पितभेदं दर्शयति अतः कर्मकर्तृव्यपदेश उपपद्यत इत्यर्थः ६ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्य द्वा
त्वादेवं व्योमवच्च ७ ननु नात्र परमात्मोपास्यः कुतः अर्भकौकस्त्वात् अर्भकं अल्पमोकः स्थानं यस्य स अर्भकौकास्तस्य भावस्तत्त्वं
तस्मादित्यर्थः एष म आत्मान्तर्हृदय इति हृदयरूपपरिच्छिन्नायतनत्वादित्यर्थः किंच तद्व्यपदेशाच्च एतच्छब्देनैव एष अणीयान् व्री
हेर्वा यवाद्वेत्यणीयस्त्वस्य व्यपदेशादाराग्रमात्रो जीव इहोपास्यो न सर्वगतः परमात्मेति चेन्न निचाय्यत्वादेवं एवमर्भकौकस्त्वाणी स०म
२१

अपेक्षया

यत्वादिविशिष्टत्वेनरूपेणपरमात्मनरहनिचास्यत्वादुपास्यत्वादित्यर्थः सर्वगतस्याप्यल्पदेशगतत्वंकथमित्यपेक्षायांसंग
च्छते यथासकललोकाधीशःपरमात्माश्रीरामचंद्रअयोध्याधीशइतिव्यपदिश्यते एवंशालिग्रामेविष्णुबुद्धिवद्धृदयपुंडरीके
परमात्माअर्भकौकस्त्वादिगुणकउपासनापेक्षयाव्यपदिश्यतेनेतावतासर्वगतत्वहानिः तत्रदृष्टांतः व्योमवदिति यथासर्वग
तमपिव्योमसूचीपाशाद्यवच्छेदेनअर्भकौकोपिअणीयोपिव्यपदिश्यते तद्वद्ब्रह्मापीत्यर्थः संभोगप्राप्तिरितिचेन्नवैशेष्यात् ८
नन्वीश्वरस्यव्योमवत्सर्वगतत्वेचेतनत्वाविशेषाज्जीववत्सुखदुःखानुभवरूपसंभोगप्राप्तिरिति चेन्नवैशेष्यात् जीवपरमा
त्मनोरत्यंतविशेषादित्यर्थः जीवःकर्ताभोक्ताधर्मादिमांश्चेतितस्यसुखदुःखसंबंधोयुक्तः परमात्मानुतद्विलक्षणइतिनतस्यसं
भोगप्राप्तिरितिविशेषएववैशेष्यंतस्मादित्यर्थःप्यत्र विशेषातिशयद्योतनार्थोयंवान चजीवपरमात्मनोरभेदान्नभोक्तृत्वादिवैलक्षण्य
मपिनस्यादितिवाच्यं विप्रतिपत्तिविषयाः परस्परधर्मासांकर्यस्यबालेसिद्धत्वादितितस्मान्मनोमयत्वादिगुणकःपरमात्मैवो
पास्योनशारीरइतिसिद्धं ॰ अत्ताचराचरग्रहणात् ९ पूर्वंब्रह्मणोभोक्तृत्वाभावउक्तेतर्हिनद्यस्तत्वमपिजीवस्यैवनब्रह्मणइति
दृष्टांतसंगत्याइदमारभ्यते अत्रपूर्वपक्षेउपास्तिःफलंसिद्धांतेनिर्विशेषब्रह्मप्रमितिरितिविवेकः कठवल्लीषुश्रूयते यस्यब्र
ह्मचक्षत्रंचोभेभवतओदनः मृत्युर्यस्योपसेचनंकइत्थावेदयत्रसइति अस्यार्थः यस्यपरमात्मनोब्रह्मचक्षत्रंचोभेजात्याप्रसि
द्धेअन्नवदोदनःयस्यचमृत्युःसर्वमारकःउपसेचनमोदनमिश्रभूतंभवति तस्सर्वस्यात्तापरमात्माकारणात्मायत्रवर्ततेतंनिर्वि
शेषमात्मानंनाविरतोदुश्चरितादितिमंत्रोक्तोपाययान्यथावेदइत्यमन्यउपायरहितोनवेदेतिकाक्वर्थः अत्रौदनोपसेचनसं न
चितःकश्चिदत्ताप्रतीयतेतत्रकिमग्निरुताहोजीवअहोस्वित्परमात्मेतिसंशयः त्रयाणामप्यत्रप्रश्नोपन्यासःसंशयबी

स.वे.
२२
व

ऽयमर्थः न जायते म्रियते वा विपश्चिदित्यादिनापरमात्मनः प्रकृतत्वात् ॥१॥

जेऽर्कि तावस्मासमाप्नोति कुतः अग्निरन्नाद इति श्रुतिप्रसिद्धिभ्यां जीवो वा स्यात् नपोरन्यः पिप्पलं स्वाद्वत्तीति श्रुतेः नपरमात्मे
ति प्राप्ते ब्रूमः अत्ता चराचरग्रहणात् अत्ता ईश्वर एव भवितुमर्हति कुतः चराचरग्रहणात् चराचरयोः स्थावरजंगमयोरद्यत्वेन ग्र
हणाच्छ्रवणादित्यर्थः मृत्युपसेचनत्वेन सर्वप्राणिमात्रस्याद्यत्वेन प्रतीयमानत्वात् ब्रह्मक्षत्रग्रहणमुपलक्षणार्थं नहि स
र्वसंहर्तुः परमात्मनोऽन्यस्य जीवादेः चराचरात्तृत्वं युक्तं तस्मादत्ता ईश्वर एव ॥९॥ प्रकरणाच्च ॥१०॥ इतश्चेश्वर एवात्ता कुतः प्रकर
णात् परमात्मनः प्रकृतत्वात् क इत्था वेद यत्र स इति च दुर्विज्ञेयत्वं ब्रह्मणोऽसाधारणं लिंगं दृश्यते ॥१०॥ गुहां प्रविष्टावात्मानौ हि
तद्दर्शनात् ॥११॥ पूर्वं ब्रह्मक्षत्रशब्दस्य मृत्युपरमात्मनिर्धारितं सर्ववस्तुपरत्वं इहापि पिबच्छब्दस्य सन्निहितगुहाप्रवेशादिना
बुद्धिक्षेत्रज्ञपरत्वमस्तीति दृष्टान्तसंगत्या सामारंभः पूर्वपक्षे बुद्धिभिन्नजीवज्ञानं फलं सिद्धान्ते तु निर्गुणब्रह्मज्ञानमिति विभागः ते
अनन्तरशाखानन्तरं कठवल्लीषु पठ्यते ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये छायातपौ ब्रह्मविदो वदन्ति पं
चाग्नयो ये च त्रिणाचिकेता इति अस्यार्थः ऋतं अवश्यंभावि कर्मफलं पिबन्तौ भुंजानौ जीवपरमात्मानौ छत्रिणो गच्छन्तीतिवद्
एकस्य जीवस्य भोक्तृत्वेन ब्रह्मणोऽपि भोक्तृत्वेन व्यपदेशः सुकृतस्य कार्ये देहरूपलोके वर्तमानौ परार्ध्ये परस्य ब्रह्मणः अर्धं स्था धर्मस्य
नमर्हतीति परार्ध्यं हृदयं तस्मिन्परमे श्रेष्ठे या गुहा नभोलक्षणा तां प्रविश्य स्थितौ छायातपवन्मिथो विरुद्धौ कर्तृत्वादिना देल
क्षणौ ब्रह्मविदः पंचाग्नयः कर्मिणश्च वदन्ति त्रिणाचिकेतोऽग्निश्चितो येस्ते त्रिणाचिकेतास्तेऽपि वदन्तीत्यर्थः तत्र संशयः
किमिह बुद्धिजीवौ निर्दिष्टौ उत जीवपरमात्मानाविति तत्र बुद्धिजीवाविति प्राप्तं कुतः जीवस्य बुद्धिभिन्नत्वेन ज्ञानार्थं प्रश्नदर्श
नात् येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इति मनुष्ये प्रेते राम
मृते २२

कि

सतिपेपं विचिकित्सासंशयः परलोकगामी भोक्ता जीवोऽस्तीत्येके नास्तीति चान्ये अतस्त्वयोपदिष्टोऽहमेतन्निर्विचिकित्सं तत्त्वं ज्ञातुमिच्छा
प्रति मीतिमृत्युं प्रति नचिकेतसो वचनमिति वराणां नचिकेता मृत्युं वरत्रयं पृष्टवान् स्वपितुः सौमनस्यमग्निविद्यामात्मविद्यां चेति तेषां
वराणां मध्ये एष तृतीयो वर इत्यर्थः एवं च बुद्धिजीवयोः दृष्टत्वान्नावेवात्र निर्दिश्येते किं च गुहाप्रवेशस्य ब्रह्मणः संभवाहतपाना
समञ्चात्र बुद्धिजीवाविति प्राप्ते ब्रूमः गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् गुहां प्रविष्टाविह जीवपरमात्मानौ कुतः आत्मानौ हि हि प ना॰वे॰व॰४+
स्मारात्मानौ नान्यस्मादित्यर्थः ऋतं पिबन्ताविति कर्मफलभोगश्रवणेनैकस्य बहात्मनि द्वितीयोऽप्यात्मैव न्यायः तत्र हेतुमाह तद्दर्श
नादिति संख्याश्रवणे हि समानस्वभावतोरेकरूपत्वस्य लोके दर्शनादित्यर्थः तद्यथास्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते गौरेव द्वितीयोऽन्वेष
णः नाश्वो न वा मनुष्यः एवमिहापि चेतनत्वसामान्याज्जीवपरमात्मानावेव बुद्धिविलक्षणा जीवप्रश्नस्याप्यदेवो नतरं नैनदद्वामना
पि गुहाप्रवेशानुपपत्तिः ब्रह्मणः यो वेद निहितं गुहायामित्यादौ बहुलं गुहाप्रवेशश्रवणान्न चर्तं पानानुपपत्तिः छत्रिन्यायस्य
दर्शितत्वादिति तस्माज्जीवपरमात्मानावेव गुहां प्रविष्टौ ११ किंच विशेषणाच्च १२ जीवपरमात्मनोरेवास्मिन्ग्रन्थे गन्तृगन्तव्य
न भावेन मन्तृमन्तव्यभावेन च विशेषितत्वादित्यर्थः आत्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादिनानन्तरग्रन्थे रथ्यादिकल्पया न
विज्ञानात्मानं रथिनं संसारमोक्षयोर्गन्तारं कल्पयति सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति परमात्मानं गन्तव्यं कल्पयति
तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति पूर्वस्मिन्ग्रं
थे मन्तृमन्तव्यत्वेन तावेव विशेषितौ सः जीवः अध्वनः संसारमार्गस्य पारमेव विशिनष्टि तदिति आपनशीलस्य ब्रह्मणः स्वरूप
परमं कार्यकारणातीतं पदं तद्वैष्णवं ज्ञेयं नान्यदित्यर्थः दुर्दर्शं सूक्ष्मत्वात् दुर्ज्ञानं अत एव गूढं अनुप्रविष्टं मायाच्छादितरूपत्वाविद्य

स.सू. मानं कुर्वन्त सत्त आह गुहेति गुहायां बुद्धावाहितं निक्षिप्तं गह्वरे बहुविधानर्थसंकटे देहे स्थितं पुराणं चिरंतनं तमीश्वरं अध्यात्म
२३ योगः प्रत्यगात्मन्येव चित्तसमाधानं तल्लक्षणेन तदात्माधिगमः साक्षात्कारस्तेन सोहमेवेति निश्चित्य धीरो विद्वान् हर्षाद्युप
लक्षितं संसारं जहातीत्यर्थः तथा समाने वृक्षे पुरुषो निमग्नोनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य
महिमानमिति वीतशोक इति मंत्रांतरेपि जीवपरमात्मानावेव विशिनष्टि मंत्रे तत्यभावेन आत्मेश्वरयोः समानस्तुल्यो वृ
क्षो देहः पुरुषो जीवो निमग्नः मनुष्योहमित्यभिनिवेशवान् नीशया अविद्यया मुह्यमानः तत्त्वमजानन् अनिशं शोचति सं
सारमनुभवति जुष्टं ध्यानादिना सेवितं यदा तत्त्वलक्षणेन पश्यति तदा अस्यैवात्मत्वेन दृष्टस्य
महिमानं स्वरूपं प्राप्नोति ततश्च वीतशोको भवति तत्र हेतुरिति शब्देनोक्तः बंधहेतोरविद्यायास्त्यक्तत्वादित्यर्थः न त्वविद्याध्य
स्तानतां बंधकल्पनमुक्तं नहवा एवंविदि किंचन रम आध्वसनं इति श्रुतेः एवं अविद्याविदुषि किंचन रेषदपि सकल्पितं नाध्य
सतेन संपादयति तस्यावाभावादित्यर्थः तस्मात्सर्वस्मिन्नपि स्मिन् ग्रंथे जीवपरयोरेव विशेषितत्वात्तावेव गुहाप्रविष्टावि
ति जीवत्वादिधर्मविनिर्मुक्तः परमात्माध्यपरतीति सिद्धं १२ अंतर उपपत्तेः १३ पूर्ववपित्ताविति प्राथमिको हेतुः श्रुतां चेतनत्वे
न तुल्यं जीवपरदृष्टसनुसाराच्चरमश्रुताः गुहाप्रवेशादयो नीताः नहि नद्वैदेववदृश्यते इति प्राथमिकप्रसक्तत्वात् अक्षिप्रति
अ बिंबात्मानुगतत्वानुरोधाच्चरमश्रुतानां मतत्वादयः स्तुत्यर्थतेन कथंचिन्नेयाः इति दृष्टांतसंगत्या सा आरंभः पूर्वपक्षे प्रतिबिंबोपास्तिः
फलं सिद्धांते ब्रह्मोपास्तिरिति उपकोसलविद्यायां छांदोग्ये श्रूयते य एषोक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभ
यमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छतीत्यादि अस्यार्थः पुरुषः परमा एम
२३

दृश्यते शास्त्रतः नातीन्द्रियगोचरत्व इति शेषः एष आत्मेति उपकोसलं प्रति आचार्य उवाच प्रतिबिंबात्मकछायापात्रत्वं सत्यमाह स
तो दिति इ सुवाचेत्यन्वयः अक्षिरूपस्थानस्य ब्रह्मसारूप्यमाह तदिति वर्त्मनी पक्ष्मस्थाने इति द्वितीया द्विवचनं ब्रह्मसरणा निर्लेपत्वाद
सुयापि निर्लेपत्वासारूप्यमित्यर्थः तत्रोक्षिरूपं ततउपदिश्यमानः परमात्मा उत प्रतिबिंबादिरिति संशये दृश्यतइति वचनात्सर्व
गतस्याक्षिस्थानतानुपपत्तेश्च न परमात्मा किंतु प्रतिबिंबादिरिति प्राप्ते ब्रूमः अंतर उपपत्तेः अंतरः अक्षिमध्यगतः परमात्मैव
कुतः उपपत्तेः आत्मत्वामृतत्वाभयत्वादीनामिहोक्तानां परमात्मन्येवोपपत्तेरित्यर्थः न च दृश्यतइत्यनेन विरोधः दर्शनस्य शा
स्त्रीयत्वेनाविरोधात् किंच एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयंति एष उ एव वामनीरेष हि सर्वाणि वामा
नि नयति एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति इत्यत्र निर्दिष्टसंयद्वामत्वादिगुणानां परमात्मन्येवोपपत्तेरंतरः परमात्मे
व नरर्थत्वं संयद्वामशब्दार्थमाह एतं हीति वामानि कर्मफलानि एतमक्षिपुरुषं हेतुमाश्रित्याभिसंयंति उत्पद्यंते संयंति वामा
न्यस्मादिति संयद्वामः सर्वफलोदयहेतुरित्यर्थः वामनीरप्ययमेवेत्याह एष इति वामनीशब्दार्थमाह एष हीति वामानि शोभना
नि जनेभ्यः प्रापयति जनस्य सर्वशुभप्रापकोप्ययमेवेत्यर्थः भामनीरप्ययमेवेत्याह एष इति भामनीपदार्थमाह एष हीति भामा
नि भानानि नयतीति भामनीः अयमेव सर्वप्रकाशक इत्यर्थः नहि प्रतिबिंबस्यात्मस्वरूपस्यैतादृशा गुणाः संभवंति तस्मादृश्यत्तरः पुरु वा
षः परमात्मा १३ कथं पुनः सर्वगतस्याल्पमक्षिस्थानमुपादिश्यत इत्यत्राह स्थानादिव्यपदेशाच्च १४ ईश्वरस्याल्पस्थानादि
व्यपदेशानानुपपत्तिः कुतः स्थानादिव्यपदेशात् यश्चक्षुषि तिष्ठन्नित्यादौ ईश्वरस्य चक्षुस्थानव्यपदेशस्य दृष्टत्वादित्यर्थः आदिपदेन
प्रम रूपवत्परिग्रहो दृष्टान्तत्वेनोक्तः हिरण्यश्मश्रुरित्यादौ रूपवत्त्वस्योपासनार्थत्वेनोपासनादिहाप्युपासनार्थमल्पस्थानव्यपदेशोन वि
रुध्यत इति भावः १४ अपि च सुखविशिष्टाभिधानादेव च १५ अक्षिपुरुषः परमात्मैवोपदिश्यते कुतः सुखविशिष्टाभिधानात्

स॰ टे॰
२४

एवं कोरत्वनात्मलेशयः कार्यं इति सत्यं न सुखविशिष्टं ब्रह्म वाक्योपक्रमे श्रूयते तस्यैवेहाभिधानादित्यर्थः तथाहि गुरुगृहे आ
चार्यात् सम्यक् चिरकालं वर्तमानमुपकोसलं गार्हपत्याद्यग्नय ऊचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति तत्र कशब्दो विषयिकसुखे रूढः
खंशब्दश्चाकाशे रूढ इति परस्परभेदमाशंक्य श्रुतिराह यद्वाव कं तदेव खं यदेव खं तदेव कमिति एवं परस्परवैशिष्ट्यप्रतिपादना
त्सुखविशिष्टं ब्रह्म वाक्योपक्रमे श्रुतमिति तस्यैवात्र ग्रहणं युक्तमितिना प्रकृतच्छायादेरिति सिद्धोऽन्तरः परमात्मा ५५ किंच श्रु
तोपनिषत्कगत्यभिधानाच्च ४६ इतश्चाक्ष्यन्तरः परमात्मा कुतः श्रुतोपनिषत्कगत्यभिधानात् श्रुतोपनिषत्का उपनिषद्ब्रह्मविद्या
येन स श्रुतोपनिषत्कः तस्य या गतिरर्चिरादिरूपा तस्याः प्रकृते अभिधानादित्यर्थः अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्य
यात्मानमन्विष्यादित्यमभिजयन्ते एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त इति एताव
पि अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना इति या गतिर्ब्रह्मविदां दर्शिता सैवास्मिन्पु
रुषविदः श्रूयते अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसंभवन्तीत्युपक्रम्यादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो
मानवः स एतान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त इति तदर्थस्तु अथ देहपातानं
तरं ब्रह्मचर्यादितपसा हेतुनात्मानमनुसंधाय तद्विद्यया ध्यानात्मया उत्तरमार्गमर्चिराद्युपलक्षितं प्राप्य तेनादित्यादिद्वारेण का
र्यं ब्रह्म प्राप्नुवन्तीत्यर्थः कार्यब्रह्म विशिनष्टि एतदिति व्यष्टिसमष्टीन्द्रियाणां समष्ट्यभिमानी हिरण्यगर्भस्थानमित्यर्थः तस्य
वास्तवं स्वरूपमाह एतदिति एतद्विशेषणसिद्ध्यर्थं हेतुमाह एतस्मादिति एतावन्मार्गादिशब्देनातिवाहिकास्तदभिमानिन्यो दे
वता गृह्यन्ते अथ यदुक्तार्थं अस्मिन्नुपासके मृते यदि पुत्रादयः शव्यं शवसंबन्धिसंस्कारादिकर्म कुर्वन्ति यदि वा न कुर्वन्ति उभयथा राम २४

अथ देहपातानन्तरं १

यंप्रतिहतोपास्तिफलालेउपासका अर्चिराद्यभिमानिनीर्देवताःप्राप्नुवंति अर्चिषोहर्देवतांततः शुक्लपक्षदेवतांततः षण्मासो
पलक्षितोत्तरायणदेवतांततः संवत्सरदेवतांततश्चादित्यंततश्चंद्रंततोविद्युतंप्राप्नुवंति तत्रस्थितानुपासकान्ब्रह्मलोका त्
दागत्यामानवःमनुष्यःसत्वानुसत्वः ब्रह्मलोकंगमयतीतियावत् सपुरुषोगंतस्यकार्यब्रह्मगमयतिप्रापयतीति अर्चिरादिदेवैर्न
त्वभिरुपलक्षितत्वात्देवपथः गंतव्येन ब्रह्मणोपलक्षितत्वाद्ब्रह्मपथः एतेनपथाकार्यब्रह्मप्रतिपद्यमानाः पुनरिमंमानवम
नोःसर्गजन्ममरणप्रवाहात्मकंपुनरावृत्तिरूपंनावर्ततेनप्रविशंति तस्मादक्षिपुरुषःपरमात्मा १६ इतश्चाक्षिपुरुषःपरमात्मा
नप्रतिबिंबात्मेत्याह अनवस्थितेरसंभवाच्चनेतरः १७ इतरः छायापुरुषादिरक्षिगतइतिनयुक्तंकुतः अनवस्थितेः उपासक
स्योनव स्यसर्वत्राक्षिणि छायासंपादकबिंबभूतपुरुषांतरस्यानादिसध्ये असंभवाच्च अमृतत्वादिगुणानांछायापुरुषेअसंभवादि
त्यर्थः तस्मात्परमात्मैवाक्षिस्थानेउपास्यइतिसिद्धं १७ अंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात् १८ पूर्वस्थानादिव्यपदेशाद्ब्रह्मेति
सिद्धेयःपृथिव्यांतिष्ठन्नित्याद्यंतर्यामिब्राह्मणस्थयश्चक्षुषितिष्ठन्नित्यादिवाक्यमंतर्यामिणोब्रह्मत्वंसिद्धवत्कृत्योदाहृतंतत्राक्षि
स्थत्वमाधीयतइत्याक्षेपसंगत्याहइदमारभ्यतेपूर्वपक्षेफलंतन्मात्रवाक्यनीयतेतउपास्तिः फलंसर्वत्रसविशेषविचारेदृष्टव्यमसि
द्धांतेब्रह्मोपास्तिरेवेतीहापितथाफलंदृष्टव्यं अंतर्यामिब्राह्मणेश्रूयते यइमंचलोकंपरंचलोकंसर्वाणिचभूतानियोंतरोय
मयतीत्युपक्रम्य यःपृथिव्यांतिष्ठन्पृथिव्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमंतरोयमयत्येषत आत्मांतर्या
म्यमृतइत्यादि अत्रपृथिव्यांतिष्ठन्नंतर्यामीत्युक्तेस्याद्वरादिरितिशंकांवारयति पृथिव्यादिति तदभिमानिदेवतांप्रत्याह यमिति
अशरीरस्यकथंनियंतृत्वमित्यतआह यस्येति नियम्यकार्यकारणसंघातेनेवनियंतृत्वमितिफलितमाह यइति तस्यभिन्नत्वम

सू·वृ· संचारयति यमयतीति तेनमभेचत्यर्थः एवंयःपृथिव्यांतिष्ठन्नित्याद्यधिदैवतानंतरंयः सर्वेषुलोकेष्वित्यधिलोकंयः सर्वेषुवेदेष

२५ त्यधिवेदंयः सर्वेषुयज्ञेष्वित्यधियज्ञंयः सर्वेषुभूतेष्वित्यधिभूतंयः प्राणेष्वित्यादिप्रआत्मनीत्यंतमध्यात्मंचकश्चिदंतर अव

स्थितोयमयितांतर्यामिश्रूयते सकिमधिदैवाद्यभिमानिनीदेवतात्मा किंवाप्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगीकिंवापरमात्मे

तिसंशयः किंतावत्प्राप्तंदेवतात्मेतिकुतः पृथिव्येवयस्यायतनंअग्निर्लोकोमनोज्योतिरि त्यादिनाकार्यकारणसंघातस्य

देवतायांश्रुतत्वेनतस्यानियंतत्वोपपत्तेः यस्यदेवस्यपृथिवी आयतनंशरीरंअग्निर्लोकः लोक्यतेअनेनरूपादिरितिलो

कश्चक्षुर्ज्योतिरेवमनइत्यर्थः तस्यशरीरस्यश्चास्यनियंतत्वंयुक्तं तस्माद्देवतात्मायोगीवेतिप्राप्तेब्रूमः अंतर्याम्यधिदैवादि

षुतद्धर्मव्यपदेशात् अधिदैवादिषुश्रूयमाणोन्तर्यामीपरमात्मैवकुतः तद्धर्मव्यपदेशात् तस्यपरमात्मनोधर्माणामिहव्य

पदेशादित्यर्थः सर्वांतर्यामित्वमात्मत्वममृतत्वमदृष्टत्वंचेहपरमात्मनोसाधारणधर्माः उदाहृतवाक्येद्रष्टव्याः नचशारी

रस्यकथंनियंतत्वमितिवाच्यं नियम्यशरीरेणैवतस्यनियंतत्वोपपत्तेरिति १८ ननुप्रधानमंतर्याम्यस्तुसांख्याशंक्याह नचस्मार्तम

तद्धर्माभिलापात् १९ स्मार्तंसांख्यस्मृतिकल्पितंप्रधानंनांतर्यामिशब्दवाच्यं कुतः अतद्धर्माभिलापात् तच्छब्देनप्रधानमुच्य

तेनतत् अतत्प्रधानभिन्नः परमात्मेत्यर्थः तस्यैवचेतनस्ययेधर्माः द्रष्टृत्वादयः तेषामिहाभिलापात् अभिधानादित्यर्थः अदृ

ष्टोद्रष्टाश्रुतः श्रोतामतोमन्ताविज्ञातोविज्ञातेतिवाक्यशेषे द्रष्टृत्वादयश्चेतनधर्माः श्रूयंतइतिनाचेतनंप्रधानमंतर्यामीत्यर्थः

१९ तर्हिचेतनोजीवोयोगीभवत्वंतर्यामीत्यतआह शारीरश्चोभयेपिहिभेदेनैनमधीयते २० शारीरोनांतर्यामीतिनकारस्यपू

र्वसूत्रादनुषंगः कस्मादुभयेपिहिकाण्वामाध्यंदिनाश्चांतर्यामिणोभेदेनएनंशारीरंपृथिव्यादिवदधिष्ठानत्वेननियम्यत्वेन राम

२५

ब्र धीयते योविज्ञानेतिष्ठन्निति काण्वा विज्ञानपदं जीवपरं य आत्मनीति माध्यंदिनाः तस्मात्पृथिव्यादिवन्नियम्यत्वमेव जीवस्य
ननियंतृत्वं भेदेनैवमधीयत इति यो ऽयं एवं यो विज्ञाने तिष्ठन्नित्यादिना प्रकारेण सर्वैर्बोध्यः तस्मादधिदैवादिष्वंतर्यामी परमा
त्मेति सिद्धं २० अदृश्यत्वादिगुणको धर्मोक्तेः २१ पूर्वं प्रधानविरोधि द्रष्टृत्वादिधर्मवशात्प्रधानमंतर्यामीत्युक्तं नहि तद्विरो न
धिधर्माणामत्राश्रवणात्प्रधानमेवादृश्यत्वादिगुणको भूतयोनिः स्यादिति प्रत्युदाहरणसंगत्यास्यारंभः अथर्वणवाक्ये
समाम्नायते अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं म
सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यंति धीरा इत्यादि अस्यार्थः पूर्वमपरा ऋग्वेदादिलक्षणा विद्योक्ता तदानंतर्यमथशब्दार्थः
सू यया तदक्षरमधिगम्यते सा परा उत्कृष्टफलका विद्येत्यर्थः अक्षरस्य वर्णसमुदायपदत्वं वारयति यदिति अद्रेश्यं अदृश्यं ज्ञानेंद्रिया
गम्यं अग्राह्यं कर्मेंद्रियाविषयः अगोत्रं वंशशून्यं अवर्णं जातिहीनं न केवलमिंद्रियाविषयः किंतु तद्रहितं चेत्याह अचक्षुरिति
न विद्येते चक्षुःश्रोत्रे यस्य तत्तथा इदं च ज्ञानेंद्रियोपलक्षणं कर्मेंद्रियाभावमाह तदिति पाणी च पादौ च पाणिपादं तद्यस्य नास्ति
तत्तथा उपलक्षणमेतत्कर्मेंद्रियाणां नित्यमनाशोपलक्षितं विभुं प्रभुं सर्वगतं सर्वकल्पनाधिष्ठानं सुसूक्ष्मं दुर्ज्ञानत्वात् तदव्य
यं नाशाभावात् यत्तद्यथोक्तमक्षरं भूतयोनिं यथा परिपश्यंति धीराः सा परा विद्येत्यन्वयः तत्र संशयः किमदृश्यत्वादिगुण
वृ को भूतयोनिः प्रधानं शारीरो वा परमात्मा वेति अदृश्यत्वादीनां प्रधाने संभवात्प्रधानमिति प्राप्ते ब्रूमः अदृश्यत्वादिगुणको
धर्मोक्तेः अदृश्यत्वादिगुणको भूतयोनिः परमात्मैव कुतः धर्मोक्तेः यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नाम
रूपमन्नं च जायते इतीश्वरधर्मस्य सर्वज्ञत्वादेर्भूतयोनौ निर्देशादित्यर्थः सामान्यतः सर्वज्ञत्वं विशेषतः सर्ववित्वं यस्य ज्ञान

मु.उ. मेवतत्परस्मादक्षरादेतत्कार्यरूपं ब्रह्म हिरण्यगर्भः सूक्ष्मभूतात्मकं नाम स्थूलभूतात्मकं रूपं च व्रीहियवादि सर्वं भौतिकम॰
२६ न्नं च जायते इत्यर्थः ननु अक्षरात्परतः पर इति श्रुतेरक्षराद्भूतयोनेः परः अन्यः सर्वज्ञत्वं श्रूयते न भूतयोनिरिति चेन्न येनाक्षरं पुरु
षं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति येन ज्ञानेनाक्षरं भूतयोनिं सर्वज्ञं पुरुषं सत्यं वेद तां ब्रह्मविद्यामुपसन्नाय शि
नाय प्रोवाचाचार्यः अव्याकृतादिरूपाक्षरात्परतः परस्तु उच्यमानः परो न भूतयोनेः किं तर्हि उच्यते किं तु अक्षरादि विद्यानिर्देशः
ततः पर इति न विरोधः किं च द्विविधविद्यासम्बन्धात्मकभूतयोनिविषयायाः परत्वं प्रमाणं भूतयोनेर्ब्रह्मत्वं गमयति न हि ब्रह्मवि
द्यातोऽन्या विद्या परा भवितुमर्हति मोक्षफलकत्वात्तदात्मकपरत्वस्य ब्रह्मविद्याया एव संभवात् ब्रह्मविद्योपक्रमे अप्रमाणमप
रविद्यां ऋग्वेदादिलक्षणां कर्मविद्यामनित्यफलकत्वेन निंदति च नित्यफलकब्रह्मविद्याप्रशंसायै तस्मात्परविद्याविषयभूतमक्ष
रं भूतयोनिर्ब्रह्मैव नेतरदिति गम्यते प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयो येऽभिनंदंति मूढा जरामृत्युं ते पु
नरेवापि यंतीति निंदित्वा च कर्मविद्यां ततो विरक्तस्य ब्रह्मविद्याधिकारं दर्शयति परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्ना
स्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति अयमर्थः प्लवं तेन गच्छंतीति प्लवा विनाशिनः
तस्मिन्हि ते हि शब्दः अत एवादृढाः के ते यज्ञरूपा यज्ञो रूपमुपाधिर्येषां ते तथा ऋत्विगादयोऽष्टादश ऋतुषु याजयंतीति ऋत्विजः षो
डश यज्ञोपाधिकाः तद्वत्पत्नी यजमानश्च यज्ञोपाधिकौ एवं अष्टादश यज्ञरूपाः क्षयिफलकत्वादवरं जघन्यं कर्म येषु श्रुत्याभिहि
तं एतदेव कर्म श्रेयो हेतुर्न ब्रह्मधीरिति ये मूढा हृष्यंति ते पुनर्जरापूर्वं मरणमेवाप्नुवंतीत्यर्थः कर्मजन्यान्लोकान्ब्रह्मलोकादीनाअ मं २
नित्यतया परीक्ष्य ज्ञात्वा निर्वेदं वैराग्यमायात् गच्छेत् कथं नास्त्यकृतो मोक्षः कृतेन कर्मणा अहेतुर्नित्यफलार्थी तस्मात्किं कर्मणेति एप
२६

विरक्तः सन्ननंतस्य ब्रह्मणो ज्ञानार्थं गुरुपादोपसर्पणं कुर्यात्तत्कृत्वा मुक्तिसाधनज्ञानाय श्रवणादि कुर्यादित्यर्थः रिक्तहस्तस्तु नोपेया
मनस्य २ द्राजानं देवतां गुरुमित्यादिनात्तहस्तत्वं निषिद्धत्वात्समित्पाणिरित्युक्तं श्रोत्रियमित्यादिनाध्ययनहीनस्य कर्मिणो वा गुरुत्वं वारयति एक
मेति स्मानंतो विरक्तः साधिकारोऽक्षरस्य विद्या ब्रह्मविद्येति फलितं तस्माददृश्यत्वादिगुणकः परमात्मा २१ अपि च विशेषणभेदव्यप
देशाभ्यां च नेतरौ २२ अदृश्यत्वादिगुणकः परमात्मैव नेतरौ प्रधानजीवौ कुतः विशेषणात् दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्य
जः अप्राणो ह्यमनाः शुभ्र इत्यादिना दिव्यत्वादिविशेषणश्रवणादित्यर्थः प्रधाननिरासे हेत्वंतरमाह भेदेति अक्षरात्परतः पर इति
प्रपंचोपादानस्याव्याकृतस्येश्वरशक्तिभूतस्याक्षरविकृतस्य जडस्य परमात्मनश्च भेदेन व्यपदिष्टत्वादित्यर्थः अव्याकृतस्याक्षरत्व
स्य कार्यव्यापित्वेन परत्वं स्वविकारापेक्षयेति द्रष्टव्यं दिव्य इत्यादेरयमर्थः दिव्यः स्वयंज्योतिः अमूर्तः निरवयवः पुरुषः पूर्णः १
वाह्यं कार्यं अभ्यंतरं कारणं ताभ्यां कल्पिताभ्यां सहाधिष्ठानत्वेन तिष्ठतीति सबाह्याभ्यंतरः सर्वकल्पनाधिष्ठानमित्यर्थः अत —
वा अजः कूटस्थः न ह्येतादृशविशेषणानि अव्यक्तजीवे संभवंति तस्मात्परमात्मैव भूतयोनिः २२ रूपोपन्यासाच्च २३ किं च भू
तयोनिः परमात्मैव नेतरो विसनुषंगः कुतः रूपोपन्यासात् रूपं सर्वविकारात्मकं शरीरं तस्योपन्यासादित्यर्थः अक्षरात्परतः रा
त्यस्यानंतरमेतस्माज्जायते प्राण इत्यादिना प्राणादिपृथिव्यंतानां सृष्टिमुक्त्वा तस्यैव भूतयोनेः सर्वकार्यात्मकं रूपमुपन्यस्यति श्रुतिः
अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतांतरात्मेति १
अग्निर्द्युलोकः असौ वाव लोको गौतमाग्निरिति श्रुतेः विवृता वेदाः वागित्यन्वयः पद्भ्यामिति प्रथमार्थे पादौ पृथिवी यस्यै १
तादृशशरीरः स एष सर्वभूतानामंतरात्मेत्यर्थः न ह्येतादृशरूपोपन्यासो जीवाव्यक्तयोः परिग्रहे घटते परमात्मनस्तु सर्वात्म

सू° २१

कत्वात्संपुज्यते अस्य सूत्रस्य वृत्तिकारमतेनैतावानर्थः प्रदर्शितः शंकरभगवत्पादास्तु अग्निर्मूर्द्धेति वाक्यस्य जायमानमध्यपा
तो जायमानहिरण्यगर्भरूपसूत्रात्मपरत्वेन परमात्मपरत्वमिति वदंति तथाहि एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति पूर्वं प्राणादीनां सृष्टिरुक्ता तत्र यो तत्रापि तस्मादग्निः समिधो यस्य सूर्य इति यस्य द्यो
लोकादेः सूर्यः समिधोग्निरिव भासकः यद्वा अग्निर्द्युलोकः यस्य सूर्य एव समिधस्तस्मादिस एव समिदिति श्रुतेः सोपि तस्माद्देव ति
जायत इत्यर्थः एवं पूर्वमुत्तरत्र च जायमानानां निर्दिष्टत्वादग्निर्मूर्द्धेति वाक्यं जायमानहिरण्यगर्भपरमेवं जायमानहिरण्यगर्
भस्यात्मत्वमुक्तमिति श्रुत्यंतरेप्युच्यते हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां कस्मै दे
वाय हविषा विधेमेति समवर्त्तत अजायत जातः सन् भूतजातस्य पतिर्बभूव भूतग्रामस्य कस्मै हिरण्यगर्भाय विधेम परिचरेम
सूत्रात्मत्वमुक्तं तद्योनिः परमात्मैव कुतः [illegible] पुरुष एवेदं विश्वं कर्म सादिना सर्वा[illegible]त्मकरूपोपन्यासादिति सर्वं कर्म[illegible]साध्यं त
पो ज्ञानं च पुरुष एवेत्यर्थः तस्माददृश्यत्वादिगुणको भूतयोनिः परमात्मनिर्विशेषो ज्ञेय इति सिद्धं २३ वैश्वानरः साधारणशब्द
विशेषात् २४ अत्र रूपोपन्यासप्रसंगात् त्रैलोक्यदेहो वैश्वानरः स्मृतो विचार्यत इति प्रसंगसंगतिः यद्वा पूर्ववाक्योपक्रमस्यादृश्य
त्वादिसाधारणधर्मस्य वाक्यशेषस्य सर्वज्ञत्वाद्युक्त्या ब्रह्मविषयत्वमुक्तं तर्हि तद्वदेवेहापि उपक्रमस्य साधारणशब्दस्य वाक्य त्व ४
शेषस्येहासाधारणेन गत्या प्रतिद्वंद्वनुगृहीतया जाठराग्निपरत्वमस्त्विति दृष्टांतसंगतिः को न आत्मा किं ब्रह्मेत्यात्मानमेवेमं वैश्वा
नरं संप्रत्यध्येषि तमेव नो ब्रूहीत्युपक्रम्य यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु
सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदे

कायस्य ४
पाश्चर्यकस्य
भोगभूमिषु
सर्वदाध्या याति
देहमध्ये
दाम २१
भोगेषु
सर्वज्ञातारं २
त
नाना मार्गगमनं स्वभावो वायुः १

आकाश १ छन्दस्थानं जलं

हो वहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि वर्हिर्हृदयं गार्हपत्यो मनोन्वाहार्यपचन आस्यमाहवनीय इत्यादि अ
ध्यायः आत्मनोत्तहारित्वाभिप्रायेणलप दंब्रसरणं परोक्षत्वार्थमात्म परं प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलाः समेत्य मीमां
सां चक्रुः को न आत्मा किं ब्रह्मेति ते च निश्चयार्थमुद्दालकमाजग्मुः सोपि सम्यङ्न वेदेति तेनोद्दालकेन सह वैश्वानरोपमिति निश्च ति
यार्थं कैकेयराजानमश्वपतिमागत्योचुः आत्मानमित्यादि संप्रत्यध्येषि तं वदाध्यायमिति ते च कैकेयराजा द्युलोकसूर्यवाय्वाका
शवारिपृथिवीनां मध्ये द्युलोकादिरेक एव वैश्वानर इति मीमांसाकाले विवदमानाः प्राचीनशालादयः षडृषयो मत्समीप
मागता इति ज्ञात्वा तादृशविपरीतबुद्धिनिरासेन सम्यग्वैश्वानरबुद्धिं जिग्राहयिषमाणो नेव पप्रच्छ औपमन्यव कं त्वमात्मानमु हे प्राचीनशाल
पास्स इत्यादिना पृष्टाश्च ते तत्र तत्रैकैकमृषिर्द्युलोक एव वैश्वानर इत्युवाच अन्यस्तु सूर्यो वैश्वानर इत्येवं क्रमेण पृथिवीपर्यन्तमेकै
कस्य वैश्वानरत्वं श्रुत्वा तेषां द्युसूर्यादीनां क्रमेण सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयित्वपादत्वगुणयोगं विधाय
म स्वेकं वैश्वानरपदसं मूर्द्धपातान्धत्वप्राणोत्क्रमण देहशीर्णतावस्तिभेदपादशोषणदोषं निर्दिश्य तेषामेव द्युसूर्यादीनां वैश्वा
नरपुरुषमिति मूर्द्धादिभावमुक्त्वा कृत्स्नवैश्वानरोपासनमुपदिशति यस्त्वेतमित्यादिना अभिमु[illegible]न विश्वमिमीते जानातीत्यभि स्वे
विमानः तं प्रादेशपरिमाणमुपास्ते पतत्स्य सर्वलोकाद्याश्रयफलमित्यर्थः लोकाभोगाश्रयः भूतानि तद्रूपाः यः भोक्तारः
त्वमात्मानमिति भेदः तत्र सर्वविधिफलमन्नपाद्यार्थः ध्यानफलमुक्त्वा ध्येयमाह तस्येति सुतेजस्त्वगुणो द्यौर्वैश्वानरस्य मूर्द्धा वि न
श्वरूपत्वगुणकः सूर्यश्चक्षुः एष शुक्ल एष नील इत्यादि श्रुतेर्विश्वरूपत्वबोध्य पृथग्वर्त्मा नानावर्त्मगमनमात्मास्वभावो यस्य
वायोः स तथा नानागतित्वगुणो वायुः प्राणः बहुलत्वगुण आकाशः संदेहः देहमध्यमित्यर्थः रयिर्धनं तद्गुणा आपोऽस्य वस्तिः

नै

सू.वृ. सूत्रस्थाने वैश्वानरस्येहोमाधारत्वसंपादनार्थमुरस्त्वेत्यादि एवं सति वैश्वानरशब्दस्य अयमग्निर्वैश्वानरो योयमंतः पुरुष इत्या
२८ दौ जाठरे विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादावग्निसामान्ये वैश्वानरस्य सुमतौ स्याम राजा हि कं भु
वनानामभिश्रीरित्यादावग्निशरीरायां देवतायां च प्रयोगदर्शनात् उपक्रमे च को न आत्मेत्युपक्रमाच्चेति संशयः किमत्र वैश्वा
नरो जाठरउताग्निसामान्यउताग्निशरीरा देवता अहोस्विच्छारीरः अथवा परमात्मेति अस्यार्थस्तु पुरुषे पुरुषाकारे देहे विश्व
स्मै भुवनाय वैश्वानरमग्निमह्नां केतुं चिह्नस्वरूपमकृण्वन् कृतवन्तो देवास्तदुद्भवेदिनव्यवहारादित्यर्थः वैश्वानरस्याग्न्यधिष्ठान
स्य देवस्य सुमतौ शोभनबुद्धौ वयं स्याम भवेम तस्यात्मद्विषया सुमतिर्भवत्वित्यर्थः अत्र हेतुः राजा हीति हि यस्माद्भुवनानाम
यं राजा कं सुखहेतुरभिमुखाश्रीरस्येत्यभिश्रीरीश्वरः तस्मात्तस्य सुमतौ स्यामेति स्तुतिवाक्यार्थः तत्र जाठरादौ वैश्वानरशब्दस्य
प्रसिद्धत्वाज्जाठरादिरेव वैश्वानर इति प्राप्ते ब्रूमः वैश्वानरः परमात्मैव कुतः साधारणशब्दविशेषात् साधारणशब्दयोरपि वि
शेषः साधारणशब्दविशेषस्तस्मादित्यर्थः जाठराग्निसामान्यतद्देवतासु साधारणो वैश्वानरशब्दः जीवपरयोः साधारण आ
त्मशब्दः तयोर्वैश्वानरात्मशब्दयोर्जाठरादौ जीवादौ च साधारणयोरपि सतोः परमात्मपरत्व एव विशेषोवगम्यते तस्यैव वा एत
स्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजा इत्यादावुक्तद्युमूर्द्धत्वादेः सर्वात्मकपरमात्मपरिग्रह एवोपपन्नतरत्वात् तस्माद्वैश्वानरः पर
मात्मा २४ स्मर्यमाणमनुमानं स्यादिति २५ किंच वैश्वानरपदस्य परमात्मपरत्वे स्मर्यमाणं स्मृत्युक्तरूपं अनुमानं स्यात् अनुमा
पकं लिंगं स्यादित्यर्थः यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः इत्यस्याः स्मृतेः
शरीरात्मकरूपप्रतिपादनपराया उदाहृतश्रुतिरेव मूलं मूलांतरकल्पने मानाभावात् तथा च स्मृतेः परमेश्वरस्यैवोक्तत्वात्तन्म राम २८

वैश्वानरः साधारणशब्दविशेषात् ७+

लभ्युतेो विद्यमानवैश्वानरशब्दः परमात्मपर एवेति तत्र सर्वपरत्वे श्रुतिशब्दो हेतुः यस्मादेवं लिंगमस्ति तस्माद्वैश्वानरः परमात्मैवे
ति २५ शब्दादिभ्योऽन्तः प्रतिष्ठानाच्चेति चेन्न तथा दृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते २६ ननु वैश्वानरेण परमात्मा कुतः
शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च शब्दस्तावद्वैश्वानरशब्दो न परमात्मपरः जाठरे रूढत्वात् आदिशब्दाद्धृदयं गार्हपत्यस्तस्याग्नि
द्य त्रेताकल्पनं तद्यत्प्रथमम्मागच्छेत्तद्धोमीयमित्यादिना प्राणाहुत्याधारता संकीर्तनं च गृह्यते एतेभ्यो हेतुभ्यो जाठर एव वैश्वा- वे
नरः किंच अन्तः प्रतिष्ठानाच्च पुरुषेऽन्तः प्रतिष्ठितं वेदेति वैश्वानरस्यान्तः प्रतिष्ठानश्रवणात् इदं च जाठरे संभवति न च पूर्ममूर्द्धत्वाद्य
नुपपत्तिः अग्निसामान्यात्मकभूताग्निपरिग्रहे तत्सोपपत्तेः द्युलोकादिसंबंधस्य तस्मिन्मंत्रेणावगतत्वात् यो भानुना पृथिवीं
द्यामुतेमामाततान रोदसी अंतरिक्षमिति मंत्रः इमां पृथिवीमुत द्यामपि द्यावापृथिव्यावेव रोदसी यो भानुना रूपेणाततान व्या
प्तवान् अंतरिक्षं तथा मध्यं चाततान स देवोऽग्निर्द्युलोकाद्यवयवो वाच्य इति मंत्रार्थः तस्मान्न वैश्वानरः परमात्मेति चेन्नाय
दोषः कुतः तथा दृष्ट्युपदेशात् तथा जाठररूपेण परमेश्वरस्य दृष्टेरुपासनोपदेशादित्यर्थः मनोमयः प्राणशरीरो भारूप इति या
वत् यद्वा तथा तस्मिन् जाठरे परमेश्वरदृष्टेः परमात्मनो ब्रह्मत्वमुपासीतेति निर्वदित्यर्थः ननु जाठर एव मुख्यो वैश्वानरोऽस्तु तत्राह
असंभवादिति मूर्द्धैव सुतेजा इत्यादेर्जाठरे संभवादित्यर्थः न च भूताग्नौ तत्संभवः अस्तु नस्तत्रैव स्यात् अपि च पुरुषमपि चैनं वैश्वा-
नरं वाजसनेयिन अधीयते स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेदेति
परमेश्वरस्य सर्वात्मकत्वात् पुरुषत्वं च पुरुषेऽन्तः प्रतिष्ठितत्वं च सर्वमप्युपपद्यते पुरुषविधमपि चैवमधीयते इति सूत्रपाठे अय
मेवार्थः न हि जाठरस्य पुरुषविधत्वं संभवति परमात्मनस्तूपासनार्थं सर्वात्मकत्वाद्विग्रहः यथा चैतत्तथा स्पष्टयिष्यामः संपत्ते

सू.टी. रिति मत्ते २६ ननु द्युमद्वारिकं प्रदर्शितमंत्रवर्णाद्भूताग्नेः संभवति नैवं शरीरापादेवतायावाऐश्वर्ययोगादित्यत आह अ
२९ नत एव न देवता भूतं च २७ देवता च भूतं च देवताभूतं एकवद्भावादुभयमपि न वैश्वानरः कुतः अत एवोक्तेभ्यो हेतुभ्यो न हि विका
रस्याग्नेर्विकाराणां रघुलोकाद्यात्मकत्वं संभवति अग्निशरीरापादेवतायाअपि न संभवति ईश्वराधीनैश्वर्यत्वात् तस्मात् सर्वा
त्मकः परमात्मैव वैश्वानरः २७ साक्षादप्यविरोधं जैमिनिः २८ पूर्वं जाठराग्निप्रतीकत्वमग्न्यादिशब्दस्याभ्युपेत्य जाठरोपाधिकं वा जा
ठराग्निप्रतीकं वा ब्रह्मोपास्यमित्युक्तं इदानीं विनैवोपाध्यादिकल्पनं साक्षादेव परमेश्वरोपासनपरिग्रहे विरोधाभावं जैमिनिराचा
एवं र्यो मन्यते पूर्वापरपर्यालोचनया वैश्वानरस्य ब्रह्मत्वे निर्णीते वैश्वानरशब्दाग्निशब्दश्चकेनचिद्योगेन ब्रह्मपरतया नेतव्यर
नितरां स्वयं विश्वश्चासौ नरश्चेति विश्वनरः सर्वात्मकत्वात् सर्वेषां नरः कर्तेति वा सर्वकारणत्वात् विश्वे नरा नियम्या अस्येति वा ग
सर्वेश्वरत्वात् विश्वनर एव वैश्वानरः राक्षसवायसादिवत् स्वार्थे तद्धितः एवमग्निः परमात्मा अगि धातोर्गत्यर्थकस्य निप्र
त्ययान्तस्याग्निरिति रूपं तत्रागयति गमयति जगतो जन्म प्रापयतीत्यग्निरग्रणीरुक्तः एवं च परमात्मनोऽग्रणीत्वादग्नि
त्वमिति तस्माद्वैश्वानरः परमात्मोपास्य इति सिद्धं २८ ननु परमात्मपरिग्रहे कथं प्रादेशमात्रश्रुतिरित्याशंकां तां व्याख्यातु
मारभते अभिव्यक्तेरित्याश्मरथ्यः २९ अनवच्छिन्नस्यापि परमात्मनः प्रादेशमात्रत्वमुपपद्यते कथं अभिव्यक्तेः उपासका
नामनुग्रहाय परमेश्वरो हृदयाद्युपासनास्थानेषु प्रादेशपरिमाणोऽभिव्यज्यते किलेत्याश्मरथ्य आचार्यो मन्यते २९ अ
नुस्मृतेर्बादरिः ३० प्रादेशमात्रहृत्पुण्डरीकस्थेन मनसा अनुस्मृतेर्ध्यानात् प्रादेशमात्र इत्युच्यत इति बादरिराचार्यो मन्यते यथा
प्रस्थपरिमिता यवाः प्रस्था इत्युच्यन्ते तद्वत् ३० संपत्तेरिति जैमिनिस्तथा हि दर्शयति ३१ मूर्द्धप्रभृतिचिबुकान्ते प्रादेशमात्रे एम
२९

प्रादेशमात्रत्वं संपन्नं ततः प्रादेशमात्रत्वसंपत्तेः प्रादेशमात्रश्रुतिरुपपद्यत इति जैमिनिराचार्यो मन्यते अ
स्मिन्नर्थे श्रुत्यंतरसंवादमाह सूत्रकारः तथाहि दर्शयति वैश्वानरस्य +१
वैश्वानरस्योपास्यत्वप्रतिपादनात् परमेश्वरस्य प्रादेशमात्रत्वसंपत्तिद्वारा श्रुत्यंतरमपि दर्शयतीत्यर्थः तथाहि समानप्रकर
न णं वाजसनेयिब्राह्मणं द्युप्रभृतीन् पृथिवीपर्यंतान् त्रैलोक्यात्मनो वैश्वानरस्यावयवान् अध्यात्मं मूर्धादिषु चिबुकपर्यंतेषु प्रसि
द्धपुरुषावयवेषु संपादयन् परमात्मनो वैश्वानरस्य प्रादेशमात्रत्वसंपत्तिं दर्शयति एवं च पुरुषावयवेषु वैश्वानरस्य संपादनात् सु
हमविधत्वं पुरुषावयवेषु संपादितस्य वैश्वानरस्य स्थितेः पुरुषे अंतः प्रतिष्ठितत्वं यद्यपि कार्यकारणसंघातरूपस्य पुरुषस्य पा
दवदवयवसमुदायरूपत्वान्मूर्धादिचिबुकांतेषु कतिपयावयवेषु स्थितस्य वैश्वानरस्य न पुरुषे अंतः स्थत्वं तथापि पादवदवयवस
मुदायात्मके पुरुषे समुदायिनो मूर्धादिचिबुकांतस्यावयवस्य शाखाया इव वृक्षे विद्यमानत्वात्तन्निष्ठस्य वैश्वानरस्य पुरुषस्य
त्वं व्यपदिश्यते शाखास्य पक्षिणो वृक्षनिष्ठत्वव्यपदेशवदिति रहस्य ब्राह्मणोपलब्धे प्रादेशमात्रमिव ह वै देवाः सुविदिता अभि
संपन्नास्तथा तु व एतान् वक्ष्यामि यथा प्रादेशमात्रमेवाभिसंपादयिष्यामीति स होवाच मूर्धानमुपदिशन्नुवाचैष वा अतिष्ठा वैश्वा
नर इति चक्षुषी उपदिशन्नुवाचैष वै सुतेजा वैश्वानर इति नासिके उपदिशन्नुवाचैष वै पृथग्वर्त्मात्मा वैश्वानर इति मुख्यमाकाशमु
पदिशन्नुवाचैष वै बहुलो वैश्वानर इति मुख्या अप उपदिशन्नुवाचैष वै रयिर्वैश्वानर इति चिबुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वा
नर इति अस्यार्थः परमेश्वरमप्रादेशमात्रमपि संपद्य प्रादेशमात्रमिव सम्यग्विदितवंतो देवास्तमेवेश्वरं पूर्वमभिसंपन्नास्तेना
वो युष्मभ्यं तथा द्युप्रभृतीनवयवान् वक्ष्यामि यथा प्रादेशपरिमाणं वैश्वानरं संपादयिष्यामीति प्राचीनशालादीन् प्रति अश्वपतिः
कैकेयो राजोवाच किं कुर्वन्नित्युक्ते स्वस्य मूर्धानमुपदिशन् कराग्रेण दर्शयन् एष वै भूर्लोकादीनतीत्य तिष्ठतीत्यतिष्ठा द्यौर्वैश्वान
रस्य अवयव इति प्रसिद्धं मनुष्यमूर्धनि अधिदैवं यो मूर्धा द्युलोकं तद्दृष्टिः कर्तव्येत्युवाच एवमेव सर्वस्य चक्षुषी दर्शयन् सुतेजाः

सू.वृ. सूर्य्यो विश्वानरस्य चक्षुरीति प्रसिद्धं चक्षुषो वैश्वानरस्य अधिदैवं पद्यादित्सारूप्यं च सुतस्तदृष्टिः कर्त्तव्येत्युवाच एवमग्रेपि तावत्पर्यन्तेषु
२० वैश्वानरावयवदृष्टिरिति द्रष्टव्यं द्व्यग्र[illegible]त्मा वायुर्वैश्वानरस्य प्राणः मुखं सुमुखाच्छिन्नं पन्नभस्तस्मिन्नध्यात्मनभसि यो
ऽधिदैवं बहुल आकाशो वैश्वानरस्य देहमध्यात्मकाव बहुलदृष्टिरित्युवाचेत्यर्थः मुखाः स्वमुखसंभवात्तासु सवैश्वानरस्य व म
पि स्तिभूतोरस्वाद्यापा आपस्तदृष्टिरित्युवाच एवंस्थितिचिबुकेऽधरमुखफलके प्रतिष्ठापदवाच्यो वैश्वानरपादभूता पृथिवी द
ष्टव्येति २१ आमनन्ति चैनमस्मिन् २२ अस्मिन्मारदेशपरिमाणमूर्ध्वचिबुकान्तराले एनं परमेश्वरं जाबाला आमनन्ति अतोपि
प्रादेशमात्रश्रुतिरुपपन्नेत्यर्थः एवमामनन्ति य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः कस्मिन् प्रतिष्ठित
इति वरणायां नास्यां मध्ये प्रतिष्ठित इति का वै वरणा का च नाशीति सर्वाणीन्द्रियकृतानि पापानि वारयति नाशयतीति वरणाना
शीति कतमच्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः संधिः स एष द्युलोकस्य परस्य च संधिर्भवतीति अस्यार्थः य एषः प्रसिद्धः
पूर्णमात्मानं तमव्यक्तः स्वरूपेणानभिव्यक्तः दुर्ज्ञेय इति यावत् तं कथं विजानीयामिसत्त्रिमश्चेष्टाते यां [illegible] स्योत्तरं स इति स हि परमा रूपेण
त्मा जीवात्मना विमुक्तेऽव्यवहारतः संसारिणि प्रतिष्ठितः परस्यैव प्रसक्तादित्यर्थः पुनरत्रिरपृच्छत् स इतियाज्ञवल्क्योऽवोचत् वरणाया
मिति वरणादिपदार्थं वदन् पदे निर्वक्ति सर्वाणीति सर्वाणीन्द्रियवृत्तिकृतान् दोषान् वारयति तेन वरणा भ्रुवाविदित्यर्थः तान्दो
षान्नाशयतीति नाशीति तथा च निषम्य जीवद्वाराणि पंतुरीश्वरस्याधिष्ठानं नासा भ्रुवोः पापनाशकत्वमिति सिद्धं तत्रास्यान्यवि नत्या २
शेषजिज्ञासया पृच्छति कतमच्चेति पूर्वोक्तमध्यशब्दार्थं स्पष्टयति भ्रुवोरिति तदेव स्थानमित्यर्थः स संधिर्द्युलोकस्य स्वर्गस्य परस्य
च ब्रह्मलोकस्य संधित्वेन ध्येयः परस्यात्र स इति तस्मात्परेश्वरोपास्त्यं परं वैश्वानरवाक्यमिति सिद्धं इति श्रीमद्ब्रह्मसूत्रवृत्तौ ब्रह्माम

मे

तर्वर्षिरूपोमप्रथमाध्यायस्यद्वितीयःपादः २ द्युभ्वाद्यायतनंस्वशब्दात् १ पूर्वत्रैलोक्यात्मावैश्वानरःपरमात्मेत्युक्तंतर्हित्रैलोक्या
यतनमन्यदित्याशंक्यसमाधानादाक्षेपसंगतिः यद्वोपक्रमस्यसाधारणशब्दस्याकाशेशब्दलिंगेनद्युमूर्द्धत्वादिनाब्रह्मपरत्व स्य
दिहाप्युपक्रमस्थसाधारणायतनत्वस्यवाकाशेषस्यसेतुत्वस्यापिशिथिलेप्रधानादौसेतुत्वादेर्व्यवस्थास्त्वितिदृष्टांतसंग
तिःप्रायशोनिर्विशेषब्रह्मणिअस्मिन्पादेवाक्यानांसमन्वयप्रतिपादनाच्छ्रुत्यध्यायपादसंगतयोबोध्याः अत्रपूर्वपक्षेप्रधा च
नाद्युपास्तिःफलंसिद्धांतेब्रह्मप्रमितिरितिविवेकः आथर्वणेश्रूयते यस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैः
तमेवैकंविजानथ [redacted] आत्मानमन्यावाचोविमुंचथअमृतस्यै
षसेतुरिति अस्यार्थः लोकत्रयाधिष्ठानलोकात्मापंचीकृतभूताधिष्ठानत्वमाहयस्मिन्निति कार्यब्रह्माख्यसमष्टिंतःकरणस्या
त्मन्येव कल्पितत्वमाहमनइति इंद्रियसमष्टिदेवतानांतत्रैवकल्पितत्वंसूचयति सहेति प्राणैरिंद्रियाधिष्ठानदेवैःचकारेण
भूतसूक्ष्माविद्याजीवांतर्यामिणामध्यस्तत्वंध्वनितंसविलासांप्रकृतिमायाख्यांश्रुत्युक्तंतत्कोगिनाविलाप्यतमेवाधिष्ठान
भूतमद्वयमात्मानंविजानथेतिमुमुक्षून्प्रत्याहमाताश्रुतिस्तमेवेति वाच्यवाचककल्पनानामेकत्वसाक्षात्कारहेतुधर्ममाह अन्या —
इति एषसाक्षात्कारःसविलासाविद्यानिवृत्तिलक्षणामृतत्वस्यसेतुःप्रापकइत्याह अमृतस्येति विजानथेत्यनेनोक्तः
साक्षात्कारःएषइत्युच्यते अमृतस्यअमृतत्वस्य अत्रद्युभ्वादीनामोततत्वश्रवणात्किंचिदायतनंप्रतीयतेतत्किंप्रधानमुतजी
वउतहोस्विद्ब्रह्मेतिसंशयः तत्रप्रधानादिरितिप्राप्तेब्रूमः द्युभ्वाद्यायतनं द्यौश्चभूश्चद्युभुवौद्युभुवावादीयस्यद्योःपृथिव्यंतरि
क्षमित्येवमात्मकस्यतद्द्युभ्वादितदायतनंब्रह्मैवकुतःस्वशब्दात् स्वस्यपरब्रह्मणोवाचकोयआत्माशब्दस्तस्मादित्यर्थः

स्वशब्दात् २

सू.वृ. तमेवैकं विजानथ आत्मानमित्यात्मशब्दश्रवणादिति १ मुक्तोपसृप्यव्यपदेशात् २ किंच द्युभ्वाद्यायतनं ब्रह्मैव कुतः मुक्तैरुप-
३१ सृप्यं मुक्तोपसृप्यं भावप्रधानो निर्देशः मुक्तोपसृप्यत्वस्य व्यपदेशादित्यर्थः यद्वा मुक्तैरुपसृप्यं प्राप्यं यत्तस्यैवात्र निर्देशादित्यर्थः
मुक्तोपसृप्यत्वव्यपदेशादिति पाठे न कश्चिदायासः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परा- श्र
रे यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति इदं च मुक्तो-
पसृप्यत्वं ब्रह्मणः एव श्रुत्यंतरे प्रसिद्धं यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति अपि
च तमेवैकं विजानथ आत्मानमन्या वाचो विमुञ्चथेति वाग्विमोकपूर्वकं विज्ञेयत्वं ब्रह्मलिंगं श्रुत्यंतरे दृष्टं तमेव धीरो विज्ञाय
प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदिति हृदयग्रन्थिः मिथ्याज्ञानरागद्वेषादिः तद्रहितो भवेत् छि-
न्नसंशयः सन् क्षीणकल्मषः तस्य हृदये परमात्मा प्रकाशत इत्यर्थः दृष्टे इति निमित्तसप्तमी तद्दर्शनार्थमित्यर्थः यद्वा यथाश्रु-
त एवार्थः यथा नद्यः स्वनामरूपाभ्यां विनिर्मुक्ताः समुद्रं प्राप्य तदात्मना तिष्ठन्ति तथा विद्वानपि साक्षात्कृतब्रह्मा नामरूपकार-
णादविद्यातो विमुक्तः परादव्याकृताख्यादज्ञानात्परं अस्पृष्टानर्थं पुरुषं पूर्णं दिव्यमखण्डचिद्घनमात्मत्वेनाप्नोतीति मुक्तोपवगमा- सृप्यत्व ५
र्थः यद्वा ज्ञानावस्थायामस्य विदुषो हृदि स्थिताः कामादयस्तन्मूलाविद्या च निवर्तन्ते पुनर्जन्मसंपादककर्माभावावस्थां वक्तुं अ-
थेति धीरो विवेकज्ञानी विवेकज्ञानमत्र पदार्थज्ञानं प्रज्ञामभेदलक्षणां वाक्यार्थज्ञानं वाक्यार्थज्ञानोत्थेन कर्मकाण्डे वैमुख्यं मुमुक्ष- र्थ
णां कार्यमित्याह नानुध्यायादिति अनात्मार्थशब्दाध्ययनफलमाह वाच इति वाचः इत्येन कण्ठताल्वाहितानाम शब्दस्यानानामुपल-
क्षणं वागादिशोषणमेव बहुशब्दचिन्तनफलमित्यर्थः तस्मात् द्युभ्वाद्यायतनं परं ब्रह्म नानुमानमतच्छब्दात् ३ अनुमीयत इ-

चू

सनुमानंसांख्यपरिकल्पितंप्रधानंनद्युभ्वाद्यायतनंकस्मात् अतच्छब्दात्तस्यप्रधानस्यानुमानस्यशब्दस्तच्छब्दः नसअतच्छब्दः चू
तस्मात्प्रधानप्रतिपादकशब्दस्याश्रवणादित्यर्थः प्रत्युततद्विरोधिशब्दाएवयः सर्वज्ञः सर्वविदित्यादयोवर्त्तन्तइतिभावः २ प्राणभृ
च्च ४ प्राणभृज्जीवोपिनद्युभ्वाद्यायतनंकुतः अतच्छब्दादेवयद्यप्यात्मशब्दःसाधारणः तथापिजीवस्यसर्वज्ञत्वंद्युभ्वाद्यायतनत्वं
चानुमानमसंभवनीयमात्मशब्दस्यातच्छब्दत्वमेव ४ जीवनिरासेहेत्वन्तरमाह भेदव्यपदेशात् ५ नप्राणभृत्द्युभ्वाद्यायतनंकुतः
भेदव्यपदेशात् तमेवैकंविजानथेतिज्ञातृज्ञेयभावेनभेदव्यपदेशादित्यर्थः जीवस्यमुमुक्षुत्वेनज्ञातृत्वात्परिशेषात् ज्ञेयंद्युभ्वा
द्यायतनंपरंब्रह्मेति ५ तत्रैवहेत्वन्तरमाह प्रकरणात् ६ कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीत्युपक्रमात्परमात्मनएव
सं इदंप्रकरणंनहिजीवज्ञानात्सर्वज्ञानंभवति तस्मात्प्रकरणादपिनप्राणभृदित्यर्थः ६ अपिचस्थित्यदनाभ्यांच ७ नप्राणभृत्
द्युभ्वाद्यायतनंकुतः स्थित्यदनाभ्यांस्थितिश्च अदनंचताभ्यामितिपंचमीद्विवचनंद्युभ्वाद्यायतनप्रकृतस्यद्वासुपर्णेतिमंत्रेजीव
स्यादनंपरमात्मनःस्थितिरितिनिर्दिश्यतेतयोरन्यःपिप्पलंस्वाद्वत्तीत्यनश्नन्नन्योअभिचाकशीत्युदासीन्येनस्थितिनिर्दि
श्यतेइदंद्युभ्वाद्यायतनस्यब्रह्मत्वेघटतेनान्यथेति तस्माद्द्युभ्वाद्यायतनंपरंब्रह्मज्ञेयमिति सिद्धं ७ भूमासंप्रसादादध्युपदेशात् ८
पूर्वमात्मशब्दात्द्युभ्वाद्यायतनंब्रह्मेत्युक्तंतरतिशोकमात्मविदित्यत्रब्रह्मण्यप्यात्मशब्दप्रयोगादित्याक्षेपसंगत्यास्यारं
भः पूर्वपक्षेप्राणोपास्तिफलंसिद्धान्तेब्रह्मप्रमितिरिति एवमेवनिर्विशेषवाक्यविचारेपूर्वपक्षेयस्यकस्यचिदुपास्तिःसिद्धान्तेब्रह्म
ज्ञानमेवेतिबोध्यम् छांदोग्येभूमप्रस्तुतंश्रुतंह्येवमेभगवद्दृशेभ्यस्तरतिशोकमात्मविदितिसोहंभगवः शोचामि तंमांभगवाञ्छोकस्य नू
पारंतारयत्वितिनारदेनपृष्टःसनत्कुमारोनामब्रह्मसुपारदृश्वापुनर्नारदः अस्तिभगवोनाम्नोभूयइतिपप्रच्छतस्मात्तरंवाग्वा

स.सू. वनाम्नो भूयसीऽस्ति न याऽस्ति भगवो वाचो भूय इति प्रश्ने मनो वाव वाचो भूय इत्युत्तरं एवं प्राणपर्यन्तं भूयः प्रश्नोत्तरे दृश्येते प्राणोप
३२ देशानन्तरं प्रश्नं विनैवेदं श्रूयते एष तु वा अतिवदति यः सत्येनातिवदतीति भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञा
च से यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पमित्यादि अस्यार्थः
नाल्पे सुखमस्तीति भूमैव सुखं तस्मान्निरतिशयं सुखमिच्छता भूमैव विजिज्ञासितव्यः विशेषेण ज्ञातुमेष्टव्य इति सनत्कुमारेणोक्ते
मुमुक्षुना नारदेनोपसन्नस्य भगव भूमानमेव विशेषेण ज्ञातुमिच्छामीत्याह भूमानं भगव इति भूम्नो लक्षणमाह यत्रेति व्यवहारेती
तं पूर्णं ब्रह्मैव भूमेत्यर्थः लक्षणव्यतिरेकमुखेन स्पष्टयितुं परिच्छिन्नलक्षणमाह अथेति एवं स्थिते संशयः किं प्राणो भूमा उत प
रमात्मेति प्राणो वा आशाया भूयानिति पूर्वं प्राणस्य सन्निधानात्प्राणो भूमेति युक्तं न च तरति शोकमात्मविदिति प्रश्नवाक्ये आत्मो
पक्रमेणात्मप्रकरणात्सन्निधेर्दुर्बलत्वमिति वाच्यं नाम ब्रह्मेत्युपास्त इति समाधानवाक्ये नामादेर्ब्रह्मण एवोपदेशेन प्रश्नस्यात्मश
ब्दस्यापि नामादिपरत्वेन नात्मपरत्वात् आत्मप्रकरणासिद्धेः प्रश्नोत्तरयोरैकार्थ्यनियमात् तस्मात्प्राणो भूमेति प्राप्ते ब्रूमः भूमा
परमात्मैव कुतः संप्रसादादध्युपदेशात् सम्यक्प्रसीदतीति अस्मिन्जीवस्वरूपमिति संप्रसादः सुषुप्त्यवस्था तस्यां चावस्थायां प्राणो
जागर्तीति संप्रसारशब्देन प्राण उच्यते प्राणादूर्ध्वं भूम्न उपदेशादित्यर्थः प्राणोपदेशानन्तरमेष तु वा अतिवदतीति तुशब्देन प्राणवा
दस्यातिवादित्वमुक्त्वा सत्यशब्दवाच्यपरमात्मवादस्यातिवादित्वं ब्रुवन्भूमानमुपदिदेश अतो भूम्नः प्राणादूर्ध्वमुपदेश इति गम्यते
किं च तरति शोकमात्मविदित्यात्मप्रकरणात् भूमा परमात्मा न च प्रकरणासिद्धिः आत्मोपदेशार्थं नामाद्युपदेशेन नाम ब्रह्मेत्युपास्त इत्या
देस्तरति शोकमात्मविदिति प्रश्नोत्तरत्वासिद्धेः अतो भूमा परमात्मा नामादिप्राणान्तमतीत्य सत्यशब्दवाच्यात्मोपदेश इति यावदति राम
अतिवदति यः सत्ये ४ ३२

दुःखसहितसुखनिराकरणेन भूम्नः सुखत्वं दर्शितं ब्रह्मधर्मः एवं यो वै भूमा तदमृतमिति +३

ती

स एषोतिवादीति श्रुत्यर्थः धर्मोपपत्तेश्च ९ किंच यत्र नान्यत्पश्यतीत्यादिनोक्तानां सर्वव्यवहाराभावादिधर्माणां परमात्मन्येवोपप
त्तेः परमात्मैव भूमा यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतेः सर्वव्यवहाराभावस्य परमात्मधर्मत्वेनावगतत्वात् य
मो वै भूमा तत्सुखं नाल्पे सुखमस्तीति भूमैव सुखमिति श्रूयमाणममृतत्वं ब्रह्मधर्मं अतोन्यदार्तमिति श्रुतेः आर्तं आर्तिमद्विना
शीति यावत् एवं स्वमहिम्नि प्रतिष्ठितत्वं सर्वगतत्वं सर्वात्मकत्वं चैते धर्मा ब्रह्मण्येवोपपद्यन्ते तस्मात्प्राणो नोपास्यः किंतु भूमा प
रमात्मा ज्ञेय इति सिद्धं ९ अक्षरमंबरांतधृतेः १० पूर्वस्मिन्सत्यशब्दस्य ब्रह्मणि रूढत्वात् भूमा ब्रह्मेत्युक्तं तद्वदत्राप्यक्षरशब्दस्य वर्णे
षु रूढत्वाद्वर्ण एवाक्षरमस्त्विति दृष्टांतसंगतिः ओंकाररूपोपास्तिः ब्रह्मज्ञानमित्युभयत्र फलं बृहदारण्यके श्रूयते कस्मिन्नु ख
ल्वाकाश ओतश्च प्रोतश्चेति स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वित्यादि अस्यार्थः यदूर्ध्वं दिवो यदधस्तात्पृथि
व्याः यच्चांतरा द्यावापृथिवी इमे यद्भूतं यच्च भवद्यच्च भविष्यत् तत्सर्वं कस्मिन्नोतं प्रोतं चेति गार्ग्या प्रश्ने कृते याज्ञवल्क्येनाकाशे तत्स
र्वमोतं प्रोतं चेति निरूपिते गार्गी पुनरपृच्छत् आकाशो ऽव्याकृताख्यः कस्मिन्नोतप्रोतत्वेन तिष्ठतीति याज्ञवल्क्य आह हे गार्गि त्वया
पृष्टमाकाशस्याधिकरणं तदेतदक्षरमस्थूलादिविशेषणकं ब्रह्मविदो वदंतीति तत्र संशयः किमक्षरशब्देन वर्ण उच्यते उत
ब्रह्मेति अक्षरसमाम्नाय इत्यादावक्षरशब्दस्य वर्णे प्रसिद्धत्वाद्वर्ण एवाक्षरशब्दवाच्य इति प्राप्ते ब्रूमः अक्षरं ब्रह्मैव कुतः अंब
रांतधृतेः पृथिव्यादेराकाशांतस्य विकारजातस्य धारणादित्यर्थः विषयवाक्यार्थकथनसमये अंबरांतधारणं प्रतिपादितं ननु १०
वर्णेन धृतिः प्रधानेपि संभवतीत्यत आह सा च प्रशासनात् ११ सा च धृतिः परमेश्वरस्यैव कर्म नान्यस्याचेतनस्य कुतः प्रशासना न २
वा त् एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्यादिना प्रशासनश्रवणादित्यर्थः प्रशासनं नाम ज्ञाता चेतन अ १

स॰ टी॰ स्यैव नाचेतनस्य प्रधानस्येति तस्मादक्षरं ब्रह्म ११ अन्यभावव्यावृत्तेश्च १ तश्च परमात्मैवाक्षरशब्दवाच्यः तस्यैवेश्वरस्य प्रशास
३३ नं कर्तृकृतः अन्यभावव्यावृत्तेः अन्यस्य प्रधानादेर्भावो धर्मोऽन्यभावः तद्व्यावृत्तेः तद्विपरीतधर्मश्रवणादित्यर्थः तद्वा एतदक्षरं
गार्ग्यदृष्टं द्रष्टृ अश्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञात्रिति द्रष्टृत्वादयो नाचेतने संभवंति तस्माद्द्रष्टृत्वादिसमानाधिकरणप्रशासनवान्
परमात्मैवाक्षरं नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मंतृ नान्यदतोऽस्ति विज्ञात्रिति द्रष्टृ अन्तरनिषेधाच्च न जीवोऽप्यक्ष
रमिति तस्मादक्षरं ब्रह्मैव ज्ञेयमिति सिद्धं १२ ईक्षतिकर्मव्यपदेशात्सः १३ पूर्वमोंकारस्य पूर्वपक्षत्वेन बुद्धिसान्निध्यादस्मिन्नोंकार
ध्यानवाक्यमिह निरूप्यत इति बुद्धिसान्निध्यं संगतिः यद्वा पूर्वमक्षरशब्दस्य वर्णरूपस्यापि जगद्धृतिलक्षणलिंगेन ब्रह्मणीत्वक्षर
त तीति बुद्धस्या अचलत्वादनादित्वाद्व्यापित्वाद्वा योगवृत्तिराश्रिता तद्वदिहापि परशब्दापरिच्छिन्नफलश्रुतिलिंगेन परशब्दस्यापेक्षि
कपरत्वविशिष्टे हिरण्यगर्भे वृत्तिरस्त्विति दृष्टान्तसंगतिः कार्यब्रह्मणोपास्तिः पूर्वपक्षे फलं सिद्धांते परब्रह्मोपास्तिरिति भेदः आ
थर्वणोऽभ्यस्यते एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीति प्रकृत्य यः पुनरेतं त्रिमात्रेणो
मित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेत्यादि अस्यार्थः पिप्पलादो नाम आचार्यः सत्यकामेन पृष्टो व्याचष्टे हे सत्यकाम परं नि
र्विशेषं अपरं च कार्यं ब्रह्म यत्तदेतदेव यदोंकारः स हि प्रतिमेव विष्णोस्तस्य प्रतीकः तस्मात्स्मरणं ब्रह्मात्मना विद्वानेतेनोंकारध्या
नेनायतनेन प्राप्तिसाधनेन परापरयोरेकतरमन्वेतीति यथाध्यानं एकमात्रद्विमात्रं वा हिरण्यगर्भोपास्तिकुर्यादिति दर्शयित्वा ब्रवीति
यः पुनरोमित्येतदक्षरं त्रिमात्रेणेति तृतीयाद्वितीयात्वेन नेया अत्रौंकाराभेदोपक्रमात् तथाविधमक्षरं सत्यं तस्य परं ध्यायीतेति
स उपासकः सूर्ये प्राप्तः सामभिर्ब्रह्मलोकं प्रतिनीयत इति अत्र संशयः किमपरं ब्रह्म ध्यातव्यमुपदिश्यते किं वा परं ब्रह्मेति अपरमिति राम
३३

प्राप्तेऽब्रूमः सः ध्यातव्यः परमात्मैव कुतः ईक्षतिकर्मव्यपदेशात् वाक्यशेषे ध्यातव्यस्येक्षतिकर्मत्वेन व्यपदेशादित्यर्थः स एतस्मा
घनात् ज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत इति सः ध्यातात्मा जीवघनशब्देन ब्रह्मलोक उच्यते सकलजीवाभिमानिहिरण्यगर्भाधारत्वात्
तस्माद्ब्रह्मलोकात् लोकान्तराण्यपेक्ष्य परात्परं पुरुषं परमात्मानमीक्षते साक्षात्करोतीत्यर्थः ईक्षतिपदार्थस्य दर्शनस्य लोके य
थार्थविषयकत्वात् यथार्थस्वरूपपरमात्मैवेक्षतिकर्मेति तत्समानविषयकध्यानस्यापि परमात्मैव विषयः ध्यानेक्षणयोः एक
विषयत्वनियमात् यथा पादोदरस्त्वचा निर्मुच्यत एवं वै स पाप्मना विनिर्मुक्त इति पापविनिर्मोकफलवचनं परमात्मानं ध्येयं
सूचयति पादोदरः सर्पः तस्मात्क्रममुक्त्यर्थमोंकारे ध्यातव्यः परमात्मेति सिद्धं १३ दहर उत्तरेभ्यः १४ पूर्वं परमपुरुषशब्दस्य ब्र
ह्मणि रूढत्वात् ब्रह्मोपास्यमित्युक्तं भवति तद्वद्दहराकाशशब्दस्य भूताकाशे रूढत्वात् तस्यैवोपास्यत्वमस्तीति दृष्टान्तसंग
तिः पूर्वपक्षे आकाशाद्युपास्तिः फलं सिद्धान्ते परोपास्तिर्ब्रह्मप्राप्तिरिति छान्दोग्ये अष्टमे विधानं तत्र श्रूयते अथ यदिदमस्मिन्ब्र
ह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्यादि अस्यार्थः विधान्तरा
रम्भार्थोऽथशब्दः यदिदमिति प्रसिद्धहृदयपरामर्शः अस्मिन्निति प्रशस्तोक्तिः ब्रह्मपुरे शरीरे तस्मिन् दहरं सूक्ष्मं पुण्डरीकं तदा
कारत्वात् हृदयस्य वेश्मत्वं संपादयति दहर इति दहरः सूक्ष्मः अस्मिन् हृदये अन्तर आकाशः परमात्मा स्यादितीत्यर्थः तस्मिन् हृद
ये अवहितत्वेपि योग्यत्वात्तच्छब्देन हृदयपरामर्शः तत्र आकाशाख्यं ब्रह्म अन्वेष्टव्यं विचार्यं विजिज्ञासितव्यं ज्ञेयमिति अत्र दह
रे पुण्डरीके योऽन्तर आकाशः श्रुतः स किं भूताकाश अहोस्वित्परमात्मेति संशये प्रसिद्धेर्बलाद्भूताकाश इति प्राप्ते यद्वा ब्रह्मपुरशब्दे
न शरीरमभिदधता तत्स्वामिजीवोपस्थितेः जीवो दहर इति प्राप्तेऽब्रूमः दहराकाशः परमात्मैव कस्मात् उत्तरेभ्यः वाक्यशेषगतेभ्यो

स्य १

सू॰ ३४ हेतुभ्यः तथाहि जिज्ञा त्वेनाभिहितस्य दहरस्याकाशस्यांतं चेद्ब्रूयुरित्युपक्रम्य किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्य
मित्याक्षेपपूर्वकं समाधानवाक्यमन्नूपायावानयमाकाशस्तावानेषोंतर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अंतरेव समा
हिते इत्यादिकमाकाशोपमानत्वं द्यावापृथिव्याद्यधिष्ठानत्वं दर्शयति श्रुतिसंदर्भस्तु तमाचार्यं शिष्या ब्रूयुः किमिति ब्रूयुः किं तदिति इदं पुं
डरीकमेव तावदल्पं तस्मिन् विद्यमानाकाशोल्पतरः तस्मिन्पुंडरीके किमस्ति यच्छ्रुतियुक्तिभ्यामन्वेष्टव्यं यद्वाव साक्षात्कर्तव्यमित्य
ल्पत्वाद्यशेषाद्दहरस्येत्यमाक्षिप्तशिष्येभ्यः तत्र समाधानं स ब्रूयादिति स आचार्यो ब्रूयात् किमिति यावानिति अस्मिन्निति दहरा त
काशोक्तिः अल्पत्वदोषस्याकाशोपमानेन निराकृतः तथा च द्यावापृथिव्याद्यधिष्ठानमाकाशोपमितं दहराकाशाख्यं ब्रह्मेत्यर्थः एष
इमेष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः [redacted]ः सत्यसंकल्प इति च आत्मत्वाप
हतपाप्मत्वादयो गुणा न भूताकाशे जीवे वा संभवंति जीवे आत्मत्वसंभवेप्युत्तरगुणानामसंभवो बोध्यः विमृत्युर्मरणरहितः वि
जिघत्सः विगतजिघत्सा अत्तुमिच्छा यस्य स विजिघत्सः तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः
क्षीयत इति कर्मणां अंतवत्फलत्वमुक्त्वा अथ य इह आत्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो
भवतीति प्रकृतदहराकाशविज्ञानस्य अनंतफलवत्त्वं वदन् परमात्मत्वमस्य सूचयति सत्यान्कामांश्चेति चकारेण तेषामप्यु
पास्यत्वमुक्तं तथा च सत्यकामादिगुणकमात्मानमनुविद्यानुभूय ये परलोकं व्रजंति तेषां सर्वेषु लोकेषु कामचारः स्वैरपास
रणं अप्रतिहतत्वमनंतमैश्वर्यं भवतीत्यर्थः तस्मादेतेभ्य उत्तरेभ्यः हेतुभ्यः दहराकाशः परमात्मा १४ गतिशब्दाभ्यां तथाहि
दृष्टं लिंगं च उत्तरेभ्यः इत्यस्य प्रपंचोयं किं चेमाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंतीति दहरवाक्ये प्रकृतं परमेश्वरं ब्रह्मलो राम ३४

लोकशब्देनाभिधायप्रजाशब्दवाच्यानां जीवानां प्रसहं तद्विषयागतिरुच्यमानागंतव्यस्य दहराकाशस्य ब्रह्मतां गमयति गतिर्ब्रह्म
लोकशब्दश्चाभिप्रेसगतिशब्दाभ्यामितिसुक्तं सूत्रकारैः प्रसहं सुषुप्त्यवस्थायां जीवस्य ब्रह्मगमनं तथाहि दृष्टं श्रुत्यंतरे सता सो
म्य तदा संपन्नो भवतीसोहे तथा च दहराकाशगमनं ब्रह्मगमनमेवेति दृष्टीकृतं तथाहि दृष्टमित्येनेन प्रसहं हिरण्यगर्भब्र
ह्मलोकगमनासंभवात् ब्रह्मैव लोक इति कर्मधारयसमास एव ग्रात्यइसास्मिन्नर्थे अहरहर्गमनमेव लिंगमिति लिंगमित्य
नेनोक्तं च शब्देन निषादस्थपतिन्यायोपि कर्मधारयसमासग्रहणे न सूचितः १५ धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः १६ धृ
तेरपि हेतोः परमेश्वर एव दहराकाशः अनतिक्रान्तप्रकरणाद्दहराकाशं निर्दिशति अथ य आत्मा स सेतुर्विधृतिरेषां लोकाना
त्र मसंभेदायेति विधृतिरिति किं अनतलादिधारकरसुच्यते सेतुशब्देन वर्णाश्रमादिसंकरहेतुत्वमुच्यते न हि सर्वलोकविधारक
त्वं ब्रह्मणोन्यस्य संभवति अस्य च विधारणलक्षणमहिम्नोस्मिन्परमात्मन्यन्यत्रापि श्रुत्यंतरे उपलब्धेः परमात्मलिंगत्वम
व एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति तथा एष सर्वेश्वर एष लोकाधिपतिरेष भूतपाल
एष सेतुर्विधरण एषां लोकानामसंभेदायेति १६ प्रसिद्धेश्च १७ दहराकाशशब्दोपि परमात्मन्येव प्रसिद्धो न जीवे आकाशो
नाम ह वै नामरूपयोर्निर्वहिता सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंत इत्यादिदर्शनात् यद्यप्याकाशशब्दस्य भूताका
शेपि प्रसिद्धिरस्ति तथापि पूर्ववान्या अयमाकाशस्तावानेषोन्तर्हृदय आकाश इति तत्सोपमानत्वेन ग्रहणान्नोपमेयदहराका
शत्वं संभवतीति दहराकाशः परमेश्वर एव १७ इतरपरामर्शात्स इति चेन्नासंभवात् १८ ननु य एष संप्रसादोस्माच्छरीरा
त्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचेति संप्रसादशब्देनेतरस्य जीवस्याप्यस्मिन्प्रक

रत्तोपीत्यामर्शात्तर्हि जीवो दहराकाशोऽस्ति चेन्नासंभवात् जीवे आकाशोपमेयत्वापहतपाप्मत्वादीनामसंभवादित्यर्थः ॥ सर्व
सुमएव इति सर्वनाम्नाभिविद्यानुक्तत्वेन वस्तुश्च सर्वकालुष्यनिर्मुक्तवृत्तिसंप्रसाद इति संप्रसादशब्देन सुषुप्त्यवस्थावाच-
केनावस्थावानिसूच्यते अस्माद्देहाभिमानास्पदविषयाच्छरीरात्स्थूलसूक्ष्मशरीरद्वयात्समुत्थाय विविक्तमात्मानं ज्ञात्वावि-
वेकज्ञानं चात्र श्रवणमनननिदिध्यासनानि तत्फलमाह अभिनिष्पद्यत इति अभिनिष्पत्तिः साक्षात्कारः अस्य फल-
माह परमिति उपसंपद्य निष्पद्यत इत्येतत् मुखव्यादानं स्वपतीतिवद्द्रष्टव्यं ज्योतिःशब्दस्य स्वर्यादिपरत्वभ्रमवारयति एष इति ५
गुहेरिति शेषः १९ उत्तराच्चेदाविर्भूतस्वरूपस्तु १९ नन्वपहतपाप्मत्वादीनामसंभवान्न जीवो दहराकाश इत्यसंगतं श्रुति [illegible]
बलेन जीवस्याप्यपहतपाप्मत्वादिसंभवात् तथाहि दहरविद्याया उपरि प्रजापतिविद्यायां य एषोऽक्षिणि पुरुषो दृश्य-
त एष आत्मेति होवाचेति जाग्रदवस्थापन्नं द्रष्टारं जीवमुपक्रम्य एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति जीवमेव परामृ-
श्य य एष स्वप्ने महीयमानश्चरत्येष आत्मेति तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेत्यवस्थात्रय-
विशिष्टं जीवमेव प्रतिपाद्य तस्यैव जीवस्यापहतपाप्मत्वादि दर्शयति एतदमृतमभयमेतद्ब्रह्मेति नाह खल्वयमेवं संप्र-
त्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानीति सुषुप्त्यवस्थायामभिहितं दोषमुपलभ्य पुनः प्रजापतिरेतं त्वेव
ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मादित्युपक्रम्य शरीरं निंदापूर्वकमेष संप्रसादोऽस्माच्छरीरात्समुत्थाय पर
ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति जीवमेव शरीरात्समुत्थितं पुरुषं दर्शयति तस्मादपहत
पाप्मत्वादीनां श्रुतिबलाज्जीवे संभवाज्जीवो दहराकाश इत्युत्तराच्चेदिति सूत्रावयवार्थः उत्तरस्माद्य एषोऽक्षिणीत्यादिवाक्या

त् श्रुत्वार्थं तु इंद्रविरोचनौ खलु सुरासुरराजानौ आत्मानं विविदिषंतौ समित्पाणी प्रजापतिं जग्मतुः तत्रागत्य द्वात्रिंशद्वर्षा
णि ब्रह्मचर्यमूषतुः अथैतौ प्रजापतिरुवाच किंकामाविह स्थो युवामिति तावूचतुः य आत्मापहतपाप्मा तमावां विविदि
षाव इति ततः प्रजापतिरुवाच प्रथमं य एषोक्षिणीति नाम्न एवास्यापामक्षिस्थानः सन्यो दृश्यते शास्त्रतः स आत्मापहत
पाप्मेत्युवाच य एवापहतपाप्मत्वादिगुणः एतदमृतमभयमेतद्ब्रह्मेति एतच्छ्रुत्वा तौ अप्रक्षीणकल्मषतया अक्षिनिष्ठ
छायापुरुषमात्मत्वेन गृहीत्वा पुनः प्रजापतिं पप्रच्छतुः अथ योयं भगवोऽप्स्वा दर्शे खड्गादौ च दृश्यते कतमस्तेषु सो
अयमेवात्सर्वेषु क एवेति नमेतम त्वेवं श्रुत्वा प्रजापतिरेतौ भ्रांतौ वितिज्ञात्वा यदि वयं युवाभ्यां तोस्य इति भ्रमः तदा दोषमनस्येन
नत्वेन गृहीतानामिस नयोराशयमनुरुध्य प्रत्युवाच उदशरावे आत्मानमीक्ष्य यदत्र यद्दृश्यते तन्मां प्रतिब्रूतमिति तौ उद
शरावे तु दृश्यानाहं ततो अथ प्रजापतिरेतौ विपरीतग्राहिणौ मा भूतामिति साक्षयमेवान्यप्रच्छ किमत्रापश्यतमिति तौ होच
तुः नखलोमादिमंतं प्रतिबिंबपुरुषमुदशरावे अपश्यावेति उ सत्ति नाश यथा शरीरमात्मानं भवति एवं छायापुरु
षोपि नात्मेत्यवनोज्ञानीयात्तामिसाशयवान् प्रजापतिरुवाच साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वा पुनरुदशरावे पश्य
न तं तमात्मानमिति तौ साध्वलंकृतौ सुवसनौ छिन्नलोमानौ भूत्वा तथैव चक्रतुः पुनः प्रजापतिना दृष्टौ तमेव छायात्मान
मूचतुः तदुपश्रुत्य प्रजापतिर्वदतोहो अद्यापि भ्रमौ न ध्यानौ न यौरिति मत्वा तत्वं कथयामि तावता कालेन कल्मषक्षये
दे अस्मद्वाक्यसंदर्भपर्यालोचनया तत्त्वं प्रतिपत्स्येते इति स य एषोत्युवाच य आत्मापहतपाप्मा एतदमृतमभयमेतद्ब्रह्मेति तयो
र्मध्ये विरोचनो देहानुसारित्वाच्छायापायो देह एवात्मतत्त्वमिति मत्वा स्वगृहमागमत्तथैवासुरानुपदिदेश इंद्रस्तु स्वगृहमाग

त्वा

छा.टी. ३६ छन्मार्गएवच्छायात्मनोनिःसंदेहोयंचिंतपितापुनःसमित्पाणिःप्रजापतिसमीपमागच्छत्तेनदृष्टःसन्मार्गेचिंतितमुवाच
प्रजापतिस्तुहेइंद्रत्वंकल्मषस्यपापपुनःद्वात्रिंशतंवर्षाणिब्रह्मचर्यंचरअथप्रक्षीणकल्मषायते अहमेतमात्मानंभूयोनु
व्याख्यास्यामीत्यवोचत्तत्तथाचरितब्रह्मचर्यःप्रजापतिमुपससाद उपसन्नायेंद्रायप्रजापतिर्व्याचष्टेयोक्षिणिपुरुषोद
र्शितःमयमेपर्यायेस्वप्नेवस्त्रप्रेवासनामयैर्वनितादिभिर्विषयैर्महीयमानःसम्मानअनेकविधान्भोगान्भुंजानोवि
हरतीतिपावत् इदंश्रुत्वादेवेंद्रःशोकभयादिविविधसंतापानुभवान्नस्वप्नेकिंचिद्दृष्टीत्युवाच एवमुक्तवतिमघवतिप्रजाप
तिःपुनर्द्वात्रिंशतंवर्षाणिब्रह्मचर्यंचरअथाप्रक्षीणकल्मषोसीत्युवाचचरित्वाआगतायेंद्रायप्रजापतिर्व्याचष्टेयोय
माद्याद्वितीयपर्यायमोक्षिणिस्वप्नेचात्मादर्शितः सएषसुषुप्तावस्थायामप्रकाशतइत्याह तद्यत्रैतत्सुप्तःइति तदेतदिति
संबंधः यत्रयस्यांसुषुप्त्यवस्थायामेतत्स्वपनंयथास्यात्तथासुप्तस्यावस्थायामुपसंहृतकरणग्रामःसमस्तःकरण
व्यापारकृतकालुष्यहीनःसंप्रसन्नःस्वप्नमज्ञानमात्रतयाविलापयन्मुक्तार्थदृक्तःस्वप्नप्रयुक्ततेजस्तत्त्वंविहायप्राज्ञोभू
त्वाज्ञानक्रियांविनास्वरूपचैतन्येनाज्ञानसाक्षीआत्मस्वदेहादेःस्वस्यनास्फूर्तिरेतत्स्वात्मनःस्पर्थः इदंश्रुत्वापुनरिंद्रोनकिं व
वि चित्तञ्जायतइत्याहनाहेति अहेतिनिपातःखेदार्थे ४ यमानोहीन्द्रउवाचअयंसुप्तःपुरुषःअयमहमस्मीत्येवनात्मान
मस्यामवस्थायांजानातिइमानिभूतानिनोएवजानातिविनाशमेवप्राप्तोभवतिनाहमत्रभोग्यंपश्यामीत्येवंदोषंदृष्ट्वापु
नःप्रजापतिमुपससादउपसन्नंपुनरुवाचवत्साद्यापितेकल्मषक्षयोनाभवत्इत्यर्थःपुनःपंचवर्षाणिब्रह्मचर्यंचरेतितदेव
मेकोत्तरशतंब्रह्मचर्यंचरेतिसहस्राभ्यासायब्रह्मचर्यसंपन्नमिंद्रंकथायायप्रजापतिर्व्याचष्टेयोयमाद्याद्वितीयतत्त्वोमय राम ३६

र्गापेषु अक्षिण्येष आत्मेति सुषुप्तौ चानुसृतोपहतपाप्मत्वादिगुणो दर्शितः तमेवभूयोनुव्याख्यास्यामीतेतस्मात्स्वमित्युपक्रम्य
तुरीयेमघवन्मर्त्यंवाइदंशरीरमित्यादिनाशरीरंनिंदित्वातस्मादुत्थितंजीवमेवोत्तमपुरुषंदर्शयति प्रजापतिः यएषसंप्रसा
दोस्मादित्यादिनातस्मादपहतपाप्मत्वादीनांजीवेसंभवाज्जीवएवदहराकाशइतिप्राप्तेब्रूमः आविर्भूतस्वरूपस्तुनशब्देनप्र
देपसूत्रव्याख्याति: अत्रप्राजापत्यवाक्यादपिनजीवशंकायुक्तेत्यर्थः यतआविर्भूतस्वरूपोत्रजीवोविवक्षितः नतुजीवत्वेनरूपे
णेति परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइत्युपसंहारदर्शनात् यदपहतपाप्मत्वादिभिः प्रतिपाद्यंपरंब्रह्मतदेव
जीवस्यपारमार्थिकंस्वरूपंनतुजीवत्वं तथाचआविर्भूतस्वरूपस्यजीवस्यब्रह्मत्वेनापहतपाप्मत्वादिकमुपपद्यतेनतुजी
वत्वेनरूपेणानासंभवादितिपूर्वसूत्रस्यहेतुर्नासिद्धइतिभावः १९ ननुदहराकाशस्यभरत्वेअथयएषसंप्रसादइत्यादिना
जीवपरामर्शोव्यर्थःस्यादित्यतउत्तरंपठति अन्यार्थश्चपरामर्शः २० अन्यार्थोयंजीवपरामर्शोनजीवप्रतिपादनायपरंज्यो
तिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइत्युपसंपत्तव्यपरमात्मपरत्वायंजीवपरामर्शःजीवोपसंपत्तव्यत्वेनहिपरमात्मो
पदिश्यते, सचोपदेशोजीवपरामर्शंविनानसंभवतीतितदर्थंजीवपरामर्शोनजीवप्रतिपादनार्थमिति २० अल्पश्रुतेरि
तिचेत्तदुक्तं ननुदहरोस्मिन्नंतराकाशइत्याकाशस्याल्पत्वश्रवणान्नपरमात्मत्वंकिंत्वाराग्रमात्रजीवत्वंयुक्तमितिचेत्तत्रस
ब्र माधानमुक्तं अर्भकौकस्त्वात्तद्व्यपदेशाच्चेत्यत्रोपासनार्थमौपाधिकमल्पत्वंपरमेश्वरस्याविरुद्धमित्यर्थः तस्माद्दहराका
शः परमात्मैवोपास्यइतिसिद्धं २१ अनुकृतेस्तस्यच २२ पूर्वंपरंज्योतिरुपसंपद्येतिवाक्यार्थविचारप्रसंगात् तेषुभंज्योति चू
षांज्योतिरित्यादिवाक्योक्तपरंज्योतिःसाधकंनतत्रेतिवाक्यंविचार्यतइतिप्रसंगसंगतिरस्याधिकरणस्य यद्वा पूर्वत्रात्मश्रुत्या

स॰वृ॰ पा॰१ यदनुरोधादाकाशशब्देन दिक्संयोगेनेश्वरो वृत्तिरुक्तान्तयेहापि तन्त्रेति सति सम्भवात्तत्र शब्दाच्च स्वतेजोन्तराभिभावकत्वप्रती
३७ त्यनुरोधादनुभाती सत्यस्य वर्तमानार्थसंयोगेन यस्मिन्नसति सूर्यादिकं न भासते स तेजोधातुरूपः स्यादेवेनोच्यत इति पूर्वपक्षो-
स्मिनादृष्टान्तसंगतिः पूर्वपक्षे अलौकिकतेजउपास्तिः फलं सिद्धान्ते निर्विशेषब्रह्मप्रमितिरिति भेदः मुण्डकोपनिषदि श्रूय-
ते न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति
सिद्धान्तेन तत्रेति विषयसप्तमी तथा च तत्र तस्मिन्ब्रह्मणि विषये सूर्यादयो न भासकत्वेन भासन्ते यथा घटादौ विषये आलो
कादिर्भासकत्वेन भासते तद्वत् अल्पतेजा सा वन्हेः कृत्स्नमभिप्रेत्य कैमुतिकन्यायमाह कुत इति इतश्च सूर्यादेर्न ब्र
ह्मणि भासकत्वमित्याह तमेवेति यथा सूर्यादिप्रकाश्यो घटादिर्न सूर्यादिप्रकाशकः एवं ब्रह्मप्रकाश्यः सूर्यादिर्न ब्रह्मप्र-
काशकः इत्यर्थः ननु यथा गुरोर्गच्छति शिष्यस्यानुगमनं स्वनिष्ठगमनं कृत एवं सूर्यादेः स्वनिष्ठभानं कृतमनुभानं किं नेत्य त आ
ह तस्येति यथायः पिण्डस्य दाहकत्वमावह्निनिष्ठवत्तथा सूर्यादेर्भानं ब्रह्मनिष्ठमेव न तु पृथग्भानं इत्यर्थः अत्र संशयः सूर्यादि
जगद्भासकतया प्रतीयमानं तेजोविशेषो वा ब्रह्म वेति तेजस एव प्रकाशकत्वप्रसिद्धेः प्रबलेन तेजसा दुर्बलस्याभिभवदर्श
नाच्च तेजोविशेष एवेति प्राप्ते ब्रूमः अत्र तथा प्रतीयमानं ब्रह्मैव कुतः अनुकृतेः अनुकृतिरनुकरणं यत्तमेव भान्तमनुभा-
ति सर्वमित्यनुभानं तदनुकृतिशब्देनोच्यते नहि तेजस्तेजोन्तरं भासमानं भासते तस्मात्स्वप्रकाशतया भासमानं चैतन्यमनु
सर्वं सूर्यादि भासत इति युक्तं सूत्रे तस्य चेत्यनेन तदुदाहृतवाक्ये चतुर्थचरणोऽभिप्रेतः तस्य भासा सर्वमिदं विभातीति सर्व
भासकत्वं तेजोन्तरस्याप्रसिद्धं विरुद्धं च भासमानस्य तेजसस्तेजोन्तराभिभावकत्वेन भासकत्वाभावात् ब्रह्मणस्तूपपन्नं त एम
३७

द्वाज्योतिषांज्योतिरित्यादौ प्रसिद्धं च नतत्रेति तच्छब्देन च हिरण्मये परे कोशे विरजं ब्रह्म निष्कलं तच्छुभ्रं ज्योतिषां ज्योतिस्त
यदात्मविदो विदुरिति मंत्रे तत्प्रसिद्धमेवोक्तमिति भूतसर्गस्तु हिरण्मये ज्योतिर्मये आनंदमये परस्मिन् कोशे तस्मिन्नन्नम
याद्यपेक्षया परे कोशे ब्रह्म पुच्छं प्रतिष्ठेति यत्प्रतिष्ठाभूतं ब्रह्म तत्प्रतिष्ठितं तच्च विरजं आगंतुकमलशून्यं निष्कलं निरवयवं शु
भ्रं नैसर्गिकदोषशून्यं ज्योतिषां सूर्यादीनां ज्योतिरवभासकं तच्च विदुषामनुभवसिद्धमिति २२ अपि च स्मर्यते २३ अपि च ब्र
ह्मणः सूर्याद्यप्रकाश्यत्वं तत्प्रकाशकत्वं च भगवद्गीतासु स्मर्यते न तद्भासयते सूर्यो न शशांको न पावकः यद्गत्वा न निवर्तंते त॰ य
द्धाम परमं मम यदादित्यगतं तेजो जगद्भासयतेऽखिलं यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति तस्मादनन्यप्रकाश्यः स
र्वजगद्भासकः परमात्मा ज्ञेय इति सिद्धं २३ शब्दादेव प्रमितः २४ पूर्वत्रानुमानादिना लिंगेन तत्रेति विषयस्य समीकृत्वान्न
भानीत्य... णाज्याहारेण न भासयतीत्यस्य पूर्वार्धेन तो भवति भासकत्वेन न भांति सूर्यादयः स्वयं कथनात् तथेहापि अंगु
ष्ठमात्र इति परिमाणलिंगाज्जीवमाशंक्य ईशानोसीति स्मार्यदिति विध्यध्याहारेणापास्ति परमंगुष्ठवाक्यमास्थिति निदृष्टांत
सगतिः सिद्धांते अभेदप्रमितिः फलं करदर्शनादुपपन्ने अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठतीति तथा अंगुष्ठमात्रः पुरु
षो ज्योतिरिवाधूमकः ईशानो भूतभव्यस्य स एवाद्य स उश्व एतद्वै तदिति अस्यार्थः स्वाभाविकं परिच्छेदं व्यापिनि पुरुष इति पू
र्णेन सर्वत्रोपलभ्यमानत्वस्यार्थः तर्हि कथमंगुष्ठमात्रत्वमित्याशंक्याभिव्यक्तिस्थानद्वारा तदाह मध्य इति आत्मनि देहम
ध्ये हृदयस्थं प्रतीत्यर्थः जीवभावमापन्नस्य ब्रह्मणा इदमंगुष्ठमात्रत्वसमर्थनमिति बोध्यं ईशानो भूतभव्यस्येत्यादिना तत्प
दवाच्यांगुष्ठमात्रजीवानुवादेनाभेदबोधनादिति तेनैव परमात्मत्ववाक्यस्यावगमात्तदाहृतं तथैव अधूमकमिति लिंग

सू.वृ.
३८

धूमस्यः ज्योतिः परत्वात् यथाधूमकंज्योतिरकलुषितमेकरूपंप्रकाशमात्रंदृष्टंतथायमपिवस्तुतःकूटस्थःप्रकाशधातुरि
त्यर्थः शोधितत्वमर्थस्यतत्रर्थैतामाह ईशानइति भूतभव्यग्रहणंभवतोपिप्रदर्शनार्थं अद्वितीयत्वमाह सएवेति अद्य
वर्तमानकालेसएवास्तिश्वः भविष्यत्कालेसएवभविता अतीतेकालेसएवासीत् यन्नचिकेतसापृष्टममन्यत्र धर्मादित्या
दिनातदेतदेवाद्वितीयंवस्त्विति अत्रसंशयः किमिदमंगुष्ठवाक्यंजीवपरमुतब्रह्मपरमिति तत्रांगुष्ठपरिमाणस्यब्रह्मण्यप
संभवाज्जीवपरमिदंवाक्यमितिप्राप्तेब्रूमः प्रसगभिन्नःपरमात्मावाक्यप्रतिपाद्यःप्रमितःकस्माच्छब्दादीशानोभूतभ
व्यस्येत्यत्रेशानशब्दात् नहिजीवेईशानशब्दः आंजसः नत्वांगुष्ठपरिमाणलिंगाज्जीवःप्रतिपाद्यइतियुक्तं लिंगश्रुत्योर्वि
रोधेश्रुतेःप्रबलत्वात् एतत्सूचनार्थमेवकारः ननुवाक्यस्यपरमात्मपरत्वेकथमंगुष्ठमात्रत्वस्योपपत्तिरितिचेत्कात्रकथं ते
नात्मपरवाक्येअंगुष्ठमात्रजीवानुवादेनब्रह्माभेदपरत्वाद्वाक्येअनुपपत्त्यभावादिति २४ ननुजीवस्यवस्तुतःसर्वगतत्वेकथमं सा
गुष्ठमात्रत्वमित्यतआह हृद्यपेक्षयातुमनुष्याधिकारत्वात् २५ तुशब्दःशंकानिरासार्थः वस्तुतःसर्वगतस्यापिजीवभावमाप
न्नस्यपरमात्मनोंगुष्ठपरिमाणहृदयावच्छिन्नतयांगुष्ठमात्रत्वमुपपद्यतइत्यर्थः ननुगजपुत्तिकादिशरीरेषुहस्तउरीकस्मा
न्निपत्तपरिमाणत्वात्कथंजीवस्यांगुष्ठमात्रत्वनियमस्तत्राह मनुष्याधिकारत्वादिति शास्त्रस्येतिशेषः षष्ठेफलार्थकर्मणि
तिर्यगादेरपिस्वर्गकामस्याधिकारःस्वर्गकामश्रुतेरविशेषादित्याशंक्यांगश्रुतसर्थवत्वायसमर्थविषयत्वात्तिर्यगादेःसाम
र्थ्याभावेनस्वर्गकामपदसंकोचःमनुष्याधिकारत्वसिद्धेचानुवर्णपमधिकरोतिशास्त्रमितिप्राप्यप्रवसंतेब्राह्मणोग्नीनादधी
तग्रीष्मेराजन्यःशरदिवैश्यइतित्रयाणामेवाग्निसंबंधश्रवणात्तेषामेवाधिकारइतिराद्धांतितं तत्राचमनुष्याणांहृदयस्यांगु राम
३८

ष्टमात्रत्वात्तदयेसायां गुष्टमात्रत्वमित्यविरोध इति तासमैव मंगुष्टमात्रजीवानुवादे न विरुद्धांशं परिसज्याभेदबोधने॰
अनेन वाक्येन इममर्थमुत्तरग्रंथस्तरभेणास्पष्टीकरिष्यति अंगुष्टमात्रः पुरुषोंतरात्मासदाजनानां हृदये सन्निविष्टः तं स्वा॰
च्छरीरात्प्रवृहेन्मुंजादिवेषीकां धैर्येणात विद्याच्छुक्रममृतमिति अस्यार्थः योंतरात्मा पुरुषत्वात्सर्वेषां जनानां हृदये सदा
सन्निविष्टः अंतो गुष्टमात्रः इति त्वंपदवाच्यानुवादः तस्मादन्वयव्यतिरेकाभ्यां तदनुसारिश्रुत्यास्व शोध्यत्वमाह तं स्वादिति
शरीरस्य स्थूलस्य सूक्ष्मस्य च तस्मात्स्वाभिमानविषयात्प्रवृहेत् पृथक्कुर्यात् धैर्येणासमाधिनेति यावत् तं विविक्तमात्मानं विशुद्धममृतं
ब्रह्मैव जानीयादित्याह तमिति तत्र देवकाठकवाक्यप्रसक्तं ब्रह्मणि ज्ञातव्ये समन्वितमिति सिद्धं २५ तदुपर्यपि बादरायणः सं
भवात् २६ पूर्वं मनुष्याधिकारं शास्त्रमित्युक्तं तर्हि क्रमसुत्तमर्थाभिरुपासनाभिर्मनुष्याणां देवत्वं प्राप्तानामधिकारोन स्या
दित्याशंक्य समाधीयते इत्याक्षेपसंगसाप्रसंगसंगत्या वा सारंभः अत्र चाधिकारनिरूपणद्वारा मंत्रार्थवादादीनां मानां
तरप्राप्ति विरोधयोरस्तत्त्वे देवताविग्रहादौ समन्वयोक्ते रध्यायसंगतिः एवं मंत्रादीनां[redacted]स्वार्थप्रामाण्यपन्यासाभ्यामु
पासनाधिकार्यादि समर्पकानां स्वार्थे प्रामाण्यात् तत्त्वमस्यादिवाक्यानां ब्रह्मात्मैक्यपर्यवसानमिति श्रुतिशास्त्रपादसंग
तयः पूर्वपक्षे मंत्राद्यप्रामाण्यादुपगमनादिवाक्यानामपि स्वार्थं तदयोगात्तत्त्वमस्यादेरपि नैकानिष्टं तत्तिफलं इति सिद्धांते प्रामाण्यपक्ष
न तत्सर्वसंभवादैकानिष्टत्तेतिफलं पदादेवानामधिकारात्क्रममुक्तिसाधनेषूपासनेषु देवादिभोगद्वारा मोक्षकाममनुष्य
प्रवृत्तिर्नास्तीति पूर्वपक्षे फलं सिद्धांते तादृशप्रवृत्तिरस्तीति बृहदारण्यकेप्यन्न तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथ
र्षीणां तथा मनुष्याणामिति देवादीनां मध्ये यो यो ब्रह्मप्रत्यक्त्वेन साक्षात्करोति स एव ब्रह्मात्मना अतिष्ठदित्यर्थः अत्र किं॰

स.बृ. देवादीनांब्रह्मविद्यायामधिकारोस्ति उतनास्तीतिविषयेशास्त्रस्यमनुष्याधिकारत्वान्नास्तीतिप्राप्तेभिधीयते तदुपर्यपि
३९ बादरायणः संभवादिति तेषांमनुष्याणामुपरिष्टाद्येदेवादयस्तेषामपिब्रह्मविद्यायामधिकारोस्तीतिबादरायणआचार्यो
मन्यतेस्मकस्मात्संभवात् अर्थित्वसामर्थ्याद्यधिकारकारणस्यसंभवादित्यर्थः देवादीनांमहाभोगशालित्वेपिभोग्यवस्तु
नामनित्यत्वदोषदर्शनाद्वैराग्यादिकंनिरतिशयानंदमोक्षार्थित्वंचसंभवतीतिभावः २६ विरोधः कर्मणीतिचेन्नानेकप्रति
पत्तेर्दर्शनात् २७ ननुदेवादीनांविग्रहवत्त्वंविनाब्रह्मविद्यायामनधिकारात्तदंगीकरणीयंतथासतिकर्मण्यपिशरीरित्व
मात्रत्विगादिवत्सन्निधानेनैवोपकारकत्वंस्यात्तच्चनसंभवति एकस्यशरीरस्यानेकत्रयुगपत्सन्निधानासंभवात्तस्मा
द्विग्रहवत्त्वांगीकारेकर्मणिदेवतायाउपकारत्वविरोधः प्रसज्येतेतिचेन्नैषदोषः कस्मादनेकप्रतिपत्तेर्दर्शनात् एकस्यदे
वस्यानेकेषांशरीराणांयुगपत्प्राप्तेः श्रुतौदर्शनादित्यर्थः तथाहि बृहदारण्यकेशाकल्यब्राह्मणे अथहैनंविदग्धः शाक
ल्यः पप्रच्छ कतिदेवायाज्ञवल्क्येत्युपक्रम्य सहैतमेवनिविदाप्रतिपेदेयावंतोवैश्वदेवस्यनिविद्युच्यंते त्रयश्चत्रीचशतात्र उत्तरंददौ ६
यश्चत्रीचसहस्रेत्युक्ते कतमेतेइति पृष्टायाम् महिमानएवैषामेतेत्रयस्त्रिंशत्त्वेवदेवाइति त्रिसहस्रषडधिकत्रिशतदेवा
नांत्रयस्त्रिंशद्देवेषुअंतर्भावमुक्त्वात्रयस्त्रिंशतोपिषट्सुषण्णांत्रिषुत्रयाणांद्वयोर्द्वयोरेकस्मिन्वाय्वात्मकेदेवेंतर्भावंब्रुवन्
वायो एकस्यानेकरूपतांदर्शयति अस्यार्थः एनंयाज्ञवल्क्यंविदग्धःशाकल्योवैश्वदेवनामकस्यशस्त्रस्यनिविदिशस्यमानादे
वाः कतीतिपप्रच्छ तत्रयाज्ञवल्क्यस्योत्तरं निविदित्रयश्चत्रीचशतेति शस्यमानदेवनिष्ठसंख्यावाचकंमंत्रपदंनिविदित्युच्यते
एवंषडधिकत्रिशताधिकत्रिसहस्रसंख्यानिर्णयानंतरं कतमेतेइति संख्येयस्वरूपप्रश्नेअष्टौवसवएकादशरुद्राद्वादश एम
श्रुतिः ३ ३९

शादित्याः प्रजापतिरिंद्रश्चेति त्रयस्त्रिंशद्देवेषु पूर्वेषामंतर्भावो दर्शितो महिमान एवैषामित्यादिना एषां त्रयस्त्रिंशद्देवानां म
हिमानो विस्ताराः सर्वे वस्तुतस्त्रयस्त्रिंशदेवेत्यर्थः तेपि त्रयस्त्रिंशद्देवाः षण्णामग्निपृथिवीवाय्वंतरिक्षादित्यदिवां महिमा॰
नस्तेपि षड्देवाः त्रयाणां लोकानां महिमानस्ते त्रयो देवा द्वयोरन्नप्राणयोस्तौ चैकस्य प्राणशब्दवाच्यस्य वायोर्महिमानावि
ति मह्या अनेकप्रतिपत्तेर्दर्शनादनेकत्र कर्मणि एकस्य प्रतिपत्तिरंगभावस्तस्य लोके दर्शनादित्यर्थः यथा बहुभिर्नमस्कु॰
र्वाणैर्युगपदेको ब्राह्मणो नमस्क्रियमाणो दृश्यते एवमेकां विग्रहवतीमुद्दिश्य युगपत्सर्वे हवींषि त्यज्यंतीति न कश्चित्कर्मणि देवता
देवमायाः उपकारकत्वविरोधः २७ शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यां २८ ननु मा भूत्कर्मणि विरोधः तथापि श
ब्दे वेदवाक्ये विरोधः स्यात् देव अनित्यविग्रहवद्देवतायां नित्यवेदार्थत्वांगीकारे शब्दस्यार्थेन नित्यसंबंधाभावेन नित्यानित्यस
योगविरोधादिति चेन्नायमप्रसक्तविरोधः कुतः अतः प्रभवात् देवादिनिष्ठनित्याकृतिवाचका[illegible]त्वेदराशेरेव देवादिप्रपंच॰
स्य प्रभवात् उत्पन्नत्वश्रवणादित्यर्थः तथाहि स्मृतिः अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा आदौ वेदमयी दिव्या यतः
सर्वाः प्रवृत्तयः नामरूपं च भूतानां कर्मणां च प्रवर्तनं वेदशब्देभ्य एवादौ निर्ममे स महेश्वर इति श्रुतिरपि एत इति ह वै प्रजा
पतिः देवानसृजतासृग्रमिति मनुष्यानिंदव इति पितॄंस्तिरःपवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमभिसौभ
गेत्यन्याः प्रजा इति तथा स मनसा वाचं मिथुनं समभवदिति अस्यार्थः एते असृग्रमिंदवस्तिरः पवित्रमाशवः विश्वान्यभि
सौभगेत्येतन्मंत्रस्य पदैर्देवादीन्स्मृत्वासृजद्ब्रह्मा तत्र एत इत्येतच्छब्द इंद्रियाधिष्ठाने देवस्मारकः असृग्रशब्दः असृक्छब्दो
यह्रुधिरप्रधानदेहरमणमनुष्यस्मारकः इंदुमंडलमध्यवर्तिपितृस्मारक इंदुशब्दः पवित्रं सोमं स्वमध्ये तिरस्कुर्वतां धारयतां

अवांतरप्रलयावस्थायी जगद्धेतुत्वादीश्वरवदिति +८

सू.वृ. ४० ग्रहाणांतिरः पवित्रशब्दः स्मारकः ऋचोऽभुवनानां स्तोत्राणां गानरूपाणा माशवशब्दः स्मारकः विश्वेदेवशंसनशस्त्राणां
विश्वशब्दः स्मारकः अभिसौभगेति शब्दो निरतिशयसौभाग्यवाचकः प्रजानां स्मारक इति सप्रजापतिर्मनसा सह वाचं मिथु
नभावं समभवत्तमभावयत्तस्मकाशितांसृष्टिं मनसा आलोचितवानिति यावत् तत्रास्य प्रसक्षानुमानशब्देन सृष्टेर्वेदप्रभ
वत्वप्रतिपादकश्रुतिस्मृतीगरसेतेनतयाच श्रुतिस्मृतिभ्यां वेदशब्दप्रभवत्वं सृष्टेरित्यर्थः आकृत्यालिंगितविग्रहानंगीका
रेकस्यसृष्टिः स्यादितिभावः तस्मादध्यागवादिशब्दानां निसाकृतिवाचकत्वं एवं वैदिकशब्दानां निसाकृतिवाचकत्वमिति न
शब्देपि विरोध इति २८ अतएव च निसत्वं २९ अस्मतकर्तृकर्तारि नामिहमेव वेदस्य निसत्वमनिसार्थसंयोगेनानुपपन्न
मिसाशंकस्यवसद्देवाकृतिविशेषावच्छिन्नदेवादिसृष्टीरिति प्रतिपादनान्निसाकृतेरेव शब्दार्थत्वान्नानुपपन्नमिसभिप्रायेण
परिहरति अतएव च निसाकृतेः शब्दार्थत्वादेव वेदस्य निसत्वं नानुपपन्नमिसर्थः एततस्त्रस्यचितः प्रयोगश्च वेदः अवांतरप्र
लयावस्थायित्वमेवहिनिसत्वं नाम अनुमानसिद्धार्थे श्रुतिरपि यज्ञेन वाचः पदवीयमायन्तामन्वविंदन्नृषिषु प्रविष्टामिति य
ज्ञेन पुण्यकर्मणा वाचो वेदस्य पदवीयं ग्रहणयोग्यतामापन्नाः सन्तः अनन्तामृषिषु विद्यमानां वाचं याज्ञिका अन्वविंदन् उप
लब्धिमंतो बभूवुरित्यर्थः पूर्वंस्थितामेववाचं सर्वज्ञातवंत इतिताप्सर्यं २९ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृ
तेश्च ३० नन्वाकृतिपदार्थकत्वेपि प्रलयेसर्वाकृतिव्यक्तिनाशेपुनस्तदाकृतिकर्तृत्वसंतोमानाभावान्निसानिससंयोगवि
रोधस्तदवस्थ इति चेत् उच्यते सृष्टिप्रलयावृत्तावपि न शब्दे विरोधः कस्मात्समाननामरूपत्वात् नहि प्रलये जगतो निरन्वयना
शोस्ति येनोत्पद्यमानं जगद्विलक्षणं स्यात् किंतु संस्कारात्मना अविद्यायां तिष्ठत्येव जगदनुभवश्च भावनाख्यसंस्कारात्मनानचा राम ४०

र्थसंस्कारे मानाभावः सुप्तिमंडूकसंस्कारदर्शनात् निद्राप्रलययोरप्यसुप्तोत्थितविषयेंद्रियाद्यर्थसंस्कारसद्भावात्प्रबोधे पूर्व
सजातीयव्यवहारात् नदप्रवृत्तिरिति सृष्टिप्रलययोः सद्भावे मानाभावः यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा
भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा
प्रबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठंते प्राणे
दे भ्यो देवा देवेभ्यो लोका इत्यादि श्रुतेर्मानत्वात् अस्यार्थः अथ शब्दस्तदर्थकः परेस्मिन्नुपक्रमात्प्राणशब्दः परमात्मपरः अस्मि
न्प्राणे जीव एवैकधा भवति तदात्मना तिष्ठतीत्यर्थः तदा एकीभावावस्थायामेनं प्रकृतं प्राणं परमात्मानं अंतर्बहिरिंद्रिया
णि सर्वाणि सविषयाणि अपियंति परमात्मनि लीनानि भवंतीत्यर्थः प्रबोधे तस्मादेव परमात्मनो जगतो जन्माह स इति अ
विलंबेनास्योदृष्टांतः पर्येति एवं शब्दात्सर्वं तदेव यथाहारः प्राणा वागादयस्तेभ्यो नंतरं तदनुग्राहकदेवा अग्न्यादयस्तेभ्यो
नंतरं लोकाः शब्दादिविषया इति तथा च यथा संस्कारबलात्सुप्तोत्थितमंडूकादि समाननामरूपत्वमुत्तरकाले स एवं पूर्वकल्पप्र
कृ पंचसमाननामरूपत्वादुत्तरप्रपंचस्येति पूर्वोक्तिकव्यत्वमुसंतेन शेदकश्चिद्विरोधः समाननामरूपत्वं च श्रुतेर्दर्शनात्सत्ते
श्चाभ्युपगंतव्यं सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं चांतरिक्षमथो स्वरिति तथा न क्षत्रे अग्निर्वा अ
कामयत अन्नादो देवानां स्यामिति स एतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपदिति भाविवृत्तिमाश्रित्य यजमानो
ग्निरित्युच्यते एवं कामयित्वा किं कृतवानित्यपेक्षायामाह स इति कृत्तिकाभ्यः कृत्तिकाख्यनक्षत्रदेवतायै बहुवचनं नक्षत्रबाहुल्यापेक्षं
अष्टाकपालमष्टसु कपालेषु पचनीयं निरवपत् तयोः समाननामरूपत्वं दर्शयतीति सिद्धं [redacted]
उक्तपुरोडाशहविष्कामिष्टिं कृतवानित्यर्थः तथा च योऽग्निर्यस्मै अग्नये निरवपत् १

सू.वृ. [redacted]तीतिसिद्धं स्मृतिरपि पर्यंते नानारूपाणि पर्यये दर्शयंते तानि तान्येव तथाभावापुणादिवि
४१ त्सादिकाद्रष्टव्या ३१ उक्तं देवादीनामधिकारमाक्षिपति मध्वादिष्वसंभवादनधिकारं जैमिनिः ३१ देवादीनां ब्रह्मविद्यायामनधिका
रं जैमिनिराचार्यो मन्यते कस्मा[त्] मध्वादिष्वसंभवात् एवं हि मधुविद्या श्रूयते असौ वा आदित्यो देवमधु देवानां मोदनान्मध्विव
मधु तस्य मधुनो द्युलोक एव तिरश्चीनवंशः अंतरिक्षमादित्यारव्यमधुनो वस्थानात्तदेव मध्वाधारोपूपः रोहितं शुक्लं कृष्णं प
रः कृष्णमपि चेति पंच रोहितादीन्यमृतानि प्रागाद्यूर्ध्वांत पंचदिग्गवस्थिताभिरादित्यरश्मिनाडीभिर्मधुच्छिद्रभूताभिः रोहिता
द्याभिस्तत्तद्देवत्यकर्मकुसुमेभ्यस्तत्तद्देवत्यकमंत्रमधुकरैराहृत्य समंडलमानीतानि पंचममममृतं गोप्यारव्यं प्रणवकुसुमादु
ब्र पासनाभ्रमरोर्ध्वरश्मिनासर्पारश्मिरूपगोप्यारव्यं मधु द्विद्वारादित्यमंडलमानीतं रोहितादिकममृतं मकरंदस्थानभूतं व
न्हौ हुतसोमाज्यपयः पुरोडाशादि रूपं दृश्यमानानि च रोहितादीन्यमृतानि यशस्तेजोवीर्यसकलेंद्रियान्नरूपेणानिष्पन्ना
न्यादित्यमधुसंवदानि प्रागादिदिक्षु क्रमेणा विद्यमानानां वसुरुद्रादित्यमरुत्साध्यरूपाणां देवानामुपजीव्यानी सेवं चिंतयतो
फलं वस्वादीनां प्राप्तिरुच्यते वस्वादीनां समानानां मध्ये एको भूत्वाप शश्चाद्यमृतं मुखक्षानुमानादिभिः करणैरुपलभ्य तृप्यतीति
न ह्येवंभूतं मधुविद्यायां वस्वादीनां देवानामधिकारः संभवति एकस्योपास्योपासक[redacted]प्राप्यप्रापकरूपविरोधात्तत्र भीवयो ४
स्यादित्यशब्देन मासु विद्यासु आदित्यो ब्रह्मेत्यादेश एवमादिरूपासु देवानामुपास्यत्वं ता विद्या गतेन तथा इमावेव गोतमभरद्वाजावय
मेव गोतमोयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोयं जमदग्निरिमावेव वसिष्ठकश्यपावयं[redacted]मेव
वा.गो.१ वसिष्ठोयं कश्यपो वागेवात्रिरित्याद्यासु ऋष्युपा कासु न तेषामेवर्षीणामधिकारः संभवति भृगुसर्पस्तु इमौ दक्षिणवामकर्णौ राम

४१

क्रमेणगोतमभरद्वाजाविसुपास्यौद्वितीयेमावित्यनेनदक्षिणवामाक्षिद्वयोक्तिः तृतीयेमावित्यनेनदक्षिणवामनासिकाद्वयोक्तिः
एवंसप्तसुशीर्षण्यच्छिद्रेषुसप्तर्षुपास्तिरित्यर्थः नचमध्वादिविद्यासुदेवादीनामनधिकारेपिब्रह्मविद्यायामधिकारःकिंनस्यादि
तिवाच्यं विद्यात्वाविशेषात्ब्रह्मविद्यायामप्यनधिकारात्तथाचायंप्रयोगःब्रह्मविद्यानदेवादीनधिकरोतिविद्यात्वान्मध्वादिविद्याव
दिति ३१ अपिच ज्योतिषिभावाच्च ३२ भ्रमणावर्त्तयापरिदृश्यमानज्योतिर्मंडलएव सूर्यचंद्रादिदेवताशब्दानांलोकेप्रयोगसद्भा
ह वात्मंडलस्यमृत्पिंडादिवदचेतनत्वेनविग्रहाभावादग्निवाय्वादीनामपितत्तुल्यत्वेनसामर्थ्यादेश्चतत्तनधर्मस्याभावान्नदेवादीनाम
धिकारः नचमंत्रार्थवादेभ्योदेवानांविग्रहवत्त्वसिद्धिः सर्वस्यस्थितमितिवाच्यं तेषामन्यपरत्वेनस्वार्थेप्रामाण्याभावात्तस्माद्देवादी
नांब्रह्मविद्यायामधिकाराभावंजैमिनिर्मन्यते इतिशंकासूत्रयोरभिप्रायः ३२ सिद्धांतयति भावंतुबादरायणोस्तिहि ३३ तुश
ब्दःशंकानिरासार्थःबादरायणआचार्योब्रह्मविद्यायांदेवादीनामधिकारस्यभावंमन्यते यद्यपिदेवतामिश्रोपासनास्वनधिकार
स्तथापिनिर्गुणब्रह्मविद्यायांदेवानामप्यधिकारोस्तिहिपूर्वोक्तस्यविद्यात्वादित्यनुमानस्यज्योतिष्टोमादिनब्राह्मणकर्तव्यकर्मत्वा
त्य द्राजसूयवदित्याभासस्यसाम्यंद्रष्टव्यं यत्तुज्योतिषिभावाच्चे[illegible]स्योत्तरं अ[illegible]स्तिहियद्यपिदेवताशब्दाःज्योतिरादौप्रयुज्यन्ते तथापित
दभिमानिदेवतापराएवसंभवंति अस्तिहि ऐश्वर्ययोगाज्ज्योतिरादिरूपेणावस्थानंतुविग्रहगृहीतत्वंबहुतनुत्वंचसामर्थ्यं तथाहि
श्रूयतेमेधातिथेर्मेषेतिमेधातिथिंकाण्वायनंमेषोभूत्वाजहारेत्यर्थः तथास्मर्यतेच आदित्यःपुरुषोभूत्वाकुंतीमुपजगामेति
मंत्रार्थवादादीनांस्वार्थेप्रामाण्याभावात्कथंतेभ्योविग्रहवत्त्वसिद्धिरितिचेन्न तत्राप्यस्तिहीत्येवोत्तरंमानांतरविरोधस्यवादयोरभा
वेतेभ्यएवविग्रहसिद्धिरस्ति तथाहि अर्थवादादिभिःस्तुत्यादिकंलक्ष्यतावाच्यार्थोंगीकृतएवनहिवाच्यार्थाभावेलक्षणा

सू.वृ. युक्ता किंच व्यासो व्यासत्वेनैव नपश्येन्नेसांदे व्यासस्वरूपाकांक्षायांसावित्रीपतितो व्यासोपस्थापितोऽमहावासो मंनपिबेत्स व्यासरू
८२ त्रिव्यासस्वरूपं विध्यपेक्षितं सद्विधिप्रमाणकमिसुच्यते यथावा स्वर्गरूपं विध्यपेक्षितं सद्विधिप्रमाणकं तथा निःस्वरूपदेवतोद्दे
शेन द्रव्यत्यागयागादिविध्यपेक्षितं देवतादिस्वरूपं विग्रहवत्त्वं विधिप्रमाणकमेवं एवं मंत्रार्थवादप्रत्यक्षमूलेतिहासपुराणादिभि
रपि विग्रहवत्त्वसिद्धिः न च प्रत्यक्षमूलत्वं पुराणादीनामसिद्धमिति वाच्यं न तत्कर्तृणां योगमाहात्म्याद्देवतादिभिः सह प्रत्यक्षव्यवहार
संभवात् तथा च श्रुतिर्योगमाहात्म्यमाह पृथिव्यप्तेजोनिलखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते न तस्य रोगो न जरा न मृत्युः प्रा
प्तस्य योगाग्निमयं शरीरमिति पादतलमारभ्याजानोर्जानोरानाभेर्नाभेः शिरोग्रीवं ग्रीवाया आकेशाग्रादहमाकेशाग्राद्वा ब्रह्मरं
ध्रं क्रमेण पृथिव्यादिधारणया पृथिव्यादिपंचात्मके भूतसमुदाये समुत्थिते प्रतिपत्तिद्वारा वशीकृते योगगुणे चाणिमादौ प्र
वृत्ते योगाभिव्यक्ते तेजोमयं देहं प्राप्तस्य योगिनो न रोगादिप्राप्तिरित्यर्थः तस्मात्प्रत्यक्षमूलेतिहासपुराणादिभ्योऽपि विग्रहवत्त्वसिद्धावर्थि
त्वादिसंभवाद्देवादीनां ब्रह्मविद्यायामधिकारोऽस्तीति क्रममुक्त्युपासनासु मुमुक्षुप्रवृत्तिरविकलेति सिद्धं ३३ शुगस्य तदनादर
श्रवणात्तदाद्रवणात्सूच्यते हि ३४ पूर्वं यथा तथापि देवानामिति देवशब्दश्रुत्या मनुष्याधिकारनियमापवादेन देवानामधिका
र उक्तः तथा मुमुक्षोर्जानश्रुतेः शूद्रशब्दश्रुत्या लिंगेन द्विजास्वधिकारनियममपोद्य शूद्रस्याप्यधिकारोऽस्तीति दृष्टान्तसंगत्ये
दमारभ्यते शूद्रशब्दस्य सिद्धान्ते क्षत्रियेऽसमन्वयोक्तेरध्यायान्तरभावोऽस्य पूर्वपक्षे शूद्रशब्दस्य वेदान्तानां स्वार्थे समन्वयप्रसिद्धेः श्रु
तिसंगतिः पूर्वपक्षे जातिशूद्रस्यापि ब्रह्मविद्यायां त्रैवर्णिकावद्विशेषः फलं सिद्धान्ते तत्तो विशेष इति विवेकः एवं किलात्र छां
दोग्ये चतुर्थाध्याये उपाख्यायते जानश्रुतिः पौत्रायणः श्रद्धातिथिः बहून्नदाता बहुसद्गुणो बभूव तस्य राज्ञो गुणगणगरिमसं राम ८२

तोषिताः संतो देवर्षयो हंसरूपमास्थायमनिशायांसमये प्रासादोपरि शयानस्यास्य राज्ञ उपरि मालां बध्वाजग्मुस्तेषामग्रेसरं हंसं संबो सं
ध्य पृष्ठत आगच्छन्नेको हंसः साद्भुतमभ्युवाद भो भो भल्लाक्ष भल्लाक्ष अस्य राज्ञो जानश्रुतेर्द्युलोकं व्याप्य विद्यमानं तेजो न पश्यसि।
स्य किं तत्तेजस्त्वां धक्ष्यतीति अतस्तत्स्पर्शसंगं मा गच्छेति भल्लाक्षेत्युपहासः भद्राक्षेत्यर्थः इदमुपश्रुत्याग्रगामी हंसः अस्य वाचकमुवाचगन
मतत संतं सयुग्वानमिव रैक्वमात्थेति अपमर्थः वरेति सोपहाससंबोधनं अवरेत्यर्थः यद्वा वराको जानश्रुतिः कमु पदमाक्षेपा
र्थः कं कमयं इत्यर्थः रैक्वो नाम कश्चन ब्रह्मविष्ठः यो जयति देशान्तरगमनपतिसत्त्वारूढमिति युग्वा गंत्री शकटी तया सह वर्तते इति सयुग्वा –
तमिवेत्यर्थः तथा च एनं वराकं जानश्रुतिं प्राणिमात्रं संतं सरूपं रैक्वं सयुग्वानं भगवन्तं असत्सु तेजसैक्वमिव कथमेतद्वचनं ब्रवीषि
इदं श्रुत्वा अपरो राजा ब्रह्मविद्याधिपरैक्वसमीपं गत्वा कृतार्थो भविष्यतीति पालनं हंसानामभिप्रायः अथैष राजा हंसप्रयुक्तमनादर ति
वाक्यं श्रुत्वा तस्मात्संतनिकृष्टमुत्कर्षं काशं च रैक्वस्य ज्ञात्वा दुःखितमनाः कथमपि निशामतिवाह्य मां विभूतवन्तौ निशावसानसू
चकं वंदिवृंदसमारब्धस्तुतिसहस्रसंवलितमंगलतूर्यनिर्घोषमाकर्ण्य तत्स्य तल्पस्य एव राजा क्षरिति यनारमाहूय प्रादिदेश विविक्त
स्म देशेषु पर्वतगुहादिषु तेषु तेषु रैक्वाख्यं सयुग्वानमन्विष्य मलतो ऽन्यमाचक्षेति स यन्तात थैव क्वचिदत्ति विविक्तदेशे शकटस्याध
स्तात्संतं पामानं कंडूयमानं दृष्ट्वा यमेव रैक्व इति निश्चित्य तत्र कुशलो रैक्वस्य तैस्तैरिंगितैर्गार्हस्थ्येच्छां धनेच्छां चोन्नीय राज्ञे निवेदया
मास स राजा तन्निशम्य गवां षट्शतानि हारं रथं चाश्वयुक्तमादाय सत्वरं रैक्वमुपससाद उपसद्य चोवाच हे रैक्व इदं सर्वं गवादि गृही वै
त्वानुशाधि मां भगवन्निति अथैवमुक्तवंतं सम्भ्रमं सस्पृहं चोवाच रैक्वः अह हारेत्वा मूढ तवैव सह गोभिरस्त्विति अहेति निपातः सा –
रोपाख्यानमाह हारेण युक्तो रथो हारेत्वा गोभिः सहितस्तवैवास्तु किमेतावन्मात्रेण मम निर्वाहानुपयोगिनेति भावः एवं स्थिते

मधिकार उपनयनाभावेन वेदाध्ययनाभावान्नहि वेदवाक्यविचारसाध्य ब्रह्मविद्याया ३+
स॰ वृ॰ चिंता किं शूद्रस्य ब्रह्मविद्यायामधिकारोस्ति न वेति अस्तीति तावत्प्राप्तं कस्मादर्थित्वादिसंभवाद्वेदाध्ययनसाध्याहवनीयाद्यभावे
४३ नाग्निसाध्यकर्मानधिकारेपि देवादिवद्विद्यायामधिकारसंभवात्संवर्गविद्यायां मुमुक्षोर्जानश्रुतेः शिष्यत्वे रैक्वेन गुरुणा शूद्रशब्दप्रयो
गाच्चेति अत्र ब्रूमः न शूद्रस्य ब्रह्मविद्यायामनधीतवेदस्याधिकारः संभवति शास्त्रीयसामर्थ्याभावात् न चैवं सति देवानामप्यन
धिकार इति सांप्रतं तेषां स्वयंप्रभातवेदत्वात् न च शूद्रस्यापि लिखितपाठादिना वेदप्राप्तिरिति युक्तं गुरूपसदनपूर्वकाध्ययनसं
स्कृतवेदस्यैव ब्रह्मविद्याद्युपकारकत्वात् न च शूद्रश्रवणलिंगेन तस्याधिकारः न्यायाभावे लिंगस्यासाधकत्वात् नहि वैदिकशूद्रश न
न ब्दो यौगिकः स्यादित्याशंक्यातं आह सूत्रकारः शुगस्येत्यादि अस्य जानश्रुतेः क्षत्रियस्य तदनादरश्रवणात् तस्य हंसस्यानादरश्रव
णाद्धि शुगुत्पन्ना सा च शूद्रशब्देन सूच्यते हि रैक्वेण तस्य सर्वज्ञत्वज्ञापनार्थं रैक्वः शूद्रशब्दं प्रयुक्तवानिति भावः शूद्रशब्दयोगेन क्षत्रिये त्व
वर्त्तयति तदाद्रवणादिति तस्याः शुचो जानश्रुतिप्राप्तत्वादित्यर्थः यद्वा तस्य जानश्रुतेः शुचं प्राप्तत्वादिति अथवा तं रैक्वं प्रति
जानश्रुतिः शुचा दुद्राव इति शूद्रो जानश्रुतिरुच्यते अतो न शूद्रस्याधिकारः ३४ ननु मुख्य एव शूद्रो जानश्रुतिरस्तु किं जघन्येन यो
गेनेत्यत आह क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात् ३५ जानश्रुतिर्न मुख्यशूद्रः कुतः क्षत्रियत्वगतेः क्षत्रियत्वावधृतेरित्य
र्थः सापि कुत उत्तरत्र संवर्गविद्यावाक्यशेषे चैत्ररथेन प्रसिद्धक्षत्रियेणाभिप्रतारिनामकेन सह समभिव्याहारात्मकलिंगादित्यर्थः
स्व सजातीयानामेव हि प्रायेण सहचारो भवतीति भावः एवं भिप्रतारी संकीर्त्यते अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्ष
सेनिं सूदेन परिविष्यमाणौ ब्रह्मचारी बिभिक्षे इति संवर्गविद्याविध्यनंतरमर्थवादशेषे भार्याख्यशब्दः शौनकस्यापत्यं शौनकं कपि
गोत्रं कापेयं पुरोहितमभिप्रतारिणं च नाम्ना राजानं कक्षसेनस्यापत्यं काक्षसेनिं तौ भोक्तुमुपविष्टौ सूदेन पाचकेन परिविष्यमा
राम
४३

णोसेव्यमानोभिसिंचितवानित्यर्थः अस्य चाभिप्रतारिणः चैत्ररथत्वं कापेयेन चित्ररथपुरोहितेन योगादवगंतव्यं चित्ररथपु
रोहितत्वं च कापेयानां श्रुतौ प्रसिद्धं एतेन वै चित्ररथं कापेया अयाजयन्निति एतेन हि द्विरात्रेण समानान्वयानां हि प्रायेण
समानान्वया एव याजका भवंति ननु चित्ररथपुरोहितकापेययोगादभिप्रतारिणश्चैत्ररथत्वं भवतु तथापि कथं क्षत्रियत्वमिति
चेन्न तस्माच्चैत्ररथिर्नामैकः क्षत्रियपतिरजायतेति श्रुतेः तस्माच्चित्ररथादित्यर्थः एवमभिप्रतारिणः क्षत्रियत्वे सिद्धे तत्समभि
व्याहारात्मकलिंगाज्जानश्रुतेः क्षत्रियत्वमिति सिद्धं ३५ संस्कारपरामर्शात्तदभावाभिलापाच्च ३६ आद्यस्तत्रैवेदाध्ययनोपन
यनाभावान्न जा तिशूद्रस्याधिकार इत्युक्तं इदानीं तु ब्रह्मविद्योपनयनाभावान्न तस्याधिकार इत्युच्यते इति भेदः इतश्च न जाति
शूद्रस्याधिकारः कस्माद्विद्याप्रदेशेषूपनयनादिसंस्कारपरामर्शात् तं होपनिन्ये अधीहि भगव इति होपससाद ब्रह्मपरा ब्रह्मनि
ष्ठाः परं ब्रह्मान्वेषमाणाः एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवंतं पिप्पलादमुपसन्ना इति अयमर्थः तं विद्यार्थि
नमाचार्यः किलोपनिन्ये उपनीतवान् अनुपनीताय विद्यादानायोगादिति तथा सनत्कुमारं प्रति नारदः अधीहि भगव इति
इमं मंत्रमुच्चार्य गुरूपसदनं कृतवानित्याह अधीहीति भरद्वाजादयः षडृषयः परं ब्रह्म परत्वेनोपगतवंत इति ब्रह्मपरास्तद्ध्या
ननिष्ठाश्च ब्रह्मनिष्ठाः परं परमार्थरूपं ब्रह्म विचारयंतो निर्णायार्थमेष पिप्पलादस्तज्जिज्ञासितं सर्वं वक्ष्यतीति निश्चित्य हस्ता
त्तां गुरूपसदनायोग्यात्समित्पाणयः संतस्तमुपसन्नाः किलेत्याह ब्रह्मेति ननु तान्हानुपनीयैवेत्यनुपनीतानामपि वैश्वानर
विद्यायामधिकारः श्रुतेरनियतमुपनयनमिति चेन्न निषेधस्य प्राप्तिपूर्वकत्वात्प्राप्तोपनयनं प्राचीनशालादीनां द्विजातीनामे
वाधिकारेण निषेधस्तु विद्याप्रदेष्टुरश्वपतेराज्ञो न्यूनवर्णत्वात् इत्यर्थः तान्प्राचीनशालादीन् ऋषीननुपनीयैवाश्वपतीरजो

स्त्र

सू॰ टी॰ वाचेति श्रुत्यर्थः ननु शूद्रस्याप्युपनयनं कर्त्तव्यमित्यत आह तदभावाभिलापाच्चेति न शूद्रे पातकं किंचिन्न च संस्कारमर्हतीति
४४ शूद्रश्चतुर्थो वर्ण एकजातिरित्यादिना उपनयनादिसंस्काराभावाभिलापादित्यर्थः पातकं भक्ष्याभक्ष्यविभागाभावकृतं एकजा
तिः उपनयनरहित इत्यस्यार्थः किंच तदभावनिर्धारणे च प्रवृत्तेः ३७ जावालो हि मृतपितृको गुरूपसदनं कर्तुकामो गोत्रमजा
रं नानः मातरं पप्रच्छ किंगोत्रोहमस्मीति सा चाप्यहं न जानामीत्युवाच ततः स जावालो गौतममुपससादोपसद्य चोवाच हे भगवन्
म ब्रह्मचर्यं चरितुं त्वयीच्छामि मामनुगृहाण तु भवानिति ततो गौतमेन किंगोत्रोसीति पृष्टः सत्यकामो जावाल आह नाहं गोत्रं वेद
नापि मन्मातेति ततः स गौतमस्तदीयेन सत्यवचनेन जावालस्य शूद्रत्वाभावं निश्चित्य प्रवृत्ते तेनैतदब्राह्मणो विवक्तुमर्हति स
मिधं सोम्याहरोपत्वा नेष्ये न सत्यादगा इति एतत्सत्यवचनं विविच्य निःसंदिग्धं वक्तुमब्राह्मणो नार्हति अतस्त्वं न सत्यादगाः सत्य
वचनान्नातिगतोसि अतस्त्वामुपनेष्ये तदर्थं समिधमाहरेत्यर्थः ततश्च सत्यस्यायमर्थः तस्य शूद्रत्वस्याभावनिर्धारणे सत्ये
व विद्योपदेशप्रवृत्तिदर्शनादिति तस्मान्न शूद्रस्याधिकारः ३७ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ३८ इतश्च न जाति शूद्रस्या
धिकारः यतः स्मृतितो वेदश्रवणस्य तदध्ययनस्य तत्प्रयोजनयोरर्थज्ञानानुष्ठानरूपयोरर्थयोः प्रतिषेधादित्यर्थः एवं स्मरति
अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रपूरणमिति श्रवणस्य निषेधः त्रपुजतुभ्यां सुतप्ताभ्यां सीसलाक्षाभ्यामस्य शूद्रस्य
द्रुताभ्यां श्रोत्रद्वयपूरणं वेदश्रवणप्रायश्चित्तमित्यर्थः पद्युह वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यमित्यध्य
यननिषेधः न त्वश्रुतस्याध्ययनं संभवति पद्युपाद्युक्तं संचारसमर्थमिति यावत् तादृशं श्मशानं यच्छूद्र इत्यन्वयः न शूद्रा
य मतिं दद्यादिति तदर्थज्ञाननिषेधः द्विजातीनामध्ययनमिज्या दानमिति तदर्थानुष्ठाननिषेधः दानशब्देनात्र नित्यदानमुक्त राम
४५

ते नैमित्तिकज्ञाने शूद्रस्याप्यधिकार इति इत्थं विदुरधर्मव्याधप्रभृतीनां तु पूर्वजन्मकृतश्रवणादिना गर्भस्थवामदेववत्
ज्ञानोत्पत्तिर्मंतव्या तस्मान्न कथमपि ब्रह्मविद्यायां शूद्रस्य वेदपूर्वकोधिकार इति सिद्धं ३८ कंपनात् ३९ समाप्तः प्रासंगिकोधिका
रविचार इदानीं प्रकृतं वाक्यार्थविचारं प्रवर्त्तयिष्यामः शब्दादेव प्रमितः सत्र ब्रह्मवाक्ये जीवानुवादो ब्रह्मैक्यज्ञानायेत्युक्तं न तथे
ह यदिदमित्यादिवाक्ये प्राणानुवादो युक्तः प्राणस्य स्वरूपेणापि कल्पितस्य ब्रह्मैक्यायोगादिति प्रत्युदाहरणसंगत्यास्यारंभः
प्रासंगिकत्वान्नाव्यवहितेन संगत्यपेक्षा पूर्वपक्षे प्राणोपास्तिः फलं सिद्धांते निर्विशेषब्रह्मज्ञानमिति भेदः काठकवाक्यं पठ
ते यदिदं किंच जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवंतीति अस्यार्थः यत्किंचेदमविशिष्टं
जगत्सर्वं प्राणे निमित्ते सत्येजति चेष्टते एजृ कंपने इति धातोः कंपनार्थकत्वात्कंपनं चेष्टैवेति चेष्टत इत्युक्तं तच्च जगत्तस्मादेव नि
स्सृतं उत्पन्नं तच्च प्राणाख्यं जगत्कारणं महत् अनवच्छिन्नं बिभेत्यस्मात्सर्वं वाय्वादीति भयं भीषास्माद्वातः पवत इत्यादिश्रुतेस्त
णत् तदेव भयहेतुत्वं निरूपयति वज्रमिति उद्यतं वज्रमिवेत्यर्थः प्राणात्मब्रह्मज्ञानस्य मोक्षहेतुत्वमाह य इति अत्र संशयः

अशनिविद्युत विशेषः

किं प्राणशब्देन मुख्यप्राणो वायुर्गृहीतो वज्रशब्देनाशनिहेतुर्वायुर्लक्ष्यते उभयविषयकमेकमुपासनं विधेयमुत निर्वि
शेषं ब्रह्मानेन वाक्येन प्रतिपाद्यमिति तत्र नाद्य उपास्तिपर इति युक्तं प्राणशब्दस्य तत्र प्रसिद्धेः वायोर्हि पर्जन्यभावेन विवर्त्तमाने
विद्युन्मेघस्तनयित्नोः जायते इत्यशनिहेतुर्वायुर्लक्ष्यते वज्रशब्दस्यापि युक्तं न च मोक्षफलश्रवणविरोधः तस्माद्वायुरेव व्यष्टि
र्वायुः समष्टिरपुनर्मृत्युं जयति य एवं वेदेति वायुवेदनस्यापि मोक्षहेतुत्वश्रवणादित्येवं प्राप्ते ब्रूमः शब्दादेव प्रमित इति व्यव
हितमपि मंडूकप्लुत्यानुवर्त्तते अस्मिन्वाक्ये प्राणादिशब्दात्परमात्मैव प्रमितः कुतः कंपनात् सर्वशब्दवाच्यस्य समस्तस्य जग

स. ३. तः कंपनाज्जीवनादिचेष्टाहेतुत्वादित्यर्थः ब्रह्मण्यपि प्राणशब्दप्रयोगो बहुलं वेदे दृष्टः प्राणस्य प्राणमित्यादौ वज्रशब्दोपि भय
४५ हेतुत्वसाम्यादुपपद्यते इत्युक्तं वाक्यार्थकथनसमये कंपनहेतुत्वं ब्रह्मणः श्रुतं तेन प्रसिद्धं न प्राणेन नापानेन मर्त्यो जीवति क
श्चनेतरेण तु जीवंति यस्मिन्नेतावुपाश्रिताविति इतरेणान्यनाएतौ प्राणापानौ किंच कंपनवायोः सर्वमुत्तरत्र च ब्रह्मलोके हि
हापि ब्रह्मसग्रहणान्याप्यंते देवभुक्तं तद्ब्रह्म तद्देवा मनस्तमुपासते यस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेति पूर्ववाक्ये ब्रह्मलोकेभु
क्तं ज्योतिष्मत् अमृतं कूटस्थं उक्तं सर्वाधिष्ठानत्वं व्यतिरेकमुखेनाह तदु नेति किंच न जडं तद्ब्रह्म नात्येति श्रुतिक्रमेणानवर्तते
इत्यर्थः न यत्तत्रापि भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचमः इति अस्येश्वरस्य भया
इत्यादयः स्वव्यापारे नियमेनानुवर्तंते राजाज्ञया भृत्यादिवदिति उत्क्रान्त्याद्यपेक्षया मृत्योः पंचमत्वं यदुक्तं वायुवेदनस्य मोक्ष
हेतुत्वं श्रुतमिति तन्न विशेषसामान्यात्मकस्य व्यष्टिसमष्टिवायोर्ज्ञानादेव मृत्युनिवृत्तिमात्रश्रवणात्तस्मादनेन वाक्येन नि
विशेषब्रह्मज्ञेयमिति सिद्धं ३९ ज्योतिर्दर्शनात् ४० पूर्वसूत्रे वशब्दश्रुतिसंकोचानुपपत्त्या प्रकरणात्प्राणशब्दं ब्रह्मेत्युक्तं न तथे
ह संप्रसादवाक्ये प्रकरणानुग्राहकं किंचिदस्ति येन प्रकरणाज्ज्योतिःशब्दं ब्रह्म स्यादिति प्रत्युदाहरणसंगत्यास्यारंभः पूर्वपक्षे आ
फलं दित्योपास्त्या क्रममुक्तिः सिद्धान्ते ब्रह्मज्ञानान्मुक्तिरिति फलभेदः छांदोग्ये प्रजापतिविद्यायां श्रूयते एष संप्रसादोऽस्माच्छरीरात्स
मुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति एतदर्थो दहराधिकरणेनुसंधेयः तत्र संशयः किं ज्यो
तिःशब्देन प्रसिद्धसूर्यादितेजोभिधीयते उत ब्रह्मेति तत्र सूर्यादीति युक्तं प्रसिद्धत्वात् अथ या एता हृदयस्य नाड्य इत्यादिना नाडी
खंडे अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमत इति मुमुक्षोरादित्यप्राप्त्यभिधानात्तत्रापि ज्योतिरु एम
४५

पसंपद्येतिश्रवणात् अपमर्षः विशेषज्ञानोपरमानंतर्यमथशब्दार्थः यत्रप्रारब्धकर्मावसानकालेएतदुत्क्रमणंप्र
यातत्येति किमाविशेषणमस्मादभिमानविषयाद्देहादुत्क्रमणंपराकरोत्यथतदाएतैरेवादित्यस्यरश्मिभिरालंबनेनारू
ढःसन्नाक्रमतेउपरिगच्छतितत्रआदित्यंगच्छतीत्येवंप्राप्तेऽभिधीयते ज्योतिरत्रब्रह्मैवकुतः दर्शनात् यआत्मापहतपाप्मे
त्युपक्रमालोचनयाब्रह्मणएवप्रतिपाद्यतयानुवृत्तिदर्शनादित्यर्थः यदुक्तंसुषुप्तोरादित्यप्राप्तिरभिहितेति तन्न अस्यनि
र्गुणब्रह्मप्रकरणत्वात् नहिनिर्गुणब्रह्मविदोगत्युत्क्रान्तीस्तः अत्रब्रह्मसमश्नुतइतिश्रुतेः तस्मात्स्वंज्योतिर्ब्रह्मैवोपसंपत्त
व्यत्वेननिर्दिश्यतइतिसिद्धं ४० आकाशोऽर्थान्तरत्वादिव्यपदेशात् पूर्वमुपक्रमवशात्स्यान्तेप्रसिद्धोपिज्योतिःशब्दःस्वार्थं
स्त्याजितस्तथाकाशोपक्रमवशाद्ब्रह्मादिशब्दोपिस्वार्थंत्याज्यतामितिदृष्टान्तसंगत्याइदमारभ्यते पूर्वपक्षेभूताकाशा
भिन्नसर्वाधिष्ठानभूताकाशात्मकब्रह्मणउपास्त्याक्रममुक्तिः सिद्धान्तेसर्वाधिष्ठानब्रह्मधियासाक्षान्मुक्तिरितिफलभेदः छां
दोग्येअन्तेश्रूयते आकाशोहवैनामनामरूपयोर्निर्वहितातेयदन्तरातद्ब्रह्मतदमृतंसआत्मेतितेनामरूपेयस्माद्ब्रह्मणोभिन्ने
नदित्यर्थः यद्वातेनामरूपेयस्यब्रह्मणोन्तरामध्येवर्तेतेतदित्यर्थः तत्रकिमाकाशशब्देनभूताकाशउच्यते उतपरमात्मे
ति विशयेरूढ्याभूताकाशइतिप्राप्तेब्रूमः परमात्मैवाकाशशब्दवाच्यः कस्मादर्थान्तरत्वादिव्यपदेशात् तेयदन्तरेत्याका
शस्यनामरूपाभ्यामर्थान्तरत्वेनव्यपदेशात् नहिनामाद्यन्तःपातिनःआकाशस्यभूतस्यतस्मादर्थान्तरत्वमुक्तं आदिशब्दे
नतद्ब्रह्मेत्यादिनाब्रह्मत्वादिव्यपदेशोदृष्टव्यः तस्मादाकाशःपरमात्माज्ञेयइतिसिद्धं ४१ सुषुप्त्युत्क्रान्त्योर्भेदेन ४२ व्यपदेशा
दित्यनुवर्ततेपूर्वेणनामरूपाभ्याभेदेनव्यपदेशादाकाशोब्रह्मेत्युक्तंतदयुक्तंप्राज्ञेनात्मनासंपरिष्वक्तइत्यत्राभिन्नेजीवेभेदोप

स॰ इ॰ चारादिस्मात् शिष्यप्राज्ञशब्दस्य ब्रह्मपरतया न भेद औपचारिक इति समाधानात् संगतिः पूर्वपक्षे जीवानुवादेन कर्मशेषकर्तृ
४६ स्तुतिः फलं सिद्धान्ते जीवानुवादेन ब्रह्मसम्प्रत्ये सर्वधीरिति विवेकः बृहदारण्यके षष्ठप्रपाठके कतम आत्मेति योऽयं विज्ञानमयः
प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इत्युपक्रम्य सुषुप्त्याद्यवस्था मध्य उपन्यस्य स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणे
४ षु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरित्युपसंहार इष्यते अस्यायमर्थः देहादीना
मन्यतमोऽयमात्मा न तद्व्यतिरिक्तो वात्मेति जनकस्य प्रश्ने याज्ञवल्क्यस्योत्तरं योऽयमिति विज्ञानं बुद्धिस्तन्मयस्तत्प्रायः प्राणेषु हृदीति
व्यतिरेके सप्तम्यौ प्राणबुद्धिव्यतिरिक्त इत्यर्थः बुद्धिहेतुर्विविनक्ति अन्तरिति ज्ञानाद्भिन्नेति ज्योतिरिति पुरुषः पूर्णः यो अ
ऽयमेवंभूतः स आत्मेत्यर्थः स्वाधीनसर्वनियन्तृशक्तिरस्तीति वक्तुं सर्वस्येशान इत्युक्तं स्वाधीनस्य नियम्यं च सर्वमधिष्ठाय पाल
यतीति वक्तुं सर्वस्याधिपतिरित्युक्तमिति अत्र संशयः किमयं वाक्यसंदर्भो जीवानुवादकः उतानुवादेनासंसारिस्वरूपप्रति त
पादनपर इति तत्रावस्थासूपन्यासात् संसार्यात्मवाचकशब्दाभावाज्जीवानुवादक इति प्राप्ते ब्रूमः विज्ञानमयस्य सुषुप्त्याद्यवस्था
वज्जीवानुवादेन ब्रह्माभेदप्रतिपादनपरोऽयं वाक्यसंदर्भः न जीवानुवादकः कस्मात् सुषुप्त्युत्क्रान्त्योरवस्थयोः शारीराद्भेदेन व्य
त रस्य प्राज्ञशब्देन व्यपदेशात् तथा हि सुषुप्तौ तावद्व्यपदेश इष्यते तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तर
मेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति उत्क्रान्तावपि अयं शारीर आत्मा प्राज्ञेनात्मनान्वा
रूढ उत्सर्जन् यातीति श्रुतिः शारीराद्भेदेन परमात्मानं प्राज्ञशब्देन व्यपदिशति अन्वारूढोऽधिष्ठितः उत्सर्जन् वेदनातः शब्दं कुर्व
न्निति यावत् ननु भेदव्यपदेशमात्रेण भेदप्रतिपादनपरोऽयं संदर्भ इति कथं गम्यत इति चेदुच्यते ध्यायतीव लेलायतीव सा एम
४६

दिग्रंथप्रवृत्तिदर्शनात्तु ह्येध्यायं संसारस्वरूपमात्मा ध्यायतीव चलतीसां चलतीव चलुतो न ध्यायति न चलतीत्यर्थः एवमतऊ
र्ध्वं विमोक्षायैव ब्रूहीति पदे पदे प्रश्नः अनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इति पदे पदे प्रतिवचनं च वाक्यसंदर्भस्याभेद
परत्वं फलयति अस्यार्थः अतः कामादिविवेकानंतरं मोक्षसाधनीभूतसाक्षात्कारायैव ब्रूहीति जनकप्रश्नार्थः तेन जाग्र
द्गुणादिना अनन्वागत अस्पृष्टो भवति असंगत्वादिति ४२ पत्यादिशब्देभ्यः ४३ इतश्च जीवस्यासंसारित्वप्रतिपादनपरमि
दं वाक्यजातं यतोस्मिन्वाक्ये पत्यादयः शब्दा असंसारित्वप्रतिपादनपराः संसारित्वप्रतिषेधपरा इदं सर्वस्य वशी सर्व
स्येशानः सर्वस्याधिपतिरित्यसंसारित्वपराः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्याद्याः संसारित्वप्रतिषे
धकाः इति तस्मादसंसारिपरमात्मस्वरूपप्रतिपादनपरोयं वाक्यसंदर्भ इति सिद्धं ४३ इति श्रीमत्ब्रह्मसूत्रवृत्तौ ब्रह्मामृ
तवर्षिण्यां प्रथमस्याध्यायस्य तृतीयः पादः ३ एवं तावत्प्रथमे पादे जिज्ञास्यत्वेन प्रतिज्ञातब्रह्मणो जगज्जन्मादिकारणत्वेन स
र्वज्ञे समन्वये वेदांतानां प्रसाध्य ब्रह्मलक्षणस्य प्रधानेनातिव्याप्तिमाशंक्याशब्दत्वेन निराकृतमीक्षतेर्नाशब्दमिति तत्र न त्वनंत
रं स्पष्टब्रह्मलिंगानि वाक्यानि ब्रह्मणि समन्वितानीत्युक्तं द्वितीयतृतीयपादयोरस्पष्टब्रह्मलिंगानि प्रायश उपास्यगानि
ज्ञेयगानि च समन्वितानीत्युक्तं इदानीं तु प्रधानस्याशब्दत्वमसिद्धं कचिच्छाखासु तत्सरशब्दानामपि दर्शनादित्याशंक्य
तेषामन्यपरत्वप्रतिपादनार्थमयं पाद आरभ्यते आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति
च १ पूर्वस्मिन्सूत्रसंदर्भे ब्रह्मैव जगत्कारणं वेदांतप्रतिपाद्यं न प्रधानादीत्युक्तमयुक्तं ब्रह्मवत्प्रधानस्यापि जगत्कारणत्वे
न वेदांतबोध्यत्वात् न च कारणद्वयस्यैव पक्षे विकल्पभेदेन व्यवस्थानादिति प्रासंगिकाक्षेपः साक्षेपसंगतिः पूर्वग्रंथे

स॰ वृ॰
८१

नास्याधिकरणस्य सूत्रकारैरेवाप्येकशब्दं प्रयुंजानैः सूचितां अव्यवहिताधिकरणे न तु प्रसिद्धजीवोक्तिभंगेनाप्रसिद्धब्रह्मो
क्तिवत्प्रसिद्धप्रधानोक्तिपरमेव काठकवाक्यमस्त्विति दृष्टांतसंगतिः प्रधानस्याशब्दत्वप्रतिपादनेन ब्रह्मणि वेदांतानां सम
न्वयदार्ढ्यादस्ति श्रुत्यध्यायसंगतिरविरोधपर्यंतपरविचारत्वात्तत्त्वेषां नयानामपादे पादसंगतिः पूर्वपक्षे ब्रह्मण्येव
वेदांतानां समन्वय इति नियमाभावः फलं सिद्धांते तु तादृशनियम इति विवेकः काठकवाक्यमस्ते आत्मानं रथिनं विद्धि क
शरीरं रथमेव तु बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् आत्मेंद्रियमनोयुक्तं
भोक्तेत्याहुर्मनीषिणः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति अनियतेंद्रियादेः पुंसः संसारित्वं नियतेंद्रियस्याध्वनः
पारं विष्णोः परमं पदमिति श्रावयित्वा किं तदध्वनः पारं विष्णोः परमित्याकांक्षायां तेभ्य एवेंद्रियादिभ्यः परत्वेन परमात्मानं
विष्णोः परं दर्शयति इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिः बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्
यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति अस्यार्थः आत्मनो भोक्तृत्वेन प्राधान्याद्रथित्वं रथस्वामि
त्वं स्थूलं शरीरं भोगायतनत्वेन गुणतया रथसमं विवेकाविवेक इतिभ्यां बुद्धिरेव शरीरद्वारा भोक्तारं सुखदुःखे वा उपनय
तीति सारथिः मनसा अभ्यासेनास्थानीयेन विवेकिना विषयेभ्यः इंद्रियाणि निगृह्यंते तेनाविवेकिना विषयेषु प्रव
र्त्यंते तेन मुक्तं मनसः प्रग्रहत्वं इंद्रियाणि संयतानि मुक्तिद्वारं प्रापयंति असंयतानि अनर्थं संसारमिति हयत्वं तेषां यथा प
श्वो मार्गमालक्ष्य चलति एवमिंद्रियहयास्तान्यमुपलभ्य चलंतीति शरीरादिषु मध्ये शब्दादीनां विषयाणां मार्गत्वं
ननु मार्गरथिनोरश्वाद्यपेक्षा न भोगे चिद्रूपतया स्वभावेनैव तद्भोगादित्यत आह आत्मेति आत्मा भोक्तेत्याहुरिति सं राम
८१

धः तस्यासंगस्यार्थेंद्रियासन्निकर्षे भोगायोगादिंद्रियमनोयोगे यथा भवतीति क्रियाविशेषणेन भोक्तृत्वमाहेंद्रियेति भा
वे निष्ठा पदा आत्मा देहः तद्युक्तमात्मानं भोक्तेत्याहुरिति योजना यद्यप्यंतरंगत्वादिंद्रियाणामर्थापेक्षया परत्वं तथापीद्रि
याणां ग्रहत्वमर्थानां प्राद्यहीनामतिग्रहत्वं श्रुतौ निर्दिष्टमित्यर्थानामेव परत्वं गृह्णंतिवशीकुर्वंति पुरुषं पशुमिति ग्रहा इंद्रि
याणि तेषां ग्राहकत्वं विषयाधीनमित्यतिग्रहा विषयास्तेनातिग्रहत्वयार्थानां प्राधान्यमित्याह इंद्रियेभ्य इति सर्वेंद्रियार्थ
व्यवहारस्य मनोमूलत्वान्मनसोर्थेभ्यः परत्वं निश्चयात्मकबुद्धिद्वारा विषयाभोक्तुरुपकुर्वतीति संशयात्मकमनसो बुद्धेः
प्राधान्यं पूर्वयोरप्युक्तमिति तेनोक्तः आत्मा स भोक्ता बुद्धेः परः भोगोपकरणत्वात्तस्यां स्वामित्वाच्च आत्मनो महत्त्वं परिमहत्त्वस्या
घ्य त्वविशेषणात् आत्मनः परमव्यक्तमिति तस्यात्तस्य विशे[...]त्वादिति व्येषेन स महच्छब्देन हिरण्यगर्भबुद्धिरुच्यते तस्यामपि
बुद्धिव्यापनादात्मत्वं च एवंभूतहिरण्यगर्भबुद्धिं स्मृतिर्दर्शयति मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः प्रज्ञा संविच्चिति
ठभ श्चैव स्मृतिश्च परिपठ्यते अयमर्थः सर्वप्रथमा ता हिरण्यगर्भबुद्धिर्यया तस्या मनस्त्वं संदेहरूपत्वं तस्यादित्यत आह मनिरिति
महत्त्वमुपपादयति ब्रह्मेति भोग्यजाताधारत्वमाह पूरिति निश्चयात्मत्वमाह बुद्धिरिति चितिशक्तिमती ख्यातिः ईश्वरो नियाम
मकः प्रज्ञा लौकिकप्रकृष्टज्ञानं संवित् ज्ञानफलमुपासकस्य तत्त्वाप्तेः चितिश्चिसंधानात्स्मृतिर्ज्ञातसर्वार्थानुसंधानशक्तिम
ती विद्वत्प्रसिद्धमुक्तबुद्धावनुकूलयति प्रतीति श्रुतिरपि यो ब्रह्माणं विदधाति पूर्वमित्यादिका हिरण्यगर्भबुद्धौ वेदाविर्भाव
मीश्वरानुग्रहाद्दर्शयंतीत्यस्या उत्कृष्टरूपत्वमाह एतादृशी बुद्धिः सर्वासां बुद्धीनां परा उत्कृष्टा अस्मिन्प्रत्यक्षे पुरुषग्रहणेनैवांतरभि
ना रथी भोक्ता गृहीतो द्रष्टव्यः आत्मानं रथिनं विद्धीत्यादिवाक्यनिर्दिष्टाः सर्वे गृहीता अवशिष्टः शरीर यदेन कल्पितशरीरं अ

स॰ सू॰
४८

मप्येकेषामिति चेदिति ३

व्यक्ताख्याविद्याकार्यलक्षणया अव्यक्तशब्देन निर्दिश्यत इति महत इति एवं वस्तुगत्यार्थः प्रदर्शितः तत्र संशयः किमव्यक्तशब्देन
प्रधानमुच्यते उत पूर्वप्रकृतं शरीरमिति तत्र सांख्यस्मृतौ महदव्यक्तपुरुषशब्दानां तत्त्वत्रये प्रसिद्धत्वादव्यक्तं प्रधानमेवेत्याह
आनुमानिकं अनुमानगम्यं प्रधानमप्येकेषां शाखिनां प्रसक्षमव्यक्तशब्देन पठ्यते इत्यशब्दत्वमसिद्धमिति चेदिति तत्राव
पवादार्थः परिहरति नेति कुतः शरीरं शरीरस्य पूर्वग्रन्थे रथरूपेण विन्यस्तस्य कल्पितस्याव्यक्तशब्देन गृहीतेर्ग्रहणादित्यर्थः रू पकविन्यस्तगृहीतेः ४
रथात्मनाय पकात्मना विन्यस्तत्वाद्रूपकविन्यस्तं शरीरं च तद्रूपकविन्यस्तं च तत्तथोक्तं तस्य गृहीतेरिति विग्रहः कथं शरीरपराव्यक्तशब्द इत्यत्रा
ह दर्शयति चेति पूर्वापरवाक्यसंदर्भे पर्यालोच्यमाने औचित्येन प्रकृतं परिशिष्टं च शरीरमेवाव्यक्तशब्दवाच्यं दर्शयतीत्यर्थः
१ ननु स्थूलशरीरस्याव्यक्तशब्दार्हस्य कथमव्यक्तशब्दार्हत्वमिति अत उत्तरं पठ्यते सूक्ष्मं तु तदर्हत्वात् २ दर्शयतीत्यनुषंगः
तु शब्दः शंकानिराशार्थः स्थूलशरीरारंभकभूतानां सूक्ष्मं कारणमव्यक्तशब्देन दर्शयति कुतः तदर्हत्वात् अव्यक्तशब्दार्हत्वादि-
त्यर्थः गोभिः श्रीणीत मत्सरमित्यादिवत् प्रकृतिवाचकशब्देन विकारलक्षणेति भावः गोभिर्गोविकारैः पयोभिर्मत्सरं सोमं श्री
णीत मिश्रं कुर्यादित्यर्थः २ ननु भूतसूक्ष्मात्मकाव्यक्तांगीकारे आगतः प्रधानकारणवादः सांख्यैस्तस्यैव प्रधानत्वेनांगीकारादि-
त्यत आह तदधीनत्वादर्थवत् ३ न प्रधानकारणवादोस्माभिरंगीकृतः कुतस्तदधीनत्वात् ईश्वराधीनत्वांगीकारात् स्वतंत्रं चेतना
नधिष्ठितमव्यक्तं जगत्कारणमिति सांख्यमतं सिद्धान्ते त्वीश्वराधिष्ठितं मायाविद्याकारणादिशब्दवाच्यं जगत्कारणमिति महद्वैल
क्षण्य ननु ईश्वर एव जगदुत्पत्तावस्तु किमव्यक्तेनेत्याशंक्याह अर्थवदिति प्रयोजनवदित्यर्थः देवात्मशक्तिं स्वगुणैर्निगूढां मायां
तु प्रकृतिं विद्यादिति श्रुतिसिद्धं ईश्वरस्य सहकारिभूतमव्यक्तमवश्यमंगीकर्तव्यं न हि शक्तिरहित ईश्वरः कार्यलेशं वा कर्तुं समर्थः

राम
४८

तस्मादपिनाव्यक्तंप्रधानं १+

असंगत्वादितितात्पर्यं नन्वेवमपिकथंशरीरस्यमहतःपरत्वंकथंवाअव्यक्तकार्यत्वस्येंद्रियादीनामविशेषेशरीरस्यैवाव्य
क्तपदार्हत्वमितिचेत् उच्यतेमहच्छब्दवाच्यभोक्त्रपेक्षयाहिरण्यगर्भबुद्ध्यपेक्षयावाअव्यक्तकार्यत्वाविशेषात्मावसरत्वसंदे
सिद्धंतदधीनत्वाद्भोक्तुरित्यर्थाच्चतन्निष्ठपरत्वंतद्विकारेदेहउपचर्यते इंद्रियादीनांतत्कार्यत्वाविशेषेपितस्यशब्देनैवोपात्त
त्वात्सरीरशेषात्मकृतान्काश्चव्यक्तशब्देनस्थूलदेहग्रहणान्याप्यमिति आचार्यदेशीयैःसूत्रद्वयमिदमन्यथाव्याख्यातंशरीरं
द्विविधंस्थूलंसूक्ष्मंचद्वयमपिपूर्ववाक्येरथत्वेनगृहीतंउत्तरस्मिन्वाक्येसूक्ष्ममेवाव्यक्तशब्देनगृहीतंततदेहत्वान्नचार्थवत्त
दधीनत्वाद्बंधमोक्षव्यवहारस्येतिसर्वथापिप्रधानस्यनात्रावकाशः ३ अपिचज्ञेयत्वावचनाच्च ४ सांख्यैःप्रकृतिपुरुषवि
वेकान्मोक्षइतिवदद्भिःप्रकृतिरपितदर्थंज्ञेयेत्युक्तं नचज्ञेयत्वेनप्रकृतेअव्यक्तमुच्यते अव्यक्तशब्दमात्रश्रवणात् ४ अ
त्राहसांख्यः ज्ञेयत्वावचनादित्यसंगतंअव्यक्तशब्दवाच्यस्यैवोत्तरत्रज्ञेयत्ववचनात् अशब्दमस्पर्शमरूपमव्ययंतथारसं
नित्यमगंधवच्चयत् अनाद्यनंतंमहतःपरंध्रुवंनिचाय्यतंमृत्युमुखात्प्रमुच्यतेइति अशब्दमित्यादिषुप्रत्येकंनित्यमितिसंब
ध्यतेनित्यंसर्ववदानिचाय्यज्ञात्वापारदर्शशब्दादिहीनंप्रधानंतादृशमेवदर्शवाक्यंज्ञेयत्वेनवदतीतिचेन्न प्राज्ञोहिपरमात्मानि
चाय्यत्वेननिर्दिष्टःनप्रधानंकस्मात्प्रकरणात्पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिःएषसर्वेषुभूतेषुगूढोत्मानप्रकाशत
इत्यादिनात्मनएवप्रकरणात् ५ त्रयाणामेवचैवमुपन्यासःप्रश्नश्च ६ किंचनप्रधानमव्यक्तशब्दवाच्यंज्ञेयंवायस्मात्त्रया
णामेवअग्निजीवपरमात्मनामेवएवंपूर्वोत्तरवाक्यपर्यालोचनयावक्तव्यत्वेनोपन्यासः तद्विषयएवप्रश्नोपिदृश्यतेकठ
वल्लीग्रंथेनान्यस्यतत्रसत्वमग्निंस्वर्ग्यमध्येषिमृत्योप्रब्रूहितंश्रद्दधानायमह्यमित्यग्निविषयःप्रश्नःयेयंप्रेतेविचिकित्साम

वदतीतिचेन्न प्राज्ञोहिप्रकरणात् ८+

क.वृ.
४८

नुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इति जीवप्रश्नः अन्यत्र धर्मादन्यत्राधर्मा
दन्यत्रास्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति परमात्मप्रश्नः लोकादिमग्निं तमुवाच तस्मै या इष्टका
यावतीर्वा यथा वा स्याग्निविषयमुत्तरं हंत त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं यथा च मरणं प्राप्यात्मा भवति गौतम यो
निमन्ये प्रपद्यंते शरीरत्वाय देहिनः स्थाणुमन्येनुसंयंति यथाकर्म यथाश्रुतमिति जीवस्योत्तरं न जायते म्रियते वा विप
श्चिदित्यादि परमात्मनः प्रतिवचनं न सोयं प्रधानस्य प्रश्नोत्तरे इष्यते येनाप्रकृतशंका स्यात्तज्ञेयत्वावस्यात् प्रश्नसंबंधस्तु हे
मृत्सोऽसमर्द्यस्तत्ववास्तत्स्वर्गप्रसर्गहेतुमग्निं अध्येषि सदास्मरमितेन त्वं तद्विषया विद्यायां वरस्यार्थः जीवपरमात्मप्रश्नोपू
र्वस्यात्मानो लोकादिं लोकहेतुविराडष्ट्योपासत्वाल्लोकादिं तमग्निमुक्तवान्नचिकेतसे यमः स्वरूपतो याद्दशीर्यावतीः स
ख्याताः यथा वाग्निश्चीयतेनेन स सर्वमुवाचेति संबंधः हंत इदानीं गुह्यं गोप्यं चिरंतनं ब्रह्म प्रवक्ष्यामीत्युपक्रम्य जीवमपि प्रवी
ति यथेति आत्माजीवो मरणं प्राप्य यथा भवति तथा वक्ष्यामीति योजना कथं भवतीत्यत आह योनिमिति मृतानां पुनर्वि
चित्रजन्मापत्तौ निमित्तमाह यथेति यथा प्रस्मिन्कठवल्लीग्रंथे जीवपरमात्मनोः पृथक् प्रश्नो न तलः वरणत्रणीयेतिमस्तुना
प्रश्नेने नचिकेतसा पितुः सौमनस्याग्निविद्यात्मविद्यात्मकं वरत्रयमेव दृष्टमिति वराणामेष वरस्तृतीय इति लिंगान्निश्चि
तत्वात् तथापि जीवपरयोः कल्पितभेदापेक्षया त्रयाणामित्युक्तं सूत्रकारैः वस्तुतस्तु येयं प्रेत इत्यादिना पृष्टस्यैवात्मनोन्यत्र
धर्मादित्यादिना धर्मविशेषपुरस्कारेणानुकर्ष इत्येक एव प्रश्नः भेदस्य कल्पितत्वात् स पर्यालोचनयावगतं तथा हि येयं
हतः समुत्र परमुत्रं तरन्निह मृतः समत्सुमाप्नोति य इह नानेव पश्यतीति जीवप्राज्ञभेददृष्टिमपवदतीति इह देहे मृतेनान्यं तरे

राम
४८

स २ प्राप्नोति २

वामुचारित्साराद्वसंसारिब्रह्मपश्चामुच्यतेदेवेहदेहेनुप्रविश्यमिसन्योन्येक्रमिसर्पः अभेदंदृष्ठपितुंभेदंनिंदति मत्योरिति पंक्ते
भ्निन्मृत्युरहब्रह्मात्मनिनानेवमिथ्याभेदंपश्यति वस्तुतोहंभिन्न इति मरणान्मरणंपुनःपुनः नसुखभागीसर्पः तथाजीव
प्रश्नानंतरमन्यवरंनचकेतोहरणीयेसाम्यमसुनातैस्तैः कामैःप्रलोभ्यमानोपिनचिकेतावचालनदेनंमुमुक्षुंमत्वाविद्या॰ यद्दान ३
भीप्सितंननचिकेतसंमन्येमत्वा कामावहवोलोलुपंतेनिप्रशस्यप्रश्नमपितदीयंप्रशंसन्युवाच तंदुर्दर्शंगूढमनुप्रविष्टंगुहा
हितंगह्वरेष्ठंपुराणं अध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातीतितेनापिजीवप्राज्ञयोरभेदएवेतिगम्यते म
युभयोर्भेदस्तदाजीवप्रश्नानंतरंप्रसंशाविफलैवस्यात् भूतस्यैतत्वात्तावहवोपिकामानेलोलुपंतश्रेयोविछेदंनकृतवंत
ततोविद्यार्थिनंत्वामन्येहमितिजीवप्रश्नस्यपरमात्मवाक्येनोत्तरमाह तंदुर्दर्शमिति नचात्रभेदमिथ्यात्वेविवादः यतोजी॰
वप्रश्नेपरमात्मानंप्रतिपादयतिउभयोर्भेदेत्वालौकिकेउन्मत्तप्रलापाभवेदित्येवमादीनिवाक्यानिभेदमिथ्यात्वबोधानि ६
महद्वच ७ किंचयथाबुद्ध्यात्मामहानपरःवेदाहमेतंपुरुषंमहांतमित्यादौवेदश्रुतोमहच्छब्दोबुद्ध्यात्मद्वितीयपतत्ववाचीना
गौक्रियतेसांख्यैः तथावैदिकअव्यक्तशब्दोनाप्रकृतप्रधानवाचीतस्मात्प्रकृतशरीरपरमेवाव्यक्तपदमितिसशब्दत्वंप्रधान
स्येतिसिद्धं ७ चमसवदविशेषात् ८ पूर्वमव्यक्तशब्दमात्रप्रसभिज्ञानेनप्रधानस्यार्थतोप्रसभिज्ञानादव्यक्तपदावाच्यत्वे॰
पित्रिगुणत्वादिनाअजामंत्रेर्थतःप्रसभिज्ञानादजापदंप्रधानपरमस्त्विति प्रत्युदाहरणसंगत्यास्यारंभः अध्यायपादसंगति
फलानिपूर्ववद्बोध्यानि श्वेताश्वतरोपनिषदिश्रूयते अजामेकांलोहितशुक्लकृष्णांबह्वीःप्रजाःसृजमानांसरूपाः अजोह्ये
कोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्यइति तत्रसंशयः किमजाशब्देनप्रधानमुच्यतेउततेजोबन्नात्मिकाघारोग्ये

स॰ टी॰
५०

सिद्धांतरप्रकृतिरिति तत्र नजायतइत्यजेत्यजा सांख्यसिद्धा प्रकृतिरेव रजःसत्वतमोगुणात्मकत्वाल्लोहितशुक्लकृष्णा च
भवति किंच एकोजः पुरुषोजुषमाणः सेवमानः कार्यकारणसंघाताभिमानीतियावत् सत्तामनुशेतेतामजांभ्रमेणात्मत्वे
नावगम्यतत्कार्यबुद्धिनिष्ठसुखदुःखादिकमनुभवति अहंसुखीदुःखीतिअन्यस्तुविवेकीभुक्तभोगांकृतभोगविवेकज्ञाना
जहातिसकामुच्यतइति जीवभेदप्रतिपादनात् अजाप्रधानमिति नाशंक्यंप्रधानमित्येवंप्राप्तेब्रूमः नप्रधानस्यासाधारणये
नात्रप्रस्तापकमस्ति नजायतइत्यजेत्यन्यत्रापियोजयितुंस्वसाधारणस्थलेइदमेतत्सदवाच्यमिति निर्धारणाभावदृष्टांतः
चमसवदिति यथार्वाग्बिलश्चमसऊर्ध्वबुध्नइत्यस्मिन्मंत्रेअयंचमसइत्यवधारणंनसंभवतिकथंचिदर्वाग्बिलत्वादेरन्यत्रा
प्यविशेषात् एवमजामंत्रेप्यजात्वादेरविशेषात्प्रधाननिर्णयइत्याशंक्यंप्रधानमित्यर्थः ॥१॥ नन्विदंतच्छिरएषह्यर्वाग्बिलश्च
मसऊर्ध्वबुध्नइतिवाक्यशेषात् शिरश्चमसइतिनिर्णयोभवति इहतुअजामंत्रेकेयमजाप्रतिपत्तव्येत्याशंकासजातीयश्रुत्यंत
रात्तेजोबन्नलक्षणाजाप्रतिपत्तव्येत्यहरयवाचामितिन्यायेनाह ज्योतिरुपक्रमातुतथाह्यधीयतएके ॥२॥ ज्योतिस्तेजउप
ले क्रमआदिर्यस्यास्तेजोबन्नलक्षणायाःसाज्योतिरुपक्रमातुरवधारणेसैवहाजानिर्धारणीयानप्रधानंकस्मात् तथाह्यधीय
तेएकेहीयस्मादेकेछंदोगास्तेजोबन्नात्मिकायाभौतिककार्यप्रकृतेस्तयालोहितादिरूपतामधीयते आमनंतियदग्ने
र्लोहितंरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णंतदन्नस्येति तथाचलोहितादिशब्दसाम्यात्तान्येवतेजोबन्नानीहप्रत्यभि
ज्ञायंते यद्वाअत्रैवश्वेताश्वतराणामुपनिषदिपूर्वापरपर्यालोचनायांअनिर्वाच्यमायायाःजगत्कारणत्वप्रतीतेस्तस्याअजा
शब्देनग्रहणंतथाहि किंकारणंब्रह्मेत्युपक्रम्यतेध्यानयोगानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामितिवाक्योपक्र

शक्यत्वात् तलो
हितादिशब्दश्र
रूपविशेषेषु
रूढाः न रज
प्रादे यथा क
थंचिद्व्ययनम
न्यत्रापि तु ५

राम
५०

मेईश्वरशक्तेर्मायाख्याया जगद्धेतुत्वं गम्यते वाक्यशेषेपि मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति यो योनिं योनिमधिति
ष्ठत्येक इति च तस्या एवावगतेः न स्वतंत्रप्रधानस्येति ॥ ससर्पस्तु ब्रह्मणः भुक्तत्वान्न जगद्धेतुत्वमिति श्रुतिर्ब्रह्मवादिनः प्रति
शंकते किमिति यन्न गत्कारणं तत्किं ब्रह्म वा अन्य है त्वसर्पः यद्वा जगदुत्पत्तौ किमुपकरणं वद्धत्वे सर्पः तेशक्ताः ब्रह्मवादिनो
ते ध्यानैसाक्षिमत्स्यध्यानाख्येन योगेनानुगताः परमात्मानमनुप्रविष्टाः संतस्तस्यैव देवस्यात्मभूतामैक्येनाध्यस्तां मायाशक्तिं
गुणत्रयवतीं त्रिगुणस्य जगतो निर्माणे सहकारिणीमपश्यन्निति योजना प्रधानेमायाशब्दवाच्येति मायिनमिति अविद्या
शक्तियोनिः तस्या एकत्वेपि कार्यभेदेन भेदाद्वीप्सा तदुक्तं सुरेश्वराचार्यैः स्वतस्त्वविद्याभेदोत्र मनागपि न विद्यते इति अधि
तिष्ठति प्रेरयति न हि परमतेरीश्वरस्य तदधिष्ठातृत्वं संमतमिति रहस्यं ९ नन्वजाशब्देन तावत्तेजोबन्नात्मिकायां प्रकृतौ रूढ्
छागादाविवाजात्वजातिसाधारणाभावान्नापि योगिकः जनिमत्त्वात्तेजोबन्नानामित्यत आह कल्पनोपदेशाच्च मध्वादिवदविरो
धः १० चः शंकानिरासार्थः तेजोबन्नात्मिकायां प्रकृतौ नाजाशब्दस्यानुपपत्तिः कुतः कल्पनोपदेशात् यथा लोके प्रसिद्धा म
जा भुक्तभोगामेकल्पजतिअन्यस्तामनुवर्तते एवं साग भोगयोः कार्यकारणसंघातादुपादानभूता या तेजोबन्नात्मिका याः प्र
कृतेः साम्यद्योतनार्थं कल्पनयाजात्वस्योपदेशात् यथा मधुभिन्नस्यादित्यस्य अहो वा आदित्यो देवमध्वित्यमधुत्वोपदेशाय
थावाधेनुभिन्नाया वाचो धेनुत्वोपदेशः एवमजाभिन्नायाः प्रकृतेरजात्वोपदेशोयथा वाधेनुभिन्नाया वाचो धेनुत्वोपदेशः एव
मजाभिन्नायाः प्रकृतेरजात्वोपदेशो न कश्चिद्विरोधः यदुक्तं जीवभेदोस्मिन्मंत्रे प्रतिपाद्यत इति तन्न लोकसिद्धभेदानुवादेन बंधमो
क्षव्यवस्थापरत्वाद्रहस्यमंत्रस्य एको देवः सर्वभूतेषु गूढ इत्यादिनात्मैक्यावगमात् तस्मान्नात्र प्रधानस्यावकाश इत्यशब्दं प्रधान एम

स०इ० मितिसिद्धं १० न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ११ पूर्वस्मादाह्निकाधिकारे प्रसिद्धच्छागीग्रहणयोगादजा तेन
५१ आदिके सूक्तं तथास्मिन् पंच पंचजना आकाशश्च प्रतिष्ठित इति मंत्रे पंचजनशब्देन प्रसिद्धमनुष्यग्रहणयोगादेव पंचवस्तु
संख्या सांख्याभिमत पंचविंशति तत्त्वानां ग्रहणमस्त्विति दृष्टांतसंगत्या सांख्याक्षेपः फलं पूर्ववत् द्रष्टव्यं बृहदारण्यके षष्ठाध्याये
श्रूयते तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमित्यनंतरं यस्मिन् पंच पंचजना आकाशश्च प्रतिष्ठितः तमेव मन्य आत्मा
नं विद्वान् ब्रह्मामृतोऽमृतं प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्य
मिति परमार्थतोऽस्यार्थः ज्योतिषां सूर्यादीनां ज्योतिर्भासकः तद्ब्रह्म देवा उपासते आयुष्ट्वेनामृतत्वेन च तेनोपासनेनायुष्मं
तो जाता इति पूर्ववाक्यार्थः सूर्यादिज्योतिरेकं पूर्वोक्तं प्राणस्य प्राणमित्यादिवाक्यशेषगताश्चत्वारः प्राणादयश्चेति मिलि
त्वा पंचजनाः पंचपंचजनशब्दोऽवयवार्थमनपेक्ष्य पुरुषमात्रं वक्ति लोके अत एव सुपुमांसः पंचजना इत्यमरो जगाद प्रकृ
ते च पुरुषग्रहणे वाक्यस्यानित्यत्वात्समीपस्थात्तत्संबंधिप्राणादयो गृह्यंते पंचजनशब्देन ते कतीत्याकांक्षायां पंचेति संख्यापूर
णं तथा च पंच पंचजना आकाशश्चाविद्याख्यो यस्मिन् प्रतिष्ठितस्तमेव निष्प्रपंचं ब्रह्मात्मकममृतमात्मानं मन्य इति मंत्रद
र्शमात् याज्ञवल्क्येनोक्ते जनकः पप्रच्छ बहिरेव त्वं किं विद्वान्मंतमात्मानं मन्यसे इति तेनाह विद्वानिति अस्मीति शेषः अविद्यायाः
ल्पितं मर्त्यत्वमिति भावः प्राणादीनां जीवनादिप्रदत्वं परलक्ष्यं ये विदुस्ते तस्य स्वरूपं पुराणं चिरंतनं अग्र्यं कार्यदशायामप्य
प्यलुप्तत्वेन भवमग्र्यं ब्रह्म निचिक्युः निश्चयेन ज्ञातवंतः इति तत्र किं पंचजनशब्देन मूलप्रकृत्यादीनि पंचविंशति तत्त्वान्युच्यं
ते उत वाक्यशेषगताः प्राणादय इति संशयेन तानीति भाष्येन यथा हि मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त एम ५१

षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष इति संगृहीतानि पंचविंशतितत्त्वानि वर्ततेन इति पंचपंचजना इति पंचानां जना
नामादिमपंचमपदेन पंचत्वोक्तौ पंचविंशतिजनाः संपद्यंते ते जनाः कतीत्याकांक्षायां संख्यास्मृतिसंगृहीतानि पंचविंशतित
त्त्वानि संबध्यंत इति नाशंक्यं प्रधानमिति स्मृत्यर्थस्तु मूलप्रकृतिः प्रधानमविकृतिः अनादित्वान्महदहंकारो पंचभूतानि सूक्ष्मा
णि पंचतन्मात्रसंज्ञानि च सप्त महदाद्याः प्रकृतयो विकृतयश्च तत्त्वांतरोपादानत्वं प्रकृतित्वं अस्ति हि महतो बुध्याख्यस्याहंकार
तत्त्वं प्रत्युपादानत्वं प्रधानापेक्षया विकृतित्वं एवं पूर्वापेक्षया विकृतित्वमहंकारादीनां द्रष्टव्यं प्रकृतित्वं चाहंकारस्य पंचतन्मा
त्राणामेकादशेंद्रियाणां चोपादानत्वात् पंचतन्मात्राणां च आकाशादिमहाभूतप्रकृतित्वं षोडशकस्य षोडशसंख्यावच्छिन्नस्य
एकादशेंद्रियपंचमहाभूतसमुदायस्य विकारत्वमेव न प्रकृतित्वं पुरुषस्तु कूटस्थ इति अत्राभिधीयते अस्मिन्मंत्रे श्रूयमाण
या पंचविंशतिसंख्यया स्मृतिप्रसिद्धानां पंचविंशतितत्त्वानामुपसंग्रहात्प्रधानस्य शब्दवत्त्वमित्यपि न कुतः नानाभावात् अ
स्मिन्मंत्रे सर्वनाम्नाकाशशब्देन चात्माकाशयोः पृथक् श्रूयमाणत्वात्तौ विहाय गुणत्रयो महदादयो द्वाविंशतिः संभूय पंचवि
शतिसंख्याया वक्तव्याः तथा च पंचानां पंचकानामेकैकपंचकपर्याप्तान्यपंचकव्यावृत्तधर्मवत्त्वाभावेन नानाभावात्संच पंचजना इत्य
नेन पंचानां पंचकानां ग्रहणं इति प्रतिपादनमशक्यं समर्थनं लोके हि गोपंचकं ब्राह्मणपंचकं चेति पंचकरूपमिति वक्तुमुचि
तं एकपंचकपर्याप्तान्यपंचकव्यावृत्तगोत्वादिधर्मवत्त्वादिति अर्थः नानात्वेपि कथंचित्संचविंशतिसंख्याप्रतिपादकत्वांगीकारे
बाधकांतरमाह अतिरेकाच्चेति न ह्यस्मिन्मंत्रे पंचविंशतिसंख्यैव श्रूयते किंतु अतिरिक्तात्माकाशावपि श्रूयेते तथा च तयोः पं
चविंशतितत्त्वातिरिक्तत्वात्सप्तविंशतितत्त्वप्राप्त्या अपसिद्धांतापातः न च गुणत्रितयविवक्षया पंचविंशतिसंख्यापूर्णान्नतत्त्वा

स॰सू॰
५२

तिरेकइति वाच्यं तथासत्यात्माकाशयोरपि पंचकथनवैयर्थ्यात् कथंचिद्रूपजातापेक्षयात्मनः पृथक्त्वेन कथनस्य सार्थकत्वे
पि आकाशस्य पृथक्कथनं निष्फलमेवेति भावः वस्तुतोत्र पंचविंशतिसंख्याप्रतीतिरेव नास्तीत्यपि शब्देन सूचयति पंचजन
शब्दस्यैकत्वेन योगमनपेक्ष्य पुरुषेषु रूढत्वात् तेकतीकांक्षायां पंचत्वसंख्यान्वयात् अन्यथा पंचजना इत्यत्र परभेदांगीकारे प्र
धानजनानामपि गुणत्वेनान्वितस्य पंचत्वस्याथ पंचत्वेन नन्वयायोगो बाधकः गुणयोः परस्परान्वयादर्शनात् उभयोः पंचत्वयोः
प्रधानजनानामसंभवेपि जनेषु रूढत्वात् संख्याप्रतीतिरेव न पंच पंचविंशतिसंख्याप्रतीतिरिति न शब्दवत्प्रधानं ११ ननु ते पं
चत्वसंख्याकाः पंचजनाक इति संदेहे स्वरूपप्रश्नस्योत्तरमाह प्राणादयो वाक्यशेषात् १२ माध्यंदिनशाखायां पंचजनमंत्रानंतर
मंत्रे प्राणचक्षुःश्रोत्रान्नमनांसि श्रूयमाणानि पंचजनशब्देनोच्यंते कस्माद्वाक्यशेषात् प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत
श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनो ये विदुरिति वाक्यशेषस्थत्वादित्यर्थः १२ ननु माध्यंदिनानां प्राणादिष्वन्नस्याम्नाना
द्भवतु पंचसंख्याकाण्वानां तु नाम्नातः कथं पंचसंख्येत्यत आह ज्योतिषैकेषामसत्यन्ने १३ एकेषां काण्वानामसत्यन्ने तद्वाक्ये ज्योति
षा ज्योतिरायुर्होपासतेमृतमिति पूर्ववाक्यस्थज्योतिषा पंचत्वपूरणीयमित्यर्थः तस्माद् शब्दं प्रधानमिति सिद्धं १३ कारणत्वे
न चाकाशादिषु यथाव्यपदिष्टोक्तेः १४ पूर्वाधिकरणत्रयेण प्रधानस्याशब्दत्वप्रतिपादनेन जगत्कारणत्वलक्षणं ब्रह्मण एवेति
नातिव्याप्तमित्युक्ता कारणविषयाणां वेदांतानां ब्रह्मण्येव समन्वय उक्तः स न संभवति तेषां वेदांतानां परस्परविरुद्धार्थप्रतिपाद
कत्वेन स्वार्थनिश्चायकत्वाभावादनुमानसिद्धप्रधानलक्षकत्वे उक्तसमन्वयासिद्धिरित्याशंकानिरासार्थमिदमारभ्यते न चावि
रोधार्थमधिकरणं नेह संगतमिति वाच्यं समन्वयतो वाक्यार्थज्ञानेन स्मृत्यादिमानांतरविरोधशंकानिरासस्याविरोधाध्यायार्थत्वादि

एम
५२

हेतुकारणविषयवाक्यानामेव मिथो विरोधान्न समन्वयो ब्रह्मणीत्याशंका तन्निरासेनैव समन्वयस्य साधयितारस्यास्य संग
तिसिद्धेः असत्सदस्य वा त्वयाभ्युपेतानामसत्पक्षत्वनिराकरणेन समन्वयस्थापनात् सा हि संगतिर्बोध्या एवं पंचत्वसंख्यापर
त्वमत्रैव ज्योतिषां चेति विकल्पस्याविरोधेपि प्रकृते सिद्धे कारणात्मकवस्तुनि विकल्पायोगाद्विरोधे सत्यप्रामाण्यं वाक्याना
मिति तन्निरासाय प्रधानस्य कारणत्वमिति प्रसुप्तोद्धरणलक्षणावांतरसंगतिः पूर्वोत्तरपक्षयोः समन्वयासिद्धिः तत्सिद्धिः
फलमिति विवेकः अत्र जगत्कारणवादिवाक्यानि ब्रह्मणि मानं न वेति विशये नेति प्राप्तं कस्मात् परस्परविरोधदर्शनात्
तथा हि क्वचिदात्मन आकाशः संभूत इत्याकाशपूर्विका सृष्टिः श्रूयते क्वचित्तत्तेजोसृजतेति तेजआदिका क्वचित्तु स प्राण
मसृजतेति प्राणादिका क्वचिदक्रमेव सृष्टिः श्रूयते स इमान् लोकानसृजताम्भो मरीचिर्मरमाप इति स ईक्षिता परमात्मा लो
कानेवाह अंभ इति अम्मयशरीरप्रचुरस्वर्गो लोको अंभः शब्दार्थः रश्मिप्रधानोंतरिक्षलोको मरीचिर्मरणप्रधानो पृथ्वीलोको
मरः अप्बहुलः पातालमापाताललोक आप इति विवेकः एवं सृष्टौ विगानेन तत्कारणत्वलक्षितब्रह्मणि विगानं तस्मादपि जग
त्कारणे विगानं दृश्यते असदेवेदमग्र आसीत् तत्सदासीत्तत्समभवदिति वस्तुतोयमर्थः इदं जगदेव प्रागवस्थायामसदिवाव्य प ५
क्तमासीत्ततोनभिव्यक्तनामरूपादव्यक्तात्कारणादभिव्यक्तनामरूपं जगज्जातं अव्यक्तमेव व्यक्तं भवतीति यावत् तत्कारणं प
रात्मना संभवत्तस्य रूपं क्रियेतेत्युत्तमासीदिति क्वचित्तु तद्धैक आहुरसदेवेदमग्र आसीदित्यसत्कार्यमुपन्यस्य कथमसतः सज्जा
येतेति तन्निरस्य सतः कारणत्वमाह सदेव सोम्येदमग्र आसीदिति क्वचित्स्वकर्तृक एव सृष्टिः श्रूयते तद्धेदं तर्ह्यव्याकृतमा
सीत्तन्नामरूपाभ्यामेव व्याक्रियतेति तदिदं जगत्तर्हि तदा प्रागवस्थायामव्याकृतं कारणमासीत् तत्कल्पितशब्दात्मनामर्थात्म

(left margin:) असद्वा इदमग्र आसीत्ततो वै सदजायत इत्यसतः कारणत्वं वदिदं वाक्यं तेत एवं ५

प ३

सू.३. नाचव्याक्षिप्येतअकर्मवं इत्यर्थः एवं परस्परविरोधान्न ब्रह्मणि समन्वयो वाक्यानां किंतु अनुमानादिसिद्धप्रधानलक्षकत्व
५२ मितिप्राप्ते ब्रूमः कार्यविषयं विगानमक्रमादिप्रयुक्तं न वियदश्रुतेरित्यादिना परिहरिष्यत्याचार्यः अत्र तु कारणविगानं परि
हरति चशब्दस्त्वेवशब्दसमानार्थकः शंकानिरासं वक्ति ब्रह्मणः कारणत्वे विरोधो नास्ति कुतः यथाव्यपदेशोक्तेः आकाशा
दिषु यथाभूत ईश्वरः कारणत्वेन व्यपदिष्ट एकस्मिन्वेदान्ते तथाभूतस्यैवापरवेदान्ते व्युक्तेरित्यर्थः १४ नचक्वचिदसतः क
त्रि सतः क्वचित्सत्त्वभावादुत्पत्तिश्रवणाद्विरोध इति वाच्यमित्याह सूत्रकारः समाकर्षात् १५ असन्नेव स भवति असद्ब्रह्मेति वेद
चेत्सत्सदात्मनमपोह्य अस्ति ब्रह्मेति चेद्वेदेति सदात्मानं निर्धार्य सोऽकामयतेति सतः सकाशात्सृष्टिमुक्त्वा तत्सत्यमित्याचक्षत इ
ति सदात्मानमुपसंहृत्य तदप्येष श्लोको भवतीति प्रकृते सदात्मनि श्लोकमुदाहरति असद्वा इदमग्र आसीदिति तथा च अ श्लो
सच्छब्देन सत एव समाकर्षान्नासतः कारणत्वशंकेत्यर्थः यद्यस्मिन्श्लोके निरात्मकमसदुच्यते तदात्मसमाकर्षणे नान्वयो
दाहरणत्वं कृतात्मसंबद्धः श्लोकः आपद्येत एवमसदेवेदमग्र आसीदित्यत्रापि तत्सदासीदिति समाकर्षादनभिव्यक्तनामरूप
मसच्छब्दं ब्रूते एव एव तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतेत्यत्रापि स एष इह प्रविष्ट आनखाग्रेभ्य इति
प्रकृतपरामर्शिना स इत्यनेनात्मनः समाकर्षणात् न स्वभावादेव जगदुत्पत्तिः व्याक्रियत इति कर्मणा एव कर्तृबोधकलकार
लूपते केरारः स्वयमेव निवृत्तस्यापि ईश्वरकर्तृरिति न विरुध्यते यद्वा कर्मण्येवायं लकारो गम्यते ग्रामः स्वयमेत्यादिवत् द्रष्टव्यः एवं ब्र
ह्मणः कारणत्वे न कश्चिद्विरोधः नापि सृष्टिविरोधात्तत्कारणे ब्रह्मणि विरोधः सृष्टिवाक्यानां निष्प्रपंचब्रह्मपरत्वेन सृष्टेस्तात्प
र्याभावात् श्रुतिरपि निष्फलसृष्टेः फलवद्ब्रह्मप्रतिपत्त्यर्थत्वं दर्शयति अनेन सोम्य शुंगेनापो मूलमन्विच्छाद्भिः सोम्य शुंगेन ते राम
५२

जोमूलमन्विच्छ तेजसासोम्य शुंगेन सन्मूलमन्विच्छेति शुंगं कार्यं सन्मूलं ब्रह्म तस्मात्केनापि विज्ञानमिति जगत्कारणवाक्यानां ब्र
ह्मणि समन्वयः सिद्धः १५ जगद्वाचित्वात् १६ एवं गार्ग्याख्यात्क्षत्रियेण बालाकिना अजातशत्रुनामकस्य राज्ञः संवादः श्रूयते
कौषीतकी ब्राह्मणे बालाकिरजातशत्रुणा ब्रह्मज्ञेन ब्रह्मणि संवदितुं ब्रह्म ते ब्रवाणीत्युपक्रम्यादित्यादिपुरुषान् जीवानुक्रान्
संबोद्भूवत्तमजातशत्रुर्मृषावादितया पोधशिष्यभूतायगार्ग्याय ब्रह्मोपदेशार्थमिदमाह यो वै बालाक एतेषां पुरुषाणां कर्ता
यस्य वै तत्कर्म स वै वेदितव्य इति अस्यार्थः हे बालाके त्वयापि पुरुषा आदित्यादिगता ब्रह्मत्वेनोक्तास्तेषां पुरुषाणां कर्ता न केवलं
जगदेकदेशपुरुषकर्ता अपितु सर्वस्यैव जगत इत्याह यस्येति कर्मपदं जगद्वाचि सर्वसामान्यविशेषाभ्यां जगत्कर्तात्वेनानि
र्दिष्टो ज्ञेय इति स इति एवमस्य संगतिः पूर्वसच्छब्दात्तदेकवाक्यस्यासच्छब्दोनीतः इहतु बालाकिवाक्यस्य ब्रह्मशब्दादजातश
त्रुवाक्यस्य कर्मशब्दो न शक्तेन तदनुगुणतया नेतुं वाक्यभेदादिति प्रत्युदाहरणं यद्वा वाक्यभेदेपि पर्यायतरत्सच्छब्दाला चीनास
च्छब्दोनीततत्पर्यायतरकर्मशब्दात्तदनुगुणतया ब्रह्मशब्दनयनमिति दृष्टान्तसंगतिः उक्तवाक्यसमन्वयासिद्धत्वसिद्धिः पूर्वोत्तरप
क्षयोः फलं बोध्यं एवं स्थिते संशयः किमत्र पुरुषाणां कर्ता वेदितव्यः प्राण उत जीवः अहोस्वित्परमात्मेति प्राण इति तावत्प्राप्तं कु
तः यस्य वै तत्कर्मेति चलनात्मकस्य कर्मणो वाय्वात्मकप्राणस्यैव संभवात् वाक्यशेषे चाप्यस्मिन्प्राण एवैकधा भवतीति प्राणश
ब्दश्रवणात् जीवो वा तल्लिंगस्यापि वाक्यशेषे दर्शनात् तद्यथा श्रेष्ठी स्वैर्भुंक्ते यथा वा स्वाः श्रेष्ठिनं भुंजते एवमेवैष प्रज्ञात्मा नेतरात्म
भिर्भुंक्ते एवमेवैत आत्मानं भुंजंतीति अयमर्थः श्रेष्ठी प्रधानः पुरुषः स्वैर्भृत्यैरुपकरणैर्भुंक्ते भृत्या अप्यशनाच्छादनादिना प्रधा
नमुपजीवंत्येवं जीवोप्यादित्यादिभिः प्रकाशादिना भोगोपकरणैर्भुंक्ते भत्सवदादित्यादयो वा जीवं हविर्ग्रहणादुपजीवंतीति

स.इ.
५४

प्राणभृत्त्वाज्जीवस्यैव भोग उपपन्नस्तस्माज्जीवमुख्यप्राणान्यतरसमन्वितमिदंवाक्यमिति प्राप्ते ब्रूमः अत्र वेदितव्यः पुरुषाणां
कर्ता परमात्मैव तथाहि ब्रह्म ते ब्रवाणीत्युपक्रम्य बालाकिनादित्यादिपुरुषान्मस्तकेषु सत्सु तन्ममुख्यान्मवादितया योवाजातु-
शत्रुणा वेदितव्यतयोपदिष्टः पुरुषकर्ता जीवो मुख्यप्राणो वा न हि भवितुमर्हति तथात्वे गार्ग्योपदेश्यादजातशत्रोरविशेषप्रसं-
गात्पुरुषकर्तृत्वं च परमात्मनोऽन्यत्राजसानसंभवत्येव न च कर्मशब्दानुपपत्तिः क्रियत इति व्युत्पत्त्या कर्मशब्दस्य जगद्वाचित्वात्
सप्राणपुरुषस्थितं जगदेतदिति सर्वनाम्ना परामृशति न च जगदंतर्भूतं पुरुषकर्तृत्वं पृथगुक्तमिति युक्तं गार्ग्येणाब्रह्मत्वेनो-
क्तपुरुषाणामब्रह्मत्वख्यापनेनापगा बलीवर्दन्यायेन पृथगुक्तिसंभवादिति १६ जीवमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्यातं ७ न
नु जीवलिंगान्मुख्यप्राणलिंगाच्च न ब्रह्मपरत्वावधारणमिति चेत्तद्व्याख्यातं प्रतर्दनाधिकरणे उपासात्रैविध्यादाश्रितत्वादिह
तद्योगादित्यत्रावहरूतया जीवमुख्यप्राणलिंगं ब्रह्मपरं व्याख्यातमित्यर्थः जीवप्राणपरत्वेऽभ्युपगम्यमाने ब्रह्मपरत्वस्याप्य-
वश्यकत्वाद्वाक्ये त्रैविध्यस्यादिदोषदोषस्तत्रोक्तः प्रकृतेऽपि समान इति भावः प्रतर्दनविचारे कर्मपरत्वाविवादेऽगतार्थता
द्रष्टव्या १७ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके १८ जैमिनिराचार्योऽस्मिन्प्रकरणे जीवपरामर्शमन्यार्थं ब्र-
ह्मप्रसिपत्त्यर्थं मन्यते अतो ब्रह्मपरमेवेदं वाक्यं कुतो मन्यते प्रश्नव्याख्यानाभ्यामात्मजिज्ञासुं बालाकिमाह्याजातश-
त्रुः सुप्तपुरुषसमीपं गत्वाहे सोमराजन्नितिसुप्तमाहपाह्वानशब्दाश्रवणात् प्राणादीनामभोक्तृत्वं प्रतिपाद्य प्रतिपादितोस्या-
पनेन प्राणादिव्यतिरिक्ते जीवे प्रतिबोधिते पुनर्जीवातिरिक्ताधिकरणं भवनापादानविषयान्प्रश्नान्द्वयमेव चकार क्वैष ए-
तद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत्कुत एतदागादिति अयमर्थः भो बालाके शयनमेतद्यथा तथैतत्पुरुषः कस्मिन्नधि-

एम
५४

कारणोत्थापेशयनं कृतवानित्यधिकरणमध्यार्थः एतद्भुवनमेकीभावोपप्यास्यात्तत्र यथाकाश्यमेत्तुस्तोमृदितिभवनापतनमध्य
ध्यार्थः शयनभवनयोराधारं प्रष्टा उत्थानावस्थायामागमनापादानं पृच्छति कुत इति एतदागमनं यथास्यात्तथाकस्मादु
द्भावस्थायामागात् उत्थानं कृतवानित्यर्थः एतत्सर्वं न रदानात्मप्य वालाकिर्मत्वा तूष्णीमेवात्र समाह यथा सुप्तः स्वप्नं न कं
चन पश्यत्यथास्मिन्प्राण एवैकधा भवती सादिना शयनभवनयोराधार उत्थानापादानं च प्राणशब्दवाच्यः परमात्मैवेत्युक्त
मर्थः तस्माद्यस्मिन्जीवस्य भोक्तुः शयनभवने यस्माज्जीवोत्थानमेकीभावश्च श्रुतरूपं तत्र परमात्मा वेदितव्य इति योपदिष्टः पुरु
षकर्ता अपि चैवमेके वाजसनेयिनो वालाकिजातशत्रुसंवादे स्पष्टं विज्ञानमयं जीवं तद्व्यतिरिक्तं परमात्मानमामन
न्ति य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागादिति प्रश्ने य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत इत्युत्तरे च आकाशः
परमात्मेति दहराधिकरणे निर्णीतं तस्मात्पुरुषकर्ता वेदितव्यः परमात्मनि कौषीतकीब्राह्मणवाक्यं समन्वितमिति सिद्धं
१८ वाक्यान्वयात् १९ पूर्वं ब्रह्मोपक्रमसामर्थ्याद्ब्रह्मपरत्वमुक्तं तर्हि तद्दृष्टमैत्रेयीब्राह्मणवाक्यस्य जीवोपक्रमसामर्थ्याज्जी
वपरत्वमस्त्विति दृष्टान्तसंगतिः फलं पूर्ववत् बृहदारण्यके श्रूयते स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु
कामाय पतिः प्रियो भवतीत्युपक्रम्य पतिजायापुत्रप्रभृतीनां प्रियत्वं चात्मार्थत्वेनाप्रियत्वमुक्तान्यार्थत्वमात्मानि हृत्वाधि का
प्रियत्वेनाननिशयानन्दात्मनो ज्ञानन्त्वतामाह याज्ञवल्क्य आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्
मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति अत्र संशयः किं जीवोऽत्र द्रष्टव्यत्वादिरूपेणोपदिश्यते किं
वा परमात्मेति तत्र जीव इति प्राप्तं कुतः पतिजायादिभोग्यजातं वत्तो भोक्तुरुपक्रमात् मध्येपीदं महद्भूतमनन्तमपारं विज्ञान

सू॰ह॰ घन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति प्रकृतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं जीवस्वरूपेण
५५ वदन् जीवस्य द्रष्टव्यत्वं दर्शयति श्रुतिरर्थस्तु इदं प्रत्यग्रूपं महद् अनवधिकं भूतं सत्यं अनंतं नित्यं अपारं सर्वगतं विज्ञानघनो॰
ऽनेकतानः ज्ञासंततस्तमिश्रार्थत्वमेव कारार्थः सर्वेतेभ्यः कार्यकारणाकारेण परिणतेभ्यो विद्याभूतेभ्यः सम्यगेनोत्था
य जीवत्वमनुभूय तान्येव भूतानि ज्ञानादिना नश्यति तस्मिन्ननु पश्चाद्विनश्यति जीवत्वं त्यजति न हि तत्त्यागानंतरम् स्वरूपादिवि
शेषज्ञानमस्तीति तस्माज्जीवदशाप्रासेन भ्रमः परमात्मैवात्र द्रष्टव्यतयोपदिष्ट आत्मा कुतः वाक्यान्वयात् उपक्रमादिपर्या
लोचनया वाक्यस्य ब्रह्मण्येवान्वयात् इत्यर्थः तथाहि अमृतत्वस्य तु नाशास्ति वित्तेनेति वित्तसाध्येन कर्मणा मोक्षस्य सा
शा नास्तीति याज्ञवल्क्यादुपश्रुत्य मैत्रेयी मोक्षमाशासाना तत्साधनं पृच्छति येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भग
त्य त्या वान्वेत्थ तदेव मे ब्रूहीति यदमृतत्वसाधनं त्वं वेत्थ तदेव मे ब्रूहीत्यर्थः एवं पृष्टो याज्ञवल्क्यः इदमात्मज्ञानमुपदिशति आ
त्मा वा अरे द्रष्टव्य इत्यादिना न हि जीवज्ञानान्मोक्ष इति कश्चिदभ्युपैति अतो द्रष्टव्यः परमात्मा तस्यात्मनो वा अरे दर्शनेने॰
ति परात्मज्ञानात्सर्वज्ञानं प्रतिज्ञातं तत् दुंदुभ्यादिदृष्टान्तैः साधयन्नस्य परमात्मत्वं गमयति स यथा दुंदुभेर्हन्यमानस्य॰
न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणायेत्यादिना दुंदुभिशंखवीणाशब्दाः दृष्टान्तत्वेनोक्तास्तस्यायमर्थः दुंदुभिशंखवीणापदैस्तज्जन्य॰
सामान्यशब्दा लक्ष्यंते तथा च यथा दुंदुभ्यादिशब्दसामान्यात् दुंदुभ्यादिशब्दविशेषाः भेदेनाग्रस्यमाणाः श्रुतिग्रहणाः सज
तवत्तत्र कल्पितास्तद्ग्रहणेन गृहीता भवंति तथा चिद्रूपस्फुरणं विना स्थितिकाले स्फुरणाभावं जगत्तत्र कल्पितं तद्ग्रहणेन
गृहीतं भवतीति ततो नातिरिच्यत इति तथा एतावदरे खल्वमृतत्वमिति उपसंहारदर्शनाच्चात्र द्रष्टव्य आत्मा परमात्मैवेति १९ एम

ननुपपत्तिजन्यापादिभोगप्रज्ञानेनलिंगेनजीवोपक्रमः प्रतीयतेसत्यंकथमित्यत्रआह प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः २० जीवब्र
ह्मणोर्हिकार्यकारणयोर्भेदाभेदौवर्तेते अत्यंतभेदे एकविज्ञानप्रतिज्ञाविरोधप्रसंगात्तथा चतत्प्रतिज्ञासिद्धेरिदमभेदांश
मादायजीवोपक्रमणंलिंगमित्याश्मरथ्यआचार्योमन्यते २० जीवस्यकार्यत्वमभेदसमानसत्ताकभेदत्वंचासहमानः २
समाधानांतरमाह उत्क्रमिष्यतएवंभावादित्यौडुलोमिः २१ संसारदशायामत्यंतभिन्नस्यजीवस्यब्रह्मात्मत्वसाक्षात्कारोत्त
कार्यकारणसंघातादुत्क्रमिष्यतएवंभावात्परमात्मनैकीभावाद्भविष्यदभेदमादायजीवोपक्रमइत्यौडुलोमिराचार्योमन्यते
२१ नन्विदमप्यसमंजसंसत्कार्यकारणसंघातवतः संसारिणोत्यंतभिन्नस्यमुक्तिदशायामभेदायोगादित्यरुच्यापरंसमा२
धानमाह अवस्थितेरितिकाशकृत्स्नः २२ ब्रह्मणस्त्वविद्याकल्पितभेदेनजीवरूपेणावस्थितेर्जीवोपक्रमोविरोधंकाशकृ
नो त्स्नआचार्यः श्रुतेस्तास्वर्पत्तोमन्यतेतत्तएवविज्ञानात्मभावेनब्रह्मणोभूतेभ्यः समुत्थानंजीवलिंगत्वेनप्रागुपन्यस्तंनविरुध्यते
अभेदांशस्वतस्त्वात्दृष्टमेपरब्रह्मणिमैत्रेयीब्राह्मणवाक्यंसमन्वितमितिसिद्धं २२ प्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधात् २३
जन्माद्यस्ययतइतिसूत्रेयद्ब्रह्मणोजगत्कारणत्वमुक्तंतदत्रविचार्यते यद्यपिजन्मादिनिपानंतर्यमेतस्यसूक्तं तथापिनिर्णी
तत्वात्सयेदर्शनेनिमित्तत्वमात्रसाधकानुमितेर्विरोधोक्तिःसुकरेतिसमन्वयावसानेलिखितमिदमधिकरणमितिबोध्यं नच
जन्माद्यधिकरणवैयर्थ्यंनिर्विषयत्समन्वयसाधनासंभवेनजगत्कारणात्मकविषयमात्रस्यतत्रोक्तत्वात् उपादानत्वंतुएतद२
धिकरणसिद्धं नत्रोक्तमितिनकश्चिद्दोषः जन्मादिनयस्याध्यायादिसंगतत्वादस्यापितद्विचारात्मकस्यास्याध्यायादिसंगतिः
पूर्वपक्षेएकविज्ञानात्सर्वसर्वविज्ञानप्रतिज्ञागौणत्वंसिद्धांतेतन्मुख्यत्वमितिफलभेदः अत्रसंशयः किंब्रह्मणोजगन्नि

सू॰ वृ॰ ५६

मित्तत्वमात्रमुतोपादानत्वमपीति न च न देक्षत बहु स्यां प्रजायेयेत्यादिना सर्वत्रेक्षापूर्वककर्तृत्वश्रवणात्कुलालवन्निमित्त-
मात्रमिति प्राप्ते ब्रूमः प्रकृतिश्च ब्रह्म चकारान्निमित्तत्वमपि कुतः प्रतिज्ञादृष्टांतानुपरोधात् प्रतिज्ञादृष्टांतयोः सामंजस्यादित्य-
र्थः प्रतिज्ञा हि येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति अस्यां च प्रतिज्ञायामात्मज्ञानेन सर्वविज्ञानमुच्यमान-
मात्मन उपादानत्वं गमयति निमित्तत्वे तदसंभवात् न हि कुलाले ज्ञाते घटादिकं ज्ञातमिति शक्यते वक्तुं उपादाने तु तन्मयो ह्युपा-
दानोपादेययोरव्यतिरेकात् यथोक्तं तत्तज्ज्ञानेन तत्तज्ज्ञानं दृष्टांतोपि यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं
विकारो नामधेयं मृत्तिकेत्येव सत्यमित्युपादानविषय एव दृश्यते विकारो वागालंबनमात्रं वस्तुतोऽसन्निति यावत् तदेव सा-
धयति नामधेयमिति भूम्यशेषं निषेधति मृत्तिकेति निमित्तत्वमपि प्रतिज्ञादृष्टांतानुपरोधादेव बोध्यं निमित्तस्योपादाना-
दन्यत्वे प्रतिज्ञादृष्टांतयोरसामंजस्यात् तथा बृहदारण्यकेपि प्रतिज्ञादृष्टांतौ दृश्येते आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं
विदितमिति प्रतिज्ञा स यथा दुंदुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो
गृहीत इति दृष्टांतः घटाद्यधिष्ठानतयानुगतो यः प्रकाशः स उपादानमित्यत्र दृष्टांतो यथा तथोच्यते बाह्यान् दुंदुभिशब्दसामा-
न्यबहिर्भूतान् दुंदुभेस्तच्छब्दसामान्यस्येत्यर्थः तथा हन्यमानदुंदुभिजन्यस्य शब्दसामान्यस्य ग्रहमंतरेण कश्चित्सुमान् दुंदुभि
शब्दसामान्यबहिर्भूतान् शब्दविशेषान् ग्रहणाय ग्रहीतुं न शक्नुयादिति व्यतिरेकः अन्वयोपि दुंदुभिशब्दसामान्यस्य ग्रहणेन
दुंदुभ्याघातसंज्ञको विशेषशब्दो गृहीतो भवति दुंदुभ्याघातस्य वीररसाभिव्यंजकस्य विशेषशब्दस्य ग्रहणात्तदवांतरशब्द-
विशेषा गृहीता भवंतीत्यर्थः २३ अभिध्योपदेशाच्च २४ इतश्चात्मनः कर्तृत्वप्रकृतित्वे कुतः अभिध्योपदेशात् ध्यानोपदे-

राम ५६

शादित्यर्थः सोकामयतेतिध्यानोपदेशात्कर्तृत्वं बहुस्यामितिध्यानोपदेशात्प्रकृतित्वमिति २४ साक्षाच्चोभयाम्नानात् २५ प्र
कृतित्वे हेत्वन्तरमिदं सर्वाणिह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्तीत्याकाशशब्देन साक्षाद्ब्रह्म गृही
ले त्वा जगदुत्पत्तिप्रलयोरुभयोराम्नानान्ब्रह्म प्रकृतिरित्यर्थः यस्मिन्नुत्पत्तिप्रलयौ यस्य कार्यस्य तत्कार्यं प्रति तदुपादानं यथा घटस्य
मृदिति आस्तेरितिभावः २५ आत्मकृतेः परिणामात् २६ लोके हि कृतिमान्कर्ता कृतिविषयो मृदादिरुपादानमिति व्यवस्था प्र
कृते चात्मनः कृतिमत्त्वं कृतिविषयत्वं च श्रूयते तदात्मानं स्वयमकुरुतेति आत्मानमिति द्वितीयया कृतविषयत्वं स्वयमित्यने
न कृतिमत्त्वं तथा च ब्रह्म निमित्तमुपादानं च कुतः आत्मकृतेः आत्मसंबन्धिनी कृतिरात्मकृतिः संबन्धो विषयविषयिभाव आ
धाराधारिभावश्च तत्तो हेतोरित्यर्थः नन्वात्मनः कर्तृत्वेन पूर्वं सिद्धस्य कथं कृतिकर्मत्वमत आह परिणामादिति परिणामो विवर्तः
सिद्धस्यापि विवर्तात्मना साध्यत्वात्कर्मत्वोपपत्तिरित्यर्थः महापरिणामादिति पृथक्सूत्रं इतश्च प्रकृतिर्ब्रह्म कुतः परिणामात्
सच्च त्यच्चाभवदित्यादिना परिणामसामानाधिकरण्येनात्मनः श्रवणादित्यर्थः मृद्घट इतिप्रकृतिविकारयोः सामानाधिक
रण्यं दृष्टमितिभावः २६ योनिश्च हि गीयते २७ यद्भूतयोनिं परिपश्यन्ति धीराः कर्तारमीशं पुरुषं ब्रह्मयोनिमिति प्रकृतिवाच
कयोनिशब्देनाम्नायते गीयते अतश्च प्रकृतिर्ब्रह्मेत्यर्थः तस्मात्ब्रह्मणः प्रकृतित्वं कर्तृत्वं चेति सिद्धं एतेन सर्वे व्याख्याता व्या
ख्याताः २८ एतावतान्थेन ईक्षतेर्नाशब्दमित्यादिना अशब्दत्वादिभिर्हेतुभिः प्रधानकारणवादो निराकृतः न पुनरणुस्वभा
वात्सत्कारणवादास्तेषामपि कारणत्वबोधकश्रुतयो दृश्यन्ते न यथाहि छान्दोग्ये श्वेतकेतुं प्रत्युद्दालकः सूक्ष्मवस्तुनि स्थूलस्यान
र्भावं प्रतिपादयितुमाह न्यग्रोधफलमत आहरेतीदं भगव इति भिन्द्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भ

सू॰वृ॰ गवइत्याहारामेगेकं भिंद्धीति भिन्नाभगवइति किमत्रपश्यसीति नकिंचनभगवइति एतस्यवैसोम्यैषोणिम्नएवंमहान्यग्रोधस्ति
५७ ष्ठतीति जगतः प्रागवस्थायां दृष्टांतः श्रूयते तत्र नकिंचनाणुशब्दश्रवणाच्छून्यस्वभावाणुकारणवादादार्ष्टीकत्वेन प्रतीयंते न ति
प्या चाऽसदेवेदमग्रआसीत् तन्नामरूपाभ्यामेवव्याक्रियतेत्यादौ असत्स्वभाववादो प्रतीयेते तासां श्रुतीनां तेषु वादेषु तात्पर्यम
स्ति न वेति संशये अस्तीति प्राप्ते अभिदिशति एतेनेति एतेन प्रधानकारणवादनिराकरणोपेहतत्त्वोशब्दत्वाचेतनत्वैकवि न
ज्ञानप्रतिज्ञानुपपत्त्यादयस्तेषामणुवादिपक्षेपि साम्येन सर्वे अणुवादिकारणवादा निराकृतत्वेन व्याख्याताः न च नकिंचनादि
शब्दविरोधः अनभिव्यक्तनामरूपपरत्वेनाविरोधात् सूक्ष्मत्वाद्वात्मन्यणुशब्दो गौणः स्वभाववादस्तु पूर्वं समाहितः अभ्यासो
ध्यायपरिसमाप्तिं द्योतयति तस्माज्जगत्कारणे सर्वज्ञे जिज्ञास्ये वेदान्तानां समन्वयो नान्यत्रेति सिद्धं समन्वयेस्पष्टलिंगमस्पष्ट
त्वेप्युपास्यगं ज्ञेयगं परमात्मनि चतुर्विंशपादेष्वनुक्रमादिति २८ इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमत्मकुरंगोविंद श्री चरणार
शिक्षित श्रीरामकिंकरवर्यरचितो ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमस्याध्यायस्य चतुर्थः पादः ४ प्रथमाध्यायः समाप्तः १
अनिर्देश्याधिकरणे प्रधानवदशब्दत्वं परमाण्वादीनामपीत्युक्तं संप्रति प्रधानस्यैवैदिकशब्दत्वाभावेपि स्मृतिरूपशब्दत्वमा
शंक्य परिहरति स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् १ प्रथमाध्याये सर्वज्ञे सर्वशक्तौ जगज्जन्मा
दिकारणे सर्वेषां वेदान्तानां समन्वयः प्रतिपादितः अशब्दत्वादिहेतुभिः प्रधानादिकारणवादाश्च निराकृताः इदानीं द्वितीयेध्या
ये प्रथमपादे सांख्यादिमतानां दुष्टत्वं प्रतिपाद्यते तृतीयपादे आद्यभागेन पंचमहाभूतश्रुतीनां परस्परविरोधः परिह्रियते द्वि
तीयभागेन जीवश्रुतीनां चतुर्थपादे लिंगशरीरश्रुतीनां विरोधपरिहार इत्येतदर्थमयमध्याय आरभ्यते तदुक्तं द्वितीये स्मृति राम

५७

तर्काभ्यामविरोधो न दृष्टताभूतभोक्तृश्रुतेर्लिंगश्रुतेरप्यविरुद्धैतेति उक्तसमन्वयस्य स्मृत्यादिविरोधेन विरसनमनेनाक्षिपते
इस्तनयोरध्याययोर्विषयविषयिभावः संबंधः निर्विषयकविरोधपरिहारायोगाद्विषयभूतसमन्वयस्यादौ विचारः कृतः विष
यिभूतविरोधपरिहार इदानीं क्रियत इति युक्तमेतस्याध्यायस्य पूर्वाध्यायानंतर्यं श्रोतसमन्वये विरोधपरिहारत्वादस्य पादस्य
श्रुत्यध्यायसंगतिः सर्वत्र पूर्वोत्तरपक्षयोः विरोधाविरोधौ फलमिति विवेकः तत्र प्रथमं स्मृतिविरोधपरिहारः अत्र संशयः उक्त
समन्वयः किं सांख्यादिस्मृत्या विरुध्यते न वेति विरुध्यत इति प्राप्तं कुतः सर्वज्ञकपिलादिप्रणीतत्वेन प्रामाण्यात् श्रुतिरपि कपिल
मुनिमप्रतिहतज्ञानं दर्शयति ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्विभर्ति जायमानं च पश्येदिति यत्तावदग्रसर्गादौ जायमानं क
पिलनामानमृषिं स्थितिकाले च प्रसूतं भूतभविष्यद्वर्तमानविषयकज्ञानैर्विभर्ति पुष्णाति तमीश्वरं पश्येदिति योजना तस्मान्न
ब्रह्मणि कारणे समन्वयः महर्षिप्रणीतप्रधानकारणवादिस्मृतीनामनवकाशत्वदोषप्रसंगात् न च जगत्कारणे सिद्धवस्तुनि
विकल्पो युज्यते तस्मात्प्रधानानुगुणतया श्रुतयो नेया इति चेदित्यंतः सूत्रावयवार्थः परिहरति नेति कुतः अन्यस्मृत्यनवकाशदो
षप्रसंगात् नच जगत्कारणे सिद्धवस्तुनि विकल्पो युज्यते तस्मात्प्रधानानुगुणतया श्रुतयो नेया इति चेदित्यंतः सूत्रावयवार्थः प
रिहरति नेति कुतः अन्यस्मृत्यनवकाशदोषप्रसंगात् तथाहि चेतनं प्रकृत्य तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम इति स्मृतिरव्या
कृतनामरूपप्रपंचस्य ब्रह्मजन्यत्वमाह तथा भगवद्गीतास्वपि अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति चेतनकारणत्वं समर्प
नेन तथा च प्रधानकारणवादे एतत्स्मृतीनामनवकाशदोषः प्रसज्येत अतः स्मृतिद्वयविरोधे श्रुत्यविरुद्धा स्मृतिः प्रमाणमिति प्र
माणसांख्यस्मृत्या न विरोधः श्रुतिश्चेतरस्य कपिलविषया कपिले च प्रमाणाभावादिति १ इतश्च सांख्यस्मृतेरनवकाशेन दो

स.ह. पश्चात् इतरेषां चानुपलब्धेः २ सांख्यस्मृतिप्रसिद्धानां प्रधानादीनां तेषां महदहंकारादीनां तत्त्वानां लोके वेदे चानुपलब्धेश्चासां
५८ त्वस्मृतेरप्रमाणत्वं न दोषः तथाचतद्दृश्यप्रधानस्मृतेरप्यप्रमाणत्वमिति भावः २ एतेन योगः प्रत्युक्तः ३ अतिदेशत्वान्न प्रथ
क्संगतत्वाद्यपेक्षा योगात्मा वस्तेश्वरादेस्तावता कपिलमताद्विशेषः प्रधानादिप्रक्रियासममेव तथा च कापिलमतनिरासेनैव पा
तंजलमतं निरस्तं भवतीत्यर्थः न चातिदेशवैयर्थ्यं ज्ञानसाधनत्वेन श्रुतिसिद्धयोगप्रतिपादकत्वेन प्रमाण्याशंकायामति
देशसार्थक्यात् तर्हि प्रामाण्यं कथं तस्या योगस्मृतेरिति चेत् उच्यते तात्पर्यविषयभूतार्थे प्रामाण्यं हि शास्त्रस्यांशे प्रामाण्यभाव न्य त्रा ५
हेति यथा कापिलस्मृतेः न हि योगस्मृतेः प्रधानादौ तात्पर्यं येन प्रामाण्यं भवेत् किंतु योगे एव स चाबाधितः श्रुतिसिद्धत्वात् त ६
किंचिदालंब्य योगः प्रतिपादनीयः इति परप्रसिद्धप्रधानादिक्रमालंबनत्वेन गृहीतं तत्रापि प्रामाण्याशंकायामतिदेशः
इत्यविरोधः एवं परदेशासांख्यस्मृतेरविरोधः तद्देशप्रामाण्यमित्याधिकरणद्वयस्य तात्पर्यं योगस्य कथं श्रौतत्वमिति चेत्
तद्दर्शयामः श्वेताश्वतरोपनिषदि त्रिरुन्नतं स्थाप्य समं शरीरमित्यादिना योगप्रपंचः कृतः त्रीणि कायग्रीवाशिरांसि उन्न
तानि यस्मिन् तथा शरीरं समं स्थाप्य युंजीतेति योजना तथा काठकेपि तां योगमिति मन्यंते स्थिरामिंद्रियधारणामिति
विद्यामेतां योगविधिं च कृत्स्नमिति इंद्रियाणां स्थिरामेकाग्रलक्षणां धारणां योगविशेषं योगं मन्यंते यथा तमेकाग्रमेव
परमतपर इति वक्तुमिति शब्दः एतां ब्रह्मविद्यां योगप्रकारं च सर्वं मृत्योः सकाशान्नचिकेता लब्ध्वा ब्रह्म प्राप्तोऽभूदित्यर्थः ३ न
विलक्षणत्वादस्य तथात्वं च शब्दात् ४ स्मृतिविरोधः परिहृतः इदानीं न्यायविरोधः परिह्रियते यद्यपि तापेक्षस्तर्केणानिर
पेक्षश्रुतिसमन्वयस्य न विरोधस्तथापि साक्षात्कारस्य मोक्षसाधनत्वेन प्रधानात् तर्कस्य दृष्टानुसारेणार्थसमर्थकत्वेना राम ५८

त

परोक्षार्थविषयकत्वात्प्रधानसाक्षात्कारस्य विषयत्वेनांतरंगं तर्कः शब्दस्तु परोक्षार्थैकबोधनस्वभावो बहिरंगमिति बलवत्तर्केण विरुध्यते
इत्याक्षेपो युक्तः पूर्ववेदविरुद्धस्मृतेः मूलाभावादप्रामाण्यमुक्तं तर्हि तर्कस्य व्याप्तिपक्षधर्मतयोर्मूलत्वेन लोकसिद्धत्वात्तेन विरोध इति
प्रत्युदाहरणसंगत्याक्षेपः आकाशादिकं न चेतनप्रकृतिकं द्रव्यत्वात् घटवदिति तर्केण समन्वयो विरुध्यते न वेति संदेहे विरुध्य
त इत्याह नविलक्षणत्वादिति जगच्चेतनप्रकृतिकमिति यदुक्तं तन्न कुतः विलक्षणत्वादस्य जगतः चेतनाद्विलक्षणत्वात् चेत
नं ब्रह्म शुद्धं जगदचेतनमशुद्धमिति यद्यद्विलक्षणं न तत्तत्प्रकृतिकं यथा तंतुविलक्षणो घटो न तंतुप्रकृतिक इति ननु ब्रह्म
जगतोर्वैलक्षण्यं कुतस्तत्राह तथात्वं च शब्दादिति तथात्वं वैलक्षण्यं विज्ञानं चाभवदित्यादिश्रुतितोऽवगतमित्यर्थः ४ ननु ब्र विज्ञाना
ह्मवज्जगदपि चेतनं श्रूयते तेहेमे प्राणा अहंश्रेयसे विवदमाना मृदब्रवीत् आपोऽब्रुवन् ते ह वाचमूचुस्त्वं न उद्गायेत्यादिश्रुतिभि
रित्यत आह अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां ५ उक्तशंकानिरासार्थस्तु शब्दः उक्तश्रुतिभिर्न जगतश्चेतनत्वं प्रसक्तं अपि
तु मृदाद्यभिमानिनीनां देवतानां तत्र व्यपदेशो भवति न मृदादिमात्रस्येदं कुतः विशेषानुगतिभ्यां कौशीतकिब्राह्मणे एता ह वै दे
वता अहंश्रेयसे विवदमाना इति बृहदारण्यके प्राणसंवादे श्रुतं प्राणानां देवताशब्देन विशेषितत्वात् प्राणा इंद्रियाणि किंतु तद
धिष्ठातृदेवता इति नेंद्रियादिजगतश्चेतनत्वं अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादिमंत्रार्थवादादिषु सर्वत्र तदभिमानिदेवता
नुगतेः श्रवणाच्च न चेतनं जगत् ते ह वाचमूचुरित्यत्रापि ते ह देवा वागभिमानिनीं देवतामूचुः किमिति त्वं न उद्गायेति भोगमस्मभ्यं
संपादयेत्यर्थो बोध्यः तस्मादचेतनस्य जगतो वैलक्षण्यान्न चेतनप्रकृतिकत्वमिति प्राप्ते राद्धान्तसूत्रं ५ दृश्यते तु ६ पूर्वपक्षनिरासा
र्थस्तुशब्दः यदुक्तं चेतनविलक्षणं जगन्न तत्प्रकृतिकमिति तन्न चेतनात्पुरुषाद्विलक्षणानां नखलोमादीनामचेतनानामचेत

त

स॰ ब्र॰
५९

नाचेगोमयाद्येनन्नवृश्चिकस्योत्पत्तिर्दृश्यते अतश्चसर्पः प्रकृतिविकारयोरत्यंतमादृश्ये प्रकृतिविकारभावानुपपत्ताप।
त्तिर्वित्तादृश्यं वाच्यं तच्च प्रकृतेपि जगति स्फुरणाद्यनुवृत्त्यासमानमितिभावः किंच ब्रह्मण्युपनिषत्स्वतिरिक्ततर्कादेः प्रमाणस्य
प्रवेशाभावान्नेनेनविरोधः समन्वयस्य तथा श्रुतिः नैषातर्केणमतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेति कोअद्धावेदकइह
प्रवोचत्कुतइयंविसृष्टिर्यत आवभूवेति ब्रह्मविषयामतिरेषा तर्केणनापनेया नप्रापणीयेत्यर्थः यद्वा स्वशास्त्रकुतर्केणनापनेयानि
रस्यानभवति किंतु अन्येनैवाचार्येणवेदविदाप्रोक्ता सतीसुज्ञानाय फलावसायिसाक्षात्काराय भवति हे प्रेष्ठप्रियतमेति नचिके
तसंप्रतिमृत्योर्वचनं कोहिब्रह्मस्वरूपं प्रभूमौ अद्धासाक्षाद्वेद कोवा तत्स्वरूपं वाचनप्रवोचदित्यर्थः छांदसो दीर्घलोपः यत आत्म
नः सकाशादियं विविधासृष्टिराबभूव स एव तत्स्वरूपं वेद नान्यइति मंत्रप्रतीकयोरर्थः ६ असदितिचेन्नप्रतिषेधमात्रत्वात् ७ ननु
चेतनस्य नामादिहीनस्याचेतननामादिमज्जगद्धेतुत्वे उत्पत्तेः पूर्वं जगदसदेवस्यादिति चेन्न कुतः प्रतिषेधमात्रत्वात् असत्स्या
दितियाप्रतिषेधः न तत्प्रतिषेधमात्रं न तु तस्यप्रतिषेध्यमस्तीत्यर्थः अयंभावः नहिकार्यसत्ता कारणात्भिद्यते किंतुकारण
मेवत्स्मिंस्तिरद्दशायामपि जगत्सत्ताब्रह्मैवतत्पाचब्रह्मात्मैव जगतः सत्वमुत्पत्तेः पूर्वमप्यविशिष्टमिति नासज्जगदिति ७ अपि
पति अपीतौ तद्वत्प्रसंगादसमंजसं ८ ननु शुद्ध्यादिगुणकं ब्रह्म जगदुपादानमित्यसमंजसं कुतः अपीतौ तद्वत्प्रसंगात् अपीतौ प्र
लयसमये जाड्याशुद्ध्यादिगुणकं जगद्ब्रह्मणि लीयमानं स्वनिष्ठजाड्यादिभिर्धर्मैर्ब्रह्मदूषयेत् यथाशाकादौ लीयमानो हिंग्वादिकं
स्वनिष्ठगंधादिभिः शाकादिकंदूषयति तद्वत् तथा च तद्वत्कार्यवत् कारणस्यापि ब्रह्मणो शुद्ध्यादिप्रसज्येतेत्याक्षेपसूत्रार्थः ८ परि
हरति न तु दृष्टांतभावात् ९ तुरेवार्थः पूर्वोक्तमसमंजसं नास्त्येवेत्यर्थः कुतः दृष्टांतभावात् ~~९ तुरेवार्थः पूर्वोक्तमसमंजसंनास्त्येवेत्यर्थः~~

राम
५९

~~...~~त् कार्यकारणेलीयमानेत्तद्धर्मेणकारणंनदूषयति॥ तस्मिन्नर्थेदृष्टान्तोदृष्टांतानांसत्वादित्यर्थः यथाघटशरावा
दिकंकार्यंमृदिलीयमानंमृदंस्वनिष्ठधर्मैर्नदूषयति यथावाल्यभ्रमवोधेनस्वधर्मैः कारणमात्मानंदूषयतः नयामायिकंजगदुत्प
त्तिस्थितिलयात्मावस्थात्रयवत्तासिरणं परमात्मानंनजगत्स्वनिष्ठजाड्यादिभिर्धर्मैर्दूषयेत् परमात्मनोवस्थात्रयासंवंधेदृढसंमति
रपि अनादिमाययासुप्तोयदाजीवः प्रवुध्यते अजमनिद्रमस्वप्नमद्वैतंवुध्यतेतदेतिमाययावृतस्वरूपोजीवोयदाचार्यप्रतिपाद
नावस्थायांतत्त्वरूपज्ञानभाग्भवति तदाअद्वैतंवुध्यतइतियोजना अजमित्युत्पत्त्यवस्थायाःसंवंधाभावउक्तः अनिद्रमितिलयाव
स्थायाः अस्वप्नमितिस्थित्यवस्थायाइतिभेदः किंचकार्यस्यकारणात्मकत्वेपिनकारणंकार्यात्मकमितिनकार्यधर्मदूषणंकार
णस्येतिसमंजसंवेदांतशास्त्रमिति स्वपक्षदोषाच्च ९ परेषांविलक्षणत्वात् प्रकृतिविकारभावानुपपत्तिः प्राक्जगतोसत्वप्र
संगापीतौतद्वत्प्रसंगइतिसांख्यैर्नोद्भावितास्तेसांख्यपक्षेपिसमानाः शब्दादिहीनप्रधानसकाशाच्छब्दादिमतोविलक्षणस्य
जगतउत्पत्तौकारणादित्यर्थः वस्तुतः प्रपंचस्यसत्त्ववादिनःसांख्यस्यैवतेदोषाः नममानिर्वचनीयवादिनइतिभावः ९ तर्काप्रति
ष्ठानादप्यन्यथानुमेयमितिचेदेवमप्यविमोक्षप्रसंगः ११ केवलस्यतर्कस्याप्रतिष्ठानादपि अप्रतिष्ठितत्वान्नतेनसमन्वयविरोधा
शंकेत्यर्थः एकेनतार्किकेणयत्नेनोत्प्रेक्षितमन्यथानयनमितितर्कस्याप्रतिष्ठानंवोध्यंनतुतर्कमात्रस्याप्रतिष्ठितत्वंधूमज्ञानानंतरवह्न्यर्थि
प्रवृत्त्यनुपपत्तेः शास्त्रार्थसंदेहेतर्केणनिर्णयप्रसंगाच्च किंचतर्काप्रतिष्ठानादित्ययमपितर्कोप्रतिष्ठितएवेतितेननपरमतनिराकर
णस्यात्तस्मात्कस्यचित्तर्कस्याप्रतिष्ठितत्वेपिकस्यचित्प्रतिष्ठितत्वलाभवात्तेनसमन्वयविरोधाशंकायुक्तेसाक्षिपति अन्यथानुमेय
मितिचेदित्यंतेन अप्रतिष्ठिततर्कादन्येनप्रकारेणप्रतिष्ठिततर्केणसमन्वयविरोधादिकमनुमेयमितिशंकार्थः तर्कस्यकाचित्स

नुमितोव्यर्थो
न्वैनप्रेष्ट त
रेणानाप्याने
यतेरावप्र
न्वेनप्रेष्ट
तमेना ४

स॰ द॰ ६०

तिष्ठितत्वमंगीकृत्यसमाधत्ते एवमपीति अन्यत्रतर्कस्याप्रतिष्ठितत्वेपि क्वचित्प्रतिष्ठितत्वसंभवात्तेनसमन्वयविरोधाशंका
पुनरुत्क्षिपति अन्यथानुमेयमितिचेदित्यनेन अप्रतिष्ठिततर्कादन्येनप्रकारेणाप्रतिष्ठिततर्केणासमन्वयविरोधादिकमनुमेय
मितिचेदित्यतेन अप्रतिष्ठिततर्कादन्येनप्रकारेण प्रकृतेलिंगादिहीनेब्रह्मणिवेदनिरपेक्षस्यतर्कस्याप्रतिष्ठितत्वदोषादनिर्मो
क्षप्रसंगएवेतिसमाधानार्थः यद्वामहतांकपिलकणादादीनांपरस्परंविप्रतिपत्तेरागममनपेक्ष्यतर्कस्तत्वनिर्णयाभावादनि
र्मोक्षप्रसंगइत्यर्थः तस्मादागमविरोधीतर्कोप्रमाणमितिनतेनविरोधः इतिसिद्धं ११ एतेनशिष्टापरिग्रहाअपिव्याख्याताः १२
अतिदेशत्वात्तरपक्षसंगत्याप्रत्यक्षाद्ब्रह्मन जगदुपादानंविभुत्वात् व्योमवदित्यनेनवैशेषिकाद्यनुमानेनब्रह्मकारणवाधकः
समन्वयोविरुध्यतेनवेतिसंदेहे विरुध्यतइतिप्राप्तेकुतः अवाधितत्वात्तस्मादन्वारभ्य एवापादाननिमित्तमात्रप्रतिदिशतिएतेनमन्वा सवी
दिभिः शिष्टैः केनचिदंशेनापवादाद्यंशेनपरिग्रहीतप्रधानकारणवादनिराकरणप्रकारेणशिष्टापरिग्रहाः शिष्टैः केनचिदप्यंशे
नअपरिगृहीताअणवादिकारणवादाव्याख्यातानिरस्ताइत्यर्थः तर्कस्यैवदवाधितत्वादितिभावः १२ भोक्त्रापत्तेरविभाग
श्चेत्स्याल्लोकवत् १३ अद्वितीयाद्ब्रह्मणोजगत्सर्गंब्रुवन्समन्वयः प्रत्यक्षादिनाविरुध्यतेनवेति संदेहे ब्रह्मणितर्कस्याप्रतिष्ठितत्वे
पिजगद्वैतस्यप्रतिष्ठितत्वाद्विरुध्यतएवेति प्रत्युदाहरणेनापमाक्षेपः भोक्त्रापत्तेरविभागश्चेदिति अद्वितीयब्रह्मणोजगदु
पादानत्वेभोक्तृभोग्यप्रपंचस्यसर्वस्यब्रह्मानन्यत्वेनभोग्यशब्दादेर्भोक्त्रात्मकत्वापत्तेः भोक्तुर्वाभोग्यात्मकत्वापत्तेःप्रत्यक्षसि
द्धः परस्परविभागोनस्यात्तलोकवत् यथामहदात्मना अभिन्नानांघटशरावादीनांपरस्परंभेदोस्तियथावारकरणोपादानकानां
तरंगफेनादीनांपरस्परभेदस्तद्वदित्यर्थः कल्पितभेदस्तत्वात्प्रत्यक्षविरोधः इत्यादोव्यभिचारान्नतर्कः प्रमाणमितिनिमंतव्य १३
नस्यादिति प्रत्यक्षविरोधः समन्वयस्य भोक्तृभोग्यप्रपंचो नाद्वितीयोपादानकः रुम ६०
परस्परविभक्तत्वात् यदितरे केनब्रह्मा वदित्यादि तर्कविरोधि ब्रह्मविपक्षेदेहे तु स्थिति बाधकेति
शंकार्थः समाधत्ते ॥

ननु ब्रह्माभेदं जगतो नांगीकृत्य लोकदृष्टांतेन विरोधः परिहृतः तस्य ब्रह्माभेद एव कुतो न स्यादित्याशंक्य जगतो निर्वचनीयत्वाद्ब्रह्मव्यतिरेके
णासत्त्वमाह तदनन्यत्वमारंभणशब्दादिभ्यः १४ पूर्वं परिणामवादमालंब्यापाततः स्यात् लोकवदिति समाधानमुक्तं इदानीं विवर्तवा
दमाश्रित्य परमं समाधानमुच्यते इत्येकफलकत्वसंगतिः संदेहः पूर्ववत् तस्माद्ब्रह्मणः प्रपंचस्यानन्यत्वं एवकस्तावाणिहस्यकुतः आरंभणश
ब्दादिभ्यः एकविज्ञानात्सर्वविज्ञानप्रतिज्ञासिद्ध्यर्थं दृष्टांत उपन्यस्तः यथा सौम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विका
रो नामधेयं मृत्तिकेत्येव सत्यमिति तत्र मृत्पिंडज्ञाने कथं घटादिज्ञानमित्याशंक्य विकारो घटादिर्वागालंबनमात्रं यतो नामधेयं विकारः न
नु नाममात्रातिरेकेण विकारोऽस्तीत्युक्त्वा मृत्तिकामात्रमेव विकारस्य पारमार्थिकं स्वरूपमिति तस्मिन् ज्ञाने वस्तुतो घटादिर्ज्ञातो भवतीत्युक्त्वा
विकाराणां मिथ्यात्वात्कारणानुसत्त्वमित्ययमर्थो दृष्टांतवाक्ये सिद्धः तथा दार्ष्टांतिकेऽपि ब्रह्मव्यतिरेकेण प्रपंचस्य तत्त्वानास्तीति तदनन्यत्वं सत्त्वं ब्रह्मस्यादि
शेरन ब्रह्मैवेदं सर्वमित्यादिरित्तरनन्यत्वप्रतिपादकं गृह्यते १५ तदनन्यत्वे हेत्वंतरमाह भावे चोपलब्धेः १५ भावपदं कारणसत्त्ववाचकं तदु
पलब्ध्युपलक्षणार्थमेवमुपलब्धिपदं कार्योपलब्धिवाचकं कार्यसत्त्वोपलक्षणार्थं तथा चायं प्रयोगः विकारः कारणादनन्यः कारणस
त्त्वोपलंभानुविधायिसत्त्वोपलंभवत्वात् यो यस्माद्भिन्नः न स तत्सत्त्वोपलंभानुविधायि[illegible]नुविधायिसत्त्वोपलंभवा[illegible]न् यथा
धूमाद्वह्निरिति हेतावुपलंभपदं रूपसंयोगे वह्निसत्त्वानुविधायिधूमे व्यभिचारः स्यात्तद्वारणाय तद्ग्रहणं सत्त्वपदं रूपसंयोगे यथा मृत्सत्त्वे चा
लोकसत्त्वोपलंभानुविधायिज्ञानवति रूपे व्यभिचार अतस्तद्वारणाय तद्ग्रहणमिति यद्वा भावाच्चोपलब्धेरिति सूत्रेण केवलं मृत्सत्कार्यका
रणयोरनन्यत्वं किंतु प्रत्यक्षोपलब्धेर्भावाच्चानन्यत्वमित्यर्थः नहि तंतुव्यतिरेकेण पटो नाम कश्चिदुपलभ्यते किंतु संयोगविशेषावच्छि
न्नास्तंतव एव पटव्यवहारविषयाः प्रत्यक्षमुपलभ्यंते अतोऽनन्यत्वं विकारस्य १५ सत्त्वाच्चावरस्य १६ अवरस्य कार्यस्योपपत्तेः प्राक्कार

त

स.सू.
६१

रणानन्यत्वेन सत्त्वात्सत्त्वाच्चावराणादुत्पत्तेरनन्तरमनन्यत्वं सिद्धमित्यर्थः ब्रह्म वा इदमग्र आसीदित्यादौ प्रपंचोपस्थापके इदंपदस्य ब्रह्म
सामानाधिकरण्यादनन्यत्वं द्रष्टव्यं अन्यथा ब्रह्मात्मना पूर्वं प्रपंचस्यासत्त्वे तत्तु उपप[illegible]पते: नहि सिकतात्मना अविद्यमानं तै
लं तात्म्येनायतेति १६ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् १७ नन्वसद्वा इदमग्र आसीदित्यादिना प्रागुत्पत्तेरसत्त्व
व्यपदेशान्न कार्यस्य कारणात्मना पूर्वं सत्त्वमिति चेन्न न ह्यसत्त्वाभिप्रायेणायमसत्त्वव्यपदेशः किंतु व्याकृतत्वरूपधर्मापेक्षया
अव्याकृतत्वधर्मान्तरेण तेन धर्मान्तरेणायमसत्त्वव्यपदेशः कुतः वाक्यशेषात् तत्सदासीदिति वाक्यशेषः पूर्वमसत्तासतो ग्रहणे
बाध्येत असदेवेदमित्यत्रासत्त्वं किंतु पृथिव्यादि वा सदेवानभिव्यक्तनामरूपमिति तदेह अनभिव्यक्तनामरूपमसच्छब्दितमिति
निश्चीयते आसीदित्यतीतकालसंबंधोऽनभ्युपगमे स्यामिति तस्मान्न व्याकृतमासीदित्युच्यते अव्याकृतं चासीदिति सिद्धं कारणानन्य
त्वं कार्यस्य १७ युक्तेः शब्दान्तराच्च १८ कारणानन्यत्वमुत्पत्तेः प्राक्तत्त्वं चेति शेषः युक्तिरेव घटार्थिनापेत इति प्रतीता घटस्य ताव
दुत्पत्तिकाले संप्रतिपत्तिर्न्या उत्पत्तेः प्राग् संतं घटस्यासत्त्वे मृद एव घटार्थिना नोपादीयेत असत्त्वाविशेषात् यत्किंचिदेवोपादीये
तेनैव मार्गेण युक्तिरूपा पूर्वं सत्त्वे उदाहरणानि च शब्दान्तरात् सदेव सोम्येदमग्र आसीदित्यादौ विद्यमानसत्त्वस्यात्तस्मादपि कारणा
नन्यत्वं पूर्वमुत्पत्तेः सत्त्वं चेत्यर्थः १८ युक्तेरित्येतत्प्रपंचयति पटवच्च १९ ननु तन्तुपटयोर्भिन्नो विलक्षणप्रतीतिविषयत्वात् घटपटव
दित्युक्ते तस्य हेतोर्व्यभिचारमाह पटवच्चेति यथा संवेष्टितप्रसारितपटस्य विलक्षणप्रतीतिविषयत्वेऽपि न भेदः एवं तन्तुपटयोरित्यर्थः
१९ न विलक्षणकार्यकारित्वमपि हेतुर्व्यभिचारादित्याह यथा च प्राणादि २० यथा प्राणायामादिना निरुद्धं प्राणापानादि जीवन
मात्रकार्यं निर्वर्तयति अनिरुद्धस्तु आकुंचनप्रसारणादिकं कार्यं करोतीति नैतावता तस्य प्राणस्य भेदोऽस्ति तस्मात्कार्यकारणयोरनन्य

त

राम
६१

तत्कर्तृत्वं युक्तं तस्मात्कारणात्मना सन्नेव घटः उत्पत्तिकर्ता किं च मृदात्मना पूर्वं घटस्याभावे ॥६

ह्यो ५

श्री

त्वसिद्धं तदनन्यत्वाच्चैकविज्ञानात्सर्वविज्ञानप्रतिज्ञासिद्धा भवति २० इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः २१ पूर्वं कार्यस्य का
रणादनन्यत्वमेकविज्ञानप्रतिज्ञासिद्धये समर्थितं तर्हि तेनैव न्यायेन जीवब्रह्मणोरप्यभेदाज्जीवधर्मा हिताकरणादयः ब्रह्मणि प्रसज्ये
रन्निति सक्षेपासंगतिः जीवाभिन्नं ब्रह्म जगदुपादानमिति ब्रुवन् समन्वयो विषयः स किं यदि तादृक् ब्रह्म जगज्जनयेत्तर्हि स्वानिष्टं जनये-
दिति तर्केण विरुध्यते नवेति संदेहे पूर्वपक्षमाह इतरव्यपदेशादिति इतरस्य जीवस्य तत्त्वमसीत्यादिना ब्रह्मत्वव्यपदेशादितरस्य ब्रह्म
णो वाऽनेन जीवेनात्मनानुप्रविश्येत्यादिना शारीरत्वव्यपदेशाद्ब्रह्मणः स्रष्टृत्वेन जीवस्यैव स्रष्टृत्वं स्यात् तथा च हिताकरणादिदोषप्रसक्तिः
ब्रह्मणः न ह्यस्वतन्त्रः सन् अहितं जरामरणादि बहुविधानर्थकारणरूपदोषं प्रसजतीत्यर्थः आदिपदेन जीवस्य जरादिकं मयास्र
ष्टमिति ज्ञानं स्यात् न संहर्तृत्वं च स्यादित्यादिदोषा गृह्यन्ते तस्माज्जीवाभिन्नब्रह्मणो नानिष्टप्रपंचजनकत्वं अभ्रान्तचेतनत्वादिति
न चेतनोपादानकं जगदित्याक्षेपसूत्रार्थः २१ समाधत्ते अधिकं तु भेदनिर्देशात् २२ तुः पूर्वपक्षव्यावृत्त्यर्थः यतः शारीरादधिकं
अन्यत्सर्वज्ञं सर्वशक्ति ब्रह्म जगदुपादानं कर्तृ चेति क्रमः अतो न हिताकरणादिदोषप्रसक्तिः कुतः भेदनिर्देशात् आत्मा वा अरे द्रष्टव्यः
कल्पित सता सोम्य तदा संपन्नो भवतीत्यादिना भेदस्य व्यपदेशादित्यर्थः न हि ब्रह्मणो नित्यमुक्तस्य हितमहितं वा किंचिदस्तीति न हिताकर-
णादिदोषप्रसक्तिः कल्पितभेदमादायैव सर्वासांकर्योपपत्तेरिति तात्पर्यम् २२ नन्वेकरूपब्रह्मणो जगत्कारणत्वे कार्यवैचित्र्यं न
स्यादिति दोषं दृष्टान्तेन परिहरति अश्मादिवच्च तदनुपपत्तिः २३ यथा लोके एकपृथिवीजन्मनामश्मनां वज्रवैदूर्यचन्द्रनीलपद्मरागा-
दिभेदेनैव वैचित्र्यं एवं ब्रह्मकार्याणां स्वरूपवैचित्र्यं युज्यते न केवलं ब्रह्माश्रितकार्येषु कथं धर्मवैचित्र्यं कथं वा भर्त्रक्रियावैचित्र्यमि-
त्यर्थः अपि आदिवच्चेत्युक्तं तस्यार्थः यथैकपृथिव्याश्रितानां वीजानां बहुविधपत्रपुष्पफलगंधरसादिवैचित्र्यं यथा एकस्माद्ब्रह्म

थिव्या

केशनखादिविचित्रकार्यक्रियाकारित्वं तद्वत्सर्वमुपपद्यत इति तदनुपपत्तिः उक्तदोषानुपपत्तिरित्यर्थः २३ उपसंहारदर्शना
न्नेति चेन्न क्षीरवद्धि २४ असहायाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विषयः स किं ब्रह्मणोपादानकर्तृत्वा असहायत्वात्समन्व
त इति न्यायेन विरुध्यते नवेति संदेहे पूर्वं सोपाधिकजीवभेदाद्धिताकरणादिदोषानालीढस्य तत्समस्य पाधितोपि विभक्तब्रह्मणः
भेदकारणादिकं नास्ति ब्रह्मणो नानाभावादिति प्रत्युदाहरणानाक्षिप्य समाधत्ते उपसंहारेति लोके कुलालस्य कर्तुर्दंडचक्राद्युपसंहारद
र्शनान्नास्य साधनोपादानस्य तत्त्वभिन्नकुलालादिसाहाय्यदर्शनात्तदुभयविलक्षणस्य ब्रह्मणो न जगत्कर्तृत्वमुपादानत्वं वा संभवती
ति चेदिति शंकार्थः समाधत्ते क्षीरवद्धीति हिशब्दो हेत्वर्थः यथा लोके क्षीरं वार्यादि साधनान्यनपेक्ष्य दध्याकारेण परिणमते तद्व
द्ब्रह्मापीत्यर्थः न चोष्मसापेक्षत्वं क्षीरस्यास्तीति वाच्यं औष्ण्यस्य दधिभावत्वरामात्रनिमित्तत्वादिति श्रुतिरप्यसहायस्य ब्रह्म
णः कार्यकारित्वं दर्शयति न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी
ज्ञानबलक्रिया चेति २४ ननु चेतनत्वमसहायत्वहेतुः अतो न क्षीरे व्यभिचार इत्याशंक्य चेतनदृष्टान्तेन तस्याव्यभिचारमाह
देवादिवदपि लोके २५ लोक्यते अनेनेति लोकः शब्दो मंत्रार्थवादेतिहासादिस्तस्मिन्यथा देवाः पितर ऋषय इत्येवमादयश्चेत
नाः स्वतः सिद्धसामर्थ्याः साधनांतरं बाह्यमनपेक्ष्य संकल्पमात्रेणैव नानाविधकार्यकर्तार उपलभ्यन्ते तद्वद्ब्रह्मापीत्यर्थः अयंभा
वः कुलालस्तावद्बाह्यमांतरं च संकल्पादिकमपेक्ष्य कार्यकर्ता भवति देवादयस्तु आंतरसंकल्पमात्रमपेक्ष्य कार्येषु समर्थाः
न यावद्येकस्य कार्यजनने सामर्थ्यं तथैवान्यस्येति नियमाभावान्न दृष्टान्तेन यसर्वस्यानमिति २५ निरवयवाद्ब्रह्मणो जगत्
सर्गं ब्रुवन्समन्वयः सावयवस्यैव नानाकारेण परिणाम इति न्यायेन विरुध्यते न वेति क्षीरादिदृष्टान्तकथनेन न ब्रह्मणः परिणा

मित्यभ्रमोऽसत्यां संदेहे कार्यकारणभावसंगत्या पूर्वपक्षयति कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा २६ पूर्वाधिकरणस्यभ्रमो
त्पादकत्वेन कारणत्वमेतस्य कार्यत्वमिति बोध्यं ननु ब्रह्म निरवयवं वा परिणमते उत सावयवं वा आद्ये कृत्स्नस्य ब्रह्मणः कार्याका
रेण परिणामप्रसक्तिः ततश्च कार्यातिरिक्तं ब्रह्म न स्याद् दुर्ज्ञानत्वश्रुतिविरोधश्च कार्यस्य प्रत्यक्षत्वात् द्वितीये कृत्स्नप्रसक्तिर्नो
स्ति एकांशपरिणामेपि अंशांशस्थितिसंभवात् तथापि निष्कलमित्यादि निरवयवत्वशब्दकोपः उभयस्मिन्पक्षेप्यनिष्टत्व
प्रसंग इति ब्रह्मणः परिणामित्वभ्रममूलकः पूर्वपक्षः २६ सिद्धांतयति श्रुतेस्तु शब्दमूलत्वात् २७ तुराक्षेपनिरासार्थस्तेन न
तावत्कृत्स्नप्रसक्तिः कुतः श्रुतेः यथा जगदुपादानत्वं ब्रह्मणः श्रूयते एवं कार्यव्यतिरेकेण ब्रह्मणः सत्त्वं श्रूयते एतावानस्य म
हिमेत्यादिना यया श्रुत्यैव विवर्तवादः स्फुटीकृतः नहि परिणामवादे कार्यव्यतिरेकेण सत्त्वं संभवति तस्मात्कार्यातिरेकेण ब्रह्म
णोऽवस्थानश्रुतेर्नोक्तदोषद्वयमित्यर्थः ननु श्रुतिर्वा कथं कार्यातिरेकेण ब्रह्मणः सत्त्वं बोधयेत् उक्तयुक्तिबाधितत्वादित्यत आह
शब्दमूलत्वात् इति ब्रह्मणः शब्दैकप्रमाणकत्वात् यथाशब्दं कार्योपादानत्वं तद्व्यतिरेकेणासत्त्वं चाविरुद्धमित्यर्थः २७ जगतो
ब्रह्मविवर्तत्वेन स्वप्नप्रपंचवन्मायिकत्वात् उपादानेपि ब्रह्मणो न कृत्स्नप्रसक्त्यादिदोषः स्वप्नसाक्षिवदित्याह आत्मनि चैवं वि
चित्राश्च हि २८ एवं ब्रह्मणीति हि यस्माद्धेतोः कस्मिन्नात्मनि स्वप्नदृशि निरवयवे विचित्राः सृष्टयः श्रूयंते न तत्र रथा न रथयोगा न
पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजते इत्यादौ तत्र प्रपंचादीनामभावे कथं तदुपलब्धिरित्याशंक्योक्तं श्रुत्या वयसादिरू
पेण शब्देन मायाविदृष्टांतं समुच्चिनोति यथा लोके मायाविस्वरूपानुपमर्देनैव हस्त्यश्वादिविचित्राः सृष्टयो दृश्यंते तथा ब्रह्म
ण्यपि विचित्रसृष्टिरित्यर्थः २८ यश्चोभयोः समो दोष इति न्यायेन कृत्स्नप्रसक्त्यादीनामनुद्भाव्यत्वं दर्शयति स्वपक्षदोषाच्च २९

त

ब्र.सू.
६३

सांख्यादयोपि निरवयवं प्रधानं जगत्कारणमङ्गीचक्रुः तथा च कृत्स्नप्रसक्त्यादिदोषाः सर्वे समानाः अणुवादिनोपि परमा-
णुद्वयसंयोगेन द्व्यणुकादिसृष्टिमङ्गीचक्रुः संयोगः किं व्याप्यवृत्तिरव्याप्यवृत्तिर्वा आद्ये दृष्टविरोधः कार्यप्रथमानुपपत्तेश्च
द्वितीये सावयवत्वं विना अव्याप्यवृत्तिसंयोगानुपपत्तिर्निरवयवत्वव्याकोप इत्यादयो दोषाः समानाः ब्रह्मवादे ते दोषा न सं-
न्ति च तस्मादुक्तमुपपन्नः परमात्मकारणवादः २९ एकस्यापि ब्रह्मणो विचित्रकार्यशक्तिमत्त्वमुक्तं तत्समर्थयति सर्वो-
पेता च तद्दर्शनात् ३० मायाशक्तिमत्तो ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो शरीरस्य न मायेति न्यायेन विरुध्यते न वेति संदेहे
पूर्वोक्तशक्तिमत्त्वविषयकशंकानिरासेन तत्समर्थनात्मकत्वाद्विषयविषयीभावसंगत्या विरुध्यते इति पूर्वपक्षे सिद्धान्तः स-
र्वोपेता सर्वशक्तियुक्ता परा देवता कुतः तद्दर्शनात् तस्याः सर्वशक्तियोगस्य श्रुतौ दर्शनादित्यर्थः सर्वकर्मा सर्वकामः सर्वग-
न्धः सर्वरसः सर्वमिदमभ्यात्त इत्यादिश्रुतिदृष्ट्या ३० विकरणत्वान्नेति चेत्तदुक्तं ३१ सर्वशक्तियुक्तानामपि देवादीनां चक्षु-
रादिकरणवतामेव विचित्रकार्यकर्तृत्वमवगम्यते अचक्षुष्कमश्रोत्रमित्यादिना ब्रह्मणो विकरणत्वावगमान्न कर्तृत्व-
मिति चेत् यदत्रोत्तरं वक्तव्यं तत्पूर्वमेव न विलक्षणत्वादेवादिवदपि लोके इत्यादावुक्तं श्रुत्येकसमधिगम्यत्वान्न तर्केण वि-
रोधाशंकापायात् एकस्य तथैवान्यस्येति नियमाभावादित्यादिकमित्यर्थः ३१ ब्रह्मणो जगत्कर्तृत्वं हेत्वन्तरेणाक्षिपति न प्र-
योजनवत्त्वात् ३२ अवाप्तसकलकामाद्ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो ब्रह्म विना फलेन न सृजति अभ्यान चेतनत्वात्स-
मतवदिति न्यायेन विरुध्यते न वेति संदेहे पूर्वोक्तकर्तृत्वाक्षेपसंगत्या पूर्वपक्षः ब्रह्मणो जगत्कर्तृत्वं न संभवतीति निसत्तत्वे
न प्रयोजनाभिसंधिरहितत्वादेशावस्थेतेः प्रयोजनवत्त्वावगमादिति ३२ अत्र सिद्धान्तः लोकवत्तु लीलाकैवल्यं ३३ तु

राम
६३

त्कशंकानिरासकः यथा लोके राजनरस्माप्तसारीनां फलं विनैव केवललीलारूपाः प्रवृत्तयो दृश्यंते यथा वा उच्छ्वासादयः स्वभा
वादेवासंभवंति एवं ब्रह्मणोपि विचित्रकार्यरचनालीलाकैवल्यं केवललीलामात्रेण फलसापेक्षं कथं विद्याजादीनां लीलाया
फलसंभवेपि नित्यतृप्तस्य ब्रह्मणो लीलामात्रमेतदित्यभिप्रायः ३३ विधांतरेण ब्रह्मणः कारणत्वमाक्षिप्य समाधत्ते वैषम्य
नैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ३४ निरवद्याद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो यो विषमसृष्टिकर्तृत्वात्सावद्य इति न्या
येन विरुध्यते न वेति विशये पूर्वं मायामय्या लीलया ब्रह्मणो यत्स्रष्टृत्वमुक्तं तस्याक्षेपात्संगतिसिद्धा पूर्वपक्षः ब्रह्म किं
प्राणिकर्मसापेक्षं जगत्कर्तृ निरपेक्षं वा नाद्यः अनीश्वरत्वप्रसंगात् द्वितीये वैषम्यनिर्घृणत्वे प्रसज्येयातां काश्चित्तिर्यगा
दीनां सततदुःखिनः उत्पादयति काश्चिन्मनुष्यादीन्सुखसाधारणान् काश्चिद्देवादीन् सततसुखिनः इति वैषम्यं सर्वसंहर्तृत्वाच्च नै
र्घृण्यं ततश्च सावद्यत्वप्रसंगात् तस्मान्निरवद्यस्येश्वरस्य न जगत्कर्तृत्वमिति शंकानिरासमाह वैषम्यनैर्घृण्ये न स्यातां कस्मा
त्सापेक्षत्वात् प्राणिकर्मसापेक्षत्वात् कर्मानपेक्षत्वे हि वैषम्यादिः स्यान्न सापेक्षत्वे इत्यर्थः न च सापेक्षत्वेनीश्वरत्वं भृत्यादे
सेवानुसारेण फलदातुराज्ञो राजत्वादर्शनात् ईश्वरस्तु पर्जन्यवद्द्रष्टव्यः यथा न तद्बीजस्यापि न पर्जन्यं विना अंकुरोत्प
त्तिस्तद्वदिति कर्मणैवोपपत्तौ किमधर्मीश्वरस्वीकार इति चोद्यं तु सापराकृतमित्यादिभाष्ये द्रष्टव्यं ननु ईश्वरस्य क
र्मसापेक्षत्वं कुत इत्यत आह तथाहि दर्शयति श्रुतिः स्मृतिश्चेत्यर्थः एष ह्येव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य
उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषते इति पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्याद्या श्रुतिः
यमुन्निनीषते ऊर्ध्वं नेतुमिच्छतीश्वरस्तं साधुकर्म कारयति पूर्वजन्मकृतसुकृतवशादिति योजना पुण्यः सुखी पापो दुःखी

स॰ सू॰
६४

यादीन्संतस्सृजतीति वैषम्यं सर्वसंहर्तृत्वाच्च नैर्घृण्यं ततश्च सावद्यत्वं प्रसज्येत तस्मान्निरवद्यस्येश्वरस्य न जगत्कर्तृत्वमि-
ति शंकानिरासमाह वैषम्यनैर्घृण्ये न स्यातां कस्मात्सापेक्षत्वात् प्राणिकर्मसापेक्षत्वात् कर्मानपेक्षत्वे हि वैषम्यादिः
स्यान्न सापेक्षत्वे इत्यर्थः न च सापेक्षत्वेनेश्वरत्वभंगः साक्षिसेवानुसारेण फलदातुराज्ञो राजत्वादर्शनात् ईश्वरस्तु पर्जन्यवद्द्र-
ष्टव्यः यथा तत्तद्बीजेषु सत्स्वपि न पर्जन्यं विना अंकुरोत्पत्तिस्तद्वदिति कर्मणैवोपपत्तौ किमर्थमीश्वरस्वीकार इति चाद्यं श्रुत्या-
पाकृतमित्यादि भाष्ये द्रष्टव्यम् ननु ईश्वरस्य कर्मसापेक्षत्वं कुत इत्यत आह तथा हि दर्शयति श्रुतिः स्मृतिश्चेत्यर्थः एष ह्ये-
व साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति पुण्यो वै पुण्येन
कर्मणा भवति पापः पापेनेत्याद्या श्रुतिः यमूर्ध्वं निनीषते ऊर्ध्वं नेतुमिच्छतीश्वरस्तं साधुकर्म कारयति पूर्वजन्मकृतसुकृतवशा-
दिति योजना पुण्यः सुकृती पापो दुष्कृती स्मृतिश्च ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमित्याद्या द्रष्टव्या ३४ न कर्माविभा-
गादिति चेन्नानादित्वात् ३५ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिना सृष्टेः प्राग्विभागावधारणान्न तदानीं क-
र्मास्तीत्यतः कर्मापेक्षया विषमा सृष्टिरित्यसंगतमिति चेन्न अनादित्वात्संसारस्य बीजांकुरवद्धेतुहेतुमद्भावोपपत्तेरित्यर्थः पू-
र्वसृष्टेः सम्पादितधर्माधर्मप्रपञ्चस्यास्तित्वेन नाशाभावात्तदपेक्षयोत्तरसृष्टौ न किंचिद्बाधकमिति भावः ३५ ननु संसारस्याना-
दित्वं कुत इत्यत आह उपपद्यते चाप्युपलभ्यते च ३६ संसारस्यानादित्वमुपपद्यते चान्यथाकस्मादेव सृष्ट्यंगीकारे मुक्तस्या-
पि पुनर्जन्मप्रसंगात्सृष्टिवैषम्यस्याहेतुत्वानुपपत्तेश्च श्रुतिस्मृत्योः संसारस्यानादित्वमुपलभ्यते च अनेन जीवेनात्मनानुप्रविश्य
नामरूपे व्याकरवाणीति प्राणधारणनिमित्तेन जीवशब्देनास्यादौ शारीरमभिलपन् प्राणधारणादिसंसारस्यानादित्वं द- राम
६४

पश्निर्गुणं तन्नोपादानं यथाजं घटं तन्यायेन वरु इयते
नवेति संदेहे विरुद्धता इति प्राप्ते ब्रूमः धर्मोपपत्तेश्च
सर्वे तगत कारणत्व सर्वज्ञत्वाद यः कारणधर्माः येवि

सर्वे

शेषपत्तिधातायम्यापूर्वमकल्पपदिसामाप्श्रुतिरपिपूर्वकल्पसद्भावंदर्शयति श्रुतिरपि संसारस्यानादित्वमाह नरूपमस्येह
तथोपलभ्यतेनान्तोनचादिर्नचसंप्रतिष्ठेति स्मरणेतु अस्यसंसारवृक्षस्यकल्पितस्यरूपंपारमार्थिकंस्वरूपंअतएवयथाघटा
दिवत् इहमाक्तेतेयथ्यवहारभूमौनोपलभ्यते नचान्तोवधिरस्यसंसारस्यविनाब्रह्मविद्यामुपलभ्यतेनाप्यादिरनिर्वचनीयत्वा
देवनापिसंप्रतिष्ठामध्यमिति ३६ इदानींपरपक्षप्रतिषेधप्रधानंपादमारब्धुकामः स्वपक्षेनिर्दुष्टतामुपसंहरति सर्वधर्मोपपत्ते
श्च ३७ पूर्वाधिकरणेकर्मवैषम्यादिप्रसक्तविषमसृष्टिहेतुत्वमुक्तं नदृष्टंविषमसृष्टिप्रयोजककर्मणः सत्वात्तद्दुपादानत्वप्र
योजकसगुणत्वाभावाद्ब्रह्मोपादानत्वमिति प्रसङ्गाद्दूहरणेनास्यारम्भः निर्गुणाद्ब्रह्मणोजगत्सर्गेवरंसमन्वयोपपन्नंनिर्गुणत्वेनो
पादानमितियथासौकिंचित्परिणामित्वाभावात्प्रपञ्चः उक्तविवर्तोपादानत्वाभावः नाद्यः दृष्टत्वान्नद्वितीयः आरोपितानिरा
सोपादानेज्ञाननाशोदोषप्रभिचारत्तस्मान्निर्गुणात्तब्रह्मणोविवर्तजगदुपादानत्वमविरुद्धमितितस्मान्नकथमपिसमन्व
यस्यविरोधइतिसिद्धं ३७ इतिद्वितीयाध्यायस्यप्रथमः पादः १ इयत्ताप्रबंधेनमुमुक्षूणांसम्यग्ज्ञानासत्तवेदान्तानांसमन्व
यः श्रुतिपादेनः तस्मिन्समन्वयेपरपरिकल्पितदूषणानिरासेनस्वपक्षः स्थापितः इदानींमुमुक्षूणांमदेतत्शास्त्रेनिर्विचिकित्स
प्रवृत्तिसिद्ध्येपरमतदूषणप्रधानः पादः आरभ्यते रचनानुपपत्तेश्चनानुमानं १ सांख्यमतस्यशिष्टपरिग्रहीतत्वेनाभ्यर्हित
त्वात्तदादौनिराक्रियते पूर्वंमीक्षतेर्नाशब्दमित्यादिनाप्रधानपरत्वेनवेदान्तानांव्याख्यानंनिरस्तं इहतुप्रधानसाधकस्वतन्त्रनिरपेक्ष
युक्तीनामाभासत्वमुच्यतेइति नपौनरुक्त्यं अत्रसांख्यादिमतनिरासेनसमन्वयस्यतन्मतविरोधनिरासद्वारादृढीकरणादेस्य
पादस्यश्रुत्याध्यायसंगतीः वेधसमन्वयविरोधनिरासेनस्वपक्षस्थापनपरप्रथमपादेनास्यपादस्यापेक्षीयोपजीवकभावः

स्मा

छे

ध्यं ते ते कां पूर्वो
क्तेप्रकारेणब्र
ह्मएवउपपद्यते
सर्वे न तगत्कार
णम्मिति उपनि
दर्शाद्वनिर्दोष
मित्यर्थः ॥ ३७ ॥
इति पाद ॥ १ ॥

डे

स. सू. ६५ संगतिः स्वपक्षस्थापनंविनापरमतनिरासायोगात्स्वसिद्धांतज्ञानेहेतुत्वाच्चपूर्वपादस्योपजीव्यत्वंबोध्यं परमतनिरासपरत्वादेवस
र्वेषामधिकरणानांपादसंगतिः सर्वधर्मोपपत्तेश्चेत्यनेनब्रह्मणिकारणधर्माणामुपपत्तिरित्युक्तंतेषांप्रधानेनुपपत्तिःकिंन
स्यादित्याक्षेपसंगत्यानिरासादनयोरधिकरणयोराक्षेपलक्षणावांतरसंगतिः फलंतुपादसमाप्तिपर्यंतपरमतयुक्तिविरोधावि
रोधाभावात्समन्वयासिद्धिर्नास्तिहीतिविवेकः तत्रप्रधानमचेतनंजगदुपादानमितिसांख्यसिद्धांतोविषयः स्मर्यमानस्यबाधि
करणविषयत्वात्संशयसिद्धांतः स्मर्यतेकिंप्रमाणमूलाभ्रांतिमूलोवेति तत्रप्रमाणमूलएवेतियुक्तं तथाहि बाह्याध्यात्मि
कंजगत्सुखदुःखमोहात्मकसामान्योपादानकंभवितुमर्हतितदन्वितत्वात् यद्यदन्वितंतत्तदुपादानकंयथामृदन्वितंघटादि
कंमृदुपादानकमिति तथाचपरस्परंसुखदुःखमोहात्मकंकिंचित्सिद्धंतदेवसत्वरजस्तमोगुणात्मकंप्रधानमितिप्रामाणिकः १
सांख्यसिद्धांतइति प्राप्तेब्रूमः उक्तानुमानसिद्धप्रधानेनजगदुपादानत्वंकुतः रचनानुपपत्तेः चेतनानधिष्ठितात्स्रष्टव्यज्ञानशून्या
त्प्रधानादनेकविधविचित्रजगद्रचनानुपपत्तेरित्यर्थः लोकेविचित्रप्रासादादिरचनायांबुद्धिकुशलशिल्प्यादिकार्यत्वदर्शना
दितिभावः सूत्रेचशब्देनहेतोः स्वरूपासिद्धिंसमुच्चिनोतिसुखादीनामंतरत्वप्रतीतेस्तदन्वितत्वंजगतोसिद्धं तस्मादप्रामाणिकः
सांख्यसिद्धांतइति १ प्रवृत्तेश्च २ साम्यावस्थापन्नागुणाहिप्रधानंसाम्यावस्थायांचनकिंचित्कार्यंजायते किंतुसाम्यावस्था
प्रच्यवेनगुणानामंगांगीभावेजातेकार्यंस्यादितिप्रक्रियासानयुक्तालोकेअचेतनरथादिप्रवृत्तेश्चेतनाधीनत्वदर्शनात्तथा
नस्यात्साम्यावस्थाप्रच्युतिरूपप्रवृत्तेश्चेतनप्रेरणांविनानुपपत्तेरित्यर्थः २ पयोम्बुवच्चेत्तत्रापि ३ नन्वचेतनस्यस्वयंप्रवृत्तिरपि
दृश्यतेयथाक्षीरंवत्सविवृद्ध्यर्थंस्वयमेवप्रवर्तते यथावाजलंस्वयमेवस्यंदतेतथापयोम्बुवत्प्रधानंस्वयमेवप्रवर्त्स्यतइति चेन्न राम ६५

यमत्तत्रापि परमात्माप्रेरकः अयमेते पोऽस्तु तिष्ठन्नित्यादिना तथा च पक्षत्वान्न व्यभिचारः पयोंऽबुनोरिति भावः ३ व्यतिरेकान
वस्थितेश्चानपेक्षत्वात् ४ अपि च न स्वतंत्रप्रधानं जगदुपादानं कुतः व्यतिरेकानवस्थितेः स्वतंत्रस्य कारणत्वे सर्वदा कार्यप्रस
क्तौ कदाचिदेव कार्यव्यतिरेकस्यावस्थित्यसंभवप्रसंगादित्यर्थः तदपि कुतः अनपेक्षत्वात् स्वतंत्रस्य प्रधानस्य चेनादिसहः
त कार्यनरानपेक्षत्वाभ्युपगमात् इत्यर्थः ४ अन्यत्राभावाच्च न तृणादिवत् ५ ननु तृणोदकादिकं निमित्तांतरनिरपेक्षमेव क्षी
राकारेण परिणमते तद्वत्प्रधानमपीति चेन्न कुतः अन्यत्राभावात् धेन्वादेरन्यत्र बलीवर्दादौ तृणादेः क्षीरीभावस्याभावादि
त्यर्थः तथा च धेन्वादिसापेक्षमेव तृणादिकं क्षीरीभवति निरपेक्षत्वे बलीवर्दादावपि क्षीरीभावप्रसंगः इत्यर्थः ५ अभ्युप
गमेप्यर्थाभावात् ६ प्रधानस्य स्वतः प्रवृत्त्यभ्युपगमे पुरुषार्थस्याप्यपेक्षाभावप्रसंग इति भावः न चेष्टापत्तिः प्रधानमचेतनं
चेतनस्य पुरुषार्थमपेक्ष्यैव प्रवर्तत इतिस्वाभ्युपगमविरोधादिति भावः यद्वा अर्थाभावात् प्रयोजनाभावादित्यर्थः तथा
हि न तावत्प्रधानप्रवृत्तिः पुरुषस्य भोगार्था भोग्यानामानंत्यात् अनिर्मोक्षप्रसंगात् नाप्यपवर्गार्था भोगाभावप्रसंगात्प्रधान
स्याप्रवृत्तिप्रसंगाच्च पुरुषस्य स्वरूपेणावस्थितिलक्षणस्य मोक्षस्य प्रधानाप्रवृत्त्यैव सिद्धत्वात् प्रयोजनाभावान्न प्रधान
स्य जगद्धेतुत्वं ६ पुरुषाश्मवदिति चेत्तथापि ७ ननु पुरुषएव प्रधानस्य प्रवर्तकः ननु स्वयमप्रवर्तमानः कथं परं प्रवर्तयेदि
ग्रा ति चेन्न पुरुषाश्मवदिति भ्रमः लोके यथा पंगुः पुरुषः स्वयमप्रवर्तमानोऽपि प्रवर्तशक्तिमंतं प्रवर्तयति यथा वायस्कांतोऽश्
मा सन्निधिमात्रेणायः प्रवर्तयति एवं पुरुषः प्रवर्तक इति चेन्न एवं तथापि दोषाणामनिर्मोक्षः तथा हि प्रधानस्य पुरुषप्र
यत्त्वे प्रधानस्वातंत्र्यमिति स्वाभ्युपगमविरोधः पुरुषस्य प्रवर्तकत्वे कर्तृत्वहानिः स्वस्य व्यापाराविना प्रवर्तकत्वायोगात् पंगोर

पिवाग्व्यापारस्यानित्यत्वादुपलक्षितस्य तु नित्यसन्निधिरेव व्यापारः प्रधानपुरुषसन्निधेर्नित्यत्वेन व्यापारत्वायोगः नित्यस्यापि
व्यापारत्वे प्रधानप्रवृत्त्यविच्छेदप्रसंगः स्यादित्यादयो दोषाः द्रष्टव्याः ब्रह्मणस्तत्त्वाविषयकं प्रवर्तकत्वमिति न कोऽप्यस्य हानिः ७ अंगि
त्वानुपपत्तेश्च ८ अपि च गुणत्रयसाम्यावस्था प्रकृतिः साम्यावस्थाप्रच्युता गुणानामंगांगिभावे महदाद्युत्पत्तिरिति वक्तव्या
तावमनेदं वक्तव्यं प्रकृतिः किं कूटस्था उत विकारिणी आद्ये परस्मादनपेक्षाणां गुणानां साम्यावस्थाप्रच्युतावंगांगिभावानुपप
त्तेः कार्यानुदयप्रसंगः प्रच्युतस्वीकारे स्वरूपहान्यापत्तेः द्वितीये किं स्वतः प्रच्युतिः उतान्यतः नाद्यः सदा कार्यप्रसंगात् न द्वितीयः
पुरुषस्योदासीनत्वाभ्युपगमहानेश्चातः प्रच्युत्यभावेनांगांगिभावानुपपत्तेः कार्याभावप्रसंगस्तदवस्थः ८ अन्यथानुमितौ
च ज्ञशक्तिवियोगात् ९ नन्वनपेक्षस्वभावाः कूटस्थाश्च गुणा नानुमीयन्तेऽस्माभिः किं तु यथा प्रकारेणैव यथा कार्योत्प
त्तिसंभवस्तथानुमीयन्ते कार्यानुमेयत्वात्प्रधानस्यैवं चांगांगिभावसंभवात्कार्योत्पादः संभवतीति चेन्न ज्ञशक्तिवियोगात् गुणा
नां ज्ञानशक्तिरहितत्वादित्यर्थः अयं भावः अचेतनानां गुणानां साम्यावस्थाप्रच्युत्यादियोगेऽपि प्रच्युतेर्निर्निमित्तत्वासंभवा
त् किंचिन्निमित्तं वक्तव्यं तथा चान्यस्य निमित्तस्यासंभवेन स्वतो वैषम्ये सर्वदा वैषम्यं स्यात् स्वतोऽप्यवैषम्ये सदा साम्यप्रसंगः
संगांगितानुपपत्तिस्तदवस्थेति कार्यानुत्पादोऽपि तदवस्थ इति ९ विप्रतिषेधाच्चासमंजसं १० सांख्या हि क्वचिन्महतः पंचत
न्मात्रसर्गं वदंति क्वचिदहंकारात् क्वचिदेकादशेन्द्रियाणि क्वचिद्दशेत्यादिपाणि त्वगिन्द्रियेण भोग्यसर्वेन्द्रियाणीति स्थापयन्ति न त
था च परस्परप्रतिषेधादसमंजसं तन्मतमित्यर्थः तस्मात्सांख्यमतस्य भ्रान्तिमूलत्वात्तदीययुक्तिविरोधः समन्वयस्य नास्ती
ति सिद्धं १० ननु प्रपंचस्य ब्रह्मोपादानकत्वे ब्रह्मवच्चैतन्यस्यापि कारणगुणस्य कार्येऽवश्यंभावादित्याशंक्य मनुजैमिनदीपप्रक्रियया

पभिचारयति महद्दीर्घवद्वा ह्रस्वपरिमंडलाभ्यां ११ प्रपंचस्य प्रधाननिष्ठशब्दत्वादिगुणानन्वयात् प्रधानानुपादानकत्व
गु२ वद्ब्रह्मणश्चेतनत्वानन्वयात् ब्रह्मोपादानकत्वं न स्यादिति दृष्टांतसंगत्यास्यारंभः यद्यपि स्वपक्षे दोषनिरासात्मकत्वादस्याधिक
रणस्य नात्र संबंधः किंतु स्मृतिपाद एव तथाप्युक्तावांतरसंगतिलोभादिहलिखितमिति मंतव्यं अत्र चेतनाद्ब्रह्मणो जगत्स
र्गत्वसमन्वयो विषयः सन्निकारणगुणाः कार्ये स्वसमानजातीयगुणारंभका इति न्यायेन विरुध्यते नवेति संदेहे विरुध्यत इ
ति प्राप्ते व्यभिचारान्न विरोध इति सिद्धांतः स चैव वाशब्दस्यार्थोनुक्तसमुच्चयः तत्र यथा ह्रस्वपरिमंडलाभ्यां द्व्यणुकपरमा
नो६ णुभ्यां महद्दीर्घाणुवच्चेतनाद्ब्रह्मणोचेतनं जगद्भवतीति योजना वैशेषिका हि ह्रस्वात्कारणात् त्र्यणुकान्महद्दीर्घं च त्र्यणुकं जायते
द्व्यणुकगतं तु ह्रस्वत्वाणुत्वं तु त्र्यणुके स्वसमानजातीयह्रस्वत्वाणुत्वे नारभेते किंतु द्व्यणुकगता त्रित्वसंख्या त्र्यणुके महत्त्वादि
कमारभते इति प्रक्रियां दर्शयंति एवं दर्शयतां वैशेषिकाणां कारणगुणाः कार्ये स्वसमानजातीयगुणारंभका इति नियमाभा
सवदनाकथनं ज्ञानभवेत् व्यभिचारस्य स्फुटत्वादिति तात्पर्येण तेनैशब्दापरिग्रहअपि व्याख्यातार इत्यस्याप्ययं प्रपंच इति न यो
नहकाशंकनीयमिति ११ इदानीं प्रकृतं परमतनिरासमुपक्रमते उभयथापि न कर्मातस्तदभावः १२ प्रासंगिकमवहि
तेनास्य संगतिनापेक्षेति व्यवहितेनोच्यते ननु प्रधानस्य चेतनानधिष्ठितत्वात् कारणताभावे तर्हि चेतनाधिष्ठिताः परमा
णवः कारणं जगत इति प्रत्युदाहरणेनास्यारंभः अत्र परमाणुप्रक्रियया जगदुत्पत्तिरिति वैशेषिकसिद्धांतो विषयः स किं
मानमूलो भ्रांतिमूलो वेति विषये मानमूल इति प्राप्ते ब्रूमः वैशेषिकाः खलु कर्मस्थाः सृष्टेः पूर्वं निश्चलयोः परमाण्वोः संयोगे
द्व्यणुकाद्युत्पत्तिरिति वर्णितं तस्य कर्मणः किंचिन्निमित्तमभ्युपगम्यते न वा आद्ये कर्मनिमित्तत्वेन प्रसिद्धं जीवप्रयत्नाभिघा
इति वदंति एवं परिमंडलात् परमाणोरणुद्व्यणुकं जायते परमाणुगतपारिमांडल्यं तु द्व्यणुके पारिमांडल्यं
न जनयति किंतु परमाणुगतद्वित्वसंख्या द्व्यणुके रणुत्वादि कमारभते ॥

२ तथा च सर्वदा सृष्टिप्रसंगात् ॥ न च जीवो दृष्टस्य
प्रेरकः तदानीं तस्य ज्ञानवत्त्वाभावात् न च ई २

स॰ वृ॰
६७

नादिकमंगीकर्तव्यं नहितत्संभवतितत्स्मृतकालीनतात्तस्याद्वितीयकर्मानुसृतिः अथ उभयथापि न कर्म अतः कर्माभावात्तद
भावः यत्तुकाश्चित्कर्मणस्तस्मात्तदभावइत्यर्थः यद्यजीवादृष्टवशादाद्यकर्मपरमाणुष्विति तत्सिद्धांततत्तथा च तददृष्टं किं जी
वनिष्ठं परमाणुनिष्ठं वा उभयथापि न कर्म अदृष्टस्याचेतनस्य कर्माभिमुख्यायोगाद्वैशेषिकाभिमतईश्वरःप्रेरकइतिवक्ष्यते अ
तः सर्गाभावइत्यर्थः यद्यपरमाण्वोः संयोगस्ततो सृष्टिर्विभागस्ततो च प्रलयः तयोश्च संयोगविभागयोः कर्मैव हेतुरिति त
त्सिद्धांतः तथा च संयोगहेतुकर्मनास्तीत्युक्तमेवविभागहेतुकर्मनास्तिनिमित्तस्यादृष्टस्यचेतनात्वसंभवात् अदृष्टप्र
भोगार्थमेव न प्रलयार्थमित्युभयथापि न कर्म अतः संयोगविभागहेतुकर्माभावात्तदभावः तयोः सृष्टिप्रलययोरभावइत्य
र्थः तस्मादनुपपन्नः परमाणुकारणवादः १२ समवायाभ्युपगमाच्च साम्यादनवस्थितेः १३ तदभावइत्यनुषंगः तस्य पर
माणुकारणवादस्यासंभवइत्यर्थः कुतः परमाणुद्व्यणुकयोः समवायाभ्युपगमात् अभ्युपगमे को दोषस्तत्राह साम्यादनव
स्थितेरिति यथा द्व्यणुकं परमाणुभ्यामत्यन्तभिन्नं सत्समवायमपेक्षते एवं समवायोपि समवायीभ्यामत्यन्तभिन्नः सन्न
न्येनसमवायेनसमवायिभ्यां संबध्येत भिन्नत्वसाम्यात् असंबद्धस्य संबंधत्वादर्शनात् तथा च तस्यापि भिन्नत्वसाम्यात् स
मवायांतरमित्येवमनवस्थास्यादित्यर्थः तद्रूपस्य संबंधत्वे समवायलोपप्रसंग इति चाभ्य तथा च समवायासिद्धावसत्वेन द्व्यणुका
दिकस्यासिद्धिः स्यादिति भावः १३ नित्यमेव च भावात् १४ परमाणूनां प्रवृत्तिस्वभावत्वपक्षे नित्यमेव भावान्न प्रलयाभावप्रस
गः निवृत्तिस्वभावत्वे निवृत्तेर्नित्यमेव भावात् सृष्ट्यभावप्रसंग इत्यर्थः १४ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् १५ चतुर्विधाः
परमाणवो रूपरसस्पर्शगंधवंतो नित्या अणवश्चेति वैशेषिकसिद्धांतः स नोपपद्यते तथा हि परमाणवो नित्याः स्थूलाश्च भवितु

एम
६७

२ अपेक्षया स्थूलत्वं स्यादिति न जगत्कारणस्य रूपादिमत्त्वमिति तात्पर्यम् सूत्रार्थस्तु न वक्ष्यते जगत्कारणस्य रूपादिम

मत्त्वे तिरूपादिमत्त्वात् घटादिवत् पटो हि रूपादिमत्त्वात् स्वकारणतन्त्वपेक्षया स्थूलो ऽनित्यश्च तद्वज्जगत्कारणस्यापि रूपादिमत्त्वे
अनित्यत्वप्रसक्तौ स्वकारणस्य रूपादिमत्त्वात् अणुत्वनित्यत्वविपर्ययः स्थूलत्वमनित्यत्वं च प्रसज्येत लोके रूपादिमतः पटादेस्त
था दर्शनादिति १५ उभयथा च दोषात् १६ रूपरसगन्धस्पर्शात्मका पृथ्वी स्थूला दृश्यते रूपरसस्पर्शात्मिका आपः सूक्ष्माः रूपस्प
र्शात्मकं तेजः सूक्ष्मतरं स्पर्शात्मको वायुः सूक्ष्मतमः इत्यनुभवागमसिद्धप्रक्रियातः पृथिव्यादिवत्परमाणवो ऽप्युपचितापचितगु
णात्मकाः कल्प्यन्ते न वा आद्ये ऽणुत्वव्याघातः उपचितापचितगुणात्मकपृथिव्यादेः स्वरूपोपचयापचयदर्शनात् गुणानां द्व्यादिनिरि
क्तेऽपि तादृशगुणवत्त्वेन पृथिव्यादीनामुपचयदर्शनात् अणुत्वव्याघात एव न वा गुणागुणिनोर्भेदः सम्भवति भेदे गवाश्ववद्गुणगु
णिभावानुपपत्तेः द्वितीये तत्कार्यपृथिव्यादिषु रूपाद्यनुपलम्भप्रसङ्गः इत्युभयथापि दोषादनुपपन्नः परमाणुकारणवादः १६ अ
परिग्रहाच्चात्यन्तमनपेक्षा १७ प्रधानवादो हि सत्कार्यत्वाद्यंशेन मन्वादिभिः शिष्टैः परिगृहीतः परमाणुकारणवादस्तु केनचिदप्यंशे
न केनचिदपि शिष्टेन परिगृहीत इति शिष्टापरिग्रहाच्चात्यन्तमनपेक्षा परमाणुकारणवादे कर्तव्या वृद्धैरिति सूत्रार्थः सूत्रे च शब्देन वै
शेषिकाभिमतषट्पदार्थासंभवः सूचितः स चासंभवः प्रतिपादितो भगवता भाष्यकृता तस्माद्ब्रह्मैकमूलत्वे वैशेषिकादिमतेन न स
मन्वयस्य विरोध इति सिद्धं १७ समुदाय उभयहेतुके ऽपि तदप्राप्तिः १८ वैशेषिकत्वावसरे परिमाणभेदेन देहादात्मनुतरविनाशित्वाङ्गी
कारादात्मनः स्यापि त्वाङ्गीकाराद्धैवैनाशिकः सर्वक्षणिकत्ववादिनस्तु पूर्णवैनाशिकास्सद्वैनाशिकवैशेषिकमतनिराक
रणानन्तरं पूर्णवैनाशिकमतं बुद्धिस्थमिदानीं निराक्रियते इत्यवान्तरसंगतिर्द्रष्टव्या तत्र तावद्बुद्धमुनिना आगम उपदिष्टः स चा
गमो वैभाषिकसौत्रान्तिकविज्ञानवादिसर्वशून्यवादाख्यचतुर्विधशिष्यप्रतिपत्तिवैचित्र्याच्चतुर्विधो भवति तत्र वैभाषिकसौत्रा

प

तिकयोर्ज्ञानेनतिरिक्तपदार्थाश्चसर्वेक्षणिकाः सन्त्वभूताः संतिइयान्परंभेदः वैभाषिकस्यघटादिपदार्थाः प्रत्यक्षाः सौत्रां
तिकस्यतुज्ञानेघटाद्याकारेउत्पन्नेतेनाकारेणप्रत्यक्षेणप्रत्यक्षघटादयोनुमीयंतइतितत्रादौवैभाषिकसौत्रांतिकयोर्बा
ह्यार्थाः।क्षित्यादिविशेषात्तयोर्मतमेकीकृत्यतन्मतंप्रमाणमूलंभ्रांतिमूलंवेति संदेहे प्रमाणमूलमितिप्राप्ते तथाहि पृथि
व्यप्तेजोवायवश्चत्वारिभूतानिचतुर्विधपरमाणुपुंजस्वरूपाणिसर्वभौतिकानिरूपादिविषयेंद्रियाणिपरमाणुपुंजस्वरू
पाणिनहिपरमाणुसमूहव्यतिरेकेणावयविभूतःकोपिचनकापेमस्तीतिपरमाणुहेतुकएवपृथिव्यादिसमुदायोबाह्यः आ
ध्यात्मिकश्चसमुदायः स्कंधहेतुकः तथाहि रूपविज्ञानवेदनासंज्ञासंस्काराश्चपंचैतेस्कंधाः तत्ररूपस्कंधाः सविषयेंद्रि
याणिविषयाणांरूपादीनामाध्यात्मिकत्वमाध्यात्मिकेंद्रियसंबंधात् इष्टश्च अहमित्यालयविज्ञानप्रवाहोविज्ञानस्कंधः
सुखादिप्रत्ययोवेदनास्कंधः गौरश्वइत्यादिशब्दादिविशिष्टवस्तुविषयकसविकल्पप्रत्ययः संज्ञास्कंधः रागद्वेषमोहधर्मा
धर्माः संस्कारस्कंधः तत्रविज्ञानस्कंधश्चित्तमित्यात्मेतिचगीयते इतरेस्कंधाश्चैत्ताः एतेषांचित्तचैत्तानांस्कंधानांसमुदायः
सर्वव्यवहारास्पदः अध्यात्मिकश्चसमुदायास्कंधहेतुकइतिसर्वक्षणिकत्ववादिनोर्वैभाषिकसौत्रांतिकयोर्मतंतन्निराक
२ रोति समुदायउभयहेतुकेपितदप्राप्तिरिति उभयहेतुकेपिसमुदायेपरमाणुहेतुकेबाह्यसमुदायेस्कंधहेतुकेअध्यात्मिक
समुदायेचतदप्राप्तिः तस्यसमुदायस्याप्राप्तिरित्यर्थः अचेतनानांपरमाणूनांस्कंधानांचस्वतःसमुदायायोगादन्यस्यच
स्थिरस्यचेतनस्यसमुदायकर्तुरनभ्युपगमादितिसूत्रवाक्यशेषः १८ इतरेतरप्रत्ययत्वादितिचेन्नोत्पत्तिमात्रनिमित्तत्वात्
१९ ननुसहेतुश्चेतनस्याभावेपिसंघातउपपद्यते तथाहि अविद्यासंस्कारोविज्ञानंनामरूपंषडायतनंस्पर्शोवेदनेत्येवंजा

तीयकानामविद्यादीनामितरेतरप्रत्ययत्वादितरेतरकारणत्वात् घटीयंत्रवदनिशमावर्तमानेष्वप्यविद्यादिष्वर्थोभिसः
निमित्तमात्रतः संघात उपपद्यते इति शंकार्थः कार्यप्रत्ययत्वेन जनकत्वेन गच्छतीति तु प्रत्ययप्रत्ययशब्दः कारणवचनः अ
विद्यादीनामयमर्थः क्षणिकेषु स्थिरत्वनित्यत्वादिभ्रान्तिरविद्या ताश्च विषये रागाद्यात्मकसंस्कारहेतुः स च संस्कारो ग सु
र्भस्थस्याद्यविज्ञानं जनयति तस्मादालयविज्ञानात् पृथिव्यादिचतुष्टयशरीरस्य समुदायस्य कारणभूतं जायते तच्च नामा
श्रयत्वान्नाम उच्यते तच्च नामसितासितादिरूपं तच्छरीरं जनयति गर्भभूतस्य देहस्य कललबुद्बुदाद्यवस्थानाम रूपशब्दार्थ
इति पर्यवसन्नं पृथिव्यादिचतुष्टयनामरूपं च शरीरं विज्ञानधातुश्चेति षडायतनानि स्वइन्द्रियाणि तस्य ततः षडायतननामरूपेन्द्रि
याणां मिथः संबंधः स्पर्शः ततः सुखादिका वेदना ततः पुनरविद्यादय इति निराकरोति नेति कुतः उत्पत्तिमात्रनिमित्तत्वात् अय
मर्थः द्विविधो हि कार्योत्पादः नवाभिमतः हेत्वधीनः कारणसमुदायाधीनश्चेति तत्र हेत्वधीनो यथा बीजादंकुरः अंकुरात्पत्र
पत्रात्काण्डमित्यादि कारणसमुदायाधीनो यथा पृथिव्यप्तेजोवाय्वाकाशकालविशेषाणां मेलने सति तेभ्य उपकृताद्बीजादंकुरो जा
यते एवमाध्यात्मिकः कार्योत्पादोऽपि पूर्ववद्द्विविधः तत्राद्यो हेत्वधीनः कार्योत्पादः अविद्यादीनां द्वितीयस्तु पृथिव्यप्तेजोवाय्वाका
कोला शालयविज्ञानानां समवायात्कार्यस्योत्पाद इति कार्यं अंकुरादिकाठिन्यस्त हयाकादीनां दर्शनात् पृथिव्यादीनां कारणत्वमस्त्येत उभ
यविधोऽपि कार्योत्पादे न चेतनापेक्षेति तत्राद्यमंगीकृत्य द्वितीयकार्योत्पादे हेतुसमुदायाधीनं दूषयति उत्पत्तीति अविद्यादीनामि
तरेतरकारणत्वेऽप्युत्पत्तिमात्रनिमित्तत्वान्न हेतुसंघाताधीनः कार्योत्पादः संभवति संहन्तुः स्थिरस्य चेतनस्यानंगीकारादित्यर्थः १९
सर्वक्षणिकत्ववादिनो हेत्वधीनोऽपि कार्योत्पादो न संभवतीत्याह उत्तरोत्पादे च पूर्वनिरोधात् २० कार्यकाले विद्यमानस्यैवमदारः

स॰सू॰ ज्ञास्यतेऽहेतुत्वेन तु नश्यभवन्मतेनन्तरस्य कार्यस्य क्षणस्योत्पादे पूर्वस्य कारणक्षणस्य निरोधात् नाशांगीकारान्न हेत्वधीनो
६० पि कार्योत्पादः संभवतीत्यर्थः २० ननु निर्हेतुक एव कार्योत्पादोऽस्तु तथा च नोक्तदोष इत्याशंक्याह असति प्रतिज्ञोपरोधो यौगप॰
द्यमन्यथा २१ असति हेतौ कार्योत्पत्त्यंगीकारे पूर्वज्ञानचक्षुरालोकविषयेषु चतुर्षु हेतुषु सत्सु कार्यं नीलादिज्ञानं जायत
इत्यस्याः प्रतिज्ञाया उपरोधः स्यात् अन्यथा कार्यसहेतुकत्वांगीकारे सकलकार्यपर्यन्तहेतोः स्थित्यंगीकारे हेतुफलयोर्यौगपद्यमेक
कस्मिन्काले स्थितिः स्यादित्यर्थः तथा च क्षणिकत्वप्रतिज्ञाहानिरिति भावः २१ प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छे
दात् २२ वैनाशिकाः खलु बुद्धिपूर्वकनाशाभावानाम बुद्धिपूर्वकनाश आकाशं चेति त्रयमप्यवस्तु सति निरूपाख्यं निर्हेतुकं तुच्छ
मिति वदन्ति तत्राकाशस्य निरूपणस्य वक्ष्यमाणत्वात् सूत्रे निरोधौ निषिध्येते अत्र तु बुद्धिपूर्वकनाशाबुद्धिपूर्वकनाशरूपनिरोधद्वयं निराक्रि
यते प्रतीपा प्रतिकूला सती घटमसन्तं करोमीत्येवमाकारिका संख्या बुद्धिः प्रतिसंख्या तत्पूर्वको निरोधो नाशः प्रतिसंख्यानिरोधः
अतत्पूर्वको नाशोऽप्रतिसंख्यानिरोधः तयोर्निरोधयोः संतानिषु संतानेषु वा प्राप्तिर्न संभवतीत्यर्थः कुतः अविच्छेदात् न तावन्निरो
धद्वयस्य संतानगोचरत्वं संतानस्याविच्छेदात् संतानविच्छेदो हि चरमसंतानिविच्छेदाद्भवति स न युक्तः चरमसंतानिनः कार्य
यं तज्जनकत्वे संतानस्याविच्छेद एव अजनकत्वे चरमसंतानिनोऽर्थक्रियाकारित्वरूपसत्त्वाभावेनासत्त्वात् तत्पूर्वसंतानिना
सर्वेषामसत्तापरिशेषापत्तिः अर्थक्रियाया अभावात् नापि संतानिप्रतियोगिकत्वं निरोधद्वयस्य संतानिनां घटादीनां क्षण॰
िकत्वेन बुद्धिपूर्वकनाशायोगात् नाप्यबुद्धिपूर्वकस्य मूलनाशत्वमभ्युपगन्तुः संभवति मूलस्य प्रत्यभिज्ञायमानत्वात्
तस्मान्निरोधस्यानुपपत्तिः २२ उभयथा च दोषात् २३ स्थिरत्वादिभ्रान्तिरूपाविद्यायाः किं सम्यग्ज्ञानाद्विनाश उत स्वतो वा नाशः राम ६०

निर्हेतुकनाशाभ्युपगमहानिप्रसंगात् द्वितीयेसम्यग्ज्ञानोपदेशानर्थक्यमित्युभयथापिदोषात् संगतंसौगतमतमित्यर्थः २३
आकाशस्यनिरूपाख्यत्वंदूषयति आकाशेचाविशेषात् २४ आत्मनःआकाशःसंभूतइतिश्रुत्याशब्दगुणकत्वेनचाकाशेपि
पृथिव्यादिवद्वस्तुत्वप्रतिपत्तेरविशेषान्ननिरूपाख्यत्वमित्यर्थः २४ आत्मनःक्षणिकत्वंदूषयति अनुस्मृतेश्च २५ अनुभ
वमनुभवनताउत्पद्यमानास्मृतिरनुस्मृतिस्तद्बलादात्मनोनुभवितुर्नक्षणिकत्वमित्यर्थः अन्यानुभूतेरन्यस्मरणायोगादितिभावः न
२५ नासतोदृष्टत्वात् २६ क्षणिकात्कार्योत्पत्तिमिच्छतार्थादभावान्निरूपाख्याद्देवकार्योत्पत्तिरंगीकृतेतिप्रतिभातिपूर्वक्षण
नाशंविनाकार्यक्षणोत्पत्त्ययोगात्साक्षादभावाद्भावोत्पत्तिः स्वग्रंथेदर्शिताचतथाचासतःअभावान्निःस्वरूपात् कार्योत्पत्ति
र्नयुक्ताकुतःअदृष्टत्वात् निरूपाख्यान्नरविषाणादेःकार्योत्पत्तेरदृष्टत्वादित्यर्थःदृष्टत्वादितिवापदच्छेदःसतएवमृदादेःका
र्योत्पत्तेर्दृष्टत्वादित्यर्थः २६ उदासीनानामपिचैवंसिद्धिः २७ किंचैवमभावात्भावोत्पत्त्यंगीकारेउदासीनानांतत्तत्कार्यसाधनेषुकृ ध
ष्यादिष्वप्रवर्तमानानांस्वगृहेतूष्णीमुपविष्टानामपिपुंसांस्वस्वाभिमततत्तत्कार्यस्यसिद्धिःस्यादित्यर्थः तस्मात्क्षणिकमूलेनवैभा
षिकसौत्रान्तिकयोर्बाह्यार्थवादिनोर्मतेनसमन्वयस्यनविरोधइतिसिद्धं २७ नाभावउपलब्धेः २८ एवंक्षणिकबाह्यार्थवादनिराक
रणंकृतंतन्निराकरणमुपजीव्यक्षणिकविज्ञानमात्रसत्त्ववादीप्रत्यवतिष्ठतइत्यनयोरुपजीव्योपजीवकभावःसंगतिःविज्ञान
वादिनोबौद्धस्ययोगाचारस्यसिद्धान्तः विज्ञानातिरिक्तस्यबाह्यपदार्थस्याभावइतितोस्याधिकरणस्यविषयःसकिंमानमूलोभ्रान्तिमूलो
वेति संदेहे मानमूलइतिप्राप्ते नपाहि नीलादिविज्ञानस्यस्वरूपतःसर्वार्थान्प्रतिअविशिष्टत्वाद्बाह्यार्थवादिनापितस्यनीलादि
ज्ञानत्वसिद्ध्येनीलाद्याकारत्वमंगीकरणीयंतथाचतेनैवाकारेणसर्वव्यवहारोपपत्तेःकिंबाह्येननीलादिनाबंध्यायमानेनतथा

स॰टी॰ नत्वप्रकाशानीलादिविज्ञानस्यक्षणिकत्वात्साकारत्वाच्चस्यापिनिराकारविज्ञानाद्वैतयोगजगत्सर्गत्वनन्तसमन्वयेनसिध्यतीति॥
७० प्रत्येनत्वमः विज्ञानव्यतिरिक्तानामभावेनसंभवति कुतः उपलब्धेः विज्ञानातिरिक्तानामर्थानांघटपटादीनामनुभवसिद्धत्वादित्यर्थः
नचविज्ञानाकारेणानुभवस्यान्यथासिद्धिः वाह्यार्थविनातत्ताद्रूप्यात्मकाकारस्यज्ञानेप्यसिद्धेः एवंचप्रतीयमानोवाह्यार्थएवेति
नज्ञानस्यसाकारत्वेनापिक्षणिकत्वमानाभावात् अनुमानस्यपक्षाधनेकज्ञानसाध्यतयास्यापिनमनुमातारंविनानुदयादितिस्या
पिनिराकारब्रह्मणिसमन्वयेनविरुध्यतेइति २८ ननुजाग्रद्वस्थायामुपलब्धाःसर्वप्रत्ययाःनिरालंबनाःप्रत्ययत्वात्स्वप्नगंधर्वनग
रमायाविनिर्मितमायादिवदित्याशंक्यदृष्टांतेवाधितविषयत्वमुपाधिरित्याह वैधर्म्याच्चनस्वप्नादिवत् २९ स्वप्नादिदृष्टप्रत्यय
स्यजाग्रत्प्रत्ययस्यचान्योन्यंवाधितविषयत्वावाधितविषयत्वरूपवैधर्म्यान्नस्वप्नादिदृष्टांतेननिरालंबनत्वंजाग्रत्प्रत्ययस्येत्यर्थः
चशब्देनदृष्टांतेसाध्यवैकल्यंसूचयति स्वप्नादावपिप्रातिभासिकविषयाणांसत्त्वादिति २९ किंच वाह्यार्थानामभावेवस्तुज्ञानपट
ज्ञानमित्यादिवैचित्र्यंज्ञानेनस्यात् नचपूर्वपूर्वानादिविचित्रवासनावशात् वैचित्र्यंस्यादितिवाच्यं वाह्यार्थाभावेवासनानामभा
वादित्याह नभावोनुपलब्धेः ३० वासनानांनभावोनसंभवःकस्मात् अनुपलब्धेस्तत्पक्षेवाह्यार्थानामनुपलब्धेरित्यर्थः वासना
टी॰ नांवाह्यार्थानुभवव्याप्यत्वाद्व्यापकाभावेव्याप्याभावइति वाह्यार्थानुभवस्यवासनांप्रतिकारणत्वात्कारणाभावेकार्याभावइतिवाता
त्पर्यं किंच वासनानांसंस्काराभिधानानांत्वत्पक्षे आश्रयासंभवाद्नुपपत्तिः ३० नन्वहमित्यालयप्रत्ययएवाश्रयइत्यतआह क्ष
णिकत्वाच्च ३१ आलयविज्ञानस्यक्षणिकत्वांगीकारान्नाश्रयत्वंसंस्काराश्रयत्वंवानक्षणिकस्यसंस्कारसमानकालीनस्यवासंस्का
रकालीनस्यवाश्रयत्वायोगादितिभावः ३१ सर्वथानुपपत्तेश्च ३२ पश्यनातिष्ठनेसाधयपशब्दप्रयोगात् ग्रंथतोनुपपन्नमिदंवेद एम ७०

गत्यानांमतं उक्तप्रकारेणार्थतोप्यनुपपन्नमितिसर्वथानुपपत्तेर्नादरणीयंश्रेयोर्थिभिः सौगतंमतमितिसर्थः दर्शनमितिव
क्षेपपक्षेनेसपशरः स्यानमितिवक्षेप्ननिषेधेनेसपशरः दृशस्तिष्ठतेभ्रधातोः शितिप्रत्ययेपश्यतिष्ठावादेशोभवतः नपुंसक च
त्वेपनस्यादिशित्वादितिबोध्यं ननुग्राह्यार्थवादस्यकेवलविज्ञानमात्रवादस्यचोक्तरीत्यासंभवाच्छून्यंनिःस्वरूपमेवप्रपंचनत
त्त्वमस्तुकिंनस्यादितिशंकायामाह पुनर्नाभावउपलब्धेरसादीनिसत्त्वानिशून्यमतनिराकरणपरत्वेनयोज्यंतेप्रपंचश्शून्यत्वस्यसर्वप्रमाणवाधितत्वे
नतन्निरासायपश्यदुपपत्तौनेपक्षस्य नपाहिज्ञानार्थयोर्नाभावः प्रमाणेनोपलब्धेरित्यर्थः वैधर्म्यान्वेतिसूत्रपूर्ववद्व्याख्येयंप्रपंच
स्यवाधत्वेवाधाधिष्ठानंसत्त्वंकिंचिद्वक्तव्यंनिरधिष्ठानवाधायोगात्तस्यचाधिष्ठानस्यत्वन्मतेनभावः नसत्त्वंमाणस्तदनुपलब्धेरि त
ति नभावोनुपलब्धेरितिसूत्रार्थः क्षणिकत्वाच्चेतिसूत्रेविभक्तेः पूर्वमुपदेश्यस्याध्याहारः तथाचक्षणिकसदार्थानंगीकुर्वतांतेषां
क्षणिकत्वोपदेशाभ्युपेयोपदेशाच्चव्याहतार्थबोधकः सुगतइत्यर्थः अंसमसूत्रेक्तव्याख्यानं नस्माद्धीसेकशरणाबौद्धमतेननस त
मत्वपस्यविरोधइतिसिद्धं नैकस्मिन्नसंभवात् २३ एवमुक्तकथ्यानांबौद्धानांमतेनिरस्तेविवसनानांजैनानांमतंबुद्धिस्थंबुद्धिस
न्निधितस्तस्यासंगत्यानिराक्रियते तत्रसंशयः किंदिगंवरमतंमानमूलंभ्रांतिमूलंवेति मानमूलमितिप्राप्तेन नपाहि स्यादस्तिः
स्यान्नास्तिस्यादस्तिनास्तिच स्यादवक्तव्यः स्यादस्तिचावक्तव्यः स्यादस्तिनास्तिचावक्तव्यश्च इत्येवंरूपसप्तभंगीस्तित्वादिविरुद्धधर्मद्
यमारोपयत्सर्वेषुपदार्थेषुयोजयंतोविवसनाः पदार्थमात्रस्यानेकरूपत्वमाचक्षते उपादानादिव्यवहारसिद्धये अन्यथावस्तु
नएकरूपत्वेसर्वात्मनास्तित्वेनास्तित्वंवावक्तव्यमिति प्राप्यात्मनापिसत्वाद्धस्तुप्राप्त्यर्थमुपादानादिव्यवहारोनस्यात् अतःके
नचित्घटादिरूपेणास्तिकेनचित्पटादिरूपेणनास्तीत्यनेकरूपत्वमेववस्तुनः सप्तभंगनयोनामसप्तस्वस्तित्वादिषुवस्तुन्येक

स॰ टी॰
७१

त्रविरोधभंगस्तत्रयोजनयोयुक्तिः स्यादस्यर्थः स्यादस्तीत्यादेरयमर्थः स्यात्सदं कथंचिदित्यर्थः कं वस्तुनोस्तित्वविवक्षायामाद्यो भं
गः असत्त्वविवक्षायां द्वितीयो भंगः क्रमेणोभयवांछायां तृतीयो भंगः युगपदुभयवांछायामस्तित्वनास्तित्वयोर्युगपद्वाचा
वक्तुमशक्यत्वादवक्तव्यं वस्तु इति चतुर्थो भंगः आद्यचतुर्थयोर्भंगयोः क्रमेण वांछायां पंचमो भंगः द्वितीयचतुर्थयोर्विवक्षा
यां षष्ठो भंगः आद्यद्वितीयचतुर्थानां वांछायां सप्तभंग इति एवमेकत्वानेकत्वनित्यत्वानित्यत्वादिविरुद्धधर्मद्वयमादायो
क्तानयो योजनीयः तस्माद्वस्तुमात्रस्य सत्त्वमसत्त्वं चेत्येवमादिविरुद्धधर्मद्वयमादायोक्तानयो योजनीयः तस्माद्वस्तुमात्र
स्य सत्त्वमसत्त्वं चेत्येवमादिविरुद्धानेकधर्मवत्त्वमेवैकरूपत्वस्य समन्वयो न सिध्यतीति प्राप्ते सूत्रम् नैकस्मिन्नसंभवादिति
एकस्मिन्परमार्थरूपवस्तुनि विरुद्धधर्माणामसंभवाद्वस्तुनोनेकरूपत्वं नास्तीत्यर्थः यदस्ति तदस्त्येव न नास्ति यन्नास्ति तन्नि
त्यमेव नास्ति यथा सम्यगात्मा वस्तुभूतः एवं प्रपंचस्यापि तन्मते वस्तुभूतत्वान्नानेकरूपत्वसंभवः अस्मन्मते तु प्रपंचो न
सन्नाप्यसत्किं त्वनिर्वचनीय एव तेन सर्वव्यवहारसंभव इति भावः ३३ एतेषामार्हतानां देहपरिमाण एवात्मेति मतं दूषय
ति एवं चात्माकार्त्स्न्यं ३४ यथैकत्र विरुद्धधर्मासंभवो दोषस्तथा आर्हतानां मते एवमात्मनोकार्त्स्न्यं परिच्छिन्नत्वदोषा
न्तरं स्याज्जीवस्य देहपरिमाणत्वांगीकारादित्यर्थः तथा च परिच्छिन्नत्वादात्मनो घटादिवदनित्यत्वं स्यादिति भावः किंचात्म
नो देहपरिमाणत्वे मनुष्यात्मनः कर्मवशाद्धस्तिशरीरे कृत्स्नप्रवेशो न स्यात्पुत्तिकाशरीरे वा कृत्स्नस्यात्मनः प्रवेशो न स्यात् ३४
ननु जीवस्य सावयवत्वांगीकारात्पर्यायेण गजादिशरीरप्राप्तौ केचिदवयवा आगच्छन्ति सूक्ष्मपुत्तिकाशरीरप्राप्तौ च केचिद
पगच्छन्तीति न मनुष्यात्मनः स्थूलसूक्ष्मशरीरप्राप्तिविरोध इत्याशंकां निराकरोति न च पर्यायादप्यविरोधो विकारादिभ्यः ३५

राम
७१

संतानत्रितत्त्वोपपत्तेरित्याशंक्याह न चेत्यादि सूत्रं
पर्यायादपि ॥ ४

पर्यायादपि अवयवगमनागमनाभ्यामपि न तत्स्थूलसूक्ष्मशरीरपरिमाणत्वस्यात्मन्यविरोध इति न चेत्सर्थः कुतः विकारादिभ्य
आत्मनः सावयवत्वेन तच्छरीरमात्रस्यापि देहात्मवत्तागीकारे विकारवत्त्वप्रसक्तौ घटादिवदनित्यत्वं स्यात् अनित्यत्वे च बन्धमो
क्षाभ्युपगमो विरुध्येत जलतुम्बिकान्यायेन संसारसागरे मग्नस्य बन्धविच्छेदात्संततोर्ध्वगमनं मुक्तिर्भवतीति त्वयाभ्युपगमादिति पर्
यायपक्षेत्वपरिच्छिन्नत्वादात्मनो नित्यत्वं स्यादित्युक्तमप्युक्तं अनित्यत्वेपि वा द्रव्यसंततानरूपेण नित्यत्वस्यात्मन्यविरोध इति न चेत्स
र्थः कुतः विकारादिभ्यः संतानस्य संतानीव्यतिरिक्तस्यासत्त्वेन तस्य च संतानीजन्यत्वाद्विकारवत्त्वस्यादेव असत्त्वेनैरात्म्यवादप्रसंग
इत्यर्थः ३५ किं च अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ३६ मुक्तात्मनो यत्परिमाणं तदन्त्यं तच्च नित्यमल्पाणुत्वाद्यन्यतमपरि
माणत्वेन व्यवस्थितं चेति जैनसिद्धान्तः तथा चान्त्यस्य परिमाणस्य नित्यत्वेनावस्थितेः तद्दृष्टान्तेन आत्मपरिमाणत्वेन तत्साम्यमा
पादितमिति द्रष्टव्यं परिमाणसाम्ये स्थूलसूक्ष्मशरीरप्राप्तो परिमाणवैषम्यं न स्यादिति भावः यद्वा सर्वदैकमेव परिमाणं स्या
दित्यापाद्यं तथा हि अन्त्यपरिमाणस्य जन्यत्वेनित्यत्वविरोधादाद्यमध्यमकालावस्थानं वक्तव्यमिति यदन्त्यपरिमाणमणुमह
द्वा तदेवैकं सर्वदा स्यान्नान्यत् तथा चान्त्यस्य परिमाणस्यावस्थितेरणुत्वाद्यन्यतमत्वेन नियतत्वादाद्यमध्यमकालयोरुभयोस्तस्य
परिमाणस्य नित्यत्वादेकत्वादविशेषः जीवोणुश्चेत्सर्वदाणुरेव महांश्चेन्महानेव स्यादित्यर्थः तथा च न शरीरपरिमाणनियम इति भावः
तस्मादयुक्तं विवसनमतेन न समन्वयस्य विरोध इति सिद्धं ३६ इदानीं केवलनिमित्तकारणमेवेश्वरो नोपादाननिमित्तमिति ये वासेश्व
रसांख्यपातंजलिशैवकारुणिकगाणपत्यादीनां मतं तस्य दोषं दर्शयति पत्युरसामञ्जस्यात् ३७ पूर्वं सत्त्वासत्त्वयोरेकत्र विरोधादसंभव इत्युक्तं
तर्हि न तद्वदुपादानकर्तृत्वयोरेकत्र विरोधादसंभव इति दृष्टान्तसंगत्यानिमित्तोपादानोभयात्मकब्रह्मसमन्वयासंभव इत्याक्षेपे सिद्धां

न

हेतुनो मयो
राद्यमध्य
मपरिमाणयोः
नित्यत्वप्रसंग
त् त्रवारणमा
त्यमध्यमो
तपरिमाणं
स्याविशेषासा
म्यस्यादित्यर्थः
नित्यपरिमाणानात्रयाणां
एकत्रासमवात्त्रितत्त्वमात्रो

२ ह्यतेन

सूर ७२

नः पत्युरीश्वरस्य जगदुपादानप्रधानादिप्रेरकत्वेन जगन्निमित्तत्वमात्रं न संभवति कुतः असामंजस्यादीश्वरस्य जगत्सर्जने प्रवृ-
त्तौ रागद्वेषादिप्रसंगादसामंजस्यं स्यात् प्रवृत्तेः रागद्वेषादिपूर्वकत्वेन लोके दृष्टत्वात् दृष्टानुसारित्वात्कल्पनायाः अस्माकं
तु श्रुत्यनुसारित्वादनिर्वचनीयवादित्वाच्च न दोष इति भावः ३७ संबंधानुपपत्तेश्च ३८ अपि च प्रधानादिभिः प्रेरकस्येश्वरस्य
संबंधो वाच्यः असंगस्य प्रेरकत्वायोगात् न च संबंधः संभवति निरवयवत्वात् पुनः सिद्धत्वाच्च संयोगसमवाययोरनुपपत्तेरित्य-
र्थः सिद्धान्ते त्वविद्यादिप्रेरकत्वकल्पितेन तादात्म्येनोपपद्यत इति भावः ३९ किंच कुंभकारस्य मृदादिप्रेरकत्वं दृष्टान्ते दृष्टं तेनेश्व-
रस्य प्रधानादिप्रेरकत्वं कल्पनीयं न हि तत्संभवति प्रधानस्य रूपादिहीनत्वेन दृष्टमृदादिवैलक्षण्यात् प्रधानादिविषयप्रे-
रणायामीश्वरस्यानुपपत्तेरित्याह अधिष्ठानानुपपत्तेश्च ३९ अधिष्ठानप्रेरणासिद्धान्ते तु न दृष्टापेक्षा श्रुत्येककारणत्वादिति
अन्यतारप भावः करणवच्चेन्न भोगादिभ्यः ४० ननु करणानीन्द्रियाणि यथा जीवेन प्रेर्यन्ते एवं प्रधानादिकमप्रत्यक्षमपीश्वरेण प्रेर्य-
त इति चेत्कुतः भोगादिभ्यो दोषेभ्यो जीवो हीन्द्रियग्रामं भोगाय प्रेरयतीति दृष्टान्ते नेश्वरस्य प्रेरकत्वे तद्वद्भोगादयः प्रसज्ये-
रन्नित्यर्थः ४० यद्वा सशरीरस्यैव प्रेरकत्वदर्शनादीश्वरस्य च शरीरानुपपत्तेर्न प्रेरकत्वमित्याह अधिष्ठानानुपपत्तेश्च भोगा-
धिष्ठानं शरीरमधिष्ठानशब्दार्थः करणवच्चेन्न भोगादिभ्यः करणवत् इन्द्रियाधिष्ठानं शरीरमित्यर्थः न हीश्वरो अंगीक्रियत
एवेति चेन्न शरीरवत्त्वे भोगादिप्रसंगादीश्वरत्वमेव न स्यादित्यर्थः ४० अन्तवत्त्वमसर्वज्ञता वा ४१ किंच प्रधानजीवेश्वराणा-
मा संख्या च परिमाणं तदुभयमीश्वरेण परिछिद्यते न वा आद्ये परिछिन्नसंख्यत्वात् परिछिन्नपरिमाणत्वाच्च त्रयाणां
प्रधानजीवेश्वराणां घटादिवदन्तवत्त्वं विनाशित्वं स्यात् द्वितीये ईश्वरस्यासर्वज्ञत्वं स्यादित्यर्थः नस्मारस्यगतेन नाकिंकपरिक

राम ७२

त्मितेश्वरकारणवादेन नाभिन्ननिमित्तोपादानब्रह्मसमन्वयविरोध इति सिद्धं ४१ उत्पत्त्यसंभवात् ४२ एवं केवलाधिष्ठात्रेश्व
र इति वेदासंगतमतं निरस्य निमित्तं प्रकृतिश्चेश्वर इति भागवतमतस्य वेदसंगतार्थत्वात्तदंगीकृत्य जीवोत्पत्त्यंशेपि प्रमा
णमूलत्वस्यादित्यतिप्रसंगादुदाहरणसंगत्यास्यारंभः ननु भागवतमतं प्रमाणमूलं भ्रान्तिमूलं वेति संदेहे प्रमाणमूलमिति प्राप्तं त
थाहि वासुदेवः खलु परमात्मा परमार्थतत्त्वं जगदुपादाननिमित्तं च तस्माद्वासुदेवात्संकर्षणाख्यो जीव उत्पद्यते तस्माज्जीवा
त्प्रद्युम्नाख्यं मनो जायते तस्माच्चानिरुद्धाख्योहंकार इति तथा च जीवाभिन्नाद्ब्रह्मणो जगत्सर्गं ब्रुवतः समन्वयस्यासंभव इति
प्राप्ते वेदाविरुद्धांशमंगीकृत्य वेदविरुद्धजीवाद्युत्पत्त्यंशं दूषयति उत्पत्त्यसंभवादिति परमात्मनो वासुदेवाज्जीवस्योत्पत्तेरसंभ
वात्तन्मतमसाध्वित्यर्थः अन्यथा जीवस्योत्पत्त्यंगीकारे घटादिवदनित्यत्वापत्त्या भगवत्प्राप्तिरूपमोक्षस्याभ्युपगमः कस्य स्या
दिति भावः ४२ न च कर्तुः करणं ४३ लोके कर्तुर्देवदत्तादेः सकाशात्करणस्य कुठारादेरुत्पत्त्यदर्शनाज्जीवात्कर्तुः करणं मनो जन्य
त इत्येतदयुक्तमित्यतश्च तन्मतमसंगतमित्यर्थः अयं भावः किं जीवो मनः करणान्तरमासाद्य जनयतीति अनासाद्य वा आद्ये त
त्करणान्तरं जीवजन्यं न वा आद्येनवस्था आद्यविकल्पावतारासंभवात् द्वितीयेपि न त्वं मनोस्त्विति न मनसो जीवजन्यत्वं आद्यद्विती
ये करणान्तरं विनैव जीवस्य कार्यजननसामर्थ्यांगीकारे किं मनःकल्पनयेति ४३ ननु संकर्षणादयस्त्रयोपि न जीवादिरूपाः किं
तु वासुदेववद्विज्ञानस्वरूपा ईश्वरा एवेत्याशंक्याह विज्ञानादिभावे वा तदप्रतिषेधः ४४ संकर्षणादीनां त्रयाणां वासुदेववद्वि
ज्ञानादिभावे वा विज्ञानैश्वर्यबलवत्त्वनिर्दोषनिरवद्यस्वरूपत्वेपि तदप्रतिषेधः तस्योत्पत्त्यसंभवरूपदोषस्य प्रकारान्तरेणाप्रतिषेध
इत्यर्थः तथाहि न तावच्चतुर्णां वासुदेवादीनामीश्वराणां किंचित्प्रयोजनमस्ति एकेनैव कार्यसिद्धेः भगवानेवैको वासुदेवः परमा

येनत्वमितित्वत्सिद्धांतहानिश्च नन्वीश्वराणां संकर्षणादीनां त्रयाणां वासुदेवतुल्यानामेव वासुदेवाद्युत्पत्तिरभ्युपगम्यत इति नोक्त
दोषइति चेन्नस्यागतउत्पत्त्यसंभवो दोषः संकर्षणादीनामीश्वरत्वाविशेषे वासुदेवस्येव नोतिशयाभावेन त्रयाणां वासुदेवेन ज
न्यत्वानुपपत्तेरिति ४४ विप्रतिषेधाच्च ४५ कश्चित्ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि वासुदेवगुणा इति प्रतिपादयंति कश्चित्तु
त गुणास्त्वात्मानो वासुदेवा भगवंत इत्यभेदं गुणिगुणिनोर्वर्णयंति न चैव परस्परं विप्रतिषेधाच्चासंगतमिदं भागवतमतमि
त्यर्थः तस्मान्निरवद्यो ब्रह्मणो वेदांतानां समन्वय इति सिद्धं ४५ इति श्रीब्रह्मसूत्रवृत्तौ द्वितीयस्याध्यायस्य द्वितीयः पादः २ न
वियदश्रुतेः १ पूर्वस्मिन्पादे श्रुतिविरुद्धत्वात्परपक्षाणामप्रामाण्यमुक्तं नहि श्रुतीनामप्यन्योन्यं विरुद्धत्वाद्ब्रह्मकारणवादस्या
प्यनपेक्षत्वस्यादिति शंकानिरासार्थं परपादद्वयमारभ्यते पादद्वयस्यापि श्रुतीनामन्योन्यविरोधनिरासेन समन्वयदृढीकरणात्
श्रुत्यध्यायसंगतिः पूर्वपादेनास्य प्रासंगिकी संगतिः शंकाव्याजेन दर्शितानां तत्तदादिसृष्टिवाक्यानामविरोधं प्रतिपादयितुमा
काशमाश्रित्य विचार्यते आकाशस्य किमुत्पत्तिरस्ति उत नास्तीति यद्यस्ति तर्हि विरोधः तथाहि छांदोग्ये आकाशवायू विनात्ते
जोबन्नजनेति तेजआदिका सृष्टिः श्रूयते तैत्तिरीयके तु आत्मन आकाशः संभूत इत्याकाशादिका तथा चानयोर्वाक्ययोर्विरोध इ

ति पूर्वपक्षः आद्यपादे पूर्वपक्षे श्रुतीनां विरोधादप्रामाण्यं फलं सिद्धांते विरोधाभावात्प्रामाण्यमिति बोध्यमेवं प्राप्ते एकदेशीम
तेन समाधत्ते न वियदश्रुतेः वियन्नोत्पद्यते कुतः अश्रुतेर्वियत उत्पत्तिप्रतिपादकवाक्यस्याश्रवणादित्यर्थः यद्यप्यात्मन आ
काशः संभूत इति श्रुतिरस्ति तथापि सा गौणीति गूढाभिसंधिस्तथाकाशस्योत्पत्तेरनभ्युपगमादेव न विरोध इति १ गूढाभि
संधिमजानानः शंकते अस्ति तु २ तुशब्दः पक्षांतरपरिग्रहे छांदोग्ये आकाशोत्पत्तिश्रुत्यभावेपि सा श्रुतिस्तैत्तिरीयकेस्ती

सर्थः तथा च विरोधस्तदवस्थ इति शंकितुरभिप्रायः २ एकदेशी स्वाभिप्रायं प्रकटयति गौण्यसंभवात् ३ न त्वाकाशस्योत्पत्तिश्रु
तिर्मुख्या किंतु गौणी कुतः असंभवात् आकाशोत्पत्तेः समवायिकारणादिसामग्र्यभावाद्विभुत्वेन नित्यत्वानुमानाच्चाकाशोत्पत्ते
रसंभवादित्यर्थः ३ शब्दाच्च ४ वायुश्चान्तरिक्षं चैतदमृतमित्याकाशे अमृतशब्ददर्शनान्नाकाशस्योत्पत्तिरित्यर्थः ४ नन्वात्मन
आकाशः संभूत इत्यादिवाक्ये संभूतशब्दस्याकाशे गौणत्वे तेज आदौ तु मुख्यत्वमित्येतत्तु विरुद्धं एकस्मिन्वाक्ये एकस्य शब्दस्य
गौणमुख्यत्वादर्शनादित्यत आह स्याच्चैकस्य ब्रह्मशब्दवत् ५ यथैकस्मिन्नेव प्रकरणे अन्नं ब्रह्मेति व्यजानादित्यादावन्नादिषु ब्र
ह्मशब्दो गौणः आनन्दो ब्रह्मेत्यत्र मुख्यः विषयभेदादेवं प्रकृतेऽपि विषयभेदादेकस्य संभूतशब्दस्य गौणत्वमुख्यत्वे स्यातामित्यर्थः ५ इ
दमेकदेशिमतं दूषयन् सिद्धांतयति प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ६ विज्ञेयाद्ब्रह्मणः कृत्स्नस्य वस्तुजातस्याव्यतिरेकात् आ
त्मैकविज्ञानात्सर्वविज्ञानप्रतिज्ञाया हानिर्भवति ब्रह्मभिन्नस्यानाकस्य नित्यस्याकाशस्याभ्युपगमे तस्याः प्रतिज्ञाया बाध्येत तस्मादा॰
काशस्योत्पत्तिरंगीकृत्य ब्रह्माधीनसत्ताकत्वात् ब्रह्मणि ज्ञाते सर्वमाकाशादिकं ज्ञातं भवतीति सा प्रतिज्ञा समर्थनीयेत्यस्याका॰
शस्योत्पत्तिरित्यर्थः किंच प्रतिज्ञायाः समर्थनं कार्यकारणाभेदपरेभ्यः शब्देभ्यो भवति तथाहि कार्यकारणाभेदप्रतिपादनपरैः मृदा
दिदृष्टान्तैः प्रतिज्ञां संसाध्य तत्साधनोपन्यासे स्वेतो सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत तत्तेजोऽसृजत ऐतदात्म्यमिदं सर्वमित्या
दिशब्दाः कार्यजातं प्रदर्श्य तस्य ब्रह्मणाऽव्यतिरेकं दर्शयन्ति ६ इदं सर्वमाकाशस्याकार्यत्वे बाधितं स्यादिति तन्नैवमुत्पत्तिमत्वसिद्धेः पूर्वो
क्तविरोधपरिहारः कथमिति चेदुच्यते छांदोग्ये हि तेजस उत्पत्तिमात्रं श्रूयते नाद्यत्वमपि तेन तैत्तिरीयके तु आकाशाद्वायुर्वायोरग्निरि
ति तेजसस्तृतीयत्वं श्रूयते तथा च तयोर्वाक्ययोरेकवाक्यतादनवकाशे तैत्तिरीयश्रुत्यनुसारेणाकाशवायू च सृष्ट्वा तदनन्तरं तेजोऽसृजत

सू॰ वृ॰ ७४ तिष्ठांदोग्यश्रुतिः परिणाममेते इति मानयोर्वाक्ययोर्विरोध इति ६ यदुक्तं तैत्तिरीयके वियदुत्पत्तिश्रुतिर्गौणी समासमभावाद्विभुत्वेन नि
त्यत्वानुमानादिति तत्र श्रोतस्य ब्रह्मणस्सर्वविषयत्वामप्रीत्यादि सिद्धं सत्तदीयानुमानमनुमानेनैव दूषयति यावद्विकारं तु विभागो
लोकवत् ७ तु शब्दमाकाशेत्सत्संभवाशंकाव्याहृत्यर्थः यतो यावद्विकारं तावद्विभागोदृश्यतेनतु विकारं ब्रह्मणि विभागा दर्शना
त् लोके घटादेर्विकारस्यैव विभक्तत्वदर्शनादित्यर्थः नयाचायं प्रयोगः आकाशदिक्कालमनःपरमाणवः पराधीनसत्ताकाः स्वसमा
नसत्ताकविभागवत्वात् घटशरावादिवदित्याकाशोत्पत्तिवादिनं प्रति विभुत्वहेतोः परोक्तस्यासिद्धिरपि बोध्या आकाशेऽप्यनन्तशब्द
प्रयोगस्त्वापेक्षिकः अमरा देवा इतिवदिति सिद्धं ब्रह्मकार्यं वियदिति ७ ननु छांदोग्ये वायोरुत्पत्तिनश्रूयते तैत्तिरीये तु श्रूयते तथा
च पूर्ववदनयोर्वाक्ययोर्विरोधपरिहारार्थं वायूत्पत्तिर्गौणीति वाच्यं किंचैषानस्तमिता देवता यद्वायुरिति वायोर्लयप्रतिषेधाच्च
नित्यत्वमित्याशंकामतिदेशेन निराकरोति एतेन मातरिश्वा व्याख्यातः ८ एतेन वियदुत्पत्तिमत्वव्याख्यानेन वायुरपि वियद्वच्छि
न्नब्रह्मजन्यत्वेन व्याख्यात इत्यर्थः वायोर्नित्यत्वं एकविज्ञानप्रतिज्ञाहान्यादेः समानत्वादिति भावः वायोर्लयप्रतिषेधश्चापेक्षिकः
अतिदेशत्वान्न पृथक्संगत्यपेक्षेति मंतव्यं ८ असंभवस्तु सतोनुपपत्तेः ९ एवमसंभावितोत्पत्तिकयोरपि वियत्पवनयोरुत्पत्तिर
स्तीति श्रुतिबलादित्युक्तं तद्वदेव ब्रह्मणोपि ब्रह्मान्तरकार्यमस्तु कार्यकारणत्वाद्विघटादिवदित्यनुमानानुगृहीतया जातो भवसि विश्वतोमु
ख इत्यादि ब्रह्मजन्मश्रुत्या ब्रह्मणोप्युत्पत्तिरस्तीति दृष्टांतसंगत्यारभ्यते तत्र ब्रह्मणो नित्यत्वप्रतिपादकश्रुतीनामुक्तानुमानानु
गृहीतश्रुत्याविरोधोस्ति न वेति संदेहे अग्नेर्विस्फुलिंगा इतिवद्ब्रह्मांतराद्ब्रह्मोत्पत्तिरुक्तश्रुतिबलादस्त्येवेति विरोध इति प्राप्तं ब्रूमः
सतः सदात्मकस्य ब्रह्मण उत्पत्त्यसंभवः कुतः अनुपपत्तेः सत्तामात्रात्सत्तासामान्यस्योत्पत्तेरनुपपत्तेः विशेषस्येव घटादेः सामान्यजः राम ७४

न्यत्वदर्शनात् ब्रह्मणश्चाविशेषत्वेन जन्यत्वेपि तज्जनकं सामान्यं तदेव नो ब्रह्म ब्रह्मणः कार्यत्वे धर्मत्वेन जगदधिष्ठानत्वानुपपत्तेश्च
सर्पः जन्मश्रुतेश्चौपाधिकविषयानवासकत्रिजन्मनि तेनसादिवहुश्रुतिविरोधादिस्वविरोधः ९ तेजोतस्तथाह्याह १० तत्तेजोसृज
तेति छांदोग्यश्रुतेः ब्रह्मजत्वं तेजसः श्रूयते तैत्तिरीयके तु वायोरग्निरिति वायुजन्यत्वमित्यनयोर्वाक्ययोर्विरोधोस्ति न वेति संदेहे सामा-
न्यात्सामान्यस्योत्पत्तिर्माभूत्सामान्याद्वायोर्विशेषस्य तेजस उत्पत्तिः संभवति एवं श्रुतिबलात्सर्वोपादानब्रह्मजत्वमपीत्यस्ति विरो-
ध इत्युदाहरणसंगत्या पूर्वपक्षे पूर्वं ब्रह्मणः कार्यत्वे जगदुपादानत्वेन संभवतीत्युक्तं तद्वद्वायोरपि कार्यत्वात्तेजः प्रत्युपादान-
त्वं नास्त्येवेति ब्रह्मसमाधानवत्तेजसः स्वविरोधः वायोरग्निरिति पंचमी क्रमार्थे न तु हेतुत्वार्थे स्यादेकदेशिना सिद्धान्तः कृतः तद्दूषय-
ति तेजोतस्तथा ह्याहेति अतो मातरिश्वनः सकाशात्तेजो जायते एवं हि यत्तत्तथा वायुजत्वं वायोरग्निरिति श्रुतिराह न चेयं पंच-
मी क्रमार्था वायोरनंतरं तेज इति पराततः कल्पनाप्रसंगात् किं च आत्मन आकाशः संभूत इत्यादौ पृथिव्या ओषधय इत्यादौ च हेतुपं-
चम्या दर्शनान्मध्ये अकस्मात् क्रमार्थपंचमीप्रसंगत्त्वमेव न चैवं क्वचिद्ब्रह्मजन्यत्वं क्वचिद्वायुजन्यत्वमिति विरोधः वायोर्ब्रह्मजन-
न्यत्वेन वायुभावापन्नब्रह्मजन्यत्वस्य छान्दोग्यवाक्यार्थस्यैव वायोरग्निरिति वाक्यस्याप्यर्थत्वेनाविरोधादिति १० आपः ११ अतत्त-
थाह्याहेत्यनुवर्तते तेजोऽनंतरभावित्वात् अपश्रयिभ्योरिति तेजसो वायुजन्यत्वकथनानंतरं तयोरपृश्यपिंभ्योः क्रमेण वृद्धिस्याला-
दुद्धित्वन्निखिलक्षणसंगत्या क्रमेणाधिकरणाद्वयमारभ्यते तदपोसृजत तेत्सादिवाक्यस्याऽपां ब्रह्मजन्यत्वप्रतिपादकस्याग्नेरापः इ-
तिवाक्येन विरोधोस्ति न वेति संदेहे पूर्ववद्विरोधोस्तीति पूर्वपक्षे आपामग्निदाह्यत्वात्तज्जन्यत्वं नास्त्येवेति अविरोध इति एकदेशि-
सिद्धान्तं दूषयति आप इति आपस्तेजसो जायन्ते हि यस्मात्तथा तेजोजन्यत्वमग्नेरापः इति श्रुतिराह सर्पः त्रिवृत्कृतयोरसेन

स.सू.
७५

नतयोरीश्वराहकभावेप्यत्रिवृत्तत्वतयोर्न विरोधः यद्योगेपेते जोवृषिनं ब्रह्मलनच्छ्रुत्यर्थ इति पूर्ववद्विरोधपरिहारो बोध्यः ११ अन्नं
तरभावि पृथिवीमाश्रित्य विचारयन्ति पृथिव्यधिकाररूपशब्दान्तरेभ्यः १२ ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नम
सृजन्तेति श्रूयते तत्र संशयः किमन्नशब्देनोदनादिकमुच्यते किं वा पृथिवीति तत्रान्नशब्दस्योदनादौ प्रसिद्धत्वादोदनादिकमेवा-
न्नशब्देनोच्यते तथा च व्रीहियवादेस्तज्जन्मोदनस्य च योगरूढ्या चात्र शब्दवाच्यस्य कश्चिदन्यत्वं कश्चित्तु पृथिव्या ओषधय ओष
धीभ्योऽन्नमित्यत्र पृथिव्यादिजन्यत्वमित्यन्यायाश्रुतो विरोध इति प्राप्ते ब्रूमः पृथिव्येवात्रान्नशब्देनोच्यते न व्रीह्यादिकं कुतः अधिकार
रूपशब्दान्तरेभ्यः तत्तेजोऽसृजतेति महाभूताधिकाराद्बलरूपं तु यदन्नस्येति कृष्णरूपस्यान्नशब्दवाच्यस्य पृथिवीत्वज्ञापकस्य
श्रवणात् समानप्रकरणे अद्भ्यः पृथिवीति च तद्यदपां शर आसीत्तत्समहन्यत सा पृथिव्यभवदिति च पृथिव्या एवान्नत्वप्रतिपाद म
कशब्दान्तरसत्त्वाच्चेत्यर्थः न तत्र सृष्टिकाले यदपां शरो घनीभावश्च आसीत्तत्समहन्यत संघनीभावः संघात्मना परिणत आसीत्से
वापां कठिनाकारपरिणामरूपा पृथिव्यभवदिति श्रुत्यर्थः तथा च व्रीह्याद्यन्नस्य नात्रोपादानकत्वं किंतु पृथिव्या एवोपादानकत्वमे
वेत्यविरोध इति सिद्धं १२ तदभिध्यानादेव तु तल्लिङ्गात्सः १३ एवं तावत्सृष्टिक्रमे महाभूतश्रुतीनामविरोधः प्रतिपादितः इदानी
तानि भूतान्यात्माश्रयाश्रयीभावसंगत्यात्म्यविचार्यते किं महाभूताभिमानिन्यो देवताः स्वतन्त्रा एव भौतिकोत्पादने प्रवर्तन्ते उ
त ईश्वराधिष्ठिता इति विशये आकाशाद्वायुरित्यादिना स्वस्वकार्यसृष्टौ स्वातन्त्र्यश्रवणात्स्वतन्त्रा एवेति प्राप्ते सर्वसृष्टिकर्तृत्वप्र
तिपादकश्रुत्या भूतसृष्टिश्रुतीनां विरोध इति प्राप्ते ब्रूमः स परमात्मैव तत्तत्कार्यगोचरेक्षणात्मकाभिध्यानादेव स्थितान् कारणा-
धिष्ठानात्स्वकार्यं सृजति कस्मात्तल्लिङ्गात्तस्य परमात्मनः सर्वनियन्तृत्वरूपलिङ्गस्य यः पृथिव्यां तिष्ठन्नित्यादिना श्रुतत्वादित्यर्थः

राम
७५

पृथिव्यांतदभिमानिदेवतायांअयंभावः आकाशादिपदानांभूतमात्ररूपत्वाद्देवतापरत्वेलक्षणापत्तेर्नभूताभिमानिदेवताया
अयंभावः आकाशादिपदानांभूतमात्ररूपत्वाद्देवतापरत्वेलक्षणापत्तेर्नभूताभिमानिदेवतानांस्रष्टृत्वमाकाशाद्वायुरित्या
दौश्रुतत्वात्तथाताआपऐक्षन्तेत्यत्रनद्यादिपदानांदेवतापरत्वेलिंगंनदीपक्षस्यतद्व्यवच्छिन्नब्रह्मनिष्ठत्वादितिनदेवतानांस्रष्टृ
त्वंकिंचिन्मानमिति १३ विपर्ययेणतुक्रमोतउपपद्यतेच १४ एवंभूतानामुत्पत्तिक्रमेचिंतितेलयक्रमोबुद्धिस्थःप्रसंगसं
गत्याविचार्यते एतस्यविचारस्यप्रयोजनमद्वैतब्रह्मध्यानप्रासंगिकत्वादेवनास्मिन्पादेसंगतिराशंकनीयातत्रकिंभूतानामु
त्पत्तिक्रमेणैवलयक्रमः उतसोपानपरंपरारूढस्यव्युत्क्रमेणावरोहणवत् व्युत्क्रमेणैवलयक्रमइतिसंदेहे उत्पत्तिक्र
मेणैवेतिप्राप्तेब्रूमः अतउत्पत्तिक्रमाद्विपर्ययेणैवलयक्रमः स्वस्वकारणेकार्याणांलयस्यदर्शनादाकाशादीनांचांतरांतर
भूतभौतिककारणतयोक्तत्वात् किंचव्युत्क्रमेणैवलयक्रमउपपद्यते अन्यथोत्पत्तिक्रमेणैवलयांगीकारेसतिकार्यकारण
स्यनाशइतिस्यात्तच्चायुक्तमित्यर्थः १४ भूतोत्पत्तिलयविचारस्यफलप्रयोजनंकंकारणंसतिक्रममेकप्रयोजनवत्त्वसंगत्यावि अद्वैतब्रह्मध्या
चारयति अंतराविज्ञानमनसीक्रमेणतल्लिंगादितिचेन्नाविशेषात् १५ पूर्वोक्तभूतोत्पत्ति[illegible]क्रमइंद्रियोत्पत्तिक्रमेण नंतत्प्रयोजनं
विहन्यतेनवेतिसंदेहेविहन्यतइत्याह अंतरेति एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच खंवायुर्ज्योतिरापःपृथिवीवि
श्वस्यधारिणीतिवाक्येनतल्लिंगशब्देनोच्यतेविज्ञायतेनेनेतिव्युत्पत्त्याविज्ञानशब्देनबुद्धिरिंद्रियाणिचगृह्यंतेनिश्चयात्मक
मंतःकरणंबुद्धिःसंशयात्मकंचमनइतिभेदः तानींद्रियबुद्धिमनांसिभूतानामात्मनश्चांतरालेतल्लिंगात्तस्मात्सृष्टेर्गमका
द्वाक्यादनुक्रम्यंतेतथाचात्मनइंद्रियबुद्धिमनांसितेभ्यश्चभूतानीत्येवंक्रमेणात्मनःआकाशःसंभूतइत्यादिक्रमस्यवा

सू॰टी॰ धइत्सनमोर्वाक्ययोर्विरोधइतिचेन्नअविशेषात् इंद्रियमनोबुद्धीनांभौतिकत्वेनभूतोत्पत्तिक्रमादिंद्रियाद्युत्पत्तिक्रमस्याविर्
७६ शेषाद्येनक्रमेणभूतोत्पत्तिस्तेनैवक्रमेणभौतिकोत्पत्तिरित्यविरोधइत्यर्थः एतस्माज्जायतेप्राणइत्यादिश्रुतिभ्यश्चसर्वेषामात्म
नःसकाशादुत्पत्तिमात्रश्रुतेर्नक्रममितिभावः अतोनकेनापिवाक्येनभूतसृष्टिवाक्यानांविरोधःइतिसिद्धं १५ एवंतत्पदार्थ
सर्वोपादानब्रह्मसिद्ध्युपादेयभूतकारणश्रुतिविरोधोनिरस्तःइदानींत्वंपदार्थसिद्ध्यैजीवविषयश्रुतिविरोधोनिरस्यतेपाद
समाप्तिपर्यंतंतत्रजीवोत्पत्तिनाशनिमित्तकजातेष्ट्यादिशास्त्राणांजीवनित्यत्ववादिशास्त्रस्यचविरोधोस्तिनवेतिसंदेहेदेवदत्तो
जातोमृतश्चेतिलौकिकव्यपदेशानुगृहीतजातकर्मादिशास्त्रविरोधोस्त्ययथाकरणोत्पत्तिश्रुत्याभूतश्रुतेर्नविरोधः तथा
जीवोत्पत्तावपिभूतश्रुतिविरोधस्याभावोवाच्यःसनसंभवति उक्तयुक्त्याजीवोत्पत्तावुक्तभूतोत्पत्तिक्रमभंगस्यावश्यकत्वादि
तिप्रत्युदाहरणेनपूर्वपक्षेराद्धांतः चराचरव्यपाश्रयस्तुस्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात् १६ योयंलौकिकस्तयोर्जन्म
प्र रणयोर्व्यपदेशोदेवदत्तोजातोमृतश्चेतिसचराचरव्यपाश्रयःस्थावरजंगमदेहविषयोमुख्यःजीवेतुभाक्तोगौणःस्यात्कुतःज
न्ममरणव्यपदेशस्यतद्भावभावित्वात्देहोत्पत्तिनाशानुविधायित्वादित्यर्थः देहप्रादुर्भावाद्यपेक्षयैवजातकर्मादिविधाननिमित्त
नेतेनशास्त्रेणजीवनित्यत्वशास्त्रस्याविरोधइतिभावः १६ एवंदेहोत्पत्तिनाशयोर्जन्मनाशौमाभूतांकल्पाद्यंतयोर्जीवस्यजन्म
नाशौकिंनस्यातांस्वर्गादिफलकर्मशास्त्रविरोधाभावादितिप्रत्युदाहरणेनविस्फुलिंगदृष्टांतेनएतस्मादात्मनःसर्वएतआत्मा
नोव्युच्चरंतीत्यादेर्जीवात्मनःपरस्माद्ब्रह्मणउत्पत्तिवाक्यस्याविकृतस्यैवब्रह्मणोजीवभावेनप्रवेशवाक्यस्यचविरोधसंदेहेविरोधो
स्तीतिप्राप्तेब्रूमः नात्माश्रुतेर्नित्यत्वाच्चताभ्यः १७ आत्माजीवोनोत्पद्यतेकुतःअश्रुतेरुत्पत्तिप्रकरणेषुजीवोत्पत्तेरश्रुतेःताभ्यः एम
७६

अत्र मां प्रति त्वं मोहान्तं मोहमध्यं मोहमपीपतत् आपादितवानसि प्रेत्य नाशानन्तरं संज्ञा नास्तीति ॥

श्रुतिभ्यो जीवस्य नित्यत्वावगमाच्च न जीवोऽप्युत्पद्यते स वा एष महानज आत्माजरोऽमरोऽमृत इत्यादि श्रुतयो जीवनित्यत्ववादिन्यो द्र-
ष्टव्याः यत्तु क्वचिद्विस्फुलिङ्गदृष्टान्तेन परस्माद्ब्रह्मणो जीवोत्पत्तिश्रवणं तत्कार्यकरणसंघातोपाधिनिमित्तमिति श्रुत्यैव स्फुटीकृ-
तं विज्ञानघन एवायं जीव एतेभ्यः कार्यकरणसंघातात्मभूतेभ्यः समुत्तिष्ठति महाः साम्येनोत्थापितानि भूतानि नश्यन्ति सन्ति तदनु
सत्यविनश्यन्ति विनाशानन्तरं संज्ञा नास्तीति याज्ञवल्क्येनोक्ते मैत्रेयी पप्रच्छ अत्रैव मा भगवन्मोहान्तमापीपदन्न वा अहमिमं विजाना-
मीति न प्रेत्य संज्ञास्तीति इदं महन्न विजानामि त्वं नु मे सत्संज्ञा नास्तीति वदन्मां मोहयसीति प्रश्नार्थः तत्रोत्तरं न वा अरे अहं मोहं ब्र-
वीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मेति अविनाशित्वमपरिणामित्वं तत्र हेतुरनुच्छित्तिरिति मोहं मोहकरं वाक्यं संज्ञाघटादि-
विशेषविज्ञानं नास्तीति मयोक्तं न स्वरूपाभाव इति नाहं मोहवादी भूतमात्रासंपृक्तमेवास्य संसारित्वं नश्यति भाविकमिति तात्प-
र्यं १७ ज्ञोऽत एव अत्रायं पुरुषः स्वयंज्योतिरित्यादिस्वप्रकाशत्वबोधकश्रुतेः परपक्षस्य भ्रान्तत्वं श्रोत्रमित्याद्यागन्तुकज्ञानवत्त्व-
वादिश्रुतिभिर्विरोधात्किं न चैतन्यमस्तीति परिहरति असतीति पूर्वपक्षे पूर्वाधिकरणसिद्धजीवानुत्पत्तिमुपजीव्य सिद्धान्तयति ज्ञोऽत एवेति जीवो
नः स्वयंप्रकाशस्वरूप अत एवानुत्पत्तिमत्त्वादेवेत्यर्थः अनुत्पत्तौ हि स्वप्रकाशत्वं स्वरूपोपाहितं जीवस्यापादितं न पाच ब्रह्माभि-
न्नजीवोऽपि स्वयंप्रकाश इति भावः परपक्ष स्मृतिरित्यादिश्रुतय आगन्तुकत्वाभिप्रायेण स्वप्रकाशत्वाविरोधेन नेतव्या इत्यविरो-
ध इति सिद्धं वस्तुदृष्टा १८ उत्क्रान्तिगत्यागतीनां १९ आत्मनो ब्रह्माभेदयोग्यत्वापत्तिः सत्त्वस्वप्रकाशत्वं चोक्तं इदानीं स्वप्रकाशत्वा-
देः षड्भिर्विहितमनवच्छिन्नस्वरूपत्वमणुत्वनिरासेन साधयति संसारावस्थायां हि भावः संगतिः एतदनन्तरभाव्यधिकरणत्रयेणानवच्छि-
न्नत्वापरिच्छिन्नत्वं कर्तृत्वमध्यस्तमात्मनीति प्रतिपाद्यते ततो ब्रह्माभेदयोग्यस्य जीवस्यांशत्वसाधिकरणेन ब्रह्मैकं विवक्षितमिति ॥

अपारमवोत्तरसंगतयः अज्ञानवृच्छिन्नत्वश्रुतीनामेषोणुरात्मा चेतसा वेदितव्य इत्याद्यणुत्वश्रुतिभिर्विरोधोस्ति न वेति संदेहे
अस्तीत्याह उत्क्रान्तीति जीवस्योत्क्रान्तिगत्यागतीनां श्रवणादणुर्जीवः स यदास्माच्छरीरादुत्क्रामति स तदा वागादिभिः प्राणो
सहोत्क्रामतीति मरणसमये उत्क्रान्तिः ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्तीति तस्माल्लोकात्पुनरेत्य
स्मै लोकाय कर्मण इति गत्यागती अपेते इदं चात्मनो विभुत्वेन संभवतीत्यणुत्वं परिशिष्यते शरीरपरिमाणस्यात्मनो नित्या
त्वविरुद्धत्वेनासंभवादिति १९ स्वात्मना चोत्तरयोः २० यद्यप्युत्क्रान्तिर्देहस्वाम्यनिवृत्तिरूपा विभुत्वेपि संभवति तथाप्युत्तरयोर्ग
त्यागत्योः स्वात्मना जीवात्मना संबन्धत्वादणुत्वमित्यर्थः २० नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् २१ ननु नायं जीवोणुः अ
तच्छ्रुतेः अनणुत्वश्रुतेः स वा एष महानज आत्मा सत्संज्ञानमनंतं ब्रह्मेत्यादिना महत्त्वश्रुतेरिति चेन्न इतराधिकारात् इतरस्य
ब्रह्मणः सर्वेषु वेदान्तेषु प्रधानतया ज्ञेयत्वेन प्रकृतत्वात्तस्यैव महत्त्वश्रुतिरित्यर्थः २१ स्वशब्दोन्मानाभ्यां च २२ एषोणुरा
त्मा चेतसा वेदितव्य इति स्वस्याणुत्वस्य वाचकशब्दाज्जीवोणुः वालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेय इत्यु
न्मानाच्च सर्वेभ्यः स्थूलपरिमाणेभ्य उद्धृत्य मानमुन्मानं अत्यन्तापकृष्टपरिमाणमिति यावत् तस्मादित्यर्थः २२ नन्वात्मनोणु
त्वे जाह्नवीतोयनिमग्नस्य देहव्यापि शैत्योपलब्धिविरोध इत्यत आह अविरोधश्चन्दनवत् २३ यथा चन्दनबिन्दुः शरीरैकदेशस्थः
शरीरव्यापि सुखं जनयति तथा जीवोपि देहव्यापि शैत्याद्युपलम्भं करिष्यतीत्यविरोध इत्यर्थः २३ अवस्थितिवैशेष्यादिति चे
न्नाभ्युपगमाद्धृदि हि २४ ननु नात्र चन्दनदृष्टान्तः अवस्थितिवैशेष्यात् लक्षणेन चन्दनविन्दोरेकदेशे अवस्थितिर्ज्ञायते जीवस्य तु
नैवमित्यतुल्यत्वादित्यर्थः तथा च व्यापि शैत्याद्युपलम्भरूपकार्येण महत्त्वकल्पनं युक्तमिति शंकाभिप्रायः निराकरोति नेति कुतः अ

भ्युपगमाज्जीवाणुत्वस्य कथमभ्युपगम्यते तत्राह हृदिहीति हि यतोल्पपरिमाणो हृदि जीवः यश्चैतेषोयं विज्ञानमयः प्राणेषु हृद्यं
तर्ज्योतिः पुरुष इत्यादेः तस्माज्जीवस्याणुत्वं श्रुत्याभ्युपगम्यत इत्यर्थः अतो न दृष्टान्तवैषम्यमिति भावः २४ गुणाद्वालोकवत् २५
आत्मनोणुत्वेपि तन्निष्ठज्ञानस्य गुणस्य व्यापकत्वांगीकारात् व्यापकगुणाद्वा व्यापिकार्यं भविष्यति लोकवत् व्यापिप्रभागुणा
कप्रदीपादिवत् गृहनिष्ठदीपस्याल्पत्वेपि प्रभात्मकगुणवशाद्यथा गृहव्यापिप्रकाशादिकार्यं जायते तद्वदित्यर्थः २५ ननु ज्ञान
ब्र सू स्य व्यापकत्वेपि जीवव्यतिरेकेणावस्थानं वक्तव्यं तत्र न युक्तं गुणिनमतिरिच्य देशे गुणस्यावस्थानादर्शनात् न च दीपप्रभान्यायः प्र
भाया दीपपतंयुक्तत्वान्नरत्नादिस्तत आह व्यतिरेको गंधवत् २६ यथा गुणस्यापि गंधस्य गुणिव्यतिरेकेणाहत्तिः पुष्पवाटिकातो
३ दूरतः स्थितस्य पुंसो गंधोपलंभदर्शनात् तद्वज्ज्ञानव्यतिरेको ज्ञानस्येत्यर्थः २६ तथा च दर्शयति २७ अणुत्वात्मनश्चैतन्यगुणेन ए
वदेहव्याप्तिरित्यत्र श्रुतिमाह सूत्रकारः तथा चेति हृदयायतनत्वमणुपरिमाणं चात्मनोभिधाय आलोमभ्य आनखेभ्य इति ले
चैतन्यगुणेन सर्वदेहव्यापित्वं दर्शयतीति सूत्रार्थः २७ तेनैव श्रुत्यंतरार्थसूत्रं पृथगिति पृथगुपदेशात् २८ प्रज्ञया शरीरं सम
रुह्येत्यात्मप्रज्ञानयोः कर्तृकरणभावेन पृथगुपदेशाद्यपि गुणद्वारा स जीवस्य शरीरव्याप्तिर्गम्यते तदेषां प्राणानां विज्ञानेन वि
ज्ञानमादायेति च कर्तुः शरीरात्पृथग्विज्ञानस्योपदेशः एतमेवाभिप्रायमुपोद्बलयति विज्ञानमिन्द्रियाणां ज्ञानशक्तिं विज्ञाने
ज्ञानं न चैतन्यगुणेनादायेत्येत इत्यर्थः २८ तथा च व्यापको जीवस्त्वणुरिति महत्त्वश्रुतीनां बाध इति प्राप्ते जीवेणुत्वस्यौपाधिकत्वा
न्न वास्तवापरिच्छिन्नत्वश्रुतिबाध इति सिद्धान्तयति तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् २९ तुशब्दः कृतपूर्वपक्षनिरास
वाचकः अणुर्जीवः किं ब्रह्मणस्तत्त्वान्तरमुत विकारोहोस्विद्ब्रह्माभिन्नः नाद्यः एकविज्ञानात्सर्वज्ञानप्रतिज्ञाबाधात् न

स॰ द्वि॰ ७८

द्वितीयश्रुतं तस्मात्सर्वश्रुत्यनुसारीति तृतीयः पक्षः परिशिष्यते तेन यावत्प्रलयोऽनवधिकमहत्त्वावगमाज्जीवोऽप्यनवधिकमहत्वात् स वा ए
ष महानज आत्मा योऽयं विज्ञानमयः इति विज्ञानमयस्य जीवस्य श्रुतो महत्त्वावगमात् एषोऽणुरात्मा चेतसा वेदितव्य इत्येतन्न मनोविषयं
वेदितव्यत्वश्रवणात् किं तु चक्षुराद्यगोचरत्वेन दुर्विज्ञेयत्वपरं बालाग्रशतभागस्येति वाक्यं तु जीवस्यौपाधिकमणुत्वमनूद्य तच्चा
नंत्याय कल्पते इति वाक्यशेषेणानंत्यसमपरिच्छिन्नत्वं बोधयति किं चात्मनोऽणुत्वे देहव्याप्युपलंभो न स्यात् न च चंदनबिंदुदृष्टांतेन त
स्य तावयववत्त्वेनावयवद्वारा देहव्यापित्वसंभवात् नापि व्यापिज्ञानाद्व्यापिकार्यसंभवः गुणिव्यतिरेकेण गुणस्यावस्थानायोगेन
व्यापिज्ञानस्यासंभवात् न च गंधव्याप्येन गुणस्य ज्ञानस्य गुणिव्यतिरेकसंभवः गंधस्यापि गुणत्वेन साश्रयस्यैव गमनांगीकारात् अ
न्यथा गुणत्वव्याहतेः गंधस्य द्रव्यत्वेन न तद्दृष्टांतो भवेत् प्रज्ञया शरीरं समारुह्येत्यत्र तदपि प्रज्ञया बुद्ध्यांतःकरणेनेति व्याख्येयं कथं
तर्हि जीवाणुत्वव्यपदेशस्तद्गुणसारत्वादिति भ्रमः तस्या बुद्धेर्गुणा अणुत्वोत्क्रांतिगत्यागतीसुखादयस्ते गुणाः सारः प्रधानं यस्य जीव
स्य संसारावस्थायां तद्भावस्तत्त्वं तस्मात्तद्व्यपदेशः अणुत्वादिव्यपदेशो न स्वाभाविकः प्राज्ञवत् प्राज्ञस्य परमात्मनः सगुणोपासनेषु दह
रोऽस्मिन्नंतर आकाशः अणीयान् व्रीहेर्यवाद्वेत्यादिषूपाधिवशाद्यथाणुत्वादिकव्यपदेशस्तद्वदित्यर्थः २९ नन्वात्मनोऽणुत्वादेः संसार
स्य बुद्ध्युपाधिकत्वे कदाचिदात्मनो बुद्ध्या वियोगेन संसारो न स्यादित्यत आह यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ३० बुद्धिसंयोगस्य
यावत्संसारं यावदात्मभावित्वान्न पूर्वोक्तो दोषः संयोगस्य यावदात्मभावित्वं कुत इत्यत आह तद्दर्शनादिति देहवियोगेऽपि बुद्धिसंयोगस्य श्रु
तौ दर्शनाद्यावदात्मभावित्वमित्यर्थः योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेला
यतीवेत्यादिका श्रुतिः विज्ञानमयो बुद्धिप्रधानो जीवो बुद्ध्या समानः सन्निमममुं च लोकमनुसंचरति तदेवाह ध्यायतीवेति बुद्धौ ध्याय

स २

राम ७८

सा स्वप्नं ध्यायतीव चलं सा चलतीव न वस्तुतो ध्यानादिमतीत्यर्थः ममममूलकस्य बुद्धिसंयोगस्य तत्त्वसाक्षात्कारपर्यन्तमवस्थानाद्या
वदात्मभावित्वमित्यपि द्रष्टव्यं ३० ननु सुषुप्तौ प्रलयसंपत्ति कार्यनाशयोरभ्युपगमान्न बुद्धिसंयोगस्य यावदात्मभावित्वमित्यत आह पुं
स्त्वादिवत्त्वस्य सतोभिव्यक्तियोगात् ३१ यथा बाल्ये पुंस्त्वादेः सत एव यौवनेभिव्यक्तिः एवं बुद्धिसंयोगादेः सुषुप्तौ सूक्ष्मात्मना सत एवाभि
व्यक्तिः सम्बाधा यावदात्मभावित्वं न विरुद्धमित्यर्थः ३१ ननु बुद्ध्युपरपर्यायान्तःकरणे किं प्रमाणं यत्संयुक्तः संसारः स्यादित्यत आह नि
त्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमो वान्यथा ३२ इदमन्तःकरणमवश्यमभ्युपगन्तव्यमन्यथा मनसोनभ्युपगमे सर्वेषामिन्द्रि
याणां [illegible]विषयसन्निधानदशायां नित्योपलब्धिप्रसंगः युगपत्सर्वविषयोपलब्धिप्रसंगः मनोव्यतिरिक्तज्ञानसामग्र्याः सत्त्वात् यदि
तस्या अपि सामग्र्याः फलाभाववत्तदा नित्यानुपलब्धिप्रसंगः एकस्याप्युपलब्धिर्न स्यादित्यर्थः अथवा एकस्योपलब्धिमितरेषामनुप
लब्धिमिच्छता ज्ञानसामग्रीमध्ये अन्यतरस्यात्मन इन्द्रियस्य वा नियमः शक्तिप्रतिबन्धो वाङ्गीकर्तव्यः स न संभवति निर्धर्मके आत्मनि श
क्त्यभावात् नापीन्द्रियस्य शक्तिप्रतिबन्धः प्रतिबन्धकाभावात्तस्मात् व्यासंगस्थले इच्छैव नियामकेति वक्तव्यं इच्छा च नात्मनो निर्गुणत्वश्रुत्या
भिन्नत्वस्य श्रुतिपथेभ्यः प्रतिपादनात् कामः संकल्प इत्यादिश्रुत्या मनोधर्मत्वस्य च्छान्दोग्ये अवगतत्वाच्च तस्मात् व्यासंगनियामकेच्छान्य
थानुपपत्त्या श्रुत्या च सिद्धमन्तःकरणं तत्संयुक्तस्यात्मनि संसार इति ३२ तद्गुणसारत्वमेवात्मनः कर्तृत्वसाधनेन प्रपंचयति कर्ता
शास्त्रार्थवत्त्वात् ३३ अत्रात्मनोसंगत्वश्रुतीनां कर्तुरिष्टसाधनबोधकविधिवाक्यैर्विरोधसंदेहे सांख्योक्तबुद्धिकर्तृत्वस्यावर्तनेना
त्मन एव कर्तृत्वमत्र साध्यते तच्च कर्तृत्वमौपाधिकमित्युत्तराधिकरणे वक्ष्यते इति न विरोध इत्यभिप्रायेण सिद्धान्तयति कर्तेति
आत्मैव कर्ता न बुद्धिः कर्तुरपेक्षितोपायबोधकविधिशास्त्रस्यार्थवत्त्वात् आत्मनः कर्तृत्वे विधिशास्त्रमर्थवद्भवति अन्यथा बुद्धेः

सू. ३ ७१

कर्त्ताआत्माफलभोक्तेतिकर्तृत्वेसतिविधिनोपायबोधकंशास्त्रमनर्थकमेवस्यात्तस्मान्नकेवलबुद्धेःकर्त्तृत्वंकिंत्वात्मनइति ३३ वि
हारोपदेशात् ३४ सईयतेमृतोयत्रकाममितिस्वेशरीरेयथाकामंपरिवर्त्ततइतिचजीवप्रकरणेस्वप्नावस्थायांविहारस्यसं
चरणस्योपदेशाज्जीवस्यकर्त्तृत्वमित्यर्थः अकर्तुःसञ्चरणायोगादितिभावः यत्रस्वप्नेभ्रमतःसजीवःकामंविषयानीयतेनग
च्छतीत्यर्थः परिवर्त्ततेविहरति किंचउपादानात् ३५ प्राणानांविज्ञानेनविज्ञानमादायस्यात्मनोग्रहणशास्त्रमुपादानश्रव
णादकर्तुरुपादानायोगादात्मनःकर्त्तृत्वमित्यर्थः प्राणानामिन्द्रियाणांविज्ञानेनमनसातज्जन्यबुद्ध्यावाविज्ञानंग्रहणशक्ति
वैदिके कैपा यां मादायस्वापेहृदयंगच्छतीतियोजना ३६ व्यपदेशाच्चक्रियायांनचेन्निर्देशविपर्ययः विज्ञानंयज्ञंतनुतेकर्माणितनुतेपिचे
तिलौकिकेविज्ञानशब्दवाच्यस्यात्मनःकर्त्तृत्वव्यपदेशाच्चात्मनःकर्त्तृत्वमित्यर्थः यज्ञंसकलंननुविज्ञानशब्दोबुद्धिपरःनजी ना:
वपरस्तत्राह नचेदिति विज्ञानशब्दोजीवपरोनचेत्तर्हिनिर्देशविपर्ययःस्यान्नबुद्धेःकरणत्वेनकर्त्तृत्वव्यपदेशोविज्ञाने
नयज्ञंतनुतइतिनस्यात्किंतुविज्ञानेनेतिस्यादित्यर्थः ३६ ननुस्वतन्त्रस्यात्मनःकर्त्तृत्वेनिष्टंनकुर्यात्किंत्विष्टमेवकुर्यादित्य
तआह उपलब्धिवदनियमः ३७ यथोपलब्धौस्वतन्त्रोप्यात्माइष्टमनिष्टंचोपलभते तद्वदिष्टमनिष्टंचसंपादयिष्यतीत्य
नियमइत्यर्थः अयंभावःआत्मातिरिक्तकरणानापक्षेत्वरूपस्वातंत्र्यतावक्तुंसंभवतीईश्वरस्यापिनतद्भावात् किंतुसकलकार
कसंकलनयाचेष्टेषुकारकेषुनिष्टसाधनस्यपीष्टसाधनत्वभ्रमादनिष्टमपिप्राप्नोतीति ३७ शक्तिविपर्ययात् ३८ इतश्चबु
द्धिव्यतिरिक्तोजीवःकर्तानबुद्धिः अन्यथाबुद्धेःकर्त्तृत्वेकरणशक्तिविपर्ययात्करणश[illegible]हीयेतेतियावत् नचेष्टापत्तिःकरण
सहितस्यैवकर्तृत्वलोकेकार्यकारित्वदर्शनाद्बुद्धेरपिकरणान्तरंकल्पनीयंस्यात् नयाचना[illegible]मात्रविवादोनवस्तुनिकरणस्येति एम
७१

उपाधिश्चात्र स्वप्नजागरितयोः श्रावयित्वा सु
षुप्तौ लीनोपाधिकस्य तस्यात्मनः॥८

रिक्तस्यैव त्वयापि कर्तृत्वाभ्युपगमादिति ३८ इतश्च बुद्धिव्यतिरिक्तो जीवः कर्ता समाध्यभावाच्च ३९ आत्माकारस्फूर्तिर्विधमा
नाप्यसतीव यत्र भवति स समाधिशब्देनोच्यते तस्य समाधेरात्मनाकर्तृत्वेऽभावप्रसंगात्समाध्यन्यथानुपपत्त्यात्मनः क
र्तृत्वमित्यर्थः समाधिग्रहणं च श्रवणमनननिदिध्यासनानामुपलक्षणं ३९ एवं बुद्धिव्यतिरिक्तात्मनः सिद्धं कर्तृत्वं तच्च
न स्वाभाविकं किं तौपाधिकमित्याह यथा च तक्षोभयथा ४० पूर्वसांख्याभिमतबुद्धिकर्तृत्वनिरासेनात्मनः कर्तृत्वमस
र्थितं न त्विति स्वाभाविकमौपाधिकं वेति संदेहे पूर्वोक्तशास्त्रार्थवत्त्वादिभिरेव हेतुभिः स्वाभाविकमित्यस्य संगत्वश्रुतिविधि
शास्त्रयोर्विरोधः इत्यस्याधिकरणस्य पूर्वपक्षः नन्वेतस्य पूर्वपक्षस्येतदधिकरणनिरस्यत्वे पूर्वाधिकरणं व्यर्थमिति चेन्न त
स्य बुद्धिकर्तृत्वनिरासेनेतरधिकरणविषयकर्तृत्वप्रतिपादकत्वान्न व्यर्थतेति तत्रेदमुत्तरं न तावत्कर्तृत्वं स्वाभाविकं श्रुतौ
पाधिकत्वेन कर्तृत्वस्य स्फुटीकृतत्वात् तथाहि आकाशे विपरिपततः श्येनस्येवात्मनः परमानंदेन संपरिष्वक्तस्य श्रमा
भावं श्रावयति तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकांतरमित्यारभ्य एषास्य परमा गतिरेषास्य परमा संपदेषो
स्य परमो लोक एषोस्य परम आनंद इत्यंते नंतरेणाप्तस्व ब्रह्मास्मि जीवस्यात्मकामं कामशब्दः काम्यितव्यपरः सर्वत्र स्वरू
पेण काम्यितव्यमित्यर्थः तत्र हेतुराप्तकाममिति आप्तकामत्वे हेतुरकाममिति यतः परं काम्यं नास्ति तदकामं शोकशो
कसंसर्गशून्यत्वादस्यात्मकामत्वमित्याह शोकांतरमिति शोकादंतरं भिन्नमित्यर्थः शोकं दुःखं तरत्यतिनिवारयतीति वा उक्त
स्य सुषुप्त्यात्मस्वरूपस्य परमपुरुषार्थत्वमाह एषेत्यादिना एतदेवाभिसंधाय भगवान्सूत्रकारो दृष्टांतेनौपाधिकं कर्तृत्वमा
ह यथा च तक्षोभयथेति यथा तक्षा उभयथा वास्यादिकरणान्यपेक्ष्य कर्ता दुःखी भवति अनपेक्ष्य तु स्वरूपेणाकर्ता सुखी

सू०वृ
८०

भवति तथात्मापि बुद्ध्यादीनि करणान्यपेक्ष्य कर्ता संसरति अनपेक्ष्य तु स्वभावतो ऽकर्ता परमात्मा चशब्दस्त्वर्थः स्वाभाविकक
र्तृत्वनिरासं च तेषां शास्त्रार्थवत्त्वादिहेतवश्च कर्तृत्वं विनानुपपन्नास्तत्साधयंति न तु कर्तृत्वस्य स्वाभाविकत्वमपि न हि तेनानुप
पत्तेरभावाद्युक्तं विज्ञानं यज्ञं तनुत इति बुद्ध्यतिरिक्तात्मनः कर्तृत्वव्यपदेश इति तत्र विज्ञानशब्दस्य चिरं ध्यस्त बुद्धौ रूढत्वा
त् स एव वाग्धास्तस्यान्तरान्तरक्रमापद्यत इति श्रुतस्तरपत्तस्य वाग्बुद्धिजन्यत्वाद्वागमात्त्रापि यज्ञसाधनं विज्ञानं बुद्धि
रेव स्वव्यापारेण स्वचित्तेन ध्यानलाभाचामं त्रोत्मापज्ञोजापतेत्तेन चितस्य वा चश्च पूर्वोत्तरभावोपपन्न इति श्रुत्यर्थः तस्मादौ
पाधिकमात्मनः कर्तृत्वमिति सिद्धं ४० परात्तु तच्छ्रुतेः ४१ यस्तु नैरोपाधिकं जीवस्य कर्तृत्वमुक्तं तत्किमीश्वरापेक्षं नवेति सं
देहे जीवस्य करणादिसापेक्षत्वादेव कर्तृत्वसिद्धत्वात्तस्येश्वरायत्तत्वं नेति प्राप्ते एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोके
भ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति श्रुतेरीश्वरापेक्षं कर्तृत्वमिति वाच्यं तथात्वे वि-
धिनिषेधयोरीश्वरस्यैवाभिषिक्तत्वे विधिनिषेधशास्त्रवैयर्थ्यं स्यादिति प्राप्ते तुशब्देन पूर्वपक्षं निरस्य प्रतिजानीते-
परादिति परमेश्वरादेव जीवस्य कर्तृत्वादिसंसारस्य मोक्षस्य च सिद्धिर्भवितुमर्हति कुतः तच्छ्रुतेः कर्तृत्वादेरीश्वरायत्तत्व-
श्रुतेः एष ह्येव साधु कर्म कारयति य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीत्यादिभ्य इत्यर्थः ४१ नन्वीश्वरस्य कारयितृत्वे-
ऽपि धर्ममेव कारयेत् नाधर्मम् अन्यथा केनचित्सुसाधर्मं केनचिदसुसाधर्मं कारयतो वैषम्यनिर्दयत्वे स्यातामिति चेत्तत्राह
कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ४२ तुरुक्तशंकानिरासार्थः जीवेन कृतो यः प्रयत्नो धर्माधर्मलक्ष
णस्तदपेक्ष एवेश्वरो ऽस्मिन्नपि जन्मनि धर्मादिकं कारयति तदपेक्ष्य सुखदुःखादिफलं ददातीति नैव वैषम्यनैर्घृण्ये न प्रसज्येते- राम
८०

अनादित्वात्संसारस्यपूर्वजन्मकृतधर्माद्यपेक्षायुक्तैव नन्वीश्वरस्यकृतप्रयत्नापेक्षत्वंकुतइत्यतआह विहितेति ईश्वरस्य
कर्मसापेक्षत्वेखलुज्योतिष्टोमेनस्वर्गकामोयजेतब्राह्मणोनहन्तव्यइत्याद्योर्विहितप्रतिषिद्धयोरवैयर्थ्यंभवति अन्यथा
विधिनिषेधशास्त्रमनर्थकमेवस्यात् धर्मकृतोदुःखमधर्मकृतश्चसुखंसंपादयेदित्यादिदोषआदिशब्दार्थः तस्मादीश्वरस्य
पूर्वकृताद्यनुसारेणधर्मादिकारयितातदनुसारेणफलदाताचेतिसिद्धं ४२ अंशोनानाव्यपदेशादन्यथाचापिदाशदासकि
तवादित्वमधीयतएके ४३ एवंतावज्जीवःस्वप्रकाशोकर्तात्मेत्युक्तं तस्यसिद्धाभेदयोगपत्त्यातस्माद्ब्रह्माभेदःसाध्यते अन्वय भेद
आत्मनितिष्ठन्नित्यादिभेदश्रुतिजातस्यतत्त्वमसीत्याद्यभेदश्रुतिजातस्यचविरोधसंदेहे समबलत्वादस्तिविरोधइतिमासं
भेदंविनापूर्वोक्तस्यजीवेश्वरयोरुपकार्योपकारकभावस्यस्वामिभृत्यवत्त्वस्यसापेक्षस्यानुपपत्तेः अभेदंविनातत्त्वमसी
त्यादेरनुपपत्तेरस्यनयोःसमबलत्वे नचोभयविधश्रुतिभ्यामंशांशिभावमंगीकारान्नविरोधइतिवाच्यं ईश्वरस्यनिरंश
त्वादित्यस्तिविरोधइतिप्राप्तेः ब्रूमोंशइत्यादि जीवईश्वरस्यांशःवांशोनतुखाभाविकोंशईश्वरस्यनिष्कलमित्यादिनिरंश
त्वश्रुतिविरोधात् अतईश्वरस्यकल्पितांशोजीवः कुतःपुनर्जीवेश्वरयोरंशांशिभावोभेदाभेदश्रुतिभ्यामित्याह नानेत्या
दिनैकइत्यन्तेनसूत्रेण यआत्मनितिष्ठन्नित्यादिनाजीवेश्वरयोर्नानाव्यपदेशात् भेदव्यपदेशादन्यथाचापिअभेदानानात्वस्या
पिव्यपदेशादित्यर्थः तथाह्येकेशाखिनआथर्वणिकाब्रह्मदाशाब्रह्मदासाब्रह्मेमेकितवाइत्यादिनाब्रह्मणोदाशदास
कितवादिभावमामनन्तितस्मादनानात्वस्याभेदस्यव्यपदेशइत्यर्थः दाशाःकैवर्ताःदासाभृत्याःकितवाद्यूतकृतोधूर्ता
स्तस्मात्सत्सत्सिद्धभेदानुवादेनश्रुतीनामभेदपरत्वात्कल्पितभेदज्ञानंशोजीवइति ४३ मंत्रवर्णाच्च ४४ पादोस्यवि

सू॰ वृ॰
९१

भाभूतानीति मंत्रवर्णादपि जीवोंऽश इत्यर्थः भूतास्थावरादयो जीवाः पादोंऽश इत्यर्थः ४४ अपि च स्मर्यते ४५ किंचेश्वरांशत्वं भ
गवद्गीतासु ममैवांशो जीवलोके जीवभूतः सनातन इति स्मर्यते तस्मादीश्वरांशो जीवः ४५ ननु जीवस्येश्वरांशत्वे जीवगतदुःखे
नेश्वरस्य दुःखित्वं स्यात्सांसारिकेण तद्दुःखेनांगिनो देवदत्तस्य दुःखित्वदर्शनादित्यत आह प्रकाशादिवन्नैवं परः ४६ यथा जीवो दुःखी
नैवं परमात्मा दुःखी प्रकाशादिवत् यथा सौरश्चंद्रमसो वा प्रकाशो नभो व्याप्य वर्तमानो वक्रकाष्ठाद्युपाधिकृतवक्रभावमापन्नो
पि न वस्तुतो वक्रभावं प्रतिपद्यते यथा वाकाशो घटादिषु गच्छत्सु गच्छन्निव न वस्तुतो गच्छति तद्वदित्यर्थः बिंबप्रतिबिंबयोरी
श्वरजीवयोर्भेदस्य सत्त्वान्न जीवदुःखेनेश्वरस्य दुःखित्वमुपाधिपरिहितपक्षपातित्वादिति भावः ४६ जीवदुःखेनेश्वरस्य दुःखि
त्वाभावस्मृतिमप्याह स्मरंति च ४७ तत्र यः परमात्मा स नित्यो निर्गुणत्वात् न लिप्यते फलैरपि पद्मपत्रमिवांभसा कर्मा
त्मा त्वपरो योऽसौ मोक्षबंधैः स युज्यते इत्यादिना आभासा एव जीवो दुःखेनादुःखित्वमीश्वरस्य स्मरंतीत्यर्थः तयोरन्यः पि
प्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीत्याद्या श्रुतिः सूचिता ४७ ननु नान्योऽतोऽस्ति द्रष्टेत्यस्याः समस्तमात्मेति प्रभृतिना नेत्र प्रत्य
तीत्यादिना जीवेश्वरभेदमात्रप्रतिषेधात्सर्वभूतेषु चैतन्यस्याखंडैकरसत्वात्कथं मित्रं सेव्यं तथा शत्रुः परिहर्तव्य इत्यादि लौकिका
नुज्ञापरिहारौ स्यातां कथं वा ऋतौ भार्यामुपेयात् गुर्वंगनां नोपगच्छेदित्यादि वैदिकानुज्ञापरिहारौ संगच्छेतामत्रास्य सात्म्यभेदाभा
वादित्यत आह अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत् ४८ उक्तौ लौकिको वैदिको वानुज्ञापरिहारौ सर्वत्रात्मन एकत्वेपि
शरीरसंबंधात्संगच्छेते देहसंबंधस्य लोकात् तद्देहविशिष्टत्वेनात्मभेदादित्यर्थः आत्मभेदाज्ज्योतिरादिवत् यथा ज्योतिषो
वह्नेरेकत्वेपि श्मशानसंबंधी वह्निः परिहार्यो नेतरः यथा वा सौरः प्रकाश एकोप्यमेध्यादिसंयुक्तः परिहार्यो नेतरस्तथात्मा ।

एम
९१

पीत्यर्थः ४८ ननु न यापि सर्वशरीरेषु कर्मकर्तृत्वेन तस्यैकत्वादेकदेवदत्तशरीरावच्छेदेन कर्मकरणे धर्मादिकं यज्ञदत्तशरीरावच्छेदे
ते नापि नोपैसनेन आह असंततेश्चाव्यतिकरः ४९ परिछिन्नांतःकरणोपाधिकस्य कर्तुः परिछिन्नस्य देवदत्तात्मनो यज्ञदत्तशरीरेणा
संततेः असंबंधाद्धर्मादेरव्यतिकरः देवदत्तस्य यज्ञदत्तशरीरावछेदेनापि धर्मादिप्रसंगो नास्तीत्यर्थः ४९ आभास एव च ५० यथा न
त कपटजलप्रतिबिंबितानां सूर्याभासानां मध्ये एकस्मिन् सूर्याभासे कंपमाने सूर्याभासांतरं न कंपते एवमीश्वराभास एव यः जीवः इति
नैकस्मिन्जीवे धर्मादिसंबंधे जीवांतरस्य धर्मादिसंबंध इत्यर्थः किंच येषां सांख्यादीनां बहवो विभवश्चात्मानः सर्वशरीरसंबंधि
नस्तेषामेव धर्मादिसांकर्यं प्राप्नोतीत्याह सांख्यमते नानात्मगताधनप्रधानसन्निधानस्य सर्वात्मनामविशिष्टत्वादेकस्यात्मनः
सुखादिसंबंधे सर्वात्मनां सुखादिसंबंधः स्यात् एवं न्यायमतेपि देवदत्तात्मनः सुखादिहेतुमनःसंयोगस्य सर्वात्मनामविशिष्टत्वात्
फलानियमः स्यादेव ५० ननु दृष्टनियमात्फलनियम इति चेन्न तत्राह अदृष्टानियमात् ५१ सांख्यमते प्रधानसमवेतमदृष्टं तच्च
ण प्रधानस्य सर्वसाधारणत्वाददृष्टस्यापि अनियमात्फलानियमस्तदवस्थः न्यायमतेपि अदृष्टहेतुमनःसंयोगस्य सर्वात्माविशेषादिदम
स्यादृष्टमस्य नेत्यनवक्लृप्तस्यादृष्टनियमस्याभावात्फलानियमस्तदवस्थ इत्यर्थः ५१ ननु अहमिदं फलं प्राप्नवानि नेदं परिहराणि इदं करिष्ये
इदं न करिष्ये इत्येवंरूपाभिसंध्यादयः प्रत्यात्मनियताः संतः स्वप्रयोज्यादृष्टनियमहेतवो भविष्यंतीत्यत आह अभिसंध्यादिष्वपि चैवं
५२ अभिसंध्यादिष्वपि साधारणमनःसंयोगसाध्यत्वाददृष्टवदनियम इत्यर्थः ५२ प्रदेशादिति चेन्नांतर्भावात् ५३ ननु आत्मनो विभु
त्वेपि स्वस्वशरीरावछिन्नस्वात्मप्रदेशाभिसंध्यादिहेतुमनःसंयोग इति भवत्वभिसंध्यादिनियम इति चेन्न सर्वात्मनां सर्वशरी
रेष्वंतर्भावाद्यस्यात्मन इदं शरीरमित्यत्र नियामकाभावाद्यस्यात्मनोस्मिन्छरीरप्रदेश इति प्रदेशकल्पना न संभवतीत्यर्थः तस्मा

सू.वृ.
८२

दस्मासस्त्र एवसकलदोषाभावइतिसिद्धं ५३ इतिश्रीब्रह्मसूत्रवृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः ३ एवं महाभूतजीवश्रुति
विरोधपरिहृत्यलिंगशरीरविषयश्रुतिविरोधंपरिहर्तुंपादांतरंकरिष्यमाणः पूर्वाधिकरणेकर्तृस्वरूपावधारणेनवुद्ध्यादीनांक
तुपकरणानामिंद्रियाणामुत्पत्तिंसाधयति तथाप्राणाः १ अस्मिन्नपिपादेपूर्वपक्षेश्रुतीनांमिथोविरोधेनाप्रामाण्याद्ब्रह्मस
समन्वयासिद्धिःफलंसिद्धांतेतासामविरोधेनप्रामाण्यात्समन्वयसिद्धिरितिबोध्यं तत्रतावदात्मनआकाशःसंभूतइत्यादावुत्प
त्तिप्रकरणेष्विंद्रियाणामुत्पत्तिर्नश्रूयते क्वचिच्चऋषयोवावतेग्रेसदासीत्केतेऋषयइतिप्राणावाऋषयइत्यत्रसृष्टेःप्रा
गिंद्रियाणांसद्भावश्रवणादनुत्पत्तिरितिभाति क्वचित्तु एतस्माज्जायतेप्राणोमनः सर्वेंद्रियाणिचखंवायुर्ज्योतिरापः पृथिवी
त्यादावुत्पत्तिरिंद्रियाणांश्रूयते एवंतासांश्रुतीनांमिथोविरोधोस्तिनवेतिसंदेहे विनिगमकाभावाद्वस्तिविरोधइतिप्राप्तेसृष्टेःपू
र्वमिंद्रियसद्भावश्रवणादुत्पत्तिश्रुतिर्गौणीत्यविरोधइत्येकदेशिनासिद्धांतितंतद्दूषयति तथेति तथाएतस्माज्जायतेप्राण
इत्यादावुक्तत्वादाकाशादिवत्प्राणाइंद्रियाणिजायंते उत्पत्तिश्रुतेरविशेषादित्यर्थः १ यदुक्तंसृष्टेःप्रागिंद्रियसद्भावश्रवणा
दुत्पत्तिश्रुतिर्गौणीतितत्राह गौण्यसंभवात् २ गौण्युत्पत्तिश्रुतेरसंभवाद्गौण्यसंभवस्तस्मादेकदेश्युक्तमयुक्तमित्यर्थः प्रा
णानांनित्यत्वे एकविज्ञानप्रतिज्ञावाधेनेतिभावः सद्भावश्रुतिस्तुहिरण्यगर्भात्मकावांतरप्रकृतिरूपप्राणानांस्वविकारापेक्ष
याप्राक्सद्भावंवोधयति अवांतरप्रलयेहिरण्यगर्भेंद्रियाणांलयाभावादितिबोध्यं २ इंद्रियाणांमुख्यजन्मसत्त्वेहेत्वंतरमा
ह तत्प्राक्श्रुतेश्च ३ तत्प्राक्श्रुतेश्च एतस्माज्जायतेप्राणइत्यादिवाक्येजायतइतिजन्मवाचिपदस्यखवाय्वादिषुमुख्यस्यताद्यपश्चा
त्प्राचीनेषुप्राणेंद्रियादिषुश्रुतेश्चेंद्रियाणांमुख्यंजन्मसर्गः एकस्मिन्वाक्येएकस्यपदस्यक्वचिद्गौणत्वंक्वचिन्मुख्यत्वमि

राम
८२

समासंभवादित्यर्थः ३ उत्पत्तिप्रकरणेष्विंद्रियाणामुत्पत्तिर्नश्रूयतइतियदुक्तं तत्रछांदोग्येउत्पत्तेः श्रुतत्वादित्याह तत्पूर्वक
त्वाद्वाचः ४ ब्रह्मप्रकृतिकानितेजोबन्नानितच्छब्देनोच्यते तथाचप्राणेनमनसाचसहितानांवाचः अन्नमयंहिसोम्यमनः आ
पोमयः प्राणस्तेजोमयीवागित्यनेनतेजोबन्नजन्यत्वाभिधानात्तदुत्पत्तिश्रुतिरित्यर्थः तस्मादुत्पत्तिश्रुतिसद्भावात्सत्वेः प्राक्तन्ना
वश्रुतेश्चान्यविषयत्वादितिश्रुतीनामविरोधइतिसिद्धंब्रह्मविकारत्वमिंद्रियाणामिति ४ एवमिंद्रियाणामुत्पत्तिंप्रसाध्यतेभ्यो
जीवस्यविवेकार्थं तद्गतांश्चतत्संख्यांनिर्णेतुकाम आश्रयाश्रयीभावसंगत्यापूर्वपक्षयति सप्तगतेर्विशेषितत्वाच्च ५ सप्तप्राणाः
प्रभवंतितस्मादितिसप्तेंद्रियाणिश्रूयंतेक्वचिदष्टौग्रहा अष्टावतिग्रहाइत्यत्राष्टौग्रहाः पुरुषपशुबंधकारींद्रियाणिगंधाद्युपा
दानद्वारेंद्रियाकर्षकाविषयाअतिग्रहाइत्यर्थः सप्तवैशीर्षण्याः प्राणाद्वाववांचावित्यत्रनवअर्वाचोपायूपस्थानववैपुरुषेप्रा
णानाभिर्दशमीसत्रदशदशवैपुरुषेप्राणाआत्मैकादशइत्यत्रैकादशआत्मामनः एवंक्वचिन्नद्वादशक्वचित्त्रयोदशेंद्रियाणि
श्रूयंतेतासांश्रुतीनांविरोधसंदेहेविरोधोस्तीतिप्राप्तेएकदेशिमतंसप्तैवेंद्रियाणिकुतः गतेः श्रुतसप्तत्वावगतेरित्यर्थः कि
चसप्तवैशीर्षण्याः प्राणाइंद्रियाणांशीर्षण्यत्वेनविशेषितत्वात्सप्तेंद्रियाणियेशीर्षण्याः सप्तद्वेश्रोत्रेद्वेनेत्रेद्वेनासिकेएका
वागितितेप्राणाइतिसप्तानामेवेंद्रियत्वावगमात् अष्टत्वादिसंख्याश्रवणंत्वेकस्यैवांतःकरणस्यसंशयनिश्चयगर्वस्मरणरूप
वृत्तिभेदेनमनोबुद्धिरहंकारश्चित्तानीतिचतुष्टयवत्सप्तानामेववृत्तिभेदेनोपपद्यतइत्यविरोधः श्रुतीनामितिप्राप्तेदूषयति
हस्तादयस्तुस्थितेतोनैवं ६ तुशब्देनप्राणानांसप्तत्वनिरासः यतोहस्तोवैग्रहइत्यादिनाहस्तादयोप्यतिरिक्ताःप्राणाः श्रूयंतेसप्त
त्वसंख्यायामसंभावितोंतर्भावःसप्तत्वातिरेकेस्थितेसप्तत्वसंख्याइंद्रियनिष्ठैकादशत्वसंख्यायामंतर्भावयितुंशक्यतेन्यूनसंख्या

स.वृ.
८२ या अधिकसंख्यायामंतर्भावसंभवात् अतो नैवं मंतव्यं सप्तैव प्राणा इति सूत्रार्थः यद्यपि ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं मनश्चे
त्येकादशेंद्रियाणि विहाय हृदयाहंकारौ प्राणानां द्वादशत्वत्रयोदशत्वसंख्यापादकौ श्रूयेते तथापि तयोरंतःकरणाभेदत्वा
न्नाधिक्यसंख्यापादकत्वमित्येकादशैवेंद्रियाणीति निरवद्यं सप्तैव शीर्षण्याः प्राणा इत्यत्र न सप्तोद्देशेन प्राणत्वविधानं किंतु
प्राणोद्देशेन सप्तानां भेदमात्रेण चतुर्णामेवेंद्रियाणां सप्तत्वमिति न तद्विरोधः नववै पुरुषे प्राणा नाभिर्दशमीति वाक्यं पुरुषाका
रदेहच्छिद्राभिप्रायं न प्राणाभिप्रायमिति विरोध इति सिद्धं [illegible] ननु इदं सूत्रद्वयव्याख्यानमसंगतं सप्त प्राणाः प्रभवंतीति प्राणप्र
सवचक्षुःश्रोत्रत्वङ्मनोवाचां सप्तत्वावगतेः शीर्षण्यानां विशेषणत्वमिति हेतुद्वयवैयधिकरण्येन सूत्रचकारानुपपत्तेः ये शीर्ष
ण्याः सप्त ते प्राणा नेतरे इत्यत्रापि संख्यापत्तेश्च अतएव इतरो द्वितीयसूत्रव्याख्यानमप्यसंगतमिति चेत्सत्यं सूत्रद्वयव्या
ख्यास्यामः मरणसमये पंचधा सहगमनं तेषामेव भोगसाधनत्वादिंद्रियत्वं तथा च मुख्यं प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीति
प्राणादीनां सप्तानामेवगतेः सहगमनस्य श्रवणात् सप्तैवेंद्रियाणि ननु सर्वशब्दश्रवणात् कथं सप्तानामेवगतिः श्रवणात्तत्राह वि
शेषितत्वाच्चेति स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवत्येकीभवति न पश्यतीति न जिघ्रति न रसयते न वदति न शृ
णोति न मनुते न स्पृशतीत्यादिना श्रुत्या सप्तानामेव प्रकृतानां विशेषितत्वात् सर्वशब्दः प्रकृतगामी सर्वे ब्राह्मणा भोजयि
तव्या इत्यत्र सर्वशब्दो यथा निमंत्रितप्रकृतब्राह्मणपरस्तद्वदिति शंकासूत्रार्थः यत्रोत्क्रांतस्य तस्यायां चक्षुरधिष्ठातृदेवः स एष चा
क्षुषशब्दवाच्यः पुरुषो रूपादिविषयव्याप्तिं विहाय वर्तते तदानीमयमरूपज्ञो भवति हृदये चक्षुरेकीभवतीति पार्श्वस्थाश्च नायं पश्य
तीत्याहुरिति श्रुत्यर्थः सिद्धांतसूत्रार्थस्तु सप्तभ्योऽतिरिक्ता हस्तादयोऽपि वधकत्वेन श्रूयंते हस्तौ वै ग्रहः स हस्तादिना ग्रहत्वं बधकत्वं ह राम
८३

त्वादीनां सहगमनं विना न संभवतीति सर्वे प्राणा अनूत्क्रामंतीति सविशेषेण सर्वेंद्रियाणामुत्क्रांतिश्रवणाच्च भवत्येकादशोत्क्रांति-
मंतः संतः प्राणाः न च सर्वशब्दस्य प्रकृतविशेषितस्य प्राणपरत्वं प्रकरणाच्छ्रुतेर्बलीयस्त्वात्सर्वप्राणग्रहणाभोजपि न व्याइत्यत्र
त्वनन्यगत्या प्रकृतपरत्वं सर्वशब्दश्रुतेरिति शिष्टस्त्वक्षरार्थः पूर्ववदिति तस्मादेकादशैवोत्क्रांतिमंतः प्राणा इति सिद्धं इ-
न्द्रियाणामुत्क्रांतिर्न संभवति तेषामपरिच्छिन्नाहंकारजन्यत्वेन विभुत्वादित्याक्षेपसंगत्या तान्यमतं दूषयति अणवश्च
इमे प्राणा अणवः परिच्छिन्ना इंद्रियाण्यास्यत्वेन सूक्ष्माश्चेत्यर्थः न तु इति परमाणवस्तत्रार्थः तथात्वे अणुत्वात्पक्षे कार्यानां शरीरव्या-
पित्त्वाद्यारिकं न स्यादित्यादिदोषाणां प्रसंगादिति इंद्रियाणां विभुत्वे काशीस्थस्य विश्वेश्वरदर्शनस्पर्शने सततं चान्येषामपि स्यातां उत्क्रा-
तिगत्यागतिश्रुतिविरोधश्चेत्यादिदोषाः द्रष्टव्याः तस्मात्परिच्छिन्नाः सूक्ष्माश्च प्राणा इति सिद्धं ७ इंद्रियाणामुत्पत्त्यादिकमुक्त्वा मु-
ख्यप्राणस्योत्पत्तिं संदेहाद्यधिकरणत्रयमतिदिशति श्रेष्ठश्च ८ इंद्रियस्वरूपप्राणे च ज्ञाते तद्व्यापारं मुख्यप्राणस्य भेदश्चिं-
ताकरिष्यमाणं मुखे करोति मध्यममतिदेशः कृतः न सत्त्वासीदनं तेन तर्हि निराख्या आनूदवातं स्वधया तदेकं
तस्माद्धान्यन्न परः किंचनास इत्यानीदिति शब्देन प्राणसंचारस्य महाप्रलयेऽपि श्रुतत्वात्संचारवतः प्राणस्य स्थितिरिति न प्राणस्योत्पत्तिरि-
त्यभ्यधिकशंकायामयमतिदेशः इंद्रियवच्छ्रेष्ठोपि प्राणो ब्रह्मविकारः तस्मात्न्यायेन प्राणः स्यादुत्पत्तिश्रवणात्सविशेषादित्यर्थः अस-
र्थस्तु तर्हि तस्मिन्महाप्रलये मृत्युर्मारकः नासीत् अमृतं देवभोग्यं च नासीत् तथा रात्र्या अह्नश्च प्रकेतश्चिह्नं भूत् तत्र इदं सवि-
ताश्च नास्तां स्वधया तदेति संबंधः स्वधाशब्देन पितृभ्यो दीयमानमन्नं तर्ह्येवं तर्हि प्राणव्यापारः स्यादित्यत आह आनीदिति तदेवैकं
मूलकारणं परं ब्रह्म अवातं वायुरहितं प्रपंचरहितमानीत् आसीदिति यावत् तस्मादन्यमनोऽन्यत्किंचिदपि नास ह न बभूव किलेति ह

स्.नृ. कारस्यान्वयइति ८ मुख्यप्राणस्योत्पत्तिचिंतानंतरं तत्स्वरूपं निरूपयति नवायुक्रिये पृथगुपदेशात् ९ यः प्राणः स वायुरि
८४ तिमहान्वायुरेवप्राणइतिश्रुतेनयाचमहान्वायुरेवप्राणइत्येकः पूर्वपक्षः ननयं पूर्वपक्षोसंगतः छांदोग्ये मनोब्रह्मेत्युपा
सीतेत्युपक्रम्य मनोरूपब्रह्मणो वाक्प्राणचक्षुःश्रोत्रेभ्यश्चतुष्पात्त्वं वदन्प्राणस्य ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भा
तितपतिचेतिभातिअभिव्यक्तो भवति तपति स्वव्यापारेण घटतीति वायुर्विशेषपाप्राणस्याभिन्नत्वकथनेननिर्धारणाभावात् अ
त्रप्राणस्यप्राणेंद्रियत्वेपि नतस्माज्जायतेप्राणः खंवायुरित्यादौ भेदनिर्देशेन निर्धारणाभावतादवस्थ्यादिति चेन्नहि तिष्ठन्नुश्रुति
द्वयं मिथो विरुद्धं सांख्यमतरीत्या इंद्रियव्यापार एव प्राणस्त्विति प्राप्ते ब्रूमः प्राणो न वायुक्रिये न वायुर्नापींद्रियव्यापार इति सूत्रार्थः
कुतः एतस्माज्जायते प्राण इत्यादौ तत्र तत्र वायोरिंद्रियेभ्यश्च प्राणस्य पृथगुपदेशादिति सूत्रार्थः ननिंद्रियेभ्यः पृथगुपदेशेपीं
द्रियव्यापारात्तन्नास्तीति चेन्न वृत्तिवृत्तिमतोर्भेदात् किंच यः प्राणः स वायुरिति श्रुतिविरोधः कथं परिहरणीय इति चेदुच्यते
न महान्वायुरेव हि प्राणापानादिपंचात्मनावृत्तिश्रमानः प्राण इत्युच्यते तथा च विकाराविकारिणोर्वा तत्त्वाभेदकाल्पनिकभेद
योः सत्त्वान्न भेदाभेदश्रुत्योर्विरोध इति सिद्धं अत्र पूर्वपक्षे वायोरिंद्रियव्यापारस्य वा जीवस्य विवेकः फलं सिद्धांते तदुभयातिरिक्तप्रा
णस्योपास्तिविशेषः ९ ननूभयातिरिक्तस्य मुख्यस्य वागतस्य तत्त्रभावस्य प्राणस्य देहे मुख्यगमे जीववत्प्राणयोरुभयोः स्वातंत्र्यापत्तेरेकवाक्य
ताभावात्सर्वधः शरीरेण भवन प्रसंग इत्यत आह चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः १० तु शब्दः प्राणस्य स्वातंत्र्यस्य निरासार्थः प्रा
णोस्य न जीववत्स्वातंत्र्यं किं तु राजापेक्षया मंत्रिण इव गुणाभावस्यैव स्वातंत्र्यं तस्य प्राणस्य प्रजापेक्षया मंत्रिण इवेंद्रियापेक्षया
तथा च नोक्तदोष इति तात्पर्यार्थः सूत्राक्षरार्थस्तु चक्षुरादिवत्प्राणोपि जीवं प्रतिकरणभूतः कुतस्तत्सहशिष्ट्यादिभ्यः तेश्च स्तु ए राम
८४

देभिः सह प्राणसंवादादिषु प्राणस्य शिष्टेः शासनादिसंबंधः समानजातीयानामेव सह शासनस्य युक्तत्वात् आदिशब्देनोचे
ननत्वभौतिकत्वादिहेतुसंग्रहः ९ ननु प्राणस्य चक्षुरादिवत्करणत्वे न युक्तमसाधारणविषयाभावादित्यत आह अकरण
त्वाच्च न दोषस्तथा हि दर्शयति ११ न चोक्तदोषः प्राणस्याकरणत्वादेव कथं तस्मान्नेप्रतिकरणभाव इन्द्रियांतरेषु संभावित
स्यासाधारणस्य देहधारणस्य तस्य कार्यस्य निर्वाहकत्वादिति भ्रमः न यतो हि श्रुतिरुक्तं कार्यं प्राणस्यासाधारणं दर्शयति प्राणसं
वादे वागादिभ्यो मुख्यप्राणस्य श्रेष्ठत्वं निर्धार्य तान्वागादीन्प्रति वरिष्ठः प्राण उवाच मा मोहमापद्यथ अहमेवैतत्पंचधात्मानं विभज्यैतद्बाणमव
ष्टभ्य विधारयामीति निर्वाणे शरीरं प्राणेन रक्षन्नवरं कुलायमिति श्रुतिरपि देहस्थितिः प्राणनिमित्तेत्याह अवरमनेकाशुचिनी
डं कुलायं देहाख्यं गृहं प्राणस्थितिसारक्षन्न जीवः सुप्तपातीति योजना ११ न केवलं देहधारणमेव साधारणं कार्यं किं त्वन्य
दपीत्याह पंचवृत्तिर्मनोवद्व्यपदिश्यते १२ यथा मनोऽनेकवृत्त्यसाधारणकार्यापेक्षया नैकधा व्यपदिश्यते एवं मुख्यास
निश्वासः सर्वशरीरक्षिपोत्क्वासादयोऽनि चत्वारि कार्याणि पंचमं च कार्यं भक्षितान्नादिरसानां समत्वेन सर्वांगेषु नयनमपेक्ष्य
पंचवृत्तिः प्राणो व्यपदिश्यते क्रमेण प्राणोऽपानो व्यान उदानः समान इति तदसाधारणकार्यापेक्षया जीवोपकरणत्वं मनोव
दिति सिद्धं सर्वं मुख्यप्राणस्यासति स्वरूपं वाक्यशेषमाणविशेषविषयाः प्राणाणुत्वनिर्वाहाः क्वासादिश्रुतेः समः सभिस्त्रि
भिर्लोकैः समोऽनेन सर्वेण प्राण इति श्रुतेः प्राणविभुत्वविषयाः श्रुतयो मिथो विरोधात्तेन वैतिमत्रेह अणुश्चेत्यधिकरणान्या
पातिदेशनसिद्धान्तयति अणुश्च १३ चक्षुरादिवत्प्राणोऽपि परिच्छिन्नः सूक्ष्मश्च सर्वः समः सभिस्त्रिभिर्लोकैरिति श्रुतिश्च
सकलवायुपरिणामात्मकप्राणमात्रपरोऽस्य विरोध इति अंतरंगप्राणस्वरूपकथनानंतरं बहिरंगपरिमाणमतिदिश्यत इति

संगतिर्बोध्या ॥ १३ ॥ ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥ पूर्वमाध्यात्मिकप्राणस्याणुत्वमाधिदैविकवायोः समष्टिभाविति श्रुत्या
व्यापित्वमित्युक्तं तत्प्रसंगेनाध्यात्मिकानां प्राणानामाधिदैविकदेवताधीनचेष्टावत्त्वमस्ति न वेति विचार्यत इति प्रसंगसंगतिः अ
त्र चक्षुषा हि रूपाणि पश्यतीति श्रुत्या चक्षुरादेर्देवतानिरपेक्षचेष्टावत्त्वप्रतीतेः आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदित्यादिश्रुत्या
नुसूर्यादिदेवताधीनचेष्टावत्त्वप्रतीतेरनयोर्मिथो विरोधोऽस्ति न वेति संदेहे अस्ति विरोध इति प्राप्ते एकदेशिसिद्धान्तः देवतानां क
रणाधिष्ठानत्वे तासामेव भोक्तृत्वप्रसक्त्या जीवस्य भोक्तृत्वं न स्यादिति युक्तिसहकृतया चक्षुषा हीति श्रुतेर्बलीयस्त्वादादित्यश्चक्षु
रित्यादिश्रुतेर्गौणार्थत्वेनेति न विरोध इति तद्दूषयति ज्योतिरित्यादिना तदुक्तसिद्धान्तनिरासार्थः अधिष्ठीयतेऽनेनेत्यधिष्ठानम
धिष्ठितत्वमित्यर्थः ज्योतिरादिभिः अग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितमेव वाक्चक्षुरादिकं चेष्टते तदामननात्तस्य देवता
धिष्ठितत्वस्यादित्यश्चक्षुरित्यादिश्रुत्युक्तत्वादित्यर्थः अचेतनानां स्वतश्चेष्टानुपपत्तेरिति युक्तिरपि द्रष्टव्या अक्षिणी प्राविशदित्ये
प्रेरकभावेनेत्यर्थः न देवतानामेव भोक्तृत्वं स्याच्छ्रवणात् योऽपरधिष्ठाता स न तस्याध्यक्षफलभोक्तेति आप्तश्चतारथ्योर्लाभ
चारः न च देवता इन्द्रियसाधर्म्यस्मिन्नु ह वै देवा आप्यगच्छतीसा देहे चक्षुरापितत्वात् न च चक्षुषा हीत्यादिश्रुतिविरोधः तत्र देवतानपेक्ष
त्वस्याश्रवणादिति मिंद्रदेवाधिष्ठेयत्वं प्राणानामिति किंच श्रुत्यन्तरेऽपि प्राणादेर्देवतयोरधिष्ठात्रधिष्ठेयभावं दर्शयति स देवतानाम
वमथ मामसवहत्सापराम्नस्युमती समुच्यन्तेऽग्निर्भूत्वेत्यादिना वागादीनामग्न्यादिभावापत्तिकथनात् अग्न्यादिभिर्वाक्तत्र
धिष्ठातृकत्वमेवान्यस्यासंभवात् स प्राणो वाचमेव प्रथमामुद्गीथकर्मणि प्रवर्तनामसवहत्स्म समतीत्स निराकृत्य प्रापयत् इंद्रि
याणां प्राणाधीनस्थितिकत्वात्प्राणस्य वागादिस्थितिसंपादनद्वारा तत्स्वसुनिराकर्तृत्वं बोध्यं किं प्रापयदित्याह स यदेति सा

फलभोगिनः इंद्रियाधिष्ठातृत्वात् जीवस्य इति वाच्यं न रक्षतपा१ फलभोग्यत्वे द्रव्यसाध्यत्व ५

त्यागं कर्प्राणो वा [illegible] स्थिति सापक्षाभि
देवतया सा कर्त्रधिष्ठानदृष्टेय
भ्रातं प्रापयदि। १

वाक्प्राणेन यद्यमुक्तमस्तुरभवत्तदालक्ष्यास्यतिकात्तनीस्वयमग्निरभवत्तदेवताकाभवदिति श्रुत्यर्थः १४ यदुक्तं देवतानामे
वभोक्तृत्वप्रसंग इति तत्राह प्राणवता शब्दात् १५ प्राणवता जीवेनैवेंद्रियाणां स्वस्वामिभावः संबंधः इंद्रियसाध्यभोगभागी जी
व एवेति यावत् कुतः शब्दात् अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरित्यादिश्रुतेरित्यर्थः अ
थ देहे प्राणप्रवेशानंतरं यत्र कृष्णतारं छिद्ररूपं तमाकाशमनुविषण्णमनुगतं चक्षुः तत्र स आत्मा चक्षुर्व्याप्य चाक्षुषः तस्य रू
पादिदर्शनाय प्रवृत्तिरूपाय चक्षुः न चैतन्मात्रमिति श्रुत्यर्थः एतत्सूत्रतात्पर्यं च देवतानामेव भोक्तृत्वमित्यादिनोक्तः १५ तस्य
च नित्यत्वात् १६ तस्य जीवस्य स्वकर्मोपार्जितदेहे कर्तृत्वेन भोक्तृत्वेन नित्यत्वाच्च न देवतानां भोक्तृत्वमस्मिञ्छरीर इत्यर्थः तस्मादे
वतानां प्राणाधिष्ठातृत्वेन किंचिद्बाधकमिति सिद्धं १६ ननु तत्त्विंद्रियेषु तदधिष्ठातृदेवतासिद्धौ तान्येव प्राणव्यापारव्यतिरेके
णानस्तीत्याशंक्य समाधत्ते ते इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् १७ एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चेत्यादिश्रुतौ
मुख्यप्राणादिंद्रियाणां तत्त्वांतरत्वं प्रतीयते हंतास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवन्निति श्रुतौ मुख्यप्राणस्य
त्वेंद्रियाणां बोध्यते हंतेदानीमस्यैव मुख्यप्राणस्यैव सर्वे वागादयो वयं रूपमसामेत्याशिषं दत्वा ते वागादयः एतस्यैव प्राणस्य
स्वरूपं बभूवुरित्यर्थः तथा चानयोर्विरोधसंदेहे नियामकाभावादस्ति विरोध इति प्राप्ते एतस्माज्जायते प्राण इति वाक्ये मनः सर्वेंद्रि
येभ्यः पृथक् निर्दिष्टत्वेपींद्रियेभ्यस्तत्त्वांतरत्वं किंत्विंद्रियत्वमेवेति यथा तद्वत्प्राणादिंद्रियाणां पृथक् निर्दिष्टत्वेपि न तत्त्वांतरत्व
मिति नानेन वाक्येन हंतास्येति वाक्यस्य विरोध इत्येकदेशिसमाधानं दूषयति ते इंद्रियाणीति प्राणात्तत्त्वांतराणींद्रियाणीति बहि
रेव प्रतिज्ञा तत्र हेतुः तद्व्यपदेशादिति भेदव्यपदेशादित्यर्थः उक्तहेतुमितरेण सूत्रभागेन विवृणोति न इति श्रेष्ठान्मुख्यप्राणादन्य

स॰ह॰
८६

त्र अन्ये ते प्रकृता वागादयः प्राणा इन्द्रियाणीत्युच्यन्ते न प्राणः एतस्माज्जायते प्राण इत्यादौ व्यपदेशभेददर्शनात् नन्वयं भेद
व्यपदेश इन्द्रियमनसोरपि समान इत्युक्तमिति चेन्न मनःषष्ठानीन्द्रियाणीति स्मृत्या मनस इन्द्रियेभ्यस्तत्वान्तरत्वाभावाभ्युप-
गमात् न च प्रकृतेऽपि हन्तास्येति श्रुत्येन्द्रियाणां प्राणात्तत्वान्तरत्वाभावाभ्युपगमः तत एतस्यैव सर्वे रूपमभवंस्तस्मादेत एतेना-
ख्यायन्ते प्राणा इति वाक्यशेषे इन्द्रियेषु प्राणशब्दस्य लाक्षणिकत्वप्रतिपादकेन प्राणादिन्द्रियाणां तत्वान्तरत्वाभ्युपगमात् न
हीन्द्रियेभ्यो न तत्वान्तरे चक्षुषीन्द्रियशब्दो लाक्षणिको दृष्टस्तस्मात् तत एतस्यैव सर्वे रूपमभवन्नित्यनेन प्राणाधीनचेष्टावत्त्वमिन्द्रि-
याणामुच्यते न तद्व्यापारत्वं १७ किंच भेदश्रुतेः १८ वागादीन्द्रियप्रकरणमुपसंहृत्याथ हेममासन्यं प्राणमूचुरिति भिन्नप्रकर-
णे प्राणस्येन्द्रियेभ्यो भेदेन श्रुतेर्न प्राणव्यापारत्वमिन्द्रियाणामित्यर्थः आस्ये भवमासन्यं प्राणं वागादय ऊचुरित्यर्थः ९ इ-
तश्च प्राणादिन्द्रियाणि न तत्वान्तराणीत्याह वैलक्षण्याच्च १९ सुषुप्तावस्यापि प्राणस्य स्थितिर्नेन्द्रियाणामित्यादिबहुवैलक्ष-
ण्यान्न तत्वान्तराणीत्यर्थः तस्मान्नास्ति हन्तवाक्यस्यापि विरोध इति सिद्धं इदं यथाश्रुतभाष्यानुसारेणोक्तं अन्ये तु वाहिः प्रतिज्ञाकल्प-
नादिदोषप्रसङ्गाद्व्यपदेशभेदस्य संज्ञाभेदरूपस्य तत्वान्तरत्वसाध्यव्यभिचारित्वात्प्रकरणभेदरूपस्य तस्य भेदश्रुतेरित्यनेन
पौनरुक्त्यापातादत्राधिकरणद्वयं कल्पयामासुः तथाहि किमेकादश वागादय एवेन्द्रियाणि उत मुख्यप्राणोऽपीति विशये इन्द्रि-
यमिन्द्रलिङ्गमित्यादिपाणिनिस्मरणात् प्राणस्यापि वागादिवज्जीवभावमापन्नपरमेश्वरलिङ्गत्वादिन्द्रियत्वमिति प्राप्ते सिद्धान्तः
श्रेष्ठान्मुख्यप्राणादन्यत्र ते वागादय एवेन्द्रियाणि कुतः तद्व्यपदेशादिन्द्रियत्वव्यपदेशात् इन्द्रियशब्दस्य तेषु रूढेरिति यावत् स्म-
रणं तु रूढस्यैवेन्द्रियशब्दस्य कथंचिद्व्युत्पत्तिं दर्शयति गच्छतीति गौरितिवदिति नन्विदमयुक्तं प्राणव्यापारातिरेकेणेन्द्रियाणामस- राम ८६

पद्मा

विरोध इति इदं भाष्यं द्‌ब्रह्म प्रयुक्तं जगत्तु वैलादित्यादा
वह्निः प्रतिज्ञा दर्शनादिद्वय॥२

तादृशस्यापि इदमारम्भेते भेदश्रुतेर्वैलक्षण्याच्चेति एतस्मान्न्यायप्रमाणादित्यादिकूपपत्तीसंतमत्रपठितमंप्रकरणभेदादै
लक्षण्याच्च न प्राणा व्यापारत्वमिंद्रियाणामिति नोक्तवाक्यद्वयोर्लक्षणाः प्राणाः श्रेष्ठाद्‌न्य इत्युक्ततः प्रतिज्ञासंभवाच्च अपुनरुक्तशब्दा॰
नामेकस्मिन्वाक्ये एकजन्मव्यपदेशादिति हेतोर्भाष्ये विवक्षितत्वात्तस्मिन्नर्थे मेव सत्यपि वाक्यमुखाहृत्प्राणादिपशब्दयोरपो
नरुक्त्यप्रतिपादनात् प्राणास्तु निर्विषयत्वेनेंद्रियत्वं शास्त्रयोगादिलिंगत्वेन संशयो हारावपि संशयप्रसंगान्निर्बीजमधिक
त रणाद्वयकल्पनमितिदिक् एवं वियदश्रुतेरित्यारम्भ भूताद्युत्पत्तिव्यापारभूतोत्पत्ति विषयश्रुतिविरोधो निरस्तः इदानीमुत्पादक
व्यापारभूतोत्पादनाविषयश्रुतिविरोधो निरस्यते तत्रायं त्रिवृत्करणभूतोत्पादनं पारमेश्वरमेवेति श्रुतिषु निःशंकमवगतं त्रिवृत्क
तं भौतिकोत्पादनेन नु श्रुतिषु विप्रतिपत्तिर्दृश्यते तथाहि सदात्मकाद्ब्रह्मणस्तेजोऽबन्नानां परोक्षत्वेन देवतापदयोग्यानां सृष्टिमु
क्त्वापदिश्यते सेयं देवतैक्षत हंताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रि
वृतमेकैकां करवाणीति सा च ब्रह्मरूपा देवता पूर्वमीक्षणं कृत्वा व्यवहारायोग्यसूक्ष्मभूतान्युत्पाद्य तेन व्यवहारालाभात् व्य
वहारयोग्यभौतिकोत्पादनार्थं पुनरैक्षत ईक्षणप्रकारमाह हंतेत्यादिनाकरवाणीत्यंतेन अनेनेति पदास्तं देव्यवहारापेक्षयामि
ति शेषः तत्र संशयः किं जीवकर्तृकं त्रिवृत्करणभौतिकोत्पादनमुत परदेवताकर्तृकमिति संगतिस्तु पूर्वं नामरूपभेदास्त्प्राणादिव्या
भेदाद्युक्तं तत्प्रसंगेन नामरूपव्याकरणं किंकर्तृकमिति विचार्यत इति प्रसंगलक्षणा वा व्याप्ता तत्र लोकचारेणापरसैन्यं प्रविश्य सं
कलयामीत्यादिना राज्ञः साक्षात्संकलनकर्तृत्वं किंतु चारस्यैवेति यथा तद्वदनेन जीवेनेति विशेषणाज्जीवकर्तृकमेव भौतिकोत्पा
दनमिति भवत्यस्य वाक्यस्याकांक्षा देवनामनामरूपयोर्निर्वहितेति वाक्येन विरोध इति प्राप्ते ब्रूमः संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्व

स.सू.
८१

त उपदेशात् २० नुशब्देन जीवकर्तृत्वनिरासः त्रिवृत्कुर्वतः परमेश्वरस्यैव संज्ञामूर्तिकॢप्तिः नामरूपव्याकरणं कार्यं भवितुमर्हति
कस्मात् सेयं देवतेत्युपक्रम्य व्याकरवाणीति व्याकरणस्य परदेवताकर्तृकत्वोपदेशात् न चानेन जीवेनेति विशेषणाज्जीवकर्तृत्वं क
मेहत्सु शब्दादिना नामरूपव्याकरणसामर्थ्याभावरूपलिंगसहकृतसन्निधेर्बलीयस्त्वेनानेन जीवेनेत्यस्य सन्निहितानुप्रविश्येत्य-
नेन संबन्धात् अनेन जीवेनेत्यस्य गुणभूतस्य व्याकरवाणीत्यनेन प्रधानेनान्वययोग्यतालक्षणलिंगस्योक्तसन्निध्यपेक्षया दु-
र्बलत्वात् तस्मात्सर्वत्रेश्वरकर्तृकमेव नामरूपव्याकरणमित्यविरोध इति सिद्धं २० एवं पदविज्ञानमिवाभूदेस्तासामेव देवता
नां समासः एतेन श्रुतिप्रबंधेन तेजोबन्नानां त्रिवृत्करणमुक्त्वा तासामेव देवतानां बहिस्त्रिवृत्कृतानामध्यात्ममपि त्रिवृत्कर-
णमुक्तं इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवतीति तदिदानीमाचार्यो यथाश्रुतं दर्शयति मांसादि भौमं यथाश-
मि वा ब्दमितरयोश्च २१ अविज्ञातविशेषरूपेणादर्शिभूदिति यस्त्वासां तिसृणां देवतानां समासः समुदाय इति यावदिति श्रुत्यर्थः
इमास्तिस्रस्त्रिवृत्कृता देवताः पुरुषशरीरं प्राप्य त्रिवृत्कार्यत्रयरूपेणैकैका देवतानेन आदिलक्षणा वर्तत इति द्वितीयश्रुत्यर्थः
तत्राहि पृथिव्यात्मा ब्रीहियवादिरूपायाः पुरुषेणाशितायाः कार्यत्रयं शरीरे वर्तते पुरीषं मांसं मनश्चेति एवं पीतानामपां मूत्रलो-
हितं प्राणश्चेति कार्यत्रयं तेजसो ग्न्यादिदीपकस्य घृतादिरूपस्य कार्यत्रयं अस्थि मज्जा वाक् चेति प्राणस्य जलाधीनस्थितिकत्वमा-
त्रेणानलकार्यत्वव्यपदेशः तस्य वायुकार्यत्वप्रसिद्धेः एवं मनसोप्यन्नभक्षणेसाहाय्यमात्रेण तत्कार्यत्वं वाचोपि ज्ञानानुकूलत्वसा-
म्येन तेजःकार्यत्वव्यपदेश इति बोध्यं एवं देहे कार्यत्रयरूपेणावर्तनमेवाध्यात्मिकं त्रिवृत्करणमिति तदिदमाह सूत्रकारः मांसा-
दीनि भूमेरन्नात्मिकायाः कार्यं भौमं मांसादि आदिपदेन पुरीषमनसी गृह्येते एवमितरयोरप्तेजसोः कार्यत्रयं यथाशब्दमवग- राम
८१

घृ

तत्वमितरयोः २१ एवमनेनसूत्रेणत्रिवृत्करणमेतदधिकरणविषयः प्रदर्शितः तत्रेयंशंकाभवतिननुसर्वेषांत्रिवृत्करणेविशेषा
भावादियंपृथिवीइमाआपइदंतेजइत्यसाधारणोव्यवहारः कथंसंगच्छते कथंवाध्यात्मिकव्यवहारः इदंमांसादिपृथिवीका
र्यमिदंरक्तंजलस्येतितत्राह वैशेष्यात्तुतद्वादस्तद्वादः २२ ननूक्तशंकानिरासार्थः सर्वेषांपृथिव्यादीनांत्रिवृत्करणविशेषेऽपिविशेष्यात् पि
स्वभागाधिक्यात्तद्वादः पृथिव्यादिवादः संगच्छत इत्यर्थः अभ्यासोध्यायपरिसमाप्त्यर्थः तस्मात्सिद्धं श्रुतीनामविरुद्धानांब्रह्मणि
समन्वयः २२ इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदगोविंदश्रीचरणशिक्षितश्रीरामकिंकरवर्यकृतौब्रह्मसूत्रवृत्तौ
ब्रह्मामृतवर्षिण्यांद्वितीयस्याध्यायस्यचतुर्थः पादः ४ द्वितीयाध्यायश्चसमाप्तः २ पूर्वस्मिन्पादेजीवोपकरणभूतभौतिकानि
ब्रह्मणोजायंतेइत्युक्तंतदुपजीव्यतदुपहितस्यजीवस्यसंसारप्रकारंवैराग्यार्थंनिरूपयितुंदेहांतरारंभभूतसूक्ष्मसंपरिष्वक्तस्येव
लोकांतरगमनमभिसाह तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तः प्रश्ननिरूपणाभ्यां १ पूर्वस्मिन्नध्यायेब्रह्मणिसमन्वयस्यस्मृति
न्यायश्रुतिविरोधनिरासेनानवसायलक्षणप्रामाण्यनिरासेनातीतोपिविचारोभवतीतिसनयोरध्याययोर्हेतुहेतुमद्भावः संग
तिः अत्रप्रथमपादेजीवस्यपरलोकगमनागमनविचारेणवैराग्यंनिरूप्यतेतस्माज्जुगुप्सेतेतिश्रुतेः द्वितीयपादेत्वंपदार्थतत्
पदार्थयोःपरिशोधनंक्रियतेतृतीयपादेसगुणविद्यासुगुणोपसंहारः चतुर्थपादेनिर्गुणब्रह्मज्ञानस्यबहिरंगानियज्ञाश्रमादी
न्यंतरंगाणिशमादीनिचनिरूप्यंते अत्रश्लोकः ततोपिविरतिस्तत्त्वपदार्थपरिशोधनं गुणोपसंहृतिर्ज्ञानबहिरंगादिसाधन
त मिति १ तथाचतद्विचारात्मकत्वेनतत्तदधिकरणानांतत्तत्संगतिर्बोध्या तत्रजीवोमुख्यप्राणेंद्रियसहकृतोमनसाविद्याध
र्माधर्मपूर्वभ्रमजन्यसंस्कारात्मकपूर्वप्रज्ञासहितः पूर्वदेहंविहायदेहांतरंगच्छतीतिश्रुतिसिद्धं तादृशोजीवः किंदेहांतरा

सू॰ वृ॰ ९८ रंभैकैः पंचीकृतभूतभागैरेतद्देहवन्मुख्यप्राणादीनामाधारभूतैरसंपरिष्वक्तो गच्छत्युत संपरिष्वक्त इति संदेहे मानाभावादसंपरि
ष्वक्तो गच्छतीति पूर्वपक्षः। न चाधारनिराधारप्राणादिगमनासंभवान्नैवराग्यमिति फलं सिद्धांते तु तत्संभवाद्वैराग्यमिति बोध्यं तत्रा
पसिद्धांतः तदंतरप्रतिपत्तौ देहांतरप्रतिपत्तौ तद्बीजभूतैः संपरिष्वक्तो रंहति गच्छति कुतः प्रश्ननिरूपणाभ्यां तथाहि द्युलोक
पर्जन्यपृथिवीपुरुषयोषित्सु पंचस्वग्निदृष्ट्योपासनात्मपंचाग्निविद्याप्रस्तावे प्रवाहणस्य राज्ञः सभां विष्टं श्वेतकेतुं राजा प प्र
मा॰ प्रच्छ वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवंतीति अयमर्थः असिंल्लोके जलमयपयोदधिपयःप्रभृतिद्रव्यकहोमश्रद्धापू
र्वकृतेन हुतेन जलेन यजमानप्राप्येन तद्द्वारा द्युलोकाख्याग्निं गच्छच्छ्रद्धाख्याहुतिलमापन्न यजमानेंद्रियाधिष्ठातृदेवास्तस्मिन्नग्नौ
जुह्वति तेन च हुतेन जलेन सोमाख्यदेहात्मना परिणमते तच्च जलमयो देहः पर्जन्याग्नौ हूयमानः अभिमानिदेवविशेषैर्हुतः सन्वृष्टिर्भवति त नौ
द्वृष्टिं तेन सोमाख्यदेहभावं वृष्टिभावं चापन्नं पृथिव्याख्येऽग्नौ हुतं सद्व्रीहियवाद्यन्नभावमापद्यते तेनान्नरेतोभावमापन्नाः पंचमाहु ता स्त्राग्नौ भाव
निरूपा आपो योषिदग्नौ हुता गर्भात्मना स्थिताः पुरुष इति संज्ञां लभंत इति पुरुषवचस्त्वमपामिति वस्तुगतिः तां वस्तुगतिं जानन् चम्मापन्नाः प्राप्ताः
न्नेव राजा पंचम्यामाहुतौ हुता यथापः पुरुषशब्दवाच्या आपः पुरुषाकारेण परिणमंते तथा किं त्वं वेत्सीति पप्रच्छ राज्ञा पृष्टः श्वेतके पुरुषाग्नौ
तुः पितरं गौतममागत्योवाच एवं महं राज्ञा पृष्टोस्मि तस्योत्तरं न जानामीति स च गौतमः स्वयमप्यज्ञः सन्राजसमीपं गत्वा तां विद्यां हुताः सत्यो
ग्रहीत्सु वाच एवमुक्तस्य राज्ञो गौतमं प्रति निरूपणात् पंचाग्निविद्योपदेशात्तत्र चापपुरुषवचस्त्वप्रकारः स्फुटीकृतः एवं प्रश्ननिरू रेतोभावमा
पणाभ्यामवादिभूतसंपरिष्वक्तो रंहतीति गम्यते १ ननूक्तप्रश्ननिरूपणाभ्यामद्भिः संपरिष्वक्तो गच्छतीति गम्यते तथापि कथम पुवंति
वितरभूतपरिष्वंगसिद्धिस्तत्राह त्र्यात्मकत्वात्तु भूयस्त्वात् २ तु शब्दश्चोद्यनिरासार्थः अपां त्रिवृत्करणश्रुत्या त्र्यात्मकत्वात् देहस्या

एम ९८

यजमानद्वारानिर्गतानांजन्मत्वेसिद्धेऽन्तराभूतद्वयजन्मत्वंतत्सदृशंगच्छतीतिध्वनि यद्वावातपित्तश्लेष्मभिस्त्रिभिःशरीरस्यत्र्यात्मक-
त्वाज्जलमात्रजन्मत्वंनसंभवतिवातपित्तयोर्वायुतेजःकार्यत्वात्तथाचावितामूतचतुष्टयजन्मत्वमपिगंधस्वेदपाकप्राणावका-
शानांयचभूतकार्याणांदर्शनात् नहिश्रुतावप्सत्वंहरणंकथंतत्राह भूयस्त्वादिति यद्यपिदेहेपृथिवीभूयस्त्वमेवतथापितेजआ-
पप्तस्यपांभूयस्त्वंबोध्यं २ प्राणगतेश्च ३ प्राणानांमुख्यप्राणचक्षुरादीनांजीवदृशायांदेहात्मनास्थितभूताश्रितानांगमन-
दर्शनानमुत्क्रामंतंप्राणोनूत्क्रामंतिप्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीतिश्रुत्यामरणकालेप्राणानांगतिश्रवणात्भू-
ताश्रिताएवप्राणागच्छंतीतिवक्तव्यं तथाचभूतैःसंपरिष्वक्तस्यरंहणमितिसूत्रार्थः ३ अग्न्यादिगतिश्रुतेरितिचेन्नभाक्तत्वात् ४ ननु
यत्रास्यपुरुषस्यमृतस्याग्निंवागप्येतिवातंप्राणश्चक्षुरादित्यमित्यादिनावागादीनांप्राणानामग्न्यादिषुदेवेषुगतेःलयस्यश्रव-
णात्तेषांलोकांतरप्रतिगतिर्यथाभूतैःसंपरिष्वंगोऽसिद्धःस्यादिति चेन्न प्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीतिश्रुतिविरो-
धेनयत्रास्येत्यादिश्रुतौओषधीर्लोमानिवनस्पतीन्केशाइतिसहपाठेनभाक्तत्वावगमात्नहिमृतस्यलोमानिकेशाश्चप्रत्यक्षेण
दृश्यमानाओषधिवनस्पतिषुलयंगच्छंतोदृश्यंतेअतस्तत्सहपाठादग्न्यादिषुवागादिलयोऽप्यौपचारिकइत्यर्थः ४ प्रथमेऽश्रवणा-
दितिचेन्नताएवह्युपपत्तेः ननुद्युलोकादिषुपंचाग्निषुपयआहुतित्वेसिद्धेपंचम्यामाहुतावापःपुरुषवचसत्वप्रकारोनिश्चेतुंशक्यते
नत्वेवनास्तिप्रथमेद्युलोकाख्याग्नावपामाहुतित्वस्याश्रवणात्किंतुतस्मिन्नेतस्मिन्नग्नौदेवाःश्रद्धांजुह्वतीतिप्रथमेऽग्नौश्रद्धे-
वाहुतित्वेनश्रूयतइति चेन्नहियतस्ताएवापःश्रद्धाशब्देनोच्यंते कुतउपपत्तेः अपांहिहोमद्रव्यत्वेनाहुतित्वंसंभवतिमनोवृत्ति-
विशेषरूपश्रद्धातुमनसःसकाशात्पृथक्कृत्यहोमायोपादातुंनशक्यतेतदाहुतिजन्यसोमाख्यशरीरादेरबात्मत्वानुपपत्तिश्च

सू.वृ. ८१

तस्माच्छ्रद्धापूर्वकं अस्मिंल्लोके भवन्न हलरचिपपः भ्रमलिङ्गमसहुतस्य द्युलोकाग्नौ आहुतित्वेन पर्यवसानात् अमुं श्रद्धाशब्दोक्ता
भूताणि कस्स्यर्थः अपो ह्यास्मै श्रद्धां संनमंते पुण्यपापकर्मणा इति श्रुता वपां श्रद्धाजनकत्वश्रवणात् तेन संबंधेन चामुं श्रद्धाशब्दस्य
लक्षणा अस्मै पुंस आपो दर्शनमात्रेण स्नानादि पुण्यकर्मसिद्ध्यर्थं श्रद्धां सन्नमंते जनयंतीति श्रुत्यर्थः ५ अश्रुतत्वादिति चेन्न
इष्टादिकारिणां प्रतीतेः ६ ननु भवतु सोमवृष्ट्यादिक्रमेण पंचम्यामाहुतावपां पुरुषवचस्त्वप्रकारः तथाप्यवादिभूतपरिष्वक्तो
जीवो रंहति संपुक्त एव अवरोहे जीवस्यारोहणाकर्तत्वस्याश्रुतत्वादिति चेन्न इष्टादिकारिणां प्रतीतेः अथ य इमे ग्राम इष्टापूर्ते द
त्तमित्युपासते ते धूममभिसंभवंतीत्यादिना गार्हस्थ्ये स्थितानाम् इष्टादिकर्मकारिणां धूमादिमार्गेण चंद्रलोकप्राप्तिमुक्त्वा तेनिष्टा-
दिकारिणां चंद्रलोकस्थानां सोमराजशब्देन निर्दिशति एष सोमो राजेति इहापि पंचाग्निविद्यायां तस्मिन्नेतस्मिन्नग्नौ देवाः श्र-
द्धां जुह्वति तस्या आहुतेः सोमो राजा संभवतीति सोमराजशब्दश्रवणात् एव इष्टादिकारिणः प्रतीयंते अतो भूतसंपरिष्वक्तजीवा-
नां रंहणमित्यर्थः ६ नन्विष्टादिकारिणां भूतसंपरिष्वक्तानां चंद्रलोकप्रतिरोहणं कर्मफलभोगापेक्षं न दसंगतं तेचंद्रं प्राप्यान्नं भ-
वंतीति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेतांस्तत्र भक्षयंतीति श्रुतौ चंद्रलोकं गतानामिष्टादिकारिणाम-
न्नत्वेन भक्षत्वश्रवणात् यथा यज्ञे सोमं राजानं चमसस्थम् ऋत्विज आप्यायस्व पुनः पुनराप्याय्याप्याय्य अपक्षीयस्व पुनः पुनरपक्ष-
य्यापक्षय्य भक्षयंत्येवमेतान्कर्मिणो देवा भक्षयंतीति श्रुत्यर्थः तत्रोत्तरमाह भाक्तं वानात्मवित्त्वात्तथा हि दर्शयति वाशब्दश्चो-
दितदोषनिरासार्थः तेषामिष्टादिकारिणामन्नत्वं भाक्तमेव न मुख्यं अन्यथा स्वर्गकामो यजेतेति श्रुतिबाधप्रसंगात् अतः क-
र्मिणां देवान्प्रति पुत्रभार्यादिवत् भोगोपकरणत्वमात्रेणान्नत्वव्यपदेशः कर्मिणामनात्मवित्त्वाद्देवान्प्रति गुणभावेन भोग्य-

राम ८१

संतथाहिश्रुतिरनात्मविदांदेवभोग्यतांदर्शयति अथयोन्यांदेवतामुपास्तेन्योसावन्योहमस्मीतिनसवेदयथापशुरेवंसदेवाना-
मितिभेददृष्टिमाननात्मवित्तासपशुवद्देवानामुपकरोतीहविर्दानेनेतिदेवभोग्यइतिश्रुतितात्पर्यं यद्वा अनात्मविद्यादित्या-
दिसूत्रभागस्यायमर्थः पंचाग्निविद्याविदनात्मविच्छब्देनोच्यतेतथाच आत्मवित्वपंचाग्निविद्याविदनात्मविच्छब्देनोच्यते तथाच
आत्मवित्वंचाग्निविद्याविल्वनभवतीसनात्मवित्तस्यभावस्तत्वंतस्मादित्यर्थः केवलेष्टादिकारिणांपंचाग्निविद्यानभिज्ञानांदे-
वानुसन्नभावेनभोग्यत्वंपंचाग्निविद्याप्रशंसार्थंगौणमेवश्रुत्यावुक्तमितिभावः नन्वन्नतस्यमुख्यत्वेपिप्रशंसासंभवतीत्यत
आह तथाहीति यथात्वस्यगौणत्वंतथाहिश्रुतिर्दर्शयति ससोमलोकेविभूतिमनुभूयपुनरावर्तते इतितत्सेष्टादिकारिणः
सोमलोकेविभूत्यनुभवोन्नत्वस्यमुख्यत्वेनसंभवति तस्मादन्नत्वस्यगौणत्वात्संसारलोकभोगार्थंभूतसंपरिष्वक्तस्यरंहणमिति
सिद्धं ७ कृतात्ययेनुशयवान्दृष्टस्मृतिभ्यांयथेतमनेवंच ८ पूर्वकर्मसमवेतानामयापरमाहुतौपुरुषात्मनापरिणामश्रवणं
हेतुमाश्रित्यावादिभूतपरिवेष्टितस्यजीवस्यरंहणमुक्तंतद्युक्तं स्वर्गादवरोहतांजीवानांकर्माभावेनतत्समवेतत्वोपायमप्यभावा
दित्याक्षेपसंगतिः पूर्वपक्षेचंद्रलोकभोगानंतरंतस्मादवरोहतांकर्माभावेनतदनुगुणतिर्यगादियोनिप्राप्त्यभावाच्चकर्मफलेषु
वैराग्यमितिफलंसिद्धांतेकर्मणः सत्वाद्वैराग्यमितिविवेकः एवंहिसुगिणामवरोहणंश्रूयते तस्मिन्यावत्संपातमुषित्वाथैत
मेवाध्वानंपुनर्निवर्तन्तइत्यारभ्य रमणीयचरणारमणीयांयोनिमापद्येरन् कपूयचरणाःकपूयांयोनिमितितस्मिंश्चंद्रलोकेया-
वद्भोक्तव्यंकर्मतस्मात्तदनंतरमेतमेववक्ष्यमाणमध्वानमाकाशंवायुंधूमाभ्रादिरूपंप्रतिपुनरागच्छन्तितेचागतारोरमणीयचर-
णाः पुण्यकर्माणोब्राह्मणादिपुण्ययोनिंप्रविशन्तिकपूयचरणाःकुत्सितकर्माणस्तिर्यगादियोनौजायंतेइति तत्रसंशयः कि-

त्रीवाना

कर्मैवतत्ताभो

स॰ वृ॰
१०
ब॰
क्षत्रिययोनिं वा

सर्वैर्निरनुशयाना
मवरोहांगीकारे
आमुष्मिकस्यैव स्या
दिति सूत्रकृत्तु ह
एतदर्थः ।

स्वर्गादवरोहंतः सानुशया उत निरनुशया इत्यनुशयशब्देनामुष्मिकफलप्रापककर्मोक्तिरिति किं कर्मोच्यते तत्र यावत्संपातमुषि
त्वेति सर्वकर्मनाशानंतरमवरोहणश्रवणान्निरनुशया एवावरोहंतीति प्राप्ते ब्रूमः कृतस्य स्वर्गसुखप्रापककर्मणात्ययस्य भोगे
नाशे पुनरनुशयवानारोहति कुतः दृष्टस्मृतिभ्यां तथा हि दृष्टा प्रत्यक्षा श्रुतिः तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां
योनिमापद्येरन् ब्राह्मणयोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं सूकरयो
निं वा चांडालयोनिं वेति तेषां कर्मिणां मध्ये ये केचिदिह कर्मभूमौ पुण्यं कृतवंतस्ते स्वर्गादवरोहंतो रमणीयां ब्राह्मणादियोनिमा
पद्येरन्निति यत्तदभ्याशो ह क्षिप्रं हि अवश्यमेवेत्यर्थः योनिशब्दः स्थानवचनः शरीरं ब्रूते यद्वा लोके जन्मनैव प्रतिप्राणमुच्चावच
मध्यमरूपभोगा दृष्टः स्मृतिरपि वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकु
लरूपायुः श्रुतवित्तवृत्तसुखमेधसो जन्म प्रतिपद्यंत इति सानुशयानामेवावरोहणं दर्शयति वर्णाः वर्णिनः आश्रमा आश्रमि
णः प्रेत्य अस्माल्लोकात्समुत्थाय चंद्रलोकमधिगत्येत्यर्थः ततः शेषेण भुक्तफलादन्येन कर्मणानुशयाख्येन जन्म प्रतिपद्यंत
इति संबंधः श्रुतं ज्ञानं वृत्तमाचारः एतादृशादि विशिष्टा येषां ते तथोक्ता इति यत्तु यावत्संपातमुषित्वेति सकलकर्मनाशानंतरं श्र
वणमिति तन्न यावत्स्वर्गभोक्तृआशेषकर्मपरत्वेन सकलकर्मपरत्वाभावादिति तस्मात्सिद्धं सानुशयानामवरोहणं
ते च कर्मिणः येन मार्गेन चंद्रलोकमारूढास्तेनैव मार्गेणावरोहंत उत मार्गविशेषेणेति प्रश्ने उत्तरमाह यथेतमनेवं चेति ति
धूमाकाशयोरवरोहणमार्गे श्रुतयोरवरोहणमार्गे श्रुतत्वाद्यथेतं यथागतमवरोहंतीति गम्यते पूर्वश्रुतानां रात्र्यादीना
मश्रवणादभ्राद्यधिकश्रवणाच्चानेवं पूर्वमार्गविपरीतमार्गेणावरोहंतीति यथाश्रुतपूर्वमार्गेणेत्यर्थः ॥ चरणादिति चेत् राम

१०

नोपलक्षणार्थेति कार्ष्णाजिनिः ९ ननु रमणीयचरणा रमणीयां योनिमापद्यन्त इति श्रुतिबलात्सानुशयानामवरोहणमिति सेन
रसंगतं तस्यां श्रुतौ चरणशब्देनाचरणवाच्याचारात्मकस्य कर्मणोनुशयाद्भिन्नत्वादिति चेन्नायं दोषो यतः कार्ष्णाजि
निराचार्य इयं चरणश्रुतिरनुशयोपलक्षणार्थेति मन्यते ९ आनर्थक्यमिति चेन्न तदपेक्षत्वात् १० ननु चरणश्रुतिरनुशयो
पलक्षणार्थेत्यसंगतं चरणस्यैव सदाचाररूपाचारात्मकस्य सत्यरमणीययोनिःप्रापकत्वसंभवात् अन्यथा कर्मण एवानुशयात्म
कस्य रमणीययोनिःप्रापकत्वे चरणस्यानर्थक्यं स्यादिति चेन्न इष्टादिकर्मणश्चरणरूपाचारनिर्वर्त्यत्वेन चरणापेक्षत्वात् तत्र
चरणस्यार्थवत्त्वादित्यर्थः १० वस्तुतः कर्मचरणयोर्न भेद इत्याह सुकृतदुष्कृते एवेति तु बादरिः ११ बादरिस्त्वाचार्यः सुकृत
दुष्कृते एव चरणशब्देनाभिधीयेते इति मन्यते लोके इष्टादिकारिणि धर्मं चरत्येष महात्मेति कर्मचरणयोरभेदेन प्रयोगदर्शना
दित्यर्थः तस्मादिष्टादिकारिणां चन्द्रलोकगतानां पुनरवरोहणे अनुशयोस्तीति सिद्धं ११ एवमिष्टादिकारिणां गतौ विचार्यते गत्या
ना भ्योनिष्टकर्माणां निष्टादिकारिणां गत्यागती विचार्येते इष्टादिकारिण एव चंद्रलोकं गच्छन्तो सन्तदा ह्यवपतन्ति अनिष्टादिकारि
णामपि च श्रुतं १२ अत्र पापिनां शुभमार्गेण गमनमपि नास्तीति सिद्धान्तो न्यायो वैराग्यदृढीकरणस्य संगतिः पूर्वपक्षे इ
ष्टानिष्टकारिणामविशेषेण चंद्रलोकगतेरिष्टादिकरणं व्यर्थमिति फलं सिद्धान्ते पापिनां चंद्रलोकगसंभावनादर्थपर्यन्तादि
करणं सार्थकमिति विवेकः अत्र पापिनां चंद्रलोकगतिरस्ति न वेति संदेहे स्तोत्साह अनिष्टेति इष्टादिकारिणामिवानिष्टादि
कारिणामपि चंद्रलोकगमनं संमतं केचिदस्मात् लोकात्प्रयन्ति चंद्रमसमेव ते सर्वे गच्छन्तीति श्रुत्या श्रुतमतो धर्मिण एव चंद्रलोकं
गच्छन्तीति सर्वगतमित्यर्थः १२ ननु धर्मिणामधर्मिणां च चंद्रलोकगमनं पापिनां नरकप्राप्तिबाधकशास्त्रविरुद्धमिति चेन्न

सू. ।३. ९१

पापिनां चंद्रलोकगमनांगीकारेपि तत्र भोगानंगीकारात् किंतु चंद्रलोकगमनमात्रं कृत्वा ततो वरोहतां पापिनां नरके व वानुभ
वइति प्राप्ते ब्रूते संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् तुः पूर्वपक्षनिरासार्थः भोगो यदि चंद्रलोकगमने तत्र
पापिनां भोगासंभवात् तद्गमनं व्यर्थमेव अतश्चंद्रमसमेवैते सर्वे गच्छंतीति श्रुतिरिष्टादिकारिमात्रविषया: सर्वे सुकृतिन ए
व चंद्रलोकं गच्छंति पापिनस्तु यमलोकमारुह्य संयमने यमालये तु पापानुरूपा यामीर्यातनाः अनुभूय पुनरिमं लोकं प्र
त्यवरोहंती एवंभूतावेवैतेषां पापिनामारोहावरोहौ भवतः कुतः तद्गतिदर्शनात् यमलोकगतेः श्रुतौ दर्शनादित्यर्थः न सां
परायः प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढं अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते म इति वैवस्वतं संगम
नं जनानामित्यादिकं पापिनां यमलोकगतौ लिंगं सम्यगवश्यंभावेन परः परस्तादिह पातादूर्ध्वमयनेन गम्यत इति व्युत्पत्त्या सांप
रायः परलोकः तत्साधनभूतकर्मविशेषः सांपरायः स बालमविवेकिनं विशेषतो वित्तनिमित्तेन मोहेन मूढं छन्नदृष्टिं अत ए
व प्रमाद्यंतं प्रमादं विषयासक्तिं कुर्वंतं प्रति न भाति स एवं बालो न केवलमज्ञ एव किंतु विपरीतदर्शी यतो यमेव लोको न्नपाना
दिरस्ति न पर इति मननशीलस्तस्मात्तदनुरूपं पापमाचरन् पुनः पुनर्जन्ममरणप्राप्त्या मम वशमापद्यत इति यमस्योक्तिर्नचिके-
तसं प्रति वचनं जनानां परलोकं गतानां पापिनां संगमनं सम्यग्गम्यं वैवस्वतं यमं राजानं हविषा प्रीणयेत इत्यर्थः १३ स्मरंति च
१४ मन्वादयः शिष्टाः पापिनां नरकभोगं स्मरंति अतश्च धर्मिणामेव चंद्रलोकगमनं नान्येषामित्यर्थः १४ अपि च सप्त १५ अ
पि च सप्त रौरवादयो नरकाः पापफलभूमित्वेन स्मर्यंते पौराणिकैः तान्पापिनः प्राप्नुवंतीति न चंद्रप्राप्तिरिति भावः १५ ननु पा-
पिनो यमसंबंधिनीर्यातना अनुभवंतीति यदुक्तं तदसंगतं रौरवादिषु चित्रगुप्तादीनामधिष्ठातृत्वस्मरणादित्यत आह तत्रापि तत् राम ९१

ध्यापारादविरोधः १६ तत्रापि रोरवादिषु तत्सेवयमस्याधिष्ठातृव्यापाराद्विरोधः चित्रगुप्तादीनां यमप्रयुक्तत्वादिति भावः १६ उपा
सकानामर्चिरादिमार्गः केवलकर्मिणां धूमादिमार्ग इति श्रुतिस्मृत्यादिषु व्यवस्थात यथा चेतन्मार्गद्वयभ्रष्टानां पापिनां तृतीयमा
र्गः केरपि नेतव्यं चेद्भाष्टिरित्याह विद्याकर्मणोरिति तु प्रकृतत्वात् १७ पंचाग्निविद्यायां प्रवाहणो येन राज्ञा श्वेतकेतवे बहुभिः प्र
श्नैर्लोकः कथं न पूर्यते तत्त्वं किं जानासीति श्वेतकेतुः पृष्टः तस्य प्रश्नस्योत्तरं केतुपितरं गौतमं प्रति राज्ञ एवं प्रतिवचनं श्रूय
ते अथैतयोः पथोर्न कतरेण चन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लो
को न संपूर्यत इति अथैतयोरिति पदस्यार्थमाह सूत्रकारः विद्याकर्मणोरिति शेषः कुतः विद्याकर्मणोर्देवयानपितृ
यानात्मकमार्गद्वयसाधनत्वेन प्रकृतत्वात् प्रकृतवाचकत्वमेतच्छब्दस्य युक्तमित्यर्थः एतदुक्तं भवति एतयोर्विद्याकर्मणोः
पथोर्मार्गसाधनयोरन्यतरेणापि मार्गसाधनेनास्पृष्टास्तु मार्गसाधनेन विद्यया कर्मणा वान्विता अस्मिन्नपि नाधिकृताः पापिन
स्तेषां क्षुद्रजन्तुलक्षणाः सकृदावर्तीजन्ममरणबाहुल्ययुक्तस्थानशब्दो मार्गद्वयापक्रमानुरोधात् तृतीयमार्गलक्षणपरित्सूत्रे तु
शब्देन चेत्समस्तं भवतीत्यस्य वैगध्यतीति श्रुतिप्रयुक्तशंकानिरासः कृतः सर्वशब्दस्य पुण्यपुरुषमात्रपरत्वादिति भावः १८ ननु पा
पिनामस्मिन्लोके देहप्राप्त्यर्थं चंद्रलोकगमनमंगीकर्तव्यं पंचम्यामाहुतावापः पुरुषवचसो भवंतीत्याहुतिसंख्यानियमेन देहप्रा
प्त्यभिधानादन्यथाहुतिसंख्यानियमाभावप्रसंग इत्यत आह न तृतीये तथोपलब्धेः १९ तृतीयमार्गप्रविष्टानां पापिनां देहप्राप्त्यर्थं
माहुतिसंख्यानियमो नादर्तव्यः कुतः तथोपलब्धेः संख्यानियमं विनैव जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति श्रुतौ तृतीयमा
र्गे देहप्राप्तेरुपलब्धेरित्यर्थः इष्टादिकारिणामेवायं संख्यानियम इति भावः किंच पंचम्यामाहुतावापः पुरुषवचसो भवंतीति पंचम्या

स्त तीय पंथा
इति न चेद्वा
वि रि ति श्रुतौ
तृतीयस्य श्रेय
स्ये त्वनेन ज
न्म म र ण बा
हुल्य युक्तो

यो २

स॰ह॰ ९२ द्यो ३

हुतावपां पुरुषवचस्त्वं प्रतिपाद्यते ना पंचम्यामाहुतौ पुरुषवचस्त्वं निषिध्यते वाक्यभेदप्रसंगात् न यावदेषं चेंद्रगतास्तेषां संख्यानियम
मः इतरेषां तु विनैव संख्यानियमं भूतान्तरप्रविष्टाभिरद्भिर्देह आरभ्यन्त इत्यनियमः १८ स्मर्यन्तेपि च लोके १९ अपि च लोके भारता
दौ द्रोणधृष्टद्युम्नादीनां सीताद्रौपद्यादीनां चायोनिजत्वं स्मर्यते तत्र द्रोणादीनां योषिद्विषयाहुतिरेका नास्ति धृष्टद्युम्नादीनां योषित्पुरुष
विषये द्वे आहुती न स्तः इत्याहुतिसंख्याया अनियमस्त्वेवमन्यत्रापीति भावः १९ दर्शनाच्च २० किं च लोके जरायुजाण्डजस्वेदजोद्भि
ज्जेषु चतुर्विधेषु देहेषु स्वेदजोद्भिज्जयोः स्त्रीपुंव्यतिषंगं विनैवोत्पत्तिदर्शनान्नाहुतिसंख्यानियम इत्यर्थः जरायुजं मनुष्यादिशरी
रं अंडजं पक्ष्यादिकं स्वेदजं यूकादिकं उद्भिज्जं वृक्षादिकं २० ननु तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्यंडजं जीवजमुद्भिज्जमिति नि ६
श्रुतौ शरीरत्रैविध्यं श्रूयते अतः कथं चातुर्विध्यमत आह तृतीयशब्दावरोधः संशोकजस्य २१ श्रुतावंडजं जीवजमुद्भिज्जमि
त्यत्र तृतीयेनोद्भिज्जशब्देनावरोधः संग्रहः संशोकजस्य स्वेदजस्य यूकादेः हि यतः पृथिवीमुद्भिद्य जायते स्वेदजं तु जलमुद्भिद्येत्युभयोरव
यवार्थत्वाविशेषादुद्भिज्जपदेन संग्रहः श्रुतौ कृतः न तेन तावता चातुर्विध्यहानिर्भवति स्थावरजंगमात्मकत्वेनोभयोर्भेदस्तु दुरपन्ह
वत्वात् इति भावः तस्मादनिष्टादिकारिणां न चंद्रलोकप्राप्तिः किंतु इष्टादिकारिणामेवेति सिद्धं २१ तत्स्वाभाव्यापत्तिरुपपत्तेः २२ पू
र्वमिष्टादिकारिणश्चंद्रं गताः कर्मफलभोगानन्तरमनुशयवन्तः अवरोहन्तीत्युक्तं अत्र तेषामवरोहप्रकारश्चिंत्यते तत्रावरोहश्रुतिः अथै द्य
तमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भू द्द
त्वा प्रवर्षतीति अथ भोक्तृकर्मसमाप्त्यनन्तरमध्वानमेवाह यथेतमिति यथागतमित्यर्थः इदमुपलक्षणं अनेनैव मिस्यपि इष्टं याः
खल्वापश्चंद्रलोके देहमारब्धवत्यस्ताः कर्मक्षये द्रुता आकाशं गतास्तत्समा परा भवंतीति तदा तदुपहिता अनुशयिनो जीवा अप्याका ४ राम

भ २

१ शासमा भवंती ९२
त्यादि... का शमिति १

एवं चाम्नाराववपि भोजनीयं वायुर्भूत्वा धूमो भूत्वा एवमग्रेपीति सिद्धार्थः पूर्वाधिकरणेनोपसमपर्यवसिते तत्रीयस्थानमिसत्रस्थानशब्द
स्यमार्गद्वयोपक्रमसामर्थ्यात् तृतीयमार्गस्य लक्षकत्वमुक्तं तथुक्तं इमोह्यत्रावरोहणविधुपक्रम्यापत्ने जीवपरस्मादौ तत्रीयस्योपक्रमसजातीय
स्यैव दर्शनात् इह तु भवति श्रुतेर्मुख्यार्थपरित्यागे मानाभाव इति प्रत्युदाहरणसंगतिः पूर्वपक्षे भवति श्रुतेर्मुख्यत्वसिद्धिः फलं सिद्धान्ते गौणत्व
सिद्धिरिति विवेकः तत्र संशयः किं स्वर्गादवरोहन्तो जीवा आकाशादिस्वरूपं प्रतिपद्यन्ते उत तत्साम्यमिति तत्र भवति श्रुतेर्मुख्यत्वानुरोधा
दाकाशादिस्वरूपापत्तिरेव जीवानामिति तत्र भवति श्रुतेर्मुख्यत्वानुरोधादाकाशादिस्वरूपापत्तिरेव जीवानामिति प्राप्ते ब्रूमः जीवानामेत
शृ७ कैरादिभिः साभाव्यापत्तिः साम्यापत्तिरेव कुतः उपपत्तेः लोके क्षीरस्य दधिभावो युक्तः क्षीरकाले दध्यभावात् इह तु पूर्वं विद्यमानाकाशादिभा
वो जीवस्य दुरुपपादः किंच जीवस्याकाशस्वरूपापत्तौ वाय्वादिक्रमेणावरोहाभावप्रसंगः इत्यादियुक्तिवशाद् भवति गौणत्वमंगीकर्तव्य प्रतेः
मित्याकाशादिसंबंधमात्रमेव जीवानां संबंधश्च सादृश्यातिरिक्तो न भवतीति सादृश्यमेवेति सिद्धं २२ एवमाकाशादिषु वर्षान्तेषु पूर्वपूर्व
सादृश्यानंतरमुत्तरेणोत्तरसादृश्यमित्युक्तं तदुपजीव्य विचार्यते किं जीवश्चिरकालमेकैकसादृश्येनावस्थाय अपरसादृश्यं गच्छति उताल्पका
लमिति विशेषनियामकशास्त्राभावादनियम इति प्राप्ते सिद्धान्तयति नातिचिरेण विशेषात् २३ जीवो नातिचिरेणाल्पमल्पं कालमे
वाकाशादिवर्षान्तैः सादृश्येनावस्थाय वर्षधाराद्वारा पृथिवीं प्रविशति कुतः विशेषात् पृथिव्यनन्तरं व्रीह्यादिप्रवेशमुक्त्वा व्रीह्यादिभ्यो जी
वस्य निःसरणसमये व्रीह्यादिषु चिरकालावस्थानरूपविशेषं दर्शयित्वा निःसरणं दर्शयति श्रुतिः अतो वै खलु दुर्निष्प्रपतरमिति ए
कत्वकारो लुप्तश्छांदसः प्रक्रियया अतोस्माद् व्रीह्यादिभावात् दुर्निष्प्रपतरं दुःखतरं जीवानां निःसरणं भवतीत्यर्थः व्रीह्यादिभ्यो जीवस्य
दुःखं निःसरणं भवतीत्युक्ते आकाशादिभ्यः सुखं निःसरणं जातमिति प्रतीयते यथा लोके कश्चित् खंडितोनेकराजसभासंचारं चरित्वा क

त

म्रं

स॰ सू॰ ९३ स्योचितागमनसभायोंदेहलिकाप्रतिशामविंद्नेसुके इत एसुतसभासां देहलिकानलध्यवानिति भनीषेतेन हतव्रीह्याकाशादिषु सुखदुःखे
जीवस्य दीर्घकालावस्थानात् अल्पकालावस्थाने भवतः न घनीस्थूलशरीराभावेन सुखस्य दुःखयोरसंभवात् तस्माद्व्रीह्यादिषु प्रवेशा
त्पूर्वमल्पमल्पमेव कालं तत्तत्सादृश्येनावस्थानमिति सिद्धं २३ अन्याधिष्ठितेषु पूर्ववदभिलापात् २४ तस्मिन्नेवावरोहे जीवानां वर्षधारा
द्वारेण पृथिवीप्रवेशानन्तरं पठ्यते तरह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्त इति ते अनुशयिनो जीवा इत्यर्थः तत्र संशयः
तद्भूत किं जीवानां व्रीह्यादिभावेन जन्म श्रुतिमुख्या उत अन्यजीवाधिष्ठितेषु व्रीह्यादिषु तेषां संसर्गमात्रमिति तत्र पूर्वं दुर्निःप्रपतरं शब्दस्य पूर्वोक्तप्र
तिवलाच्चिरकालावस्थानलक्षणेऽपि प्रहते क्षीरस्य दधिभावेन वारिभूतसंपरिष्वक्तजीवानाम् वा देहाद्वारा व्रीह्यादिभावेन मुख्य
मेव जन्म न संभवाद्व्रीह्यादिस्थावरशरीरेषु सुखदुःखभाजो नुशयिनो जीवा इति प्रत्युदाहरणे न पूर्वपक्षे सिद्धान्तः अन्यैर्जीवैरधिष्ठि
तेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनां भवति पूर्ववत् यथा ... परामर्शमन्तरेण व प्रवेश उक्तः एवं व्रीह्यादिष्वपि कर्मपरामर्शं विनैव प्र
वेशाभिलापादित्यर्थः पूर्ववदिति परं सूत्रे अयं हृपाभिप्रायेण प्रयुक्तमिति पुनरुपाद्यव्याख्यातं तस्मात् कर्मपरामर्शाभावान्न व्री
ह्यादिष्वनुशयिनां सुखदुःखभाक्त्वम् यत्र त्वनुशयिनां सुखदुःखभाक्त्वं तत्र कर्मपरामर्शो रमणीयचरणा इत्यादिना दृश्यते इति जायन्त इ
ति श्रुतिः संसर्गमात्राभिप्रायान मुख्येति बोध्यं २४ अशुद्धमिति चेन्न शब्दात् २५ ननु ज्योतिष्टोमादिकं कर्म पशुहिंसायोगादशुद्धं तत्का
रणमनुशयिनां व्रीह्यादिषु स्थावरेषु दुःखानुभवार्थं मुख्यमेव जन्मास्त्विति चेन्न ज्योतिष्टोमादेः शास्त्रविहितत्वेन धर्मत्वेनावगत
त्वान्न दुःखहेतुत्वमित्यर्थः २५ किंच रेतःसिग्योगोऽथ २६ अथ व्रीह्यादिभावानन्तरमनुशयिनो रेतःसिंचतीति रेतःसिक्तयोगस्तद्भा
वः श्रूयते न तयोरेतःसिंचति तद्रूपस्यैव भवतीति अनुशयी व्रीह्याद्यन्नद्वारा पुरुषं प्रविष्टस्तद्रूपो भवति तद्भावं गच्छतीत्यर्थः नत्व

आकाशादौ संसर्गमात्रं केतः पूर्ववदभिलापात् तथाकाशादौ भवदौ ते भु॰

राम ९३

म्रा ३

अनुशयिनो योनौ रेतःसिग्भावो मुख्यः संभवति इदानीं पुरुषप्रविष्टेनानामासंयोगेनत्वात् अतस्तद्भाववत्त्वं संसर्गो वक्तव्यः तथा च व्रीह्यादि
ष्वपि संसर्ग एव आकाशादिष्वपि संसर्गस्यैवावगतत्वेन संदंशन्यायादिति भावः २६ ननु अनुशयिनां सर्वत्र संसर्गस्यैवांगीकारे मुख्यज
न्मकापि न स्यात् तथा च रमणीयां योनिमापद्येरन्नित्यादि श्रुतेर्गौणत्वप्रसंगः स्यात् अत आह योनेः शरीरं २७ योनौ रेतःसिक्प्रविष्टेन ततः श
रीरमनुशयिनामनुशयात्मककर्मभोगाय जायते इत्याह शास्त्रं तद्य इह रमणीयचरणा इत्यादि तस्माद्ब्राह्मणादियोनावेवानुशयिना
मुख्यं जन्म न व्रीह्यादिष्विति गत्यागतिविवेककृतं वैराग्यं ज्ञानसाधनमिति सिद्धम् २७ इति श्रीब्रह्मसूत्रवृत्तौ तृतीयस्याध्यायस्य प्र
थमः पादः १ एवं गत्यागतिनिरूपणेन कर्मफलेभ्यो विरक्तस्य महावाक्यार्थज्ञानाय तत्त्वंपदार्थौ शोधयितुं पादमारभमाणो गत्या
गतिनिरूपणेनैव जाग्रदवस्थानिरूपितत्वमभिसंधायात्मनः स्वयंप्रकाशत्वसिद्ध्यै स्वप्नावस्थां वक्तुं पूर्वपक्षयति सन्ध्ये सृष्टिराह हि १ ध्ये
तथा चानयोः पादयोर्हेतुहेतुमद्भावः संगतिः सिद्धा विरक्तस्य पारम्पर्यप्रवृत्तेः तत्त्वंपदार्थयोर्मध्ये त्वंपदार्थस्योद्देश्यत्वात्तस्यावस्थात्रयोपी
त्वतः प्राकृतस्यावस्थानिर्मुक्तत्वं प्रतिपाद्यते तत्रापादसमाप्ति संदिग्धार्थो विचार्यते तत्र स्वप्नावस्थायां जाग्रदादितया त्वंपदार्थस्य निष्कृष्टत्वसि
द्धौ स्पष्टसाधनत्वमेतदेव स्वप्नेहलममधिकृत्य संशय्यते ननु त्रयाणामुपयोगान्न पञ्चयानो भवेत्स्व परयोरुपयोगात् स्वप्नः सृजत इत्यादि त
त्र संशयः किं सा मनसः स्थित्या यथार्था किंचिद्यथादिवत् उत भुक्तिरजतवन्मायामात्रमिति पूर्वपक्षे घटादिवत्सत्यस्वप्नावस्थानां जीवसृष्टपु
रुषार्थोपयोगात् भ्रान्तिभेदरूपशक्यार्थानुपपत्तिसिद्धिः फलं सिद्धान्ते तत्सिद्धिरिति भेदः तत्र पूर्वपक्षसूत्रं सन्ध्यमिति संध्यं जाग्रत्सुषुप्त्योः सं
धौ भवं स्वप्नस्थ सृष्टिर्यथार्था किं च शास्त्रं हि श्रुतिरेवमाह अथेति १ निर्मातारं चैके पुत्रादयश्च २ किं चैके शाखिनोऽस्मिन्नेव स्वप्ने कामाना
निर्मातारं तं प्राज्ञं जीवमिव परमात्मानमामनन्ति य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण इति एषु च सुप्तादि कर्तृत्वो सुप्तेषु नि
स्पष्टसाधनत्वाच्चायं विचारः जाग्रदवस्थायां सूर्यादिप्रकाशसत्त्वेनात्मनः स्वप्रकाशत्वं दुर्ग्रहं स्व
प्ने तु सूर्याद्यभावेपि प्रत्यक्षतया दृश्यमानात्सुग्रहमिति स्वप्नस्य स्वयंज्योतिष्ट्वसिद्ध्यै +५

वा॰सू॰ ऽपरोऽपि सर्थः ननु श्रुतौ कामानां बुद्धिवृत्तिविशेषाणां निर्माता परमात्मेति श्रूयते नार्थनिर्मातेत्यत आह पुत्रादय इति काम्यंत
९४ इति व्युत्पत्त्या पुत्रादय एव कामा इत्यर्थनिर्मातृत्वं परमात्मन इत्यर्थः तथा च स्वप्नसृष्टिः सत्या ईश्वरकर्तृकत्वात् क्षित्यादिवत् ॥
नु इत्यनेन सूत्रेणोक्तं तस्माच्छ्रुतिसमानाम्नायात्स्वप्नसृष्टिः सत्येति प्राप्ते प्रत्याह मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ३ नुः पूर्व
पक्षनिरासार्थः स्वप्नसृष्टिर्मायामात्रं भुक्तिरजतवत् कुतः कार्त्स्न्येन अविनदेशकालादिसंपत्त्याबाधाभावेन चानभिव्यक्तस्वरूपत्वा न
न्नीहारपादीनामुचितो देशः स्वप्नसंभवति देहान्तर्नाडीप्रविष्टमनोवच्छिन्नसाक्षिनिष्ठत्वात् नाप्युचितः कालो निशीथे काममात्र
निनि स्वप्ने वृत्तसंवत्सरसाध्यसंभरणस्य दर्शनात्तस्मात्प्रातिभासिकः स्वप्नप्रपंचः प्रत्युक्तं अपरस्यानवयोगान्मध्यः सृजतेऽ
नीश्वरकर्तृकत्वात्स्वप्नसृष्टिश्रुतिर्गौणीति सृष्टेः सत्यत्वमिति तच्छ्रुत्यैव न तत्र रथा न रथयोगा न पंथानो भवन्तीत्यादिकया तत्त्वं रथाद्यभावः न
चि बोधिकया परिहृतं अनुमाने चोचितदेशादिजन्यत्वमुपाधिः हेतुसिद्धिश्च श्रुतं नेत्यसिद्धिकृत्तेति स्वप्नं निहसत्वं निर्मायत्वेन भा
सत्वेन ज्योतिषा प्रस्वपितीति च स्वप्नसृष्टेर्जीवकर्तृत्वश्रवणात् स्वप्नं निहस [redacted] पूर्वदेहं निश्चेष्टं कृत्वा स्वप्नं निर्माय अपूर्व
स्वामेदेहं संपाद्य स्वेन भासा स्वीयांतःकरणवृत्त्यात्मेन ज्योतिषा स्वरूपचैतन्येन चेत्यर्थः तथा च कामं कामं पुरुषो निर्मिमाण इत्यत्रा
पि जीवस्यैव निर्मातृत्वं ज्ञेयम् ३ ननु स्वप्नस्य मिथ्यात्वे तस्य शुभाशुभसूचकत्वं न स्यादित्यत आह सूचकश्च हि श्रुतेराचक्षते च तद्विदः ४
स्वप्नगजादिप्रकाशः सत्यस्यैव वस्तुनः सत्यस्य सूचकः सत्यस्य साध्वसाधुसूचने समर्थः तथा हि यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु प
श्यति समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शन इत्यादिश्रुतेरवगम्यते स्वप्नः आचक्षते च स्वप्नाध्यायविदः शुभाशुभसूचकत्वं स्व
प्नस्येत्यर्थः यद्यपि प्रकाशस्यायोपरागेणोक्तसूचकत्वमिति वस्तुनः सत्यत्वमप्रयोजकं तथापि रजतस्य सत्यहर्षादिजनकत्वव राम ९४

स्वस्वसूचकत्वमविरुद्धमिति तात्पर्यं ४ ननु यथेश्वरः संकल्पमात्रेण जगत्सृजति एवं तदंशो जीवोऽपि संकल्पमात्रेण निर्मितेन
स्वाप्नं जगत्सृजतु तथा चोचितनिमित्ताभावान्मिथ्यात्वमसृष्टेरिति संगतमित्यत आह पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविप
र्ययौ ५ जीवेश्वरयोरभेदेऽपि मायोपाधेरैश्वर्यस्य तिरोहितत्वात्तत्र जीवस्य संकल्पमात्रेणास्रष्टृत्वमिति परिहाराभिप्रायः जीवस्य तिरोहित
मीश्वरत्वं परस्यात्मनोऽभिध्यानादभेदाभ्यासरूपध्यानेनाप्तादीश्वरप्रासादादभिव्यक्तं भवति कुतः तत ईश्वरादज्ञानाद्बन्धः ज्ञानाद्विपर्य ६
यो मोक्ष इति श्रुतिर्दर्शयति तस्मादीश्वरप्रसादरहितानां नैश्वर्याभिव्यक्तिरिति भावः श्रुतिस्तु यज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकाम इति देवं स्वप्रकाशमीश्वरमहंत्वेन साक्षात्
कृत्वा सर्वपाशानामविद्यास्मितारागादीनां क्लेशानामपहानिः क्षयो भवति एवं क्षीणैः क्लेशैस्तत्कार्यजन्ममरणक्षयो भवति निर्गुण
विद्याफलमुक्त्वा सगुणविद्याफलमाह तस्येति तस्येश्वरस्याभिमुख्येन ध्यानादुक्तहानिद्वयापेक्षया तृतीयमणिमाद्यैश्वर्यं देहभे
दे देहविशेषोत्तरं देहमात्मभुक्तिं निर्गुणविद्योदये केवलोऽद्वितीय आप्तकामो निरतिशयानंदात्मनैवावतिष्ठत इति क्रममुक्तिर्वाक्या
र्थः ५ ननु जीवस्येश्वरत्वतिरोभावे को हेतुरित्याशंक्याह देहयोगाद्वा सोऽपि ६ सोऽपि जीवस्येश्वरत्वतिरोभावो देहादिदेहादियोगात् य
था भस्मयोगादग्नेः प्रकाशनसामर्थ्यतिरोभावस्तद्वदिति भावः ननु जीवस्येश्वरत्वाभाव एवास्तीति शंकां वाशब्देन निरस्यति अभेद
स्य श्रुतिसहस्रसिद्धत्वादिति भावः तस्मादुचितसामग्र्यभावाज्जाग्रद्दृष्टेर्बाधितत्वाच्च शुक्तिरूप्यवन्मायामात्रं स्वप्नदर्शनमिति त
द्वस्याविनिर्मुक्ताप्रमात्मेति सिद्धं ६ एवं वाऽस्य कारणापरमरूपं स्वप्नमात्मनः स्वप्रकाशत्वार्थं परीक्ष्यान्तःकरणोपरमरूपा सुषुप्तिः स्व
प्नानंतरभाविनी तस्य ब्रह्मत्वाय निरूप्यते तदभावो नाडीषु तच्छ्रुतेरात्मनि च ७ सुषुप्तेः स्वप्ननाशरूपत्वात्तदानंतर्याच्च हेतुहेतु

ब्रा॰ सू॰ मद्भावः अनंतर्य्यवासंगतिः तत्रसुषुप्तिवाक्यानिविप्रतिपन्नानिदृश्यंते तद्यथैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नंनविजानात्यासुतदा
३५ नाडीषुसृप्तोभवतीति तत्तासुतदाभावस्यासुषुप्त्यवस्थायामेतत् वालेखांक्षियो परमेणाप थास्वात्तथासुषुप्तः संहृतवाह्येंद्रियश्रति
यावत् समस्तःस्त्रविशेषवृत्तिः संप्रसन्नः संहृतांतःकरणाश्चपरावस्वप्नंनविजानातीति तदानाडीषुसुप्तस्ट्स्यर्थः क्वचिन्नाडीभिः प्रत्यव
नंतरंपुरीततिसुषुप्तिः श्रूयते ताभिः प्रत्यवसृप्यपुरीततिशेत इति क्वचित्परमात्मनिसुषुप्तिः श्रूयते परएवोत हृदयआकाशस्तस्मिं
च्छेतइति सतासोम्यतदासंपन्नोभवतीत्यादिभिः तत्रसंशयः किंजीवस्यनाडीपुरीततस्परमात्मनांमध्येयत्रकुत्रचित्सुषुप्तिः उत
नाडीपुरीततोरेवशानंतरपरमात्मन्येवेति अत्रपूर्वपक्षे सुषुप्तिस्थानेविकल्पाज्जीवस्यअनेकानिपमः सुषुप्ताश्रमनिवृत्तावपी
ह्रै यतेनैव ... निपमादृतिनफलंविशेषातेनतन्नियमः इतिभेदः तत्रैककार्यनिष्पादकत्वेनश्रुतत्र्व्रीहियववदेकशयननिष्पाद
कनाड्यादीनांविकल्पइतिप्राप्तेब्रूमः तदभावः स्वप्नाभावः सुषुप्तिर्नाडीष्वात्मनिचेतिनाड्यादीनांसमुच्चयएवनविकल्पइत्यर्थः
समुच्चयश्चनाडीपुरीततस्तेवेशविनाशसंपन्नाभावात्मयोर्नाडीपुरीततोर्गुणत्वेनपरमात्मनः प्रधानत्वेनत्रयः कुतः तच्छ्रुतेस्तस्य
नाड्यादीनांसुषुप्तिस्थानत्वस्यश्रुतत्वात् उक्तसमुच्चयानंगीकारेश्रुतीनांसंग्रहोनस्यादितिभावः किंच विभोर्जीवस्यततोनंतर
नाडीपुरीततोःसंचारोंतःकरणाद्युपाधेः संचारात्संभवति उपाधिसंचारविनाशतत्त्वस्यसंचाराभावात्सुषुप्तात्प्राथमाभावान्नाडीपुरी
न ततोःशयनंजीवस्यसंभवतीत्यपिद्रष्टव्यं ७ अतःप्रबोधोस्मात् ८ यतः परमात्मैवसुषुप्तिस्थानंअतएवहेतोरस्मात्परमात्मनोजी
प्रबोध वस्यप्रबोधउपरिशयनेनकालेकस्माज्जीवात्मानः समुत्तिष्ठंतीतिप्रश्नेपरमात्मनः सकाशादुत्तिष्ठंतीतिश्रवणात् आत्मनोन्यस्य
सुषुप्तिस्थानत्वेइदंश्रवणंवाध्येत अन्यत्रसुप्तस्यान्यस्मादुत्थानायोगादितिभावः तस्मात्सुषुप्तिमिथ्याज्ञानाभावमात्रेणषद्ब्रह्मसं राम ३५

ष्टेः सत्वान्मूलाज्ञाननिवृत्तेस्साकल्येन ब्रह्मसंपत्तिरिति हेतुः सत्तिजीवस्य ब्रह्मसत्वनियम इति सिद्धं ८ स एव तु कर्मानुस्मृतिशब्दवि-
धिभ्यः ९ सुषुप्ते तु परमात्मनः सकाशाज्जीव उत्तिष्ठति किं परमात्मैव सुप्तिस्थानमित्युक्तं न त्वयुक्तं सुप्तादन्यस्य प्रबोधसंभवेन सुप्त-
स्यनाड्यादिस्थानत्वस्याविरोधादिसाक्षेपात्संगतिः पूर्ववदेव फलं तत्र यः सुप्तो जीवः स एवोत्तिष्ठति उत स वान्यो वेत्यनियम इति संश-
ये जलराशौ क्षिप्तबिंदोरिवानियम इति प्राप्ते ब्रूमः यः सुप्तो जीवः स एवोत्तिष्ठति नान्यः कुतः कर्मस्मृत्यादिपंचभ्यः हेतुभ्यः दिनद्वयसा-
ध्यकर्मणोऽर्धं कृत्वा सुप्तः पुनरुत्थाय विशिष्टमर्धं कर्म करोतीति अनुशब्देन प्रत्यभिज्ञा योऽहं पूर्वदिने काशीनाथमद्राक्षं सोऽहमिदानीं
मणिकर्णिकायां स्थितोऽस्मीत्याद्याकारा स्मृत्युच्यते पश्चात्सेतुं गतस्य सतो दृशः काशीनाथस्मरणादिस्मरणमिति शब्देनोच्यते पुनः प्र-
तिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैवेत्यादि श्रुतिजातं शब्दः अयमनंगमनमायः प्रतिनिपतनगमनं प्रतिन्यायः स यथा भवति तथा यो-
निं शरीरं प्रति सुप्तः पुनरागच्छति जागरणायेत्यर्थः कर्मविद्याविधयो विधिशब्देनोच्यते यदि सुप्तस्य पुनर्नोत्थानं तदोक्तहेतवो बाध्येरन्नि-
त्यर्थः तस्मात्सुप्त एवोत्तिष्ठतीति सिद्धं ० एवमवस्थात्रयनिर्मुक्तत्वमात्मनस्तत्त्वं द्रष्टुं व्यभिचारिणीं ऊर्ध्वं मूर्छावस्था किं सुषुप्तावेवान्तर्भ-
वति उतातिरिक्तावस्थैवेति संदेहे अतिरेके प्रमाणाभावात्सुषुप्तिरेव मूर्छेत्युपजीव्योपजीवकभावेन पूर्वपक्षे सिद्धान्तः मुग्धेऽर्धसंपत्तिः प-
रिशेषात् १० पूर्वपक्षे मूर्छावस्थातो विवेकार्थं प्रयत्नो न कार्य इति फलं सिद्धान्ते तु प्रयत्नः कर्तव्य इति तथा च न तावत्स्वप्नजागरिते मूर्छावस्था
ज्ञानाभावात् नापि मरणावस्था प्राणोष्मणोः सत्वात् नापि सुषुप्तिः वैलक्षण्यात् मुग्धस्य शरीरकंपो भयंकरं वदनं निश्चले उन्मीलिते नेत्रे
निश्चलश्च प्राणो वर्तिष्टते नैवं सुषुप्तो भवति तस्मात्परिशेषादर्धसंपत्तिर्मुग्धावस्थातिरिक्तैव ननु मुग्धेऽपि बाह्यज्ञानं करणानामभावेन सं-
संपत्तेः सुषुप्तावेवाविशेषात्कथमर्धसंपत्तिरिति चेन्न संसंनहि ब्रह्मणार्धसंपत्तिं मुग्धस्य ब्रूमः किंतु सुषुप्तावस्थायां ये धर्माः प्रसन्नत्व

ते

तिपूर्वपक्षे द्विरूपं ब्रह्म ध्येयं सिद्धान्ते निर्विशेषं ज्ञेयमेवेति फलभेदः तत्र यथा मू+६

म. हं. ९६ रन्नत्वनिमीलितनेत्रत्वप्राणोच्छ्वासविशेषविज्ञानराहित्यादिरूपः तत्र विशेषविज्ञानराहित्यादिनार्थेन धर्मेण जीवन्मूर्छावस्थायाः संपन्न न

त्वार्थेन मरणावस्थाधर्मेण ज्ञातेन कंपादिना च पृथक्त्वाद् द्रष्टुं तत्पत्तिर्मूर्छेत्युच्यते रसनवद्यं ९ एवमुद्देश्यत्वेन प्रथमजिज्ञास्यत्वं पदार्थ

स्वप्रकाशं सर्वावस्थानिर्मुक्तं निर्विशेषं तच्छोधितं तज्जिज्ञासा परमानन्तरं जिज्ञास्यं विधीयते तत्सहार्थमवसरसंगत्या शोधितुं तस्य निर्विशे

षत्वमाह नस्थानतोपि परस्योभयलिंगं सर्वत्र हि ११ सर्वकामः सर्वकर्मः सर्वगंधः सर्वरसः इत्यादिना ब्रह्मणः सविशेषत्वं श्रूयते स्थूल त्र

मन[illegible]णित्वसादिना निर्विशेषत्वं तत्र संशयः किमुभयश्रुत्यनुसारादुभयरूपं ब्रह्म उतैकरूपमेकरूपमपि सत्रापि सविशेषं निर्विशे

षं वे त्यवस्थाया विरुद्धत्वं सुषुप्तिमरणावस्थाभयधर्मवत्त्वं तथा ब्रह्मणोपि उभयरूपत्वं भवतु श्रुतत्वाच्चेति दृष्टान्तेन पूर्वपक्षे सिद्धान्तः

नूतावस्तुतः परब्रह्मण उभयलिंगं उभयरूपत्वं संभवति तस्य स्वतस्तु तो द्विरूपायोगात् न ह्येकमेव वस्तु एकदा तत्तदभाववद् दृष्ट

ं तेन मूर्छादृष्टान्तो निरस्तः वैलक्षण्यात् नापि स्थानतः उपाधितः परस्योभयरूपत्वं नालिकेयुक्तं अग्निसंयोगमात्रेण जलस्योष्ण

स्वभावत्वादर्शनात् तस्मादेकरूपं ब्रह्म न द्व्येकरूपत्वं निर्विशेषत्वमेवाहयतः सर्वत्र वेदान्तेषु ब्रह्मणोपरेशशब्दमस्पर्शमित्यादिषु

सविशेषत्वनिरासेन ब्रह्मोपदिश्यते तस्मान्निर्विशेषमेवैकरूपं ब्रह्म ११ न भेदादिति चेन्न प्रत्येकमतद्वचनात् १२ ननु न निर्विशे

४ भेदेन षमेव ब्रह्म कुतः भेदात् प्रतिविधं ब्रह्मण आकारभेदात् कस्यांचिच्छाखायां चतुष्पाद्ब्रह्मोपदिश्यते कस्यांचित् षोडशकलं कस्यांचि

त्रैलोक्यशरीरं वैश्वानराख्यं तस्मात्सविशेषमपि श्रुतिसामर्थ्यादंगीकर्तव्यमिति चेन्न प्रत्येकं प्रत्युपाधि अतद्वचनात् ब्रह्मणः प

रस्याभेदस्य वर्णनादित्यर्थः यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषो

यमेव स योयमात्मेत्यादिश्रुतेर्ब्रह्मणः सर्वोपाधिषु पृथिव्यादिष्वभेदः श्रूयते अस्यां पृथिव्यां तेजोमयः स्वप्रकाशो नाशरहितो यः राम ९६

पुरुषः पश्चात्मानं देहमधिकृत्य वर्तमानः शारीरो जीवस्तावुभौ सर्वेषां भूतानामुपकारको मंतो मधु सः शरीरं पृथिव्यवच्छिन्नः पुरुषो यश्चायमे
व योयमात्मा सर्वकारणभूत इति श्रुत्यर्थः १२ अपि चैवमेके १३ किं चैके शाखिनः एवं भेददर्शननिंदापूर्वकमभेदमेव ब्रह्मणः समामनंति मन
सैवेदमाप्तव्यं नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति शाखान्तराचार्यसंस्कृतमनसैव ब्रह्मज्ञानं ज्ञाने त्विह ब्रह्म से
ण्यणि किंचिदपि भेदजातं नास्ति यस्त्वविद्याकृतं नानारूपं सदिति पश्यति स मरणान्मरणं पुनः प्राप्नोतीत्यर्थः १३ ननु सगुणनिर्गुण
परश्रुतिद्वयसत्त्वे कथं निर्गुणे ब्रह्मणि पक्षपातस्तत्राह अरूपवदेव हि तत्प्रधानत्वात् १४ रूपादिहीनं निर्विशेषमेव ब्रह्मावधार
स णीयं नैव विशेषवत्कुतः अस्थूलमनण्वादिनिषेधशास्त्रस्य निर्गुणब्रह्मप्रधानत्वादित्यर्थः उपासनावाक्यानां सविशेषतात्पर्याभावा
न्नासंयोगिकोऽर्थवाक्यभेदापत्तेरितरेषां तु विशेषवाक्यानां प्रसक्तादिसिद्धप्रपंचानुवादकत्वेन निर्विशेषपरत्वात् तदनन्यत्वमित्यादिना
प्रपंचमिथ्यात्वसाधनाच्चेन सविशेषत्वं ब्रह्मणः प्रामाणिकमिति भावः १४ ननु तर्हि सविशेषश्रुतीनां का गतिरत आह प्रकाश
वच्चावैयर्थ्यात् १५ यथा सूर्यादिप्रकाशो वक्रवंशाद्युपाधिना वक्रः दीर्घो वक्रऋजुरिव भवति तद्वत् ब्रह्मापि पृथिव्याद्युपाधिवशा
त्तदाकारमिव भवतीति तादृशोपाधिकाकारः सविशेषश्रुतीनां गतिरिति तासामवैयर्थ्यान्निरर्थकत्वाभावान्न विरोध इत्यर्थः १५
ननु को दृष्टान्तो निर्विशेषब्रह्मसत्त्वे आह आह च तन्मात्रम् १६ तन्मात्रं चैतन्यैकरसं निर्विशेषं श्रुतिराह यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो वा
रसघन एवैवं वा अरेऽयमात्मानंतरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति एकरसे दृष्टांतः यथा हि लोके सैंधवघनो लवणमूर्तिर्विशेषो
न्तर्बहिश्चाविलक्षणरसभूयः सर्वो लवणैकरसः तथायमात्मांतर्बहिश्चाभेदरहितः सर्वः स्वप्रकाशचिदेकतानोस्तीति श्रुत
र्थः १६ किंच प्रपंचनिषेधमुखेन ब्रह्मण उपदेशाद्ब्रह्म निर्विशेषं सविशेषत्वे सविशेषवाक्यैरेव तत्सिद्धेर्निर्विशेषो [redacted]

स.वृ. पदेशानर्थक्यं स्यादित्याह दर्शयति चाथो अपि स्मर्यते १७ अथात आदेशो नेति नेतीत्यादिश्रुतिर्निषेधमुखेनैव ब्रह्म दर्शयति पंच
८१ भूतात्मानं तत्प्रपंचं यच्छब्दार्थः नस्मात्परं ब्रह्मधीहेतुत्वमतः शब्दार्थः इति शब्दः पूर्वोक्तपंचभूतपरामर्शी तन्निषेधावधिभूतः पर
मात्मेत्यादेश उपदेश इत्यर्थः सूत्रगताथोशब्दस्यार्थः तथा स्मर्यते च निषेधमुखेन ब्रह्मेत्यर्थः ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृत
मश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यत इति भगवद्गीतायां आदिमत्कार्यमस्य न विद्यत इत्यनादिमत्कार्यरहितमित्यर्थः न
त सत्कारणं कस्यचिन्न कार्यं न कस्यचिदित्यर्थः १७ अत एव चोपमा सूर्यकादिवत् १८ यत एव परमात्मनिषेधोपदेशो निर्विशेषो परमा चो
दि त्मा अत एवोपाधिकं सविशेषत्वं आश्रयजलसूर्यकादिवदौपम्यमागच्छते यथा सूर्यो नित्यात्मा विवस्वान् यो भिन्ना बह्वेकोऽनुगच्छ हु
न् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मेति एक एव तु भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जल
चंद्रवदिति ज्योतिःस्वभावो विवस्वान् एकोऽपि तत्तत्सात्रगता भिन्ना अपो अनुगच्छन् बहुधा क्रियते एवमयमात्मा देवः स्वप्रकाशा
जः कूटस्थः नित्य एकोऽपि भिन्नेषु क्षेत्रेष्वनुगच्छन्नुपाधिना भेदरूपः क्रियत इति योजना तथा चैतद्दृष्टांतबलादपि ब्रह्मणो निर्विशेषत्व
मिति सूत्रकृतामाशयः १८ दृष्टांतवैषम्यमाशंकते अम्बुवदग्रहणात्तु न तथात्वं १९ ननु यथा सूर्यादिभ्यो मूर्तेभ्यो भिन्नं दूरस्थं प्रतिबि
बोपाधिभूतमुपलभ्यते न तद्व्यापकादात्मनो दूरस्थोपाधेरग्रहणादात्मनो मूर्तत्वाभावाच्च विषमो दृष्टांत इति न तथात्वं न सूर्यकादि
त्क तुल्यत्वमिति शंकार्थः १९ तत्रोत्तरमाह वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं २० यथा सूर्यप्रतिबिंबस्य जले तद्भूतस्य जल
न गतवृद्धिह्रासादिभाक्त्वं बालवृंदमवमविकृतस्य परमात्मनो देहाद्युपाध्यंतर्भावाद्देहगतवृद्धिह्रासादिभाक्त्वं न स्वाभाविकमित्येता
वतांशेनैतयोर्दृष्टांतदार्ष्टांतिकयोः सामंजस्याद्भवति सूर्यादिदृष्टांतः न हि सर्वात्मना साम्ये दृष्टांतदार्ष्टांतिकयोः शक्यते वक्तुं दृष्टांतत्व एम
८७

करणात्मको हिरण्यगर्भश्चक्षुर्गोलके दक्षिणे चक्षुरूपेण वर्त्तमानः सार इति चोक्तास्तस्य+८
निरोधादिति भावः २० किं त्वागमसमधिगम्येऽर्थेन चोद्यमित्याह दर्शनाद्य २१ परस्य च ब्रह्मणो देहान्तरानुप्रवेशस्य प्रतिबिंबभाव
रूपस्य श्रुतौ दर्शनादित्यर्थः पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति श्रुतिं पुरः शरीराणि
द्विपादयुक्तानि चतुष्पादयुक्तानि चक्रे कृत्वा पुरश्च स्तुणस्थाभिव्यक्तेः पूर्वं स पुरुषः एभ्यः पक्षी लिंगशरीरं भूत्वा पुरः शरीराण्या
विशदित्यर्थः तस्मान्निर्विशेषमेव चैतन्यैकरसं ब्रह्मेति सिद्धं २१ ननु निषेधश्रुतिभिर्ब्रह्म निर्विशेषं सिद्ध्यतीति यदुक्तं तद
युक्तं ताभिर्ब्रह्मण्यपि निषिद्धत्वादित्याक्षेपप्रसंगसाधिकरणमारभ्यते प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः २२ न
त्र स्वरूपस्य ब्रह्मणोऽसिद्धिरिति फलं सिद्धान्ते तत्सिद्धिरिति बोध्यं द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चेत्युपक्रम्य पंचभूतात्मकं रूपद्वयं तेजो
वन्नात्मकं भूतत्रयं मूर्तं स्थूलात्मकं भूतसंघं वाय्वाकाशात्मकं भूतद्वयं परोक्षममूर्त्तमिति द्वेधा विभज्य तत्र मूर्तस्य सारश्चक्षुर्गोलकं
चक्षुरूपं सारः अमूर्तस्य तु सत्पातावर्त्तीं कारणात्मकलिंगशरीररूपस्य हिरण्यगर्भस्य पुरुषशब्दवाच्यस्य वासनामयानि स्वाप्नरूपा
णि मायामयानि दर्शयित्वा रूपद्वयवतो ब्रह्मणः स्वरूपं बोधयितुमिदमारभ्यते अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्
परमस्त्यथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति उपक्रमे वा तत्र शब्दः एवकारार्थः सपरिकररूपद्वयोपन्यासान
न्तरमथशब्दार्थः रूपद्वयोपन्यासस्य ब्रह्मज्ञानहेतुत्वं ब्रह्मणो वक्तव्यत्वेन परिशेषाद्यातः शब्दार्थः इति शब्देन ब्रह्मणो रूपद्वयस्य परि
करं यदुपन्यस्तं तत्सर्वं परामृश्यत इति शब्देन परामृष्टं सर्वं नञा वीप्सया निषिध्यते नेति नेतीति वीप्सया विषयजातस्य सर्वस्य निषेधे त्वप्र
विषयः प्रत्यगात्मा निषेधावधिभूत इति निर्विचिकित्सं ज्ञानं भवति एवं नेति नेतीति ब्रह्मोपदेशं कृत्वा नेति नेतीत्युपदेशस्य कोऽर्थ
त इत्याकांक्षायां तमेवोपदेशं निर्वक्ति न ह्येतस्मादिति हि यस्मादेतस्मान्नेति नेतीत्यादिष्टाद्ब्रह्मणोऽन्यत् इतिरिक्तं नास्ति ब्रह्मैव वस्तु परमस्ति

अथैति नेति नेतीति निषेधस्य ब्रह्मविषयत्वाभावसूचनार्थो यश्शब्दः नामधेयमाह २+

ती

सू. वृ. ९८ तस्मान्नेतिसु अतश्शतिनिर्वचनवाक्यस्यार्थः यद्वा नेति नेतीति यः प्रपंचनिषेधरूप आदेशः कृतः स एतस्मादित्यनेन परामृश्यते तस्मान्ने
तीति प्रपंचनिषेधरूपाद्ब्रह्मोपदेशान्नान्यः परमुपदेशनं नस्त्यतीत्यर्थः ब्रह्मणो नामधेयकथनव्याजेनापि स्वरूपमाह सत्यस्य सत्यमि
ति तद्यावचेष्टश्रुतिः प्राणा इति प्राणशब्देन लिंगशरीरमुच्यते तस्य सत्यत्वं स्थूलदेहापेक्षया तस्यापि तत्त्वं द्रष्टव्यं एष परमात्मा सत्यस्या
पि परं सत्यमिति वस्तुगतिः तत्र नेति नेतीति निषेधस्य को वा विषय इति संदिह्यते किं प्रपंचो ब्रह्म च सुभयमपि निषिध्यते उतैकं एक
मिति तत्रापि किं प्रपंचो निषिध्यते उत ब्रह्मेति तत्र नियामकाभावादुभयमपि प्रतिषिध्यत इति प्राप्ते यद्वा निरधिष्ठाननिषेधायोगा
द् ब्रह्मैव निषिध्यते प्रपंचस्य प्रत्यक्षसिद्धत्वेन निषेधायोगादिति प्राप्ते ब्रूमः ब्रह्मणो द्वे रूपे सपरिकरं प्रकृतं प्रधानं एतावत्त्वं इयत्ता
परिच्छिन्नत्वं तत्प्रकृतैतावत्त्वं तदेव प्रतिषेधति नेति नेत्यादिश्रुतिः इतिशब्दस्य प्रधानत्वेन प्रकृतपरामर्शित्वात् ब्रह्म तु न प्रधानत्वेन स्य
प्रकृतं द्वे वाव ब्रह्मणो रूपे इति रूपद्वयात्मकत्वेनोपसर्जनत्वेनैवोक्तत्वादितश्च ब्रह्मणो न निषेधः यस्मात्ततः प्रपंचनिषेधानंतरं
भूयो ब्रह्मास्तीति ब्रवीति न ह्येतस्मादिति नेत्यन्यत्परमस्तीति सन्निर्वचनवाक्यं तस्मादित्यर्थः ब्रह्मणोपि निषेधे किमस्तीति ब्रूयादिति भावः निर्
वचनवाक्यस्य द्वितीयव्याख्यायां तु ततः प्रपंचनिषेधस्य परस्तादथ नामधेयमिति सत्यस्य सत्यमिति वाक्यं ब्रह्म ब्रवीति तेन नेतीत्यादिवाक्येन नि
षेधमात्रे न तात्पर्यं किंतु तेन निषेधेन भावरूपं ब्रह्म ज्ञातव्यमिति सूत्रभागस्यार्थः न च प्रपंचनिषेधप्रसक्तविरोधः तस्य व्यावहारि
कप्रामाण्यादित्यनवद्यं २२ ननु यदि ब्रह्मास्ति तर्हि उपलभ्येत तत्राह तदव्यक्तमाह हि २३ तद्ब्रह्म अव्यक्तं अग्राह्यं सति रिक्तमानागोचरः
हि यतः श्रुतिराह न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यत इत्यादिना ब्रह्म
णः प्रत्यक्षागोचरत्वं अन्यैर्देवैरिन्द्रियैः तपांतरैरित्यर्थः नेति नेतीति य आत्मा व्याख्यातः स एषोऽगृह्य अग्राह्यः यस्मान्नहि गृह्यते न प

राम ९८

संतुष्टाः संयतेंद्रियाः ज्योतिः पश्यंति युंजानास्तस्मै योगात्म
नेनम इति जितश्वासाः ८

हरणायोगपरस्सर्थः २३ तर्हि सर्वदा ब्रह्मग्रहणाभावे मोक्षो न स्यादित्याशंक्याह अपि संराधने प्रत्यक्षानुमानाभ्यां २४ अपि चैन
मात्मानं संराधने समाधावस्यापाकृतावस्थाः पश्यंतीति प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामवगम्यते तथा हि श्रुतिः परांचि खानि
व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नांतरात्मन् कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति ज्ञानप्रसादेन विशु
स्तुतं द्धसत्त्वस्ततस्तं पश्यते निष्कलं ध्यायमान इति स्वप्रभः परमात्मा खानि श्रोत्राद्यात्मकाकाशोपलक्षितानींद्रियाणि परांचि अनात्मविषया
णि यतृणत् हिंसितवान् इंद्रियाणां हिंसा नानात्मविषयतासर्जनमेव तत् यथा सर्जनं गमकमाह तस्मादिति ननु परांचींद्रियैः परांचमेवा
र्थं पश्यति नांतरात्मानं कथं तर्ह्यात्मज्ञानं तत्राह कश्चिद्धीर इति कश्चिद्धीरो विवेकी आवृत्तचक्षुः संयतेंद्रियो मोक्षमिच्छन् प्रत्यगा
त्मानं समाधावीक्षितवानित्यर्थः ज्ञानस्य करणाद्युक्तस्यांतःकरणस्य प्रसादेन रागादिरहितेन विशुद्धसत्त्वः प्रत्यक्प्रवणांतः
करणः ततस्तु विशुद्धसत्त्वाद्धेतोस्तमात्मानं निरवयवं ध्यायमानः पश्यति साक्षात्करोतीत्यर्थः स्मृतिरपि यं विनिद्रा जितश्वासाः प्रा
णायामपरा योगात्मत्वं ध्यानात्मकयोगगम्यत्वं २३ ननु जीवब्रह्मणोर्ध्यातृध्येयभावांगीकारे भेदः स्यादित्याशंक्याह प्रकाशादि
वच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् २५ यथा सौरः प्रकाश आकाशवाय्वाद्युपाधौ कर्मणि भिन्न इव वक्र इव भाति वस्तुत
स्त्वेकरूपः तद्वत्प्रकाश आत्मापि ध्यानज्ञानादौ कर्मण्युपाधौ भिन्न इव भाति वस्तुतस्त्ववैशेष्यमेकरूपत्वमेवात्मनः कुतः अभ्या
सात् तत्त्वमसीत्याद्यभेदश्रुत्यभ्यासादित्यर्थः २५ अतोऽनंतेन तथा हि लिंगं २६ अतो भेदस्यौपाधिकत्वाद्विद्यया भेदं निरस्य जीवोऽनंते
न परमात्मनाऽऽत्मैकतां गच्छति तथा हि लिंगमपूर्वार्थज्ञापकं श्रुतिर्जातं ब्रह्मैव सन्ब्रह्माप्येतीत्यादि २६ एवं जीवब्रह्मणोः पारमार्थि
कमभेदमुक्त्वा समनंतभ्युच्चयं भेदाभेदपक्षमुपन्यस्यति उभयव्यपदेशात्त्वहिकुंडलवत् २७ ध्यातृध्येयभावादिना भेदस्याभेदस्य च

सू.वृ.
११ त्वे भ्युं।। व्यपदेशाज्जीवेश्वरयोः भेदाभेदौ भवतः तु शब्दः सिद्धान्ते वैषम्यद्योतनार्थः अहिकुंडलवत् कुंडलमेहः संस्थानविशेषः यथा
अहिकुंडलयोरहित्वेनाभेदः कुंडलत्वेन भेदस्तद्वदित्यर्थः २७ धर्मभेदेन भेदाभेदाविति पक्षमुक्त्वा एकधर्मावच्छेदेनैव भेदाभेदा
विति पक्षमाह प्रकाशाश्रयवद्वा तेजस्त्वात् २८ यथा प्रकाशः सौरः तदाश्रयश्च सविता तयोर्भेदः तेजस्त्वाविशेषात्तथा
विभिन्नत्वं प्रतीयते तथा चैकत्वेनैकावच्छेदेनैव प्रमाणबलात् भेदाभेदौ यथा तद्वज्जीवेश्वरयोर्भेदाभेदावित्यर्थः २८ ननु भे
दस्य पारमार्थिकत्वे ज्ञानान्निवृत्तेरसंभवान्मोक्षो न स्यात् एकावच्छेदेन तयोरङ्गीकारे लोकविरोधकथं वनस्यादितादिदोषप
रिहारेण मतान्तरमाह पूर्ववद्वा २९ प्रकाशवच्चाविशेष्यमिसत्त्र पूर्वभेद औपाधिकः अभेदः पारमार्थिक इति पक्षोक्तः स एव सि
द्धान्तोभ्युपेयः २९ प्रतिषेधाच्च ३० नान्योतोस्ति द्रष्टेत्यादिशास्त्रात् परमात्मातिरिक्तस्य चेतनस्य नेतिनेतीत्यादिवाक्यैः प्रपंचस्य च प्रति त्मा
षेधाद्ब्रह्माद्वितीयमिसत्यमेव सिद्धान्तरहस्यं तस्माच्छ्रुतिबलान्निर्विशेष एकः परमात्मेति सिद्धं ३० ननु नेति नेतीति ब्रह्मातिरिक्तं
वस्तु निषेधमित्युक्तं तदयुक्तं ब्रह्मणः सेतुत्वोन्मानादिव्यपदेशेन वस्त्वन्तरसत्त्वावगमात् धुम्बाधिकरणे सेतुत्वस्य गौणत्वेन नी
तत्वोपि उन्मानादीनां गमनेन दर्शनादित्याशंक्याह परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः ३१ तत्र पूर्वपक्षे पूर्वाधिकरणसिद्धान्तासि
द्धिः फलं सिद्धान्ते तत्सिद्धिरिति बोध्यं अत्र ब्रह्मातिरिक्तं वस्त्वस्ति न वेति संशये अस्तीत्याह परमिति अतो ब्रह्मणः परं वस्त्वस्ति अथ य आ
त्मा स सेतुरिति ब्रह्मणः सेतुत्वव्यपदेशात्तथा च ब्रह्म सद्वितीयं सेतुत्वात् आश्रमसेतुवदित्यनुमानमुक्तं ब्रह्म चतुष्पादिति श्रुतावुन्मानव्य
पदेशात् एतावानस्य महिमेति परिच्छिन्नत्वव्यपदेशात् वेशपसमीपस्थक्रयसाधनकार्षापणादिवत्सद्वितीयं ब्रह्मेत्युन्मानशब्दार्थः च
तस्रो दिशा एकः पादः पृथिव्यन्तरिक्षं द्यौः समुद्र इति द्वितीयः पादः अग्निः सूर्यश्चन्द्रमा विद्युदिति तृतीयः पादः चक्षुः श्रोत्रं वाङ्मन इति राम

ब्रं

चतुर्थः पाद इति श्रुतावुपासनार्थं चतुष्पाद्ब्रह्मेत्युक्तमिति मंतव्यं सुषुप्तौ प्राज्ञेनात्मना शरीरः संपरिष्वक्त इत्यादिना ब्रह्मणः संबंधव्य
पदेशात्संबंधित्वेन हेतुना घटाकाशवत्तद्द्वितीयत्वमिति संबंधार्थः अधिदैवमहिरण्मयपुरुषमीश्वरं व्यपदिश्य ततो भेदेनाक्षिपुरुषं व्यप स्य
देशात्परमात्मास द्वितीयः परतत्त्वात्मा ३१ सेतुत्वादिहेतोः एवमित्याह सामान्यात्तु ३२ मर्यादाधारिमेपहिसेतुशब्दात्स्वलोकनाहेतो
द्दृश्यते तुल्यं ब्रह्मणोऽस्ति किं तु सेतुर्यथा जलस्य व्यवस्थापकः एवं ब्रह्मणोऽपि सकलजगन्मर्यादाव्यवस्थापकत्वेन प्रसिद्धः सेतुसामा
न्यात् सेतुत्वव्यपदेश इत्यर्थः तुशब्दः पूर्वपक्षनिरासार्थः एकविज्ञानात्सर्वविज्ञानप्रतिज्ञाविरोधः सर्वेषामनुमानानां बाधः ३२
उन्मानव्यपदेशोऽपि न मुख्य इति द्वितीयहेतुमप्यसिद्धं दर्शयति बुद्ध्यर्थः पादवत् ३३ ब्रह्म चतुष्पादिति श्रुतावुन्मानव्यपदेशो
बुद्ध्यर्थः उपासनार्थः निर्विशेषस्य बुद्धिस्थत्वायोगादुपासनाद्वारा बुद्धिस्थत्वायोन्मानव्यपदेशो न मुख्य इत्यर्थः पादवत् यथा ब्रह्म
प्रतीकस्य मनसो वाग्घ्राणचक्षुःश्रोत्राण्युपासनार्थं पादत्वेन व्यपदिश्यते तद्वदित्यर्थः ३३ अविशिष्टहेतुद्वयमप्यसिद्धं दर्श
यति स्थानविशेषात्प्रकाशादिवत् ३४ सुषुप्तौ ब्रह्मणा जीवेन न घटस्यापरेनेव संबंधः किं तु स्थानविशेषात् बुद्ध्याद्युपाधिविशे
षात्तस्य स्वविशेषविज्ञानस्योपाध्युपशमादुपशमे अभिव्यक्तोपाधिप्रयुक्तभेदाभावस्य जीवपरयोः सुषुप्तौ संबंध इति व्यपदि
श्यते अक्ष्यादित्यपुरुषयोर्भेदव्यपदेशोऽप्यक्ष्यादित्यरूपस्थानविशेषापेक्षया प्रकाशादिवत् यथा सौरः प्रकाश आकाशो वा अं
गुलियोगात् घटमठाद्युपाधिविशेषात् दर्शनं वक्रं इव भिन्न इव भाति उपाधिविगमनंतरानीं सवक्र इवाभिन्न इव व्यपदिश्यते ।
तद्वदित्यर्थः तस्माज्जीवपरयोः संबंधो भेदश्चोपाधिनिमित्तो न स्वाभाविकः ३४ ननु मुख्यमेवास्तु तत्राह उपपत्तेश्च ३५ न मुख्यः
संबंधो जीवपरयोः सुषुप्तौ सम्पत्तिस्वमपीतो भवतीति स्वरूपस्यैव संबंधत्वव्यपदेशात् स्वरूपस्य च सदातनत्वात् सुषुप्तौ गौणः संबं
त

पत्वमेवएवंभेदेपिनमुख्यः श्रुतिसहस्रविरोधादिसुपपत्तिवशान्नेमित्तिकएवेत्यर्थः ३५ एवंसेतुत्वादीनांहेतूनांनिरासेनब्रह्म-
णोद्वितीयत्वंबहत्वंनेरणाह तथान्यप्रतिषेधात् ३६ यथासेतुत्वादिहेतुभ्योनवस्त्वंतरप्रमात्तथाहमेवाधस्तादहमेवाधस्तादि-
त्यादिवाक्येरन्यस्यवस्तुनः प्रतिषेधाद्वितीयमेवब्रह्मेत्यर्थः ३६ ननुब्रह्मणोद्वितीयत्वेसर्वगतत्वंकथमतआह अनेनसर्वगत
त्वमायामशब्दादिभ्यः ३७ अनेनसेतुत्वादिव्यपदेशमुख्यत्वस्यवस्त्वंतरस्यचप्रतिषेधेनब्रह्मणःसर्वगतत्वंसिद्धं अप्रतिषेधे
प्रसिद्धसेतुवत्ब्रह्मणोसर्वगतत्वप्रसक्तेःनसर्वगतत्वमानमाह आयामेति आयामशब्दोव्यापकत्ववाचकआकाशवत्सर्वगत
श्चनित्यइत्यादिशब्दःआदिपदेननित्यःसर्वगतःस्थाणुरित्यादिस्मृतिग्रहणात्तस्माद्द्वितीयस्यब्रह्मणआविधकंसर्वमादायश्रुति
स्मृतिभ्यांसर्वगतत्वंसिद्धं ३७ ननुब्रह्मातिरिक्तवस्तुनोनिषेधेब्रह्मणोनिर्विशेषत्वेनकर्मफलदातृत्वंनस्यादितिआक्षेपव्यावहारि
कफलदातृत्वमविरुद्धमित्याह फलमतउपपत्तेः ३८ पूर्वंनिर्विशेषत्वंसदलक्षणंब्रह्मोक्तमिदानींतस्यैवाच्चविचार्यतइतिपाद
संगतिः पूर्वपक्षेकर्मणएवफलदातृत्वाद्ब्रह्मणःकिंचित्करत्वसिद्धिःफलंसिद्धान्तेईश्वरस्यैवफलदानत्वसिद्धिरितिभेदःकिं
सर्वस्यजंतोःकर्मणएवफलंभवतिउतेश्वरादितिसंदेहे अत्रपूर्वपक्षनिराकरिष्यन्सिद्धान्तमाह फलमितिअतःपरमात्म
नःफलं [illegible] सर्वस्यलोकस्यभवितुमर्हतिक्षणिकात्कर्मणःफलासंभवेनेश्वरस्यैवफलदातृत्वोपपत्तेरित्यर्थः ३८ श्रुत
त्वाच्च ३९ सवाएषमहानजआत्मान्नादोवसुदानइतीश्वरफलहेतुत्वस्यश्रुतत्वाच्चेश्वरःफलदातेत्यर्थः अत्रमासमंनानात् प्र
तिम्यादहातीसत्रादःवसुदानोधनदाता ३९ शंकते धर्मंजैमिनिरतएव ४० यतःश्रुत्युपपत्तिभ्यामीश्वरंफलदातारमेवमन्यते
सिद्धान्ती अतएवश्रुत्युपपत्तिभ्यांधर्मफलदातारंजैमिनिराचार्योमन्यतेतथाहि स्वर्गकामोयजेतेतिविधिविषयस्ययागस्य-

स्वर्गसाधनत्वं श्रुतं तन्निर्वाहाय श्रुतिप्रमाणकैरपूर्वाख्योऽपाणयागस्योत्तरावस्थारूपः कल्पनीय इति यागादिधर्म एव फल
दातारीश्वरस्य सर्वसाधारणस्य विचित्रफलदातृत्वानुपपत्तेरिति ४० समाधत्ते पूर्वं तु बादरायणो हेतुव्यपदेशात् ४१ बाद
रायणस्त्वाचार्यः पूर्वोक्तमीश्वरं फलदातारं मन्यते तु फलं शंकानिरासकः कर्मापूर्वं वा स्वस्वरूपस्थितिनियोगसाक्षात्कारव
दधिष्ठितं भवितुमर्हति अचेतनत्वान्मृदादिवदनुमानेन संभाविते र्थे श्रुतिस्मृतीप्रमाणयति हेतुव्यपदेशादिति एष एव
साधु कर्म कारयति अन्नादो वसुदानः इत्यादिश्रुत्या लभते च ततः कामान्मयैव विहितान्हितान् इत्यादिस्मृत्या चेश्वरस्य धर्मा
धर्मयोः सकले च हेतुत्वेन व्यपदिष्टत्वादित्यर्थः तस्मात्तत्कर्मतापेक्षादीश्वरादेव सर्वेषां फलसिद्धिरिति सिद्धं ४१ इति श्रीब्रह्म
सूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां तृतीयाध्यायस्य द्वितीयः पादः २ एवं तत्पदलक्ष्यं वाच्यात्मकं निर्गुणं सगुणं ब्रह्म ज्ञेयं व्याख्यायानीमि
दानीं तज्ज्ञानं किंप्रकारकमित्यपेक्षायां तद्विचारणपरायणं तमारभ्यते सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् १ पूर्वपादे वाक्यार्थ
ज्ञाने कारणीभूतं तत्त्वंपदार्थनिरूपणं कृतं अस्मिन्पादे वाक्यार्थनिर्णयस्तत्र सनयोः पादयोर्हेतुमद्भावः संगतिः सगुणविद्या हेतु
याः सत्त्वशुद्धिद्वारा वाक्यार्थज्ञानोपयोगित्वात्तद्वाक्यार्थचिंताक्षिप्यत इति मतं तत्र तावत्सगुणब्रह्मप्राणपंचाग्न्यादिविष
यमुपासनं शुभदाभेदचिंतारभ्यते किं प्रतिवेदान्तं प्राणोपासनं पंचाग्न्युपासनमित्येवंजातीयकमुपासनं भिद्यते न वेति पूर्वप
क्षे उपासनानां भेदादेकवेदान्तोक्तोपासनस्य गुणानां वेदान्तान्तरोक्तोपासनेनुपसंहारः सिद्धान्ते उपासनैक्याद्गुणोपसंहार इत
दुपासनानां सत्त्वशुद्धिद्वारा वाक्यार्थज्ञानमुक्तिरिति फलिष्यति द्रव्यदेवते यथा यागस्य रूपं तथोपासनस्योपास्यरूपं तथा च
यथाऽऽमिक्षावाजिनयागयोर्द्रव्यरूपभेदाद्भेदः एवमुपासनानामुपास्यरूपभेदाद्भेदः इत्याशयः तथाहि क्वचित्पंचाग्निविद्या

तत्त्वंपदार्थत्व
प्रकारकज्ञा
नानुकूलो
व्यापारः तत्त्वं
पदार्थनिरूपण
प

स॰ वृ॰ यां षष्ठेऽग्निरुपास्यः अथ यत्रैव कश्चिन्नु घ्राणस्वापां पंचैवाग्नयः इत्येवं रूपेण तत्र तत्रोपासने रूपभेदावगमादुपासनेभिद्यते इति प्राप्ते अ
१०१ मः सर्ववेदान्ते प्रत्ययमप्रमीयमानान्युपासनानि न भिद्यंते कुतः चोदनाद्यविशेषात् आदिपदेन कर्माभेदहेतुत्वेनोपन्यस्ताः संयोगरूपसमा
ख्याः गृह्यंते चोदनासंयोगरूपसमाख्यानामविशेषादित्यर्थः यथा सर्वशाखास्वग्निहोत्रं जुहोतीति चोदनाया अविशेषान्निसाग्नि
होत्रमेकं तथा यो हवै ज्येष्ठं च श्रेष्ठं च प्राणं वेदेत्यादि चोदनायाः छंदोगानां वाजसनेयिनां चाविशिष्टत्वादेकैव प्राणविद्या सर्वशाखासु
अ॰३पा३ मिति गम्यते यः प्राणोपासकः स ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति फलसंयोगस्य सर्वत्राविशिष्टत्वाच्च न विद्याभेदः ज्येष्ठत्वादि गुणकप्राणस्यो
पास्यरूपस्य सर्वत्राविशिष्टत्वाच्च न प्राणविद्येति समाख्यायाः सर्वत्राविशेषाच्च विद्यैकमिति १भेदान्नेति चेन्नैकस्यामपि २ननु वा
जसनेयिनः पंचाग्निविद्यायां षष्ठमपि तावदग्निमुपास्यत्वेनामनंति तस्याग्निरग्निरिति समिधः समिदित्यादि षष्ठाग्निर्वाग्नि
र्भवतीति छंदोगास्तु पंचाग्नीनेव समामनंति ननु षष्ठमग्निं तथा च रूपभेदाद्वाभिन्नावाजिनायोगयोरिव शाखाद्वये पंचाग्निविद्या
भेदेनाभ्युपगंतुमिति चेन्न यतः एकस्यामपि विद्यायामपि रूपभेदउपपद्यते तथाहि येहि पुलोकादयः पंचाग्नयो वाजसनेयिशाखायां
मुक्ताः त एव छांदोग्ये प्रत्यभिज्ञायंते न चावनविद्याभेदः प्रयुक्तः न च षष्ठाग्निस्तस्मा भावात् भेदः एकस्मिन्नतिरात्रे षोडशीग्रहणाग्रहणा
वृ॰ भ्यां दर्शनात् यद्वानेकगुणाप्रत्यभिज्ञानुरोधाच्छांदोग्येप्यग्निरूपसंहारः कर्तव्यः न वाग्निषु पंचत्वसंख्याश्रवणाद्विरोधः संख्या तु
सं पादितानग्निपरत्वादिति भावः २ननु ब्रह्मविद्याग्निपारकमुंडकाध्ययने शिरसि अंगारपात्रधारणरूपं व्रतं कर्तव्यमित्येतेनोपदिश्यते इ
त्येकोपनिषद्ध्ययनकालेन शिरोव्रतेनापेक्षयते तथा च मुंडकस्य विद्यापेक्षया उत्तरोपनिषत्सु विद्याभेदः प्रयुक्तः नैवंकेवविद्याशिरो
व्रतरूपधर्ममपेक्षते तेनापेक्षते चेति युक्तं अतो धर्मभेदाद्विद्याभेदः इत्याशंकाह स्वाध्यायस्य तथात्वेनाहि समाचारेऽधिकाराच्च सववच्च तन् राम
१०१

न्नियमः ३ स्वाध्यायस्यैवैषशिरोव्रताख्यो धर्मो न विद्यायाः कुतः हि यतस्तथात्वेन स्वाध्यायांगत्वेन समाचारे वेदव्रतोपदेशपरे ग्रंथे शि
रोव्रतमपि वेदव्रतत्वेनाथर्वणिकाः समामनंति तथा च यथा गोदानरूपं वेदव्रतं वेदाध्ययनांगमेवं शिरोव्रतमपि मुंडकाध्ययनांगमेव न
त्रं मुंडकोक्तविद्यायोगमित्यर्थः अधिकाराच्च नैतदचीर्णव्रतोऽधीते इत्यत्र साधिकृतमुंडकग्रंथजातपरं तच्छब्दस्य कारणादधीतेरध्य
ध्ययनशब्दाच्च शिरोव्रतमध्ययनस्यैवांगमित्यर्थः अचीर्णव्रतः अननुष्ठितशिरोव्रतः न तस्य शिरोव्रतस्य मुंडकाध्ययने नियमस्तत्र हे
तुः सववच्चेति यथा सवानां सप्तहोमानां सौर्यादयः शतौदनांताः शाखांतरीयैकत्रनाम्नस्तदेवाथर्वणिकैकाग्निसंबंधाथर्वणिकानामा
थर्वणिकानामेव नियम्यंते तद्वदेतच्छब्दादधीते इति शब्दाच्च मुंडकाध्ययन एव शिरोव्रतस्य नियम इत्यर्थः तस्मात्सर्वत्र विद्यैका ३ दर्श त्र
यति च ४ सर्ववेदा यत्पदमामनंति इत्यादिवाक्ये निर्गुणस्य ब्रह्मणो वेदस्य सर्ववेदांतेषु एकत्वेन न द्विधापाः सर्वत्रैकत्वं दर्शयति तथा
ऽग्निमेतं कं सगुणस्य ब्रह्मणो वैश्वानरस्याप्यरेणुमात्रत्वेन संपादितस्य च्छांदोग्ये प्रसिद्धवदुपादानं यत्तेन मेवं प्रादेशमात्रं वैश्वान
रमुपास्ते इत्यत्रापि सर्वत्र वैश्वानरविद्यायाः एकत्वं दर्शयति तेन यथा च यथा निर्गुणस्य सगुणस्य वा ब्रह्मण एकत्वेन सर्वत्र श्रूयमाण
तान्नद्विधापारकत [redacted] नपा
शाखाविशेषरूपोपाख्यायिकानां सर्वत्र श्रूयमाणत्वादिदमवगम्यते सर्वत्रोपास्यर्थैनेषां श्रवणमिति तत्र श्रापाखोख्यायिकानामे
कत्वात्तदुपासनानामप्यैक्यमिति तत्समभिव्याहारादितरेषामप्युपासनानामभेदसिद्धिरित्यर्थः ४ उपासनैकत्वविचारस्य प्र
व योजनमाह उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ५ सर्वत्रोपासनानामेकत्वेऽप्येकशाखास्य विद्यायां कतिपयगुणाः प्रयुक्ताया
शाखांतरस्याधिकगुणानामुपसंहारोऽस्ति न वेति संदेहे यत्र पाठतो गुणाः श्रुतास्तैरेवाकांक्षाशांतेर्नोपसंहार इति प्राप्ते क्रमः

स॰ वृ॰ समानेऽउपासने गुणोपसंहारो युक्तः कुतः अर्थाभेदात् उपास्यगुरोर्निर्वर्त्तस्य उपासनरूपार्थस्य सर्वशाखास्वभिन्नत्वात् न ह्ये
१२ कमेवोपासनं गुणांतरमपेक्ष्य तेनापेक्ष्यते चेति युक्तं विधिशेषवत् यथाग्निहोत्रस्य सर्वत्रैकात्तच्छेषाणामुपसंहारस्तद्वदेतस्यः
अत्र पूर्वपक्षे पूर्वाधिकरणप्रयोजनस्य गुणोपसंहारस्यासिद्धिः फलं सिद्धांते तत्सिद्धिरिति बोध्यं तस्माद्योनाघविशेषणादेतुना
स कृतत्वोपासने कर्मविचारस्य फलं सिद्धौ इदानीं चारतनाद्विशेषस्य उपासनेनासाधकत्वापवादार्थमाह अन्यथात्वं शब्दादि
ति चेन्नाविशेषात् ६ बृहदारण्यके प्रपठ्यते उद्गीथब्राह्मणे क्षेत्रज्ञस्य यास्तामसवृत्तयः ते असुराः याश्च सात्त्विकवृत्तयस्ते देवास्ते
षां ह देवासुराणामन्योन्यस्पर्द्धा नाम तमोवृत्तिसमुद्भवः सात्विकवृत्तिसमुद्भवः सात्विकवृत्त्युद्भवश्च नाम तद्वृत्त्यनुद्भवश्चैव स्वरूपं प्राजापत्या।
ते ह देवाः सामभक्तिरूपेणोद्गीथेनोद्गातृकर्मणा असुरान्जयं करिष्याम इति बुद्ध्वा वाचं घ्राणं चक्षुः श्रोत्रं मनश्चोचुः त्वमस्माकमौ
द्गात्रकर्मोद्गीथं कुर्विति ते च वागादयस्तथास्त्विति उक्तवन्तः कर्मणि प्रवृत्तास्तान्ज्ञात्वा असुरास्तदभिज्ञास्तैर्भिर्देवाः स्वजयं करिष्यन्ती त्र
ति बुद्ध्वा ताडितवंतस्ते च वागादयस्ताडिता इति वागादीन्निरस्य मुख्यप्राणमूचुः त्वं न उद्गायेति अथ हेममासन्यं प्राणं देवा ऊचु
स्त्वमस्माकमुद्गाता भवेति स प्राणस्तथास्त्वित्युक्त्वा कर्मणि प्रवृत्तस्तं चोद्गातारं प्राणं प्राप्य हंतुकामा असुराः पाषाणं प्राप्य वेग
वान् लोष्ट इव विशीर्णा व्यपवा अभूवन्निति प्राणस्तुतिं कृत्वा उद्गीथकर्त्तारं प्राणमुपास्यं दर्शयतीति एवमेव छांदोग्येपि श्रूयते
तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्यामः तत्र पूर्ववद्देवासुरस्पर्द्धायां देवा उद्गीथपालास्तितमोद्गात्रकर्माहृतवंतोऽनेन कर्म
णानेनान् तामसवृत्तिलक्षणानसुरानभिभविष्यामः इत्युपक्रम्य पूर्ववद्वागादीन्निंदां कृत्वा अथ ह य एवायं मुख्यः प्राणस्तमुद्गी स्त
थमुपासांचक्रिरे देवा इति सर्वत्र वागादिशब्देन तदभिमानिदेवतापरा बोध्याः तत्र संशयः किमनयोर्विद्ययोर्भेदः उत अभेद इति अ

२

एम
१२

त्रपूर्वपक्षेगुणोपसंहारःफलंसिद्धांतेविद्याभेदान्नोपसंहारइतिभेदः चोदनाद्यविशेषादिसूत्रसमाख्याया अविशेषाद्विद्यैक
मित्युक्तंतत्रैवाप्युद्गीथविद्येतिसमाख्याया अविशेषात् विद्यैक्यमेवेतिदृष्टांतसंगत्याप्राप्तंनिरस्यतिसिद्धांती अन्यथात्वंश
ब्दादितिचेदिति छांदोग्यबृहदारण्यकयोःप्राणस्यान्यथात्वंभिन्नाकारत्वंबृहदारण्यकेउद्गीथकर्तृत्वंछांदोग्येउद्गीथकर्मत्व
कर्तृत्वमित्येवंरूपंगम्यतेतथाचकर्तृकर्मणोर्भेदेनोपास्यभेदाद्विद्याभेदःस्यादितिशंकार्थः पूर्वपक्षीपरिहरति नेतिकुतः अविशेषात् दे
वासुरसंग्रामोपक्रमादीनांबहूनामर्थानामुभयत्राविशेषात् छांदोग्येप्युद्गीथमुपासांचक्रिरइतिप्राणस्योद्गीथकर्मात्मकत्वश्रु
त्या लक्षणयोद्गीथकर्तृत्वेनैवव्याख्येयमितिविद्यैक्यमितिप्राप्ते सिद्धांतयति नवाप्रकरणभेदात्परोवरीयस्त्वादिवत् ॥६॥ नैवात्र
विद्यैक्यंयुक्तंप्रकरणभेदात् उपक्रमभेदादित्यर्थः तथाहि ओमित्येतदक्षरमुद्गीथमुपासीतेत्योंकाराद्येकवर्णरूपावयवविशिष्टस्य
सामभक्तिविशेषोद्गीथस्यावयवभूतमोंकारमुपास्यमुपक्रम्यतस्यैवोंकारस्यपृथिव्यादिभ्यःसारतमत्वादिगुणानुक्त्वापुनरुद्गीथा
वयवमोंकारमनुसृत्यदेवासुराअभिकारूपेणप्राणमुद्गीथमुपासांचक्रिरेइत्याह अत्रत्योद्गीथशब्देनोद्गीथावयवओंकारस्य
वक्तव्यःउपक्रमउद्गीथपदेनतस्यैवोक्तत्वात् अन्यथाउद्गीथपदेनसकलसामभक्तिग्रहणेउद्गीथकर्तृत्वलक्षणयाचोपक्र
मोबाध्येत तस्मात्तत्रोद्गीथावयवभूतोंकारप्राणउपास्यः बृहदारण्यकेतूद्गीथकर्ताप्राणउपास्यइतिनयोर्विद्ययोर्भेदःइतिपरोवरीय
छो स्त्वादिवत् यथोद्गीथोपासनत्वसाम्येप्येकत्रोद्गीथेपरमात्माध्यासेनप्राणाद्यपेक्षयापरत्ववरीयस्त्वादिगुणकमुपासनंसएषपरो
वरीयानुद्गीथइत्यादिवाक्यविहितमक्ष्यादित्यपुरुषगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनाद्भिन्नंतद्वदित्यर्थः ॥७॥ सं
ज्ञातश्चेत्तदुक्तमस्तितुतदपि ॥८॥ ननूद्गीथविद्येतिसंज्ञापरसकलत्वाच्छ्रावादयेविद्यैक्यमित्युक्तमितिचेत्तत्रोत्तरमुक्तंनवाप्रकरणभेदा

मित्योंकारत्वोद्गीथत्व ५

स.वृ. रिति सूत्रे संज्ञाकरणस्योद्देश्यत्वान्न विधेयसमर्पकत्वमिति भावः किंच न तत्संज्ञे फलं परोवरीयस्त्वाद्युपासनयोर्भिन्नयोरप्यस्ति
१०३ उद्गीथविधिरिति सूत्रस्यापि शब्देनाप्योपि दृष्टान्तः सूत्र्यते न पृथक्कस्मिन्कारकत्वे चोदितानां भिन्नानां कर्मणां कार्यैकसंज्ञात्वमस्ति
अतः प्रोद्देश्यसंज्ञैक्यं विधेयैक्ये अप्रयोजकमिति भावः तस्माद्व्यंशोदाम्पवाजशोनेपि शाखयोरुक्तविधयोर्भेद इति सिद्धं ॥ नन्वोमित्ये
तदक्षरमुद्गीथमुपासीतेत्युपक्रमे उद्गीथपदस्योंकारपरत्वनिर्धारणेनासिद्धान्तः कृतः तदुक्तं उपक्रमवाक्यस्यान्यथापि योजनासंभवे
न निर्धारणयोग्यत्वमित्याक्षेपं समाधत्ते आसेत्यसमंजसं ओमित्येतदक्षरमुद्गीथमित्योः सामानाधिकरण्यप्रतिभासोस्ति स किं नाम्नि ब्रह्म
दृष्टिवदध्यासः उत पङ्कजं तामरसमितिवदपवादः किंवा भूसुरो ब्राह्मण इतिवत्तुल्यधर्मावभासः अहोस्विन्नीलमुत्पलमितिवदुद्गी
छा थोंकारयोर्विशेषणविशेष्यभावावभास इति संशयः तत्र पूर्वपक्षे निर्धारणकारणाभावादनिर्धारितार्थकमिदमुपक्रमवाक्यमप्रमा
णमिति तन्मूलकस्य पूर्वाधिकरणसिद्धान्तस्यासिद्धिः फलं सिद्धान्ते तु ओंकारस्य प्रस्तावं प्रत्यनुवाकं प्रतिसामं चाध्येतेषु व्याप्तेः व्यापि
त्वात्केवलोंकार उपास्य इत्याकाङ्क्षायामुद्गीथावयवत्वेनोंकारो विशेष्यते ओमित्येतदक्षरमुद्गीथमुपासीतेति नितरां वोद्गीथमित्योंका
त्व रस्य विशेषणमित्येव समंजसं उत्पलस्य नीलत्वमिव न त्वध्यासादिपक्षग्रहणं युक्तमित्युपक्रमवाक्यस्य निर्धारितार्थत्वात्तन्मूलकस्य
सिद्धान्तस्य सिद्धिरिति बोध्यं सूत्रे त्वर्थवशब्देनाध्यासादिपक्षाणामसंभवः सूचितः तथाहि उद्गीथे ओंकारस्य ओंकारे चोद्गीथस्याध्या
सेनोपास्यत्वे उत्तरत्र विधीयमानादोंकारस्याप्युद्गीथरूपाद्युपासनाद्भिन्नमिदमुपासनमिति वक्तव्यं तथा च पृथक्फलकल्पनाप्रसं
गः सिद्धान्ते तु प्रमाणाभावः ओंकारोऽत्र विशिष्यते इति नापन्दोषः नापि द्वितीयः पक्षः ओंकारोद्गीथयोरन्यतरज्ञानस्यान्यतरज्ञान
बाधकत्वादर्शनात् नापि तृतीयः पक्षः ओंकारोद्गीथशब्दयोः पर्यायत्वाभावादिति तस्मात्तदेकदेशे दृष्टपदोऽप्यद्रसाद्विदुद्गीथप एम १०३

दंस्नावपवमोंकारं लक्षयतीति सिद्धं ॥ सर्वाभेदादन्यत्रेमे १० वाजसनेयके छांदोग्ये च प्राणसंवादे मुख्यप्राणस्य श्रैष्ठ्यगुणकस्योपा-
सनमुक्तं वाक्चक्षुःश्रोत्रमनोरेतांसि क्रमेण वसिष्ठत्वप्रतिष्ठात्वसंपत्त्वायतनत्वजनिमत्त्वरूपगुणयुक्तानि संकीर्त्यंते च वागादयः
प्राणाधीनस्थितिकत्वं तेषु निश्चित्य स्वनिष्ठान्वसिष्ठत्वादिगुणान्प्राणे समर्पितवंतः ३ सुक्तं वाचो हि वसिष्ठत्वं वाग्मिनो लोके सुखेन
वासदर्शनात् चक्षुषः प्रतिष्ठात्वं चक्षुष्मतः सुखेन पादप्रतिष्ठादर्शनात् श्रोत्रस्य संपत्त्वं श्रुतान्मनिर्धारणेन परमसंपत्तिदर्शना-
त्मनो हि भोग्याकारवृत्तिद्वारा भोग्यानामायतनत्वं पुरुषाकारेण परिणममाने रेतसि जनिमत्त्वं एवं कौषीतक्यादिशाखास्वपि प्रा-
णसंवादेषु अथातो निःश्रेयसादानम् एता ह वै देवता अहंश्रेयसे विवदमाना इत्यादिना प्राणस्य श्रैष्ठ्यमुक्तं वसिष्ठत्वादिगुणास्तु नोक्ताः
र निःश्रेयसं श्रेष्ठत्वं तस्यादानं निर्धारणं न हि छिन्नो पात्तयोगात्तदारभ्य तदस्याह अथ येति एता वागाद्यभिमानिन्यो देवता अहंश्रेयसे स्व-
कीयश्रेष्ठत्वाय स्पर्धः तत्र किं वसिष्ठत्वादिगुणानां क्वचिदुक्तानामन्यत्रोपसंहारोऽस्ति न वा संदेहे पूर्वमोंकारस्य समीपस्थगुणोप- ति
त्व वोपास्यत्वं दृष्ट्वा प्रियत्वेय गुणाश्रुतानां तरेवोपास्यत्वं प्राणस्येति नोपसंहार इति दृष्टांतेन प्राप्ते ब्रूमः अन्यत्र वसिष्ठत्वादिगुणानामश्रु-
तानामस्थले इमे वसिष्ठत्वादयो गुणा उपसंहर्तव्याः कुतः सर्वाभेदात् सर्वासु शाखासु प्राणोपासनस्य प्राणसंवादस्य चाभिन्नत्वा-
दित्यर्थः एकस्यामेव विद्यायां वसिष्ठत्वाद्यपेक्षानपेक्षाभावयोर्विरोधादिति भावः १० ननु प्राणस्य सविशेषत्वाद्भवतु शाखांतरीयगु-
णोपसंहारः ब्रह्मणस्तु निर्विशेषत्वेन स्वशाखागतधर्मैरेव तान संभवान्नान्यशाखाश्रुतानामानंदादीनामुपसंहार इति प्राप्ते उदाह-
रणोऽनास्तीत्यस्य समाधत्ते आनंदादयः प्रधानस्य ११ निर्गुणब्रह्मपरासु श्रुतिषु आनंदस्वरूपत्वविज्ञानघनत्वापरिच्छिन्नत्वाद्वितीयत्वा-
दयो धर्माः क्वचित्क्वचिच्छ्रूयंते तत्र संशयः किं यत्र ये धर्माः श्रुतास्तत्रैव ते ज्ञेयाः उत सर्वे धर्माः सर्वत्रोपसंहर्तव्या इति अत्र पूर्वपक्षे

केषांचिद्धर्माणामनुपसंहारो यथावत्तत्त्वं ज्ञानात्सिद्धिः फलं सिद्धान्तेन तत्सिद्धिरिति बोध्यं तत्रानंदादीनां नोपसंहार इति प्राप्ते ब्रूमः
स.दी. प्रधानस्य ब्रह्मण आनंदस्वरूपत्वादयो धर्माः सर्वत्रोपसंहर्तव्याः वेद्यैकेन विद्यैकत्वादिति पूर्वसूत्रोक्तहेतोरित्यर्थः ११ ननु नेति
१४ रीयके आनंदमयपरमात्मानं प्रस्तुत्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्ष आनंद आत्मेति प्रियशिरस्त्वादयो
धर्माः श्रूयन्ते तेषामप्यानंदस्वरूपत्वादि धर्माणामिव सर्वत्रोपसंहारः स्यात् ब्रह्मधर्मत्वाविशेषादित्यत आह प्रियशिरस्त्वा
द्यप्राप्तिरुपचयापचयौ हि भेदे १२ प्रियशिरस्त्वादिधर्माणां न सर्वत्र प्राप्तिः हि यतः प्रियमोदप्रमोदानंदाः परस्परापेक्षयोप
चितापचितस्वरूपाः उपचयापचयौ च प्रवर्तेते हि धर्मिधर्मिणोर्भेदे सत्येव स्वाभाविको संभवतः ब्रह्मणस्तु द्वितीयत्वान्नोपचिता
पचितत्वं प्रियादिधर्मस्वभावत्वे अस्वभावधर्माणां ब्रह्मज्ञानार्थेनोपसंहार इत्यर्थः चंदनं सुखं प्रियं पुत्रप्राप्तिजं मोदः स एव प्र
कृष्टः प्रमोदः सुखसामान्यमानंद इति तेषां तारतम्यं बोध्यं ++ एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या
सूक्ष्मया सूक्ष्मदर्शिभिरिति प्रकृत्य पुरुषे आत्मशब्दश्रवणात्तात्परमेव वाक्यं तस्यात्मनः श्रुतसामानाधिकरण्येन च तत्स्वरूपत्वेन
प्रतिपादनादिति भावः १५ आत्मगृहीतिरितरवदुत्तरात् १६ ऐतरेयके श्रूयते आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मि
षत्स ईक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजताम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः पृथिवी म
रो या अधस्तात्ता आप इति लोकानुक्त्वाह अंभ इति तद्व्याचष्टे श्रुतिरदोऽम्भ इति तदम्भः परस्ताद्दिवं दिवः परस्तात्तेन तस्य च परस्ता
द्यौरपि द्वर्तमानत्वं द्यौः प्रतिष्ठा आश्रयः सोऽम्भः शब्दवाच्यः स्वर्गमारभ्याधस्तनलोकाश्रयः द्युमध्ये रजोभिर्व्याप्तत्वादंभ इत्युक्तमित्यर्थः राम
अंतरिक्षलोकः सवितृमरीचिव्याप्तत्वान्मरीचयः स्यान्नभसोपरेक्ष्यपां बहुत्वं तस्मिन्नन्तः ++ भूतानीति पृथ्वीलोको मरः १४

इदंत्रुटिप
त्रं

अत्रभगवद्भिः सूत्रकारैरानंदमयस्यब्रह्मत्वंप्रियादीनांतद्धर्मत्वंचकृत्वेयंचिंताकृतातस्याअन्य
त्फलंबोध्यं तथाहि वेदैक्येविद्यैक्यादानंदादिधर्माणांसर्वत्रोपसंहारेसगुणब्रह्मोपासनेषु
भिन्नेष्वपिवेद्यस्यसगुणस्यब्रह्मणएकत्वेनोपासनैक्यापत्तावन्योन्यंगुणोपसंहारःस्यादितिशं
कानिरासःफलं उपासनानांविधिपारतंत्र्यादत्रयावद्गुणविशिष्टमुपासनंविधीयतेतत्रतावद्गु
णविशिष्टमेवकर्त्तव्यंतत्तत्फलस्यतेनैवसिद्धेः वस्तुपरतंत्रनिर्गुणविद्याफलस्याविद्यानिवृत्तेःया
वत्स्वरूपज्ञानमंतरेणासंभवात्सर्वत्रानंदादिगुणानामुपसंहारइतिशंकानिरसनप्रकारः १२ रा
उपास्यब्रह्मधर्माणांसर्वत्रनप्राप्तिरित्युक्तंतदपेक्षयाज्ञेयधर्माणामानंदादीनांसर्वत्रप्राप्तिरिति
विशेषमाह इतरेत्वर्थसामान्यात् १३ उपास्यधर्मापेक्षयाइतरेत्वानंदादयोधर्माज्ञानैकफलकाःस
र्वत्रोपसंह्रियंते अर्थस्यप्रतिपाद्यस्यब्रह्मणःसामान्यादेकत्वादित्यर्थः उपसंहारंविनायथावत्स्वरू
पविषयकमहावाक्यार्थज्ञानसाध्याविद्यानिवृत्तेरसंभवादितिभावः १३ आध्यानायप्रयोजना
भावात् १४ कठवल्लीषुपठ्यते इंद्रियेभ्यःपराह्यर्थाइत्यारभ्यपुरुषान्नपरंकिंचित्साकाष्ठासापरा

१०४ गतिरितितत्रसंशयः किमिमानिवाक्यानिभिन्नानिउतात्मपरमेकमेववाक्यमितिपूर्वपक्षेइंद्रियादि
परत्वविशिष्टस्यार्थादेरूपास्यस्यप्रतिवाक्यंभेदाद्विद्यायाभेदः फलंसिद्धांतेनिर्विशेषात्मप्रदर्शनपरमे
कमेववाक्यमितिविद्यैक्यंफलं अतएवपूर्वोत्तरपक्षयोर्विद्याभेदाभेदयोःपर्यवसानादस्याधिकरणस्यपा
दसंगतिः पूर्वंब्रह्मस्वरूपाणामानंदादीनामुपसंहार्यत्वंब्रह्मज्ञानोपायत्वंचिंतितमिदानीमब्रह्मरूप
स्यानुपसंहार्यस्यार्थादिपरत्वरूपधर्मस्यब्रह्मज्ञानोपायत्वमुच्यतइत्येकफलकत्वमवांतरसंगतिः
तत्रेमानिवाक्यानिभिन्नानीतिप्राप्तेब्रूमः आध्यानाय ध्यानसाध्यसाक्षात्कारायपुरुषएवार्थादि
भ्यःपरत्वेनप्रतिपाद्यतेइत्येकमेववाक्यंनत्विंद्रियादिपरत्वेनार्थादयःप्रतिपाद्याः प्रयोजनाभा
वान्नहींद्रियपरत्वेनार्थज्ञानंस्वतःकिंचित्फलंसाधयतिअतंप्रतिपाद्यभेदाभावान्नवाक्यभेदः
पुरुषज्ञानंफलहेतुरितितत्रैवोक्तंनिचाय्यतंमृत्युमुखात्प्रमुच्यतइति १४ एवंवाक्यस्यात्ममात्र
परत्वेफलवत्त्वंलिंगमुक्त्वाअपूर्वत्वमपिलिंगमाह आत्मशब्दाच्च १५

१०४
इदंत्रुटिपत्रं

यानिपृथिव्याअधस्तात्सातालात्मवृक्षलोकिनिताआपः इत्यर्थः नत्रसंशयः किमात्मपदेनहिरण्यगर्भउच्यतेउतपरमात्मेतिपूर्वपक्षेआ
त्मपदस्यपरमात्मपरत्वाभावात्तल्लिमिसत्यनेनानंतरादिधर्माणामत्रोपसंहारइतिफलंसिद्धांतेपरमात्मनएवग्रहात्तेनतल्लिमिसत्य
मत्स्यानंदादिधर्माणामत्रोपसंहारइतिमंतव्यं तत्रपूर्ववाक्यभेदभिर्पर्यालोचनापृथक्कृतनिपाघतंनास्तीत्युक्तंतर्हिप्रजापतेरनंका
ए यंदत्वादसादिपूर्ववाक्येहिरण्यगर्भस्यप्रकृतत्वात्सचात्मशब्देनोच्यतइतियुक्तं अन्यथावाक्यभेदप्रसंगादितिदृष्टांतसंगसाप्रासे
श्रुतः अस्मिन्सृष्टिवाक्ये आत्मशब्देनपरमात्मनएवग्रहीतिर्नाम्यस्मावत् यथाइतरेषुसृष्टिवाक्येष्वात्मनः आकाशः संभूतः
इत्यादिष्वात्मशब्देनपरमात्मनएवग्रहणंतद्वदत्रापिकुतः उत्तरात् सईक्षतलोकान्नुसृजाइतिसइमांल्लोकानसृजतेतीक्षणपूर्व
कलसृष्टलरूपात्तरविशेषणादित्यर्थः नंत्रविशेषणंपरमात्मन्येवमुख्यं श्रुतत्वेनबवगतमितिभावः अन्वयादितिचेत्स्यादवधार त्वेन ब
णात् १७ पूर्ववाक्यादिपर्यालोचनयाप्रजापतावेववाक्यस्यान्वयदर्शनान्नपरमात्मनोग्रहणंयुक्तमितिचेदत्रोच्यतेस्यादिति अ
ति त्रपरमात्मनएवग्रहणंयुक्तंस्यात् आत्मावाइदमेकएवाग्रआसीदितिसृष्टेःप्रागेकत्वावधारणस्यपरमात्मन्येवानसलादित्यर्थः
नचास्मिन्वाक्येलोकसृष्टेश्चप्रमाणाद्धिरण्यगर्भेमरगमयति अन्यथापरमात्मग्रहणेमहाभूतसृष्टिःश्रूयतेतिवाच्यंतथा
न्येतेनआदिसृष्टिश्रवणेपियथाआकाशवायुसृष्ट्युपसंहारस्तद्वदत्रापिमहाभूतसृष्टेरुपसंहारात्तस्मादस्मिन्वाक्येआत्मनः
परस्यैवग्रहणमितिसिद्धंतत्रक्ष्पस्यापरास्यात्मा आत्मगृहीतिरितरवदुत्तरात् बृहदारण्यकेकतमआत्मेतियोयंविज्ञानम
यः प्राणेषुहृद्यंतर्ज्योतिःपुरुषइत्यात्मशब्देनोपक्रम्य तस्यैवात्मनोसंगत्वादिकमुक्त्वासवाएषमहानजआत्मेतितस्यात्मतामुपसंह
रति छांदोग्येतुसदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमिति विनैवात्मशब्दंसन्मात्रमुपक्रम्यांतेसआत्मातत्त्वमसीतिब्रह्मात्मत

अयंभावः आरंभणाधिकरणे ब्रह्मातिरिक्तवस्तुजातस्य मिथ्यात्वसाधनादात्मान्यस्य सत्यदार्थत्वानुपपत्तेः ८+

मुपसंहरति नन्वत्र संशयः किमनयोर्वाक्ययोस्तुल्यार्थत्वमुतभिन्नार्थत्वमिति पूर्वपक्षे अनयोर्वाक्ययोरुपक्रमवैषम्याद्यभेदे
स॰ वृ॰ १५ न विद्यैक्यं भेदादात्मान्यगुणोपसंहारः किंतु बृहदारण्यके निर्गुणविद्यायां छांदोग्ये उपक्रान्तसत्तासामान्यब्रह्मत्वोपासनेन तिफले
सिद्धांते घारोग्यसदसदनात्मनस्त्वग्रहीति ः तत्र बृहदारण्यके आत्मपदेनात्मग्रहणवत् उत्तरत्र तत्त्वमसीत्युपसंहा
रबलादित्युभयत्रापि विद्यैकात्म्यादन्योन्यगुणोपसंहार इति पूर्वाधिकरणाभासे मवलौ यदि परत्वेपरि सद्भाविद्यैकामुक्तं तर्हि प्रकृ ९
ते उपक्रमभेदेन वाक्यभेदाद्विद्यैक्यं न स्यादिति प्रत्युदाहरणसंगतिरस्याधिकरणस्य बोध्या अन्वयादिति चेत्स्यादवधारणान्न
नूपसंहारबलात्सदनात्मग्रहीतिरिति संगत उपसंहारस्योपक्रमानुयायात् उपक्रमपरत्वं तत्रत्वादि साक्षेपांशार्थः परिहरति
स्यादवधारणादिति सत्सदनात्मनस्त्वग्रही नियुक्तस्यात्तत्सदेवेत्यादिश्रुतौपत्ता वधारणात् सत्तासामान्यस्य च सद्दितीयपत्वादवधा
रणानुपपत्तेः सत्सदनात्मनस्त्वोपक्रमः सदुपक्रमस्य ब्रह्मसत्तासामान्यपरत्वसंदेहे पि तत्त्वमसीति वाक्यशेषाद्ब्रह्मपरत्वनिर्णयः
न चैकशाखत्वाद्वैषम्य आत्मसच्छब्दाभ्यां जीवब्रह्मणोरुपक्रमादुभयमुभयोर्लक्ष्यमेवेनावैषम्यादिति तस्मादनयोर्वाक्ययोरैकार्थ्यमु
मितिसिद्धं कार्याख्यानादपूर्वं १८ वाजसनेयके प्राणसंवादे प्राणो वागादीन्प्रप्रच्छ मम किमन्नं किं वास इति ते प्रत्यूचुः यदिदं किंचा
श्वभ्य आकृमिभ्य आकीटपतंगेभ्यस्तत्तेन्नमापो वास इति तदनंतरं श्रूयते तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामंत्य
शित्वाचाचामंत्येतमेव तदनमनग्नं कुर्वतो मन्यन्ते तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते इति य
स्मात्प्राणस्यापो वासस्तस्मादस्मिन्नर्थे तच्छंदः विद्वांसः प्राणविदः श्रोत्रियाः श्रुताध्ययनसंपन्नाः भोजनात्पूर्वोत्तरकालयोरा
चमनं कुर्वंति तेनेनाचमनेनैतस्मादिदानींतनोपि प्राणविदेवं कुर्यादिति सर्वः छांदोग्येप्येवमेव श्रूयते तस्माद्वा एतदशिष्यन्तः पुर
विधिनाप्रवासनैतमेवानं प्राणमनग्नं आच्छादितं कुर्वतो मन्यंते चिंतयंति पूर्वे जनाः १+ राम १५

स्नात्वोपरिष्टाच्चाद्भिः परिदधातीति तस्मात्प्राणांप्रसर्पणावासस्त्वादित्यर्थः अन्नमशिष्यंतः प्राणविद आचमनं कुर्वंतः एनं कुर्वंति
क्रिमेतत्पत्र भोजनात् सर्वमूर्द्धं चाद्भिः प्राणां परिदधति आच्छादयंतीत्यर्थः तत्राचमनीयास्व ॥ स्य प्राणवासस्त्वध्यानमाचमनं च
प्रतीपेनेनत्रोभयविधाने वाक्यभेदप्रसंगादेकमेव विधेयं तत्रैकं किमाचमनं विधेयम् उत वासस्त्वध्यानमिति संशयः पूर्वपक्षे प्राणवि
द्यांगत्वेनापूर्वस्याचमनस्य विधेयत्वात् तस्याचमनस्यान्यत्र प्राणविद्यायामुपसंहारः फलं सिद्धांते त्वनुपसंहार इति मंतव्यं तत्र संदि
ग्धस्तद्रूपक्रमस्य वाक्यशेषान्निर्णयवदाचामतीति वर्तमानोपदेशस्य विधित्वसंदेहः आचामेदिति वाक्यशेषाद्विधित्वनिर्णयवद
निर्दिष्टानमनग्नतामिति मनः वासस्त्वध्यानमेवापूर्वं प्राणविद्यांगत्वेन विधेयं प्राणविद्यांगत्वेन श्वादिमयोर्दस्यान्नस्य प्राणाय
सन्नत्वेन ध्यानं विधीयते तत्र चैव तदाचमनमत्र विधेयं कुतः कार्याख्यानात् द्विजो नित्यमुपस्पृशेदित्यादिना स्मार्तेन विधिना सकला
नुष्ठानांगत्वेन भुक्त्यर्थं कार्यस्याचमनस्य प्राणविद्यायामपि प्राप्तस्याख्यानात् तदीयावस्य वासस्त्वविधानार्थमनुवादादित्यर्थः
१९ समान एवं चाभेदात् १९ वाजसनेयिशाखायामग्निरहस्ये शांडिल्यविद्या श्रुता तत्र गुणाः श्रूयंते स आत्मानमुपासीत मनोम
यं प्राणशरीरं भारूपमित्यादिना तस्यामेव शाखायां बृहदारण्यके पुनः श्रूयते शांडिल्येन दृष्टा विद्या मनोमयोयं पुरुषो भाः सत्यस्त
स्मिन्नंतर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंचेति भाः प्रकाशात्मकः स
त्यः परमार्थः तस्मिन्मनोमय पदप्रकृतिभूतमनः शब्देन प्रस्तुते हृदये अंतः यथा व्रीह्यादिर्यथा तावत्परिमाणः पुरुषोस्ति स एष
सर्वस्येशान इत्यादिगुणक इत्यर्थः तत्र संशयः किमग्निरहस्य बृहदारण्यकस्थयोरेनयोर्विद्ययोर्भेद उतैक्यमिति पूर्वपक्षे विद्य
योर्भेदात् गुणानुपसंहारः फलं सिद्धांते विद्यैक्यात् गुणोपसंहार इति वाच्यं पूर्वं प्राप्ताचमनानुवादेन वासस्त्वध्यानं विधेयमित्युक्तं

म.सू. १०६ रहस्यत्वेकवाक्यतयोरेकस्यानुवादकत्वमेकस्य विधायकत्वमिति तत्र नियामकाभावादुभयोरपि स्वानिकरस्य गुणविशिष्टविद्याविधायक
त्वमिति न परोऽभेदः अस्तु सुहृद्द्रोणनयोक्तक्रमः यथाभिन्नासु शाखासु विद्यैकगुणोपसंहारश्च भवति सर्वसमानेऽपि कस्यामपि शाखा
यां भवितुं युक्तः अभेदात् उपास्यस्य मनोमयत्वादिगुणकस्योभयत्राप्यभेदेन प्रत्यभिज्ञानादित्यर्थः एकैकस्यानुवादकत्वमे
कस्य विधायकत्वमिति तत्र नियामकाभाव इति तत्र अग्निरहस्ये बहूनां गुणानां श्रवणेन तत्रैव विद्यासत्ताविधिकल्पनात् बृहदार
अग्निरहस्योक्त ण्यके तु विद्यैकप्रत्यभिज्ञानार्थं तत्रोक्तमनोमयत्वाद्यल्पगुणानुवादेन सर्वेशानत्वाद्यगुणा विधीयन्ते इति न किंचिद्बाधकं तस्
मादुभयत्र शाण्डिल्यविद्यैकामिति सिद्धं ॥१९॥ सम्बन्धादेवमन्यत्रापि ॥२०॥ बृहदारण्यके सत्यं ब्रह्म हिरण्यगर्भात्मा सत्यं महदित्युपक्रम्य
तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष इति तत्र वर्तते हि यत्तु सत्यसंहिरण्यगर्भाख्यं सोऽसा
वादित्यः किं मण्डलमेवादित्यः नेत्याह य एष इति अक्षन्नक्षिणि तस्य सत्यस्य स्थानभेदेन आदित्यचाक्षुषपुरुषात्मनावस्थानमुक्त्वा आ स्य
दित्यपुरुषस्य सत्यस्य भूरिति शिरः भुव इति बाहू स्वरिति प्रतिष्ठा पादाविति व्याहृतिदेहत्वं सम्पाद्य तस्योपनिषदहरिति अहर्नाम त्व
मुक्त्वा तदनन्तरं चाक्षुषपुरुषस्य सत्यस्य पूर्ववत्व्याहृतिदेहत्वं सम्पाद्य तस्योपनिषदहमिति अहं नाम तत्वमुक्तं उपनिषच्छब्देन देवता
प्रकाशकरहस्यनामोच्यते अहः शब्दः प्रकाशवाच्यहं शब्दः प्रत्यगात्मवाचीतावहरहं शब्दौ क्रमेणादित्यचाक्षुषपुरुषयोर्नाम
नीति स्थितिः तत्र संशयः किमस्याः सत्यविद्यायोर्नाम्नोर्व्यवस्था प्राधान्यं कर्तव्यं उत नामद्वयस्य पुरुषद्वयेऽप्युपसंहार इति पूर्वप
क्षे उपसंहारः फलं सिद्धान्ते त्वनुपसंहार इति तत्र दृष्टान्तसंगत्या पूर्वपक्षयति सम्बन्धादिति यथा शाण्डिल्यविद्याया एकशाखायां
विभागेनाधीताया एकविद्यात्वसम्बन्धादन्योन्यं गुणोपसंहारः पूर्वमुक्तः एवमन्यत्रापि सत्यविद्यायां भवितुं युक्तं एकविद्यात्वसम्बन्धे एम
१९

धादिसर्वं ॥ २० ॥ समाधनेनवाविशेषात् ॥ २१ ॥ नैवनामद्वयस्यपुरुषद्वयेउपसंहारः विधेयोऽव्यवस्थादिस्वरूपस्थानविशेषादिसर्वं
तथाहि पाण्डवस्तस्मिन्मंडलेपुरुषस्तस्याहरितिनामसुक्तंतस्येतिनच्छेदनादित्यमंडलावच्छिन्नस्यैवपाप्मशोतस्यैवाहर्नाम
त्वंयुक्तं एवमहन्नामत्वंचाक्षुषपुरुषस्यैवचक्षुरूपस्थानविशेषावच्छिन्नस्यैवनच्छेदनपाप्मशोदिति तस्मादनयोर्नाम्नोर्म
व्यवस्थितिः ॥ दर्शयतिच ॥ २२ ॥ एकविद्यानिर्देशेऽपिसम्भृत्यादिनादित्यपुरुषस्यरूपमुक्त्वातद्रूपमक्षिपुरुषेतिदिशतितस्यैतस्य
तदेवरूपंयदमुष्यरूपमितिअयमतिदेशस्ततोऽस्यसत्यविद्यास्थलेस्थानभेदान्नोपसंहारइतिदर्शयति अन्यथास्थानभेदेऽपि
गुणोपसंहारांगीकारेअयमतिदेशोनिरर्थकएवस्यादिति तस्मान्नाम्नोर्व्यवस्थितिसिद्धा ॥ २२ ॥ संभृतिद्युव्याप्त्यपिचातः ॥ २३ ॥ प
रिशिष्टापरशान्मकरविलग्नेस्थपुरुश्रूयते ब्रह्मज्येष्ठावीर्यासंभृतानिब्रह्माग्रेज्येष्ठंदिवमाततानेतिवीर्याणीवीर्याणिपराक्रमवि
शेषरूपाणिविभूतिविशेषाणिब्रह्मज्येष्ठमनन्यापेक्षकारणोपपतानिब्रह्मज्येष्ठानिलौकिकस्त्ववीर्याणिबलवद्भिर्मध्येभंगः स
भवतिब्रह्मवीर्याणांतुनैवमित्याह संभृतानीति सर्वाधिकेनब्रह्मणानिर्विघ्नंसमृद्धानीत्यर्थः तेनज्येष्ठंब्रह्मअग्रेद्युप्रादिजन्म
नः प्रागेवदिवंस्वर्गमाततानव्याप्तवन्नित्यमेवसर्वव्यापकमित्यर्थः एवंसंभृतिद्युव्याप्त्यादयोगुणाःब्रह्मणःश्रूयंते तत्र
संशयः किंतेषांगुणानामंतरादित्यादिनिर्दिष्टेषुशांडिल्यादिब्रह्मविद्यासूपसंहारउततद्गुणविशिष्टोपासनंपृथगेवात्रविधी
यतइतितत्रोपसंहारइतिप्राप्तेपूर्वोक्तन्यायमतिदिशति संभृतीति संभृतिश्चद्युव्याप्तिश्चसंभृतिद्युव्याप्तिप्रयास्थानभेदा
न्नाम्नोर्व्यवस्थाएवंसंभृत्यादयोपिशांडिल्यादिविद्यासुनोपसंह्रियंते अतएवस्थानभेदादेवसर्वंशांडिल्यादिविद्यासुहृ
दयायतनत्वंब्रह्मणःश्रुतंनैवमत्रतस्मात्संभृत्यादिगुणविशिष्टमुपासनांतरमितिसिद्धं अस्यानिदेशत्वान्नपृथक्त्वमगसा

ना
सू॰ वृ॰ घुपेरुषा २३ पुरुषविद्यायामिव चेतरेषामनाम्नानात् २४ अस्ति तांडिनां पैंगिनां च रहस्यब्राह्मणे पुरुषविद्या तत्र पुरुषो यज्ञत्वेन
१७ कल्पितस्तस्यायुस्त्रेधा विभज्य सवनत्रयं कल्पितं तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनं ततः पराणि चतुश्चत्वारिं
शद्वर्षाणि माध्यंदिनसवनं ततः पराण्यष्टाचत्वारिंशद्वर्षाणि तृतीयसवनं पुरुषविद्याविदः षोडशोत्तरशतवर्षजीवित्वादि
त्पिपासादित्वं दीक्षात्वेन कल्पितं तैत्तिरीयकेपि तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममित्यादिना पु
तत्र रुषो यज्ञः स्वरूपितं संशयः किमनयोर्विद्ययोरन्योन्यगुणोपसंहारोस्ति न वेति तत्र पूर्वपक्ष उक्तः तैत्तिरीयसंसत्त्वादिगुणाः शांडिल्यविद्या
स्वोपसंहियन्त इति प्राप्तं तत्र असाधारणगुणप्रत्यभिज्ञानाभावात् रहनुमरणस्यावभृथत्वेन कल्पितस्य गुणस्योभय
त्रसत्त्वेन प्रत्यभिज्ञानाद्गुणोपसंहारो युक्त इति प्रत्युदाहरणेन प्राप्ते उत्तरं नान्योन्यगुणोपसंहार उपास्यरूपभेदात्तदाहदा
स्य पः पुरुषेति तांड्यादिशाखा पुरुषविद्यायां यथा गुणाम्नानं न तथेतरेषां तैत्तिरीयकाणां पुरुषविद्यायां गुणाम्नानाभावा
दित्यर्थः अन्यत्र पुरुषस्यैव यज्ञत्वेनोपास्यः तैत्तिरीयके तु विदुषः पुरुषस्य प्रसिद्धयागीयत्वस्य पुरुषान्मादिषु यजमानत्वा
दिकल्पनयोपास्यत्वादेवं बहुतरोपास्यभेदाद्रूपते[redacted]न तद्द्वाविद्याभेदान्नान्योन्यगुणोपसंहार इ
तिपत्त्वं भयगुणस्योभयत्र सत्त्वात्प्रत्यभिज्ञानमिति तन्न बहुगुणभेदे एकस्य प्रत्यभिज्ञापकत्वाभावादिति किंच तैत्तिरीय त्वा
के पूर्वमात्मविद्यामुपदिश्य तच्छेषत्वेन पुरुषयज्ञ उपदिश्यते तस्यैवं विदुष इति तत्सन्निधौ श्रवणात् अन्यत्र तापुर्षद्वि॰
फलकः पुरुषयज्ञः स्वतंत्र[redacted]इत्यनयोर्भेदस्यैवन्याय्यत्वाति २४ वेधाद्यर्थभेदात् २५ अस्त्याथर्वणिकानामुपनिषदारंभे
मंत्रपठनं सर्वं प्रविध्य हृदयं प्रविध्य धमनीप्रवृज्य शिरोभिवृज्य त्रिधा विभक्त इत्यादि तांडिनां देव सवितः प्रसुव इत्यादि शाक राम
१७

पनिकानां भेत्ता भोहरितनीलोसीसादि नेनिर्णयकारणं शान्तोमित्ररस्यादि यजमानेन पिनाकनूपनिषद्रांभेद्यवर्णपञ्चाग्नयोणपद
नेरेवाहवेसनेनिषेदुरितादि कावीनकोमाममग्निष्टोमम त्रायमाणं ब्रह्मवा अग्निष्टोमो ब्रह्मवनदहन्ब्रह्मणोवनेनब्रह्मोपपत्तिनेममनत
मानुर्वीत पयनदहरूपपंतीसादि अथमर्थः आभिचारिककर्मरेवनामभिचारकृतोपत्ते हेदेवनेमद्वियोः सर्वमंगंप्रविश्य
विदारयद्धरयं च विदारयधमनीः शिराः प्रनन्यभिंदितस्य शिरस्त्राभित्ताभिंधिस्य वंमद्विपुल्लिधा विभक्ता विश्लिशेभवत्तिसर्वः
हरिनरुद्रनीललंबनीलासीतोद्रः संवायनेमित्रः सर्पः शंसुरवकराभूपादिति विद्यार्थोशान्ति अग्निष्टोमो ब्रह्मसत्रेस पस्मिन्नर
निक्षिपत नरदहरपिब्रह्मनतोपरनरहहपपंति अहनिर्वेसकर्मानुति इनितब्रह्मरोगवतोधनेनब्रह्मपरमुपपत्तिनेत्रक्रमेणम्
नतंमुक्तिमाप्नुवंतीत्यर्थः तत्रसंवादः किमिमंसर्वंप्रविश्यसादयोमंत्राः प्रवर्ग्याहीनि चकर्माणि तत्र तु पनिषद्धक्ता विद्यास्पसं
क्लिपरनेवेति तत्रपूर्वेपथापुरुषयज्ञस्यास्माविद्यासन्निधानात्तत्वेषतेनर्धमंत्रागोक मेणांचनत्तद्विद्यासन्निधानात्तत्वे
पत्वेनोपसंहारास्तीतिद्वंतेनमासत्रमः नेपामुपसंहारो विद्यासुकुतः वेधाद्यर्थभेदात् सर्वप्रविश्यसादिमंत्रप्रकाशिता
नां वेधादीनामर्थानामभिचारकर्मादिसमवेतानां भेदात् विद्यासमवेतत्वादिरसंभवः तथाचाभिचारकर्मादिसमवेता यमं
कारानसामर्थ्यलक्षणलिंगसन्निधिभ्यां तु वेलेतिरस्कृत्यसमंत्राणामभिचारादिकर्मांगत्वंसंपादयतीतिविद्याशेषत्वंप्रवर्ग्यादिक ने
र्मणांसन्निधेर्वेलीयसा श्रुत्यादिनाज्योतिष्टोमादौ विनियुक्तानां न विद्याशेषत्वमितिभावः २४ हानौ तूपायनशब्दशेषत्वात्कु त
शाछंदः स्तुत्युपगानवत्तदुक्तं २५ तांडिनां रहस्य अश्व इव रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरी
रमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति तथैव तथायणा श्रुतिः तथा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैति

स.३. ति यथाश्वो जीर्णानि रोमाणि रजोभिः सह त्यक्त्वा स्वच्छो भवति एवमहमपि पापं सर्वं विधूय निर्मलः सन् यथा वा चंद्रो राहोर्मुखा
१.८ त्प्रमुच्य भास्वरो भवति एवमकृतं नश्वरं वा तद्रूपेणानादिसिद्धशरीरं धूत्वा सर्वमतित्यज्य स्वच्छः सन् कृतात्मा कृतकृत्यः ब्रह्मात्मकं लो
त्दे कमभिसंभवामि अभिमुख्येन प्राप्नोमीत्यर्थः ताण्ड्यशाखिनः पठंति तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्वि
षंतः पापकृत्यामिति तस्य मृतस्य विदुषः परस्वं यः तत्पैतृको धनादिकः पश्यंति तत्सुकृतदुष्कृते विधुनुते तेन तस्यापि दायज्ञातयः सु
कृतमुपयंति अप्रियाः दुष्कृतमिति तत्तेन विद्याबलेन विद्वान्सुकृतदुष्कृते विधुनुते सजातिसत्कपालपार्विनियोगमाह नेस
ति तस्मादुपासकानेद्वष्ट्र इति श्रुतितात्पर्यं तत्र शाकटायनिनः श्रुतौ तु पादानमात्रं पुण्यपापयोः श्रुतं तत्र विदुषस्त्यागं विना
न संभवतीति पुण्यपापत्याग आक्षिप्यते यत्र तु ताण्ड्याथर्वणवाक्येषु पुण्यपापत्यागमात्रं श्रुतं तत्र कौषीतकिपाठेउपादानमन्य
त्र श्रुतमत्रोपसंह्रियते न वेति संदेहे पूर्वपक्षो विद्यांतरत्वान्निप्रकर्षासिद्धिः फलं सिद्धांते तूपादानस्योपसंहारात् विद्यास्तु
तिप्रकर्षसिद्धिः उपासकस्तु न विद्यास्तु संशये हि श्रुतावुपासकः पुण्यपापे संजतिन्नान्यः हपारीयेत इत्युच्यते सा च स्तुतिः स
प ४ ताहगुणनत्वादयोपास्य गुणोपसंहारप्रसंगेन तु सर्वगुणोपसंहारो विचार्यत इति प्रासंगिकी पादसंगतिः तत्र पूर्वापूर्वविद्या
सन्निधौ श्रुतस्यापि मंत्रादेर्विद्यायामसामर्थ्यादनुपसंहार उक्तः एवं क्वचित्कौषीतकिरहस्यहानसन्निधौ श्रुतस्यापि उपादान
स्य उपादानमंतरेणापि तत्रस्मीहानसंभवेन हानस्योपादानोसामर्थ्याभावान्नोपसंहार इति दृष्टांतेन प्राप्ते सू हानौ तु केवलस्य वा पपादन ३
चीनयात्र केवलहानौ श्रुतायां तस्यां तत्रोपादानमुपसंहर्तव्यं कुतः उपायनशब्दशेषत्वात् अश्वरोमविधूननदृष्टांतेनोक्तस्य पु
ण्यपापहानेन नापेक्षितस्योपादानात्मकस्योपायनस्य तद्धानशेषत्वादित्यर्थः ज्ञानात्सर्वेषां पुण्यपापयोर्नाशउत्तरयोरश्लेष एम
हानस्य नाशत्वाभावेन विधूतयोः पुण्यपापयोरन्यत्रावस्थानरूपोपायनसापेक्षत्वादुपायनं क्वचिद १८
पि हानसन्निधौ श्रूयमाणं केवलहानश्रवणेऽप्याक्षिपति पुण्यपाप + १

इति फलाप्याप्येव स्यात् अतो हानं विद्ध्यान्यत्राभावः तत्तुल्यकर्मप्राप्तिहपादानमिति फलतो दृष्टमनयोः पुण्यपापयोर
मन्त्रसंचारान्मकोपादानस्य सुखस्यापगात् तत्र शब्दशब्दन हानावुपायनोपसंहारस्य वस्तु सर्वत्वं संचितमिति बोध्यं शाखांत
रत्वाद्विशेषः शाखान्तरस्यपेक्षितः उपसंहरणीयः तत्र दृष्टान्तमाह कुशाछंदस्तावदिनानत्रकुशादृष्टान्तो यथा कुशा वानस्प
त्यास्य स्वारभावान्विनाभुतो हे कुशाः समिद्रूपाः सूर्यवानस्पत्यास्यामायजमानं रक्षतेति यजमानप्रार्थनेनवनस्पतियोगित
त्रि नत्वासामान्यतमितत्वश्रवणाच्छाकरायणिनां औदुंबराइति शाखान्तरीयाविशेष आश्रितः औदुंबराः कुशा इति आश्वलाय
नो यथा छंदोभिः स्तुवीत इत्यत्र देवासुरछंदसामविशेषेणप्राप्तौ पर्यग्नि रेव छंदांसि पूर्वाणी[illegible] नि पैंगिश्रुत्या नियमः
स्तुतिरवृत्तो यथा षोडशिनः पात्रविशेषस्य ग्रहणे अंगभूतं स्तोत्रं करोति कर्तव्यमिसाकांक्षायां षोडशिनां कालाविशेषप्रा
प्तेः समयाध्युषितः स्तूयते षोडशिनं स्तोत्रमुपाकरोतीति तेन तैत्तिरीयकवाक्यात् कालविशेषधीर्भवति एवं भूतायाआम्नाता श्रुतेर्यो
कालविशेषधीरिति उपगानदृष्टान्तो यथा ऋत्विज उपगायन्तीति सामान्यवाक्ये शाखान्तरीयनाध्वर्युरुपगायतीति विशेष
मपेक्ष्याध्वर्युवर्जिता ऋत्विज उपगायन्तीत्येतनद्यं परत्यानि श्चीयत इति तथा यथा कुशादिषु श्रुत्यं तगतं विशेषान्वयः त
था हानावुपायनान्वयस्य सर्वः कुशादिसामान्यश्रवणाच्छाखान्तरीयविशेषसापेक्षमिसंगीकर्तव्यमनिरपेक्षत्वे अशेषदोषप्र
दुष्टविकल्पः स्यात् स इह चसामान्यवाक्यस्य विशेषसापेक्षत्वं जैमिनेरपि संमतमिसाह तदुक्तमिति पूर्वमीमांसायां जैमिनिना
तदुक्तमिसर्थः न यदि हि अपितु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यादिति जैमिनिसूत्रं अस्यार्थः आ
दि श्रावयेति चतुरक्षरमस्तुश्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं येयजामहे इति पंचाक्षरं द्व्यक्षरो वषट्कारएष वै सप्तदशः प्र

प्रीमा
अप्राप्तस्य प्राप्तिः १ प्राप्तस्य निषेधः २ प्रमाणस्याप्रामाण्यं ३ अप्रामाणस्य स्वीकारः ४ श्रुतस्य हानिः ५ अश्रुतस्य परिग्रहः ६
ब्रीहिककेके
नियमत्त्व प्रयोगेऽप्यधिकता ते प्रामाण्यस्वीकारः। प्रामाण्यपरित्यागः। पुनः प्रयोगे ब्रीहिमुपादाने स्वीकृतस्यास्वीकारः ७ अस्वीकृतस्य स्वीकारः ८=
कोद्रिकमे स्वीकृताप्रामाण्यपरित्यागः। [illegible] प्रामाण्य [illegible] ते चलारो दोषा एवं यववाक्येपि

पर्युदासः सदृग्ग्राही

स्तु.वृ. ज्ञापयितिर्यज्ञमन्त्रायतत्र्श्लनारभ्याधीनवाक्यं श्रुतेनानुयाजेषु येयजामहे करोतीति विशेषवाक्यंन स्ववाक्यस्य शेषः स्यात्
१९ स्थानत्वेनः पर्युदासार्थंनयाअनुयाजव्यतिरिक्तेषु यजतेषु सप्तदशाक्षरगणः प्रयोक्तव्यइत्येकोविधिर्भवति यदिनञोनिषे
धकत्वेनसामान्यवाक्यविशेषवाक्येनयेयजेनसामान्यवाक्येनविहितस्यगुणस्यनिषेधादनुयाजेषुतस्यविकल्पः स्यात्सः
चान्याय्योविधीनामित्येकरशतवृस्यादितिप्रजापतिरितिस्तुतिस्तोहिलिंगात्मासप्तदशाक्षरेति अपाउदाहृतिश्रुतिर्थेवकिं वा
पुरायपापयोर्विधूननंहानमाभिप्रेतंउततयोः फलतत्क्षालनमिति विशेषफलतत्क्षालनमेवतिनपुरुषान्तरेतयोः फलह
नुत्वमितिप्राप्तेब्रूमः हानावेवार्थविधूननशब्दोवर्तितुमर्हति उपायनशब्दशेषत्वादुपायनशब्दस्तान्निधोविधूननशब्दस्य
श्रुतत्वादित्सर्थः उपादानात्मकोपायनस्यहानेविनाअसंभवाद्विधूननशब्देनधूञ्कंपनइतिधातुजन्येनचलनेनाचके
नापिहानमेवलक्ष्यमितिभावः ननूपायनशब्दसान्निध्येश्रूयमाणविधूननशब्दस्यहानिलक्षकत्वेपिकेवलविधूननश
ना दस्यनहानलक्षकत्वमितिशंकांकुशापरइत्यादिनाकरोतियथाकुशाशरस्थलेशाखान्तरीयविशेषश्रूयमाणनिर्णीयकत य
येहापिक्वचिद्विधूननसन्निधौश्रूयमाणमुपायनंसर्वत्रविधूननस्यनिर्णायकमित्सर्थः नउक्तमितिपूर्वव्याख्येयः २६
सांपरायेतर्तव्याभावात्तथाह्यन्ये २७ पूर्वंविद्यायाः कर्महानिहेतुत्वंसिद्धंकिंताकेवलहानश्रवणोउपायनस्यापसहारउक्त
हानि इदानीविद्यायाःकर्महेतुत्वंनास्तीत्साक्षेपात्संगतिः पर्यंकस्यब्रह्मोपासकस्यदेहत्यागानन्तरंदेवमार्गेणब्रह्मलोकंगति
स्य पर्यंकब्रह्मसमासपर्यंगच्छतोमार्गमध्येविरजानदीतरणानंतरंकर्महानिःश्रूयते विरजानदींमनसैवात्येतितत्सुकृत
दुष्कृतेविधुनुतइतितन्नसंशयः किंविरजानदीतरणानंतरंकर्महानिरुतदेहत्यागात्प्राक्कालइतिपूर्वपक्षेमरणात्प्राक्काली एम
१९

हेतुत्वमिति विद्याया हानि[redacted] हेतुत्वासिद्धिः फलत्वं सिद्धं ते विद्यासामर्थ्याज्जीवत एव कर्महानि १+

न विद्यां विना नदीतरणस्येव कर्महानिरिति न सिद्धिरिति भेदः तत्र नन्स्तु कृत इत्यत्र से न तारितं सर्वं नाम्नां तस्मादर्थकः

त लेन हेतुत्वं वा विना न दीनतरणस्येवाम्ब रहितस्य कर्महानिहेतुत्वमिति गम्यते तथा च नदीनतरणानन्तरमेव कर्महानिरि

तिमार्गे सर्वम्ः सोपायेपरलोकसाधनीभूतविद्याकाल एव कर्महानिर्युक्ता कुतः तत्र नामाभावान्न दीनतरणानन्तरपुण्यपा

पकर्मणानन्तस्य निर्वर्तस्य फलस्याभावादिसर्थः अत्रापि विकल्पः किं नदीनतरणानन्तरं कर्मणां निवेश फलस्य लाभा

वसर्पनमक्षीणत्वं कर्मणो उच्यते उत नदीनतरणं विना कर्मक्षयहेतोरभावाद्वा आद्यस्तत्रोक्तो हेतुर्बोध्यः द्वितीयस्त्वसिद्धः

कर्मक्षयहेतोर्विद्यायां सत्वात्कर्मक्षयं विना नदीनतरणानुपपत्तेश्च न च सर्वनाम्नां नदीनतरणस्य हेतुत्वं भ नोतिर्युक्तास्य वेना

न्तः श्रुत्यन्येन श्रुतं विद्यापरामर्शित्वादिति तस्मात् सर्वं ज्ञानत एव कर्मक्षयान नदीनतरणानन्तरं पर्यस्तेन इति मन्तव्यं तथा से केशा

विनसत्वाद्यारप्यजीवद्दशायामेव कर्मक्षयमभ्युपगरोमणीत्यादावधीयते अतश्च जीवत एव विद्यासामर्थ्यात्कर्मक्षय इति

२५ तद्भपाविरोधात् २६ छन्दतः स्वच्छया विद्यानुष्ठानं जीवत एव न हेतुकः कर्मक्षयो जीवत एव युक्तः सतिहेतौ कार्योपविनवा

योगात् एवं सति विद्या कर्मक्षययोर्निमित्तनैमित्तिकभावत्वाज्जादिश्रुत्योरुभयोरविरोधो भवतीत्यर्थः ब्रह्मप्राप्तेर्देहत्यागवि

नानुपपत्तेः श्रुतेः चानुपपन्नभावात् जीवत एव कर्मक्षय इति भावः तस्माद्विद्याफलत्वं कर्मक्षयस्येति सिद्धं २८ एवं प्रसंगा

गतो विद्योदयानन्तरमेव कर्महानमिति निरूप्य यथाहानसन्निधौ किञ्चिद्रूपमाणमुपायनं सर्वत्रोपसंह्रियते तथाहानसन्निधौ क्व

चिद्रूपमाणमुपायनः पर्यासर्वत्रोपसंहर्तव्य इति दृष्टान्तेनाभिप्राय समाधत्ते गतेरर्थवत्वमुभयथान्यथा हि विरोधः २९

कर्महानसन्निधौ क्वचिदुपायनः पर्याश्रुतः क्वचिन्न श्रुतो निर्गुणविद्यास्थले तत्र देवयानोपसंहारोऽस्ति न वेति संदेहे अस्तो किं

नतु कर्मक्षयस्य विद्याफलत्वे ब्रह्मप्राप्तेरिव देहत्यागोत्तरकालीनत्वं स्यादत आह छेद+६

निवृत्तो भेदभ्रमः । गतेर्देवयानस्यार्थवत्त्वं उभयथा विभागेन भवितुमर्हति क्वचित् सगुणविद्यायां देवयानमार्गोऽस्ति क्वचिन्निर्गुणवि
द्यायां नेति अन्यथा सर्वत्र देवमार्गोपसंहारांगीकारे विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यं प्रसंगभिन्नब्रह्मलक्षणं
निरतिशयमुपैतीति श्रुतिविरोधः स्यादित्यर्थः ॥ २९ ॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥ क्वचिद्विद्यायां गतिरर्थवती क्वचि
न्नेति गतेरुभयथाभाव उपपन्नः तल्लक्षणार्थोपलब्धेः सा गतिर्लक्षणं कारणं यस्य सगुणविद्याफलस्य पर्यंकस्थब्रह्म
प्राप्तिरूपस्य लोकांतरवर्तिनोऽर्थस्य तस्य श्रुतिषूपलब्धेरित्यर्थः । निर्गुणविद्यायां मार्गसाध्यफलाभावान्न तस्योपसंहारः
लोकवत् यथा लोके ग्रामसेतुवासिनां गंगाप्राप्त्यर्थं पथा अपेक्षितः न गंगास्थानानां तद्वदित्यर्थः । तस्मान्न निर्गुणविद्यायां
मार्गोपसंहार इति सिद्धं ॥ ३१ ॥ अनियमः सर्वेषामविरोधः शब्दानुमानाभ्यां ॥ ३२ ॥ सगुणविद्यासु क्वचित्पंचाग्निविद्यादिषु
मार्गः श्रूयते क्वचित्तु वैश्वानरविद्यादिषु न श्रूयते तत्र किं क्वचिच्छ्रुतमार्गस्यान्यत्रोपसंहारोऽस्ति नवेति संदेहे यद्विद्याप्र
१ करणे मार्गः श्रुतः स तत्रैवेति प्रकरणबलान्नियमस्तेनोपसंहार इति पूर्वाधिकरणात् दृष्टांतेन प्राप्ते उच्यते सर्वेषां सगुणो
पासनानां मार्गस्यानियमः क्वचिच्छ्रुतस्य सर्वत्रोपसंहार इति यावत् । ननु प्रकरणबलान्नियमः प्राप्नोत्यन्यथा प्रकरणविरोध
इति चेदुच्यते प्रकरणेनाविरोध एवानियमस्य कुतः शब्दानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः । य एवमेतद्विदुर्ये चामी अ
रण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभिसंभवंतीत्याद्या श्रुतिः ये अधिकृतास्ते तेन द्युलोकादिपंचकमेवमग्नित्वेनाविदुस्तेऽर्चिरभि
संभवंतीति संबंधः । तद्य इत्थमी अरण्ये संयताः श्रद्धां तपः पूर्वमुपासते तेऽर्चिरभिसंभवंतीत्यर्थः । तथा च पंचाग्निविद्या
विहीनमप्यविद्यांतरशीलानां वाक्येनैव प्रकरणाद्बलीयसा देवमार्गावगतेः प्रकरणं बाध्यमिति भावः । भुज्ञकृत्स्नगतेर्थ

तेजगतः श्राभ्यते मनेः साक्षात्स्मृतिरप्युपास्त कस्य विशेषेणामार्गेर्दर्शयति जगतः विद्यायां कर्मणि चाधिकृतस्य जननसंस्मर्यः ३१
यावदधिकारमवस्थितिराधिकारिकाणाम् ३२ पूर्वं निर्गुणविद्यायां न मार्गः सगुणविद्यायां तु सर्वत्र मार्गः इति व्यवस्थापिता [redacted] रहस्तौ निर्गुणविद्यायां मोक्षहेतुत्वानुपपत्तेरप्यौ
दिफलकत्वे ब्रह्म अनन्तरामुष्मिकफलमार्गमन्तरेण न संभवतीति कृत्स्न मवस्थापा आक्षेपात् संगतिः अपान्तरतमवसिष्ठसन
त्कुमारादीनां निर्गुणब्रह्मविदां पुनः पुनरुत्पत्तिः स्मर्यते अपान्तरतमाः कलिद्वापरयोः संधौ विष्णुनियोगात् कृष्णद्वैपायनः संबभू
वेत्यादिना तत्त्वतः श्रापः त्रिद्युणां वर्तमानदेहपातादनन्तरं देहान्तरप्राप्तिर्न स्यादित्यत्र पूर्वपक्षे वसिष्ठादिनिष्ठब्रह्मविद्याया
रेव तु रवि हि निष्ठब्रह्मविद्याया अपि मोक्षहेतुत्वाभावेन स्वर्गादिफलप्राप्तये देहान्तरप्राप्तिरस्त्वेव निर्गुणविद्यायामपि
मार्गोपसंहार इति फलसिद्धान्तस्तु अपान्तरतमःप्रभृतीनामाधिकारिकाणां वेदप्रवर्तनादिषु लोकव्यवस्थाहेतुष्वधिकारेष्वप
१६ रमात्मनां नियुक्तानां यावदधिकारमवस्थितिः यथा प्रारब्धकर्मावस्थितिः तस्य प्रारब्धस्य कर्मणः प्रतिबंधकस्यानेकशरीर
भोग्यफलहेतोस्तस्य फलस्य भोगेन नाशं प्रतिबंधकान्तराभावादनारब्धफलानां संचितकर्मणां च ज्ञानेन नाशप्रत्वेन नाप्रतिबंधकत्वा
दप्रतिबंधः साक्षात्कारो वर्तमानदेहपातानन्तरं कैवल्यं संपादयतीति न देहान्तरप्राप्तिरप्रतिबद्धसाक्षात्कारवतः न चैवं श्रुतिः
तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति अप्रतिबद्धसाक्षात्कारवतो वर्तमानदेहपातावधिकैवल्यस्य श्रावयितुं न
यावन्तं विदुषां मार्गापेक्षेति नु मार्गस्य निर्गुणविद्यायामुपसंहार इति सिद्धं अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौ
पसदवदुक्तं ३३ बृहदारण्यके श्रूयते याज्ञवल्क्यस्य गार्ग्युक्तिविषयत्वसूत्रे एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलम

स॰सू॰
१११

नन्वेवंसत्यमदीर्घमित्यादिश्रवणमात्रवर्णोऽप्यक्षरस्याधिगम्यत्वादसत्त्वं ब्रह्मोपक्रमस्य श्रावयति यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुरि
त्यादिष्वेवं तत्र तत्रानिर्गुणब्रह्मप्रमितसर्वनिषेधाः श्रूयन्ते तत्रासंशयः कश्चिन्निषेधश्रुतावश्रुतनिषेधानां श्रुतेनाउपसंहारोस्ति न वे
ति तत्र यथा पूर्वमधिकारिकाणां वसिष्ठादीनामारब्धकर्मणामेव देहान्तरसंबन्धसिद्धेर्नेसांचितकर्मणो देहान्तरसंबन्धहेतुत्वमित्युक्तं
तथेहापि तत्तद्वाक्योक्तैरेव निषेधैरुपलक्षणतया सर्वद्वैतनिषेधसिद्धेर्न शाखान्तरीयाणां निषेधानां तत्र ब्रह्मप्रमितिहेतुत्वमित्यनुपसं
हार इति दृष्टान्तेन प्राप्ते ब्रूमः अक्षरे धर्मिणि द्वैतनिषेधविधिपरोऽक्षराधियः तासां सर्वत्र निषेधप्रकरणेष्वविरोध उपसंहारो न्याय्यः कु
तः सामान्यतद्भावाभ्यां द्वैतप्रपञ्चनिरासेन ब्रह्मप्रतिपादनस्य सर्वत्र समानत्वात्तस्य ब्रह्मणः प्रतिपाद्यस्य सर्वत्र भावात् एकत्वेन प्र
त्यभिज्ञायमानत्वाच्च तच्छेषाणां निषेधशब्दानां सर्वत्रोपसंहार इत्यर्थः औपसदवत् तथा हि यजुर्वेदे जमदग्निः पुष्टिकामश्च
तुरात्रेणयजतेते सुसन्नेजामदग्न्याहीने पुरोडाशिन्य उपसदो भवन्तीति पुरोडाशयुक्तासूपसत्सु विहितादिष्टासु पुरोडाशप्रदान
कर्मैत्राणामुद्गातृवेदोत्पन्नानामग्ने वेर्होत्रं वेरध्वरमित्यादीनामुद्गात्रप्रयोगप्राप्ते अध्वर्युकर्तृके पुरोडाशप्रदाने तेषां मन्त्राणां वि
नियोगाद्विनियोगविधेश्च तादर्थ्यकसंपादकस्य स्वरूपमात्रबोधकोऽसति विध्यपेक्षया मुख्यत्वात् मुख्यानुरोधेनाध्वर्युणैव प्रयोगो न
गौणानुसति विध्यनुरोधेनोद्गात्रा प्रयोग इति यथाध्वर्युकर्तृके पुरोडाशशेषाणां मन्त्राणां यत्र क्वचिच्छ्रुतानामप्यध्वर्युणा संबन्ध एव
मक्षरब्रह्मप्रमितिशेषाणां निषेधानां यत्र क्वचित् श्रुतानामप्यक्षरेणास्य सर्वत्र संबन्ध इत्यर्थः अस्मिन्नर्थे उदाहरणान्तरं विवक्षया जैमि
नि सूत्रमुदाहरति तदुक्तमिति गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इति जैमिनिसूत्रे य एवं विद्वानग्निमाधत्त इति य
जुर्वेदविहिताधाने अंगत्वेन य एवं विद्वान् वारवन्तीयं गायति य एवं विद्वान् यज्ञायज्ञीयं गायति य एवं विद्वान् वामदेव्यं गायतीति

एम
११२

यजुर्वेदस्य तत्सामानि विहितानि विषयः वारवंतं यत्प्रयुक्तं साम वारवंतीयं एवमग्रेपि ऊह्यं: साम्नां यो भुयजुर्धैतिसामयजुषोः ८
स्वरभेदोस्ति तत्र संशयः किमेतानि सामानि सामवेदोत्पन्नत्वात्तदीयेनोच्चैःस्वरेण आधाने प्रयोक्तव्यानि उत येन यजुर्वेदेन वि-
नियुक्तं तेन तदीयेनोपांशुस्वरेणेति तत्रोत्पत्तिविधिबलादुच्चैःस्वरेण प्रयोगप्राप्ते सिद्धांतः गुणमुख्येति गुणमुख्ययोरुत्पत्ति-
विनियोगविध्योर्व्यतिक्रमः स्वरविषये विरोधे मुख्येन विनियोगविधिना वारवंतीयादेर्वेदस्य संयोगो ग्राह्यः साम्नां विनियो-
जकवेदस्वरसंयोग इति यावत् कुतः तदर्थत्वात् उत्पत्तिविधेर्विनियोगार्थत्वादित्यर्थः एतत्समानन्यायत्वेनोपसंहरति मंत्राः
सु एवमुदाहृता इति मंतव्यं ३३ इयदामननात् ३४ द्वा सुपर्णा सयुजेत्यादिमंत्र आथर्वणादौ श्रूयते काठकेपि ऋतं पिबंतौ सु-
कृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये इत्यादि श्रूयते तत्र संशयः किमनयोर्मंत्रयोर्विद्याभेद उत विद्यैक्यमिति पूर्वपक्षे विद्या-
भेदादन्योन्यगुणानुपसंहारः फलसिद्धांते विद्यैक्यादुपसंहार इति तत्र पूर्ववदेवास्याक्षरस्याभिन्नत्वेन विद्यैक्यादक्षरधियामु-
पसंहार उक्तः नहि प्रकृते द्वासुपर्णेति मंत्रे एकस्यैव भोक्तृत्वं ऋतं पिबंताविति मंत्रे उभयोरपि भोक्तृत्वं श्रूयत इत्युभयत्रैव विद्याभेदा-
द्विद्याभेद इति प्रत्युदाहरणेन प्राप्ते ब्रूमः मंत्रद्वयविद्यैक्यमेव कुतः इयत्तावच्छिन्नस्य द्वित्वावच्छिन्नस्य वेद्यस्योभयत्राप्य-
भिन्नत्वेनामननादित्यर्थः अत्र हि मंत्रद्वये भोक्तृजीवानुवादेन परमात्माभेदः प्रतिपाद्यः पिबंताविति प्रयोगस्तु भोक्तृजीव-
साहचर्याद्भोक्तरि भोक्तृत्वं छत्रिणो गच्छंतीतिवदुपपद्यत इत्युक्तं गुहाधिकरणे तथाच प्रतिपाद्यैक्यान्निर्गुणविद्यैक्यमित्यवि-
रोधः ३४ अंतराभूतग्रामवत्स्वात्मनः ३५ बृहदारण्यके उषस्तयाज्ञवल्क्यप्रश्ने यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांत-
रस्तमाचक्ष्वेति पृष्टो याज्ञवल्क्य एवमुषस्तमाह य आत्मेति एतत्प्रश्नोत्तरं यः प्राणेन प्राणिति स त आत्मा सर्वांतर इत्या-

सू. हृ.
११२

दिनाकार्यकारणारहित आत्मा प्रतिपादितः एवमेतदनंतरब्राह्मणे पूर्ववत्कहोलप्रश्ने योऽशनायापिपासे शोकं मोहं जरां मृ
त्युमत्येति सोऽशनायाद्यतीत आत्मा प्रतिपादितः तत्र संशयः किमनयोर्ब्राह्मणयोर्विद्याभेदः उत विद्यैकत्वमिति फले पूर्ववत्स्
वेद्यवैलक्षण्याविशेषस्य परस्पराक्षिप्तत्वात् क्षणिकत्वेन विद्याभेदाद्विद्यैकमुक्तं इह तु वेद्यैक्येपि न विद्यैक्यं समभिव्याहृतौ सारूप्यजसभ्या
सवत्त्वात् आत्माभ्यासाद्विद्याभेदसिद्धेरिति मुख्यः पूर्वपक्षः एकत्वकार्यादिरहितात्मन उपास्यत्वादन्यत्र अशनाद्यतीता
त्मनः उपास्यत्वादुभयत्र वेद्यभेदाद्विद्याभेद इति गौणः पूर्वपक्षः तत्र गौणपूर्वपक्षं दूषयति अंतरेति पूर्वसूत्रस्थस्यात्मनेना
दिति पदस्यानुषंगः ब्राह्मणद्वयेपि स्वात्मनः सर्वांतरत्वामननाद्वेद्यस्यात्मन एकत्वम् उभयोरेकस्मिन् देहे सर्वांतरत्वायोगा
त् भूतग्रामवद्यथा भूतसमूहात्मकस्य तद्देहस्य पृथिव्यपेक्षया जलमांतरं जलापेक्षया तेजः इत्यादिक्रमेणापेक्षिकं भूतानामां
तरत्वं न मुख्यं सर्वांतरत्वं न द्वयोर्ब्राह्मणयोर्द्वयोर्विद्याभेदांगीकारे वेद्यात्मद्वयस्यापि स्यादित्यर्थः यद्वा भूतग्राममवदिति श्रुत्यंतरदृष्टां ता
र्थं च यथा एको देवः सर्वभूतेषु गूढः इत्यादिश्रुत्यंतरे सर्वेषु भूतग्रामेषु सर्वांतर एकैवात्मा आम्नायते तेन द्वयोर्ब्राह्मणयोरित्य ए
र्थः तथा चैवेद्यैकाद्विद्यैकसिद्धि ३५ मुख्यपक्षमनूद्य दूषयति अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशांतरवत् ३६ अन्यथावि
द्याभेदानंगीकारे आम्नानभेदस्याभ्यासस्यानुपपत्तिः प्रयोजनाभावादिति चेन्न उपदेशांतरवदभ्यासस्योपपत्तेरित्यर्थः तथाहि
यथा छांदोग्ये तत्त्वमसीत्युपदेशे नवकृत्वोऽभ्यस्यमानेपि न विद्याभिद्यते उपक्रमोपसंहारयोरविशेषात् न द्वब्राह्मणद्वयेपि प्र
श्नरूपेणोपक्रमस्यातोऽन्यदार्तमित्युपसंहारस्य चाविशेषात् द्वितीयप्रश्ने यदेव साक्षादपरोक्षाद्ब्रह्मेत्येवकारेण विद्याभेदनि
रासाच्च न विद्याभेदः अभ्यासस्यादरार्थत्वेनाशनायाद्यतीतत्वादिविशेषप्रतिपादनार्थत्वेन चोपपत्तेरिति ३६ व्यतिहारोवि एम
११२

विधीयते ॥ उत जीवेश्वरयोरन्योन्यानुवादेनान्योन्यात्मकत्वरूपव्यतिहारेणोभयविषयं चिंतनं २+

शिष्यं निहीनरवृत ३७ सेतरेपिनः आदित्यपुरुषमधिकृत्य समामनंति तद्योहं सोसौ योसौ सोहमिति तथैव जाबाला अपि त्वं वा अ
अहमस्मि भगवो देवते अहं वै त्वमसीति तत्र संशयः किमात्मनरीश्वरेणैकत्वविषयमेकरूपमेव चिंतनमिति अत्र पूर्वपक्षिमतेनैक
रूपत्वात्तावद्वंसिद्धांतिमते उभयरूपत्वांगीकारेणाव्यतिहारस्यार्थकमिति भेदः तत्राभ्यासस्यादरार्थत्वेन व्यतिहारोपदेशस्याभ्याद त्व
रार्थत्वात् तदनुरोधेन चिंतनस्योभयरूपत्वं किंत्वेकरूपत्वमेवेति दृष्टांतेन प्राप्ते ब्रूमः व्यतिहार एवात्रोपास्यत्वेनोपदिश्यते नता
त्मनरीश्वरेणैकत्वमात्रमिति तरवृत पद्यतेरसर्वात्मत्वादयो गुणा उपास्यत्वेनोपदिश्यंते तद्वत्तस्तज्ज्ञातेर्थे हेतुर्विशेषित्वनिहीति से
माम्नातारो जीवपरमात्मानो व्यतिहारेण विशेषयंति तद्योहमित्यादिना तद्व्यतिहारेण विशेषणं व्यतिहारस्योपास्यत्वेनार्थकं
स्यात् अन्यथा जीवस्येश्वरेणैकत्वमात्रस्योपास्यत्वे तत्प्रतिपादकं श्रुसुशस्येवार्थवत्वेन तीश्वरस्य जीवेनैकत्वप्रतिपादकांशः
यो स्यात् तस्मादुभयांशस्यार्थवत्त्वोभयरूपं चिंतनं विधेयमिति सिद्धं पूर्वसूत्रे उपदेशानारवीदिति दृष्टांतेन तत्त्वमसीत्येकत्ववास
कथनप्रसंगेनैकत्ववाक्यस्य तद्योहमित्यादेर्विचारान्नासंगिकोपादसंगतिः पद्याऽस्यामहंग्रहोपासनो व्यतिहारस्यानुपास्यता वोध्या
नत्व त्वंत्राहंग्रहोपासनात्तस्य व्यतिहारस्योपसंहार इति पूर्वपक्षे फलं सिद्धांते तस्योपास्यत्वेन सर्वत्रोपसंहार इति सत्यादयः पादसं
ज गतिः ३८ सैव हि सत्यादयः ३९ वाजसनेयके बृहदारण्यके हिरण्यगर्भप्रस्तुत्य स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमां
मांल्लोकानिति तत्सविद्यां विधाय तदंगत्वेन तद्रत अक्षरं सत्यमिति तत्र स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्त
मे अक्षरे सत्यं मध्यतोनृतं तदेतदनृतमुभयतः सत्येन परिगृहीतं सत्यभूयमेव भवतीति सत्यनाम्नां अक्षराणामुपासनमुक्त्वा
नंतरं श्रावयति तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले पुरुषो यश्चायं दक्षिणेक्षन्पुरुषस्तस्यादि अयमर्थः हरादः

स॰ बृ॰
११३

उपास्यप्रसिद्ध्यर्थः एतदिति । हिरण्यगर्भाख्यं ब्रह्मोपास्यं पुरा मश इति महत्प्रापकं प्रकृतं पूर्व्वं प्रथमजं भोक्तृत्वेनोपेत्यपितिशेषः वे
दनप्रकारमाह सत्यं ब्रह्मेति सत्यं सत्यमिति सत्यं पंचभूतात्मकं हिरण्यगर्भाख्यं ब्रह्म यो वेद उपास्ते स इमांल्लोकान् जयतीत्यर्थः तोसे
कृमक्षरमित्यत्र नवक्षोपास्ति नकार उच्चारणार्थः निरुक्तः नकारो बोध्यः अत्र हि प्रथमोत्तमे अक्षरे सत्ये सत्यं मत्सुसाम्याभावान्मध्य
श्र तो मध्यस्थमक्षरमनृतं सु:म सुनृतपोतकारस्साम्यात्वे तत्वनृतं सुरूपमभयतः सत्येन परिगृहीतमनृतं भावितमितोऽशंकिं वि
लकं तत्सत्यभूयमस्यवाहुल्यमेव भवतीत्यर्थः ततत्र हृदयात्मकत्वे सत्यात्मकत्वे च ब्रह्मणः । सिद्धं इत्यर्थः पतन्तसत्यमित्यादिकं स
वैधादेवमन्यत्रापीत्याधिकरणमाख्याति न वा विशेषात्पः किं तयोनसत्यमसौ स आदित्य इत्यादिनाभिहिताविद्यापूर्वसत्यविद्यातोऽभि
द्यते नवेति पूर्वपक्षे विद्याभेदान् गुणानुपसंहारः सिद्धान्ते तदुपसंहार इति बोध्यं तत्र पूर्वं जो च ब्रह्मणो व्यतिहारोक्तिभेदाद्विद्या
भाद्वैरूप्यमुक्तं तद्धि देहापि मत्यविद्यायां लोकजयस्य फलत्वादनंतरविद्यायां च हंति पाप्मानमित्यादिना पापनिर्हृतेः फलत्वा
त्स्फोक्तिभेदाद्विद्याभेद इति स्थिते तन प्रामे [illegible] रूपमनंतरविद्यायास्तस्य सत्यविद्येयत्वेनाभिधत्ते कुतः तयत्सत्यमिति प्रकृतं
स्यैवोपास्यस्य हिरण्यगर्भस्याकर्षणात् इति हि शब्दस्य चित्तो हेतुर्बोध्यः नहि विद्याभेदे विद्याभेदो युक्तः नच फलभेदाद्विद्याभेदः
सत्यविद्याप्रकरणोपदिष्टस्य फलस्य सर्वस्यापि सत्यविद्याफलत्वादिति तस्माद्विधेयकात्स्न्येपरवाक्यस्याः सर्वैस्तवादयो गुणा उ
पसंहर्तव्या इति सिद्धं ३८ कामादीतरत्र तत्र चायतनादिभ्यः ३९ दहरविद्यायां दहराकाशमात्मानमभ्युपेत्य छान्दोग्य आमनंति ए
ष आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प इत्यादि तथा वाजसनेयिनोऽपि स
वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिंछेते सर्वस्य वशी सर्वस्येशान इत्यादि तत्र सं

राम
११३

गायः किमन्योन्यं गुणोपसंहारोस्ति नवेति तत्र पूर्ववेद्याभेदेन विद्यैक्याद्गुणोपसंहार इत्युक्ते नार्हिप्रकृते छांदोग्ये दहराकाशस्यै
८७ वोपास्तित्वात् वाजसनेयके आकाशनिष्ठस्यात्मनो ज्ञेयत्वाद्वेद्यभेदेन सगुणनिर्गुणविद्ययोर्भेदान्नोपसंहार इति मसुदाहरणे
न प्राप्ते ब्रूमः कामादि सत्यकामत्वादिगुणजातमितरत्र वाजसनेयके उपसंहर्तव्यं यच्च सर्ववशित्वादिकं तदपि तत्र छांदोग्ये उ
पसंहर्तव्यं कुतः आयतनादिभ्यः हृदयस्थानत्वस्य ब्रह्मणश्चामयमस्य ब्रह्मणः सेतुत्वव्यपदेशस्य चोभयत्राविशेषादित्यर्थः
अयमर्थः दहराधिकरणे दहराकाशस्य ब्रह्मत्वसमर्थनादत्र वेद्यभेदः ननु तथापि सगुणनिर्गुणविद्ययोरनयोर्भेदो दुर्वार इति
चेत्सत्यमस्ति भेदः कथं तर्हि गुणोपसंहार इति चेत्तत्रोपासनार्थं गुणोपसंहारं ब्रूमः किंतु विद्यास्तु सर्वत्र तु सर्वं गुणोपसंहा
रश्च विद्याभेदेपि संभवति तु तेनोभयत्राविशेषादिति ॥ ३९ ॥ आदरादलोपः ॥ ४० ॥ छांदोग्ये वैश्वानरविद्यायां प्राणाग्निहोत्रं श्रूयते त
द्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेत्यादिना भक्तमन्नं जावालश्रुतौ पूर्वोतिथि
भ्योश्नीयादिति वैश्वानरोपासकस्यातिथिभ्यः पूर्वभोजनविधानातिथिभोजनप्राथम्यनिंदया पूर्वभोजनं तस्यातिप्रायाह वैश्व
यमहुत्वाग्निहोत्रं परस्य जुहुयादेवं तदिति यथा त्वाग्निहोत्राकरणे पराग्निहोत्रकरणमयुक्तमेवं तत्र अतिथिभ्यः पूर्वभोजन
दानमित्यर्थः तत्र संशयः किं भोजनलोपे प्राणाग्निहोत्रस्य लोप उत नालोप इति अलोप इति सिद्धः पूर्वपक्षे फलं सिद्धांते तु लोपसिद्धि
रिति उपास्तिविचारप्रसंगेनानंतरगपूर्वभोजनाश्रितप्राणाग्निहोत्रविचारादस्ति पादसंगतिः उपास्तिलोपापत्तेस्तु सर्वत्वेन गुणो
पसंहारवद्भोजनलोपेपि पूर्वभोजनस्तु सुपरत्वस्य प्राणाग्निहोत्रालोपस्य वानंतरसंगतिः तत्र पूर्वपक्षसूत्रं आदरादलोप इ
ति भोजनलोपेप्यग्निहोत्रस्यालोपः पूर्वभोजनस्य प्राथम्यरूपधर्मलोपमसहमानया जाबालश्रुत्या प्राणाग्निहोत्रे आदरक

स॰ द्वि॰ रणात् न हि धर्मलोपमसहमाना श्रुतिः प्राणाग्निहोत्रस्य धर्मिणो लोपं सहेत तस्मान् भोजनलोपेप्यनेन भक्षद्रव्येण प्रा
११४ णाग्निहोत्रं कर्तव्यमित्येवं प्राप्ते ४० इदं पठति उपस्थितेऽतस्तद्वचनात् ४१ भोजने उपस्थिते अतः अस्मादेव भोजनद्रव्या
त्प्राणाग्निहोत्रं कर्तव्यम् अनुपस्थिते भोजने प्राणाग्निहोत्रं न कर्तव्यमेव कुतः तद्वचनात् तद्धोमीयमिति वचनात् सन्निहितसाका
द्वा ङ्क्षं प्रथममागच्छेदित्यनेन सन्निहितस्य भोजनार्थस्य द्रव्यस्य होमसाधनत्वप्रतीतेरित्यर्थः न चायं भोजनागमनस्य भो
जनप्रयुक्तस्य भोजनलोपे लोपः द्रव्यस्य लोपेग्निहोत्रस्य लोप एव आदरवचनं तु भोजनप्रसक्तिदशायां द्रष्टव्यं ४१ तन्निर्धार
ग्ध्य णानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलं ४२ सन्ति कर्माङ्गेषूद्गीथादिषु प्राणाद्युपासनानि तानि किं पर्णतावत् कर्माङ्गानि नित्य
ध्य कर्मवदनुष्ठेयानि उत गोदोहनवत्तत्र फलसाधनान्यनित्यानीति संशयः पूर्वोक्ताकारसिद्धेरेव पूर्वोत्तरपक्षयोः फलं उपासना
विचारात्मकत्वादस्य पादसंगतिः अनित्यभोजनाश्रितप्राणाग्निहोत्रस्यानित्यत्ववन्नित्यकर्माङ्गाश्रितोपासनानां नित्यत्व
मित्यवान्तरसंगतिः तत्र यस्य पर्णमयी जुहूर्भवतीति किंचित् क्रतुमनारभ्याधीतस्य पर्णमयीत्वस्याव्यभिचरितक्रतुसंबंधिजु
हूद्वारेण क्रत्वङ्गत्ववदनारभ्याधीतानामुद्गीथाद्युपासनानामप्युद्गीथादिद्वारेण क्रत्वङ्गत्वमिति प्राप्ते ब्रूमः तन्निर्धारणानियम इति
तेषां कर्माङ्गाश्रितानां निर्धारणानामुपासनानामनियमः नित्यवदनुष्ठानाभावः कुतः तद्दृष्टेः तस्यानियमस्य श्रुतौ दर्शनादित्य म
र्थः तथा हि तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्यनुपासकस्यापि कर्मणः कर्तृत्वं दर्शयन्ती श्रुतिरुपासनस्यानियतत्वं दर्शय
ति उपासनस्य पृथक्फलश्रवणादपि पयःप्राप्तिफलकगोदोहनवन्न कर्माङ्गत्वमित्याह पृथग्घीति हि यतः पृथगप्रतिबं
धः कर्मणो वीर्यवत्तरत्वात्मकस्य समृद्धिरूपः फलमुपलभ्यते अतोपि न कर्माङ्गत्वमुपासनस्येत्यर्थः तथाप्युपासनस्य प्र एम
११४

थकफलत्वे श्रुतिः तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यव
त्तरं भवतीति तेनोंकारेणोभावपि कर्म कुरुतः यश्चैनमोंकारमक्षरमेवं रसतममाप्त्यादिगुणकं वेद यश्च न वेद तावुभावितिसंबंधः
एवमनभिप्रेतं पक्षमनूद्याभिप्रेतमाह श्रुतिः नानात्विति तुशब्दः पक्षनिरासार्थः कर्मांगोंकारमात्रज्ञानेपि रसतमाप्त्यादिगु
णकोंकारज्ञानेन नानैव पृथक्फलकं दृष्टो हि मणिविक्रयेपि शबरवणिजोर्मणिमात्रविशेषज्ञानाभ्यां फलभेदः तस्मात्परं च कर्म विद्य
योद्गीथादिविषयया श्रद्धया आस्तिक्यबुद्ध्या उपनिषदा तत्तद्देवताध्यानेन युक्तः करोतीति तदेव कर्म वीर्यवत्तरं भवतीत्यर्थः अनेन विद्या
हीनं कर्म वीर्यवन्मात्रं विद्यासहितं तु वीर्यवत्तरमिति गम्यते न हि देवविद्यायाः कर्मांगत्वं संभवति अंगहीनस्य कर्मणो वीर्यवन्मात्रत्व
स्य फलजनकत्वलक्षणस्यानुपपत्तेः तस्मात्सर्णतापा अक्रियात्मकत्वेन क्रतुसंबंधं विनाप्यात्मनः फलजनकत्वाभावेन विषम
त्वाद्विद्यायाः क्रियात्मकत्वेन स्यात्तेन फलसाधनत्वसंभवात् गोदोहनवत्स्यात्तत्रामेवेतिसिद्धं ॥ प्रदानवदेव तदुक्तं ॥ ४३ ॥ बृह
दारण्यके छांदोग्ये च संवर्गविद्यायां वागादिभ्यः प्राणः श्रेष्ठः अग्न्यादिभ्यो देवताभ्यः श्रेष्ठो वायुरित्यवधारितं तत्र संशयः किम
स्यां विद्यायां वायुप्राणयोः प्रयोगैक्यं उत प्रयोगभेद इति फलपादसंगती पूर्ववत् पूर्वं फलभेदात् कर्मांगानां तदाश्रितोपासनानां च
नित्यत्वानित्यत्वलक्षणः प्रयोगभेद उक्तः तर्हि प्रकृते वायुप्राणयोर्विलक्षणफलैक्याद्वायुप्राणयोः स्वरूपत एकत्वेन वेद्याभेदेन विद्यै
क्यात् प्रयोगैक्यमिति प्रत्युदाहरणेन प्राप्ते ब्रूमः यथैकस्मिन्नग्निहोत्रे दधितंडुलादिभिर्गुणैः प्रयोगभेदः एवमेकस्यामपि विद्या
यां वायुप्राणयोः स्वरूपाभेदेप्याधिदैवत्वाध्यात्मकत्वलक्षणरूपावस्थाभेदेन गुणभेदात् प्रयोगभेद इति प्रदानवदेवेदं दृष्टं त
था हि इंद्राय राज्ञे पुरोडाशमेकादशकपालं निर्वपेदिंद्रायाधिराजायेंद्राय स्वराज्ञ इति पुरोडाशत्रयप्रदानमिष्टौ श्रुतं तत्र किं त्रयाणां पुरोडा

त

सू०३ डाशानांसहप्रदानमुतप्रदानभेद इति दिशाये देवतैकाँसहप्रदानेप्येते राजाधिराजस्वराजगुणभेदेन तद्विशिष्टदेवताभेदा
११५ सुरोडाशानांप्रदानस्य प्रक्षेपस्य भेद इति पर्यायतदन्तं प्रकृते वैधभेदात्प्रयोगभेद इत्यर्थः तद्गुणे देवताकाण्डेनानात्वादेवता
पृथक्त्वज्ञानादिति वाशब्दो देवतैकत्वनिरासार्थः नानादेवतेत्यत्र हेतुमाह पृथगिति उत्पत्तिवाक्य एव राजाधिराजस्वराजगु
णानां पृथग्ज्ञानात्तद्विशिष्टदेवतानां नानात्वमुक्तमित्यर्थः ४३ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि ४४ वाजसनेयिनोऽग्नि
रहस्ये नैव वा इदमग्रे सदासीन्नाऽसदासीदित्युपक्रम्य मनसः प्रादुर्भावमुक्त्वा तन्मन आत्मनोऽग्नीन् पश्यदिति मनोऽधिकृत्य
पठंति षट्त्रिंशतं सहस्राण्यपश्यदात्मनोऽग्नीन् अर्कान्मनोमयान्मनश्चित इत्यादि तथैव वाक्चितः प्राणचितः चक्षुश्चि
तः श्रोत्रचितः कर्मचितोऽग्निचित इत्यग्नीनाम्नायन्ति अयमर्थः पुरुषस्यायुष्ट्वेन क्लृप्तशतवर्षाणाम् अहोरात्राणि षट्त्रिंश
त्सहस्राणि तैरवच्छिन्ना मनोवृत्तयोऽपि षट्त्रिंशत्सहस्राणि भवंति एकस्मिन्नहोरात्रे उत्पन्नस्सर्वमनोवृत्तिष्वहोरात्रगतैक
त्वारोपात् तास्तावत्संख्याका मनोवृत्तय इष्टकात्वेनाग्नित्वेन च संपाद्यंते षट्त्रिंशत्सहस्राणीसाद्दिनाम नरूपत्वस्वतिरूपा
नग्नीन् अर्कान् अर्चनान् अत एव मनोविकारत्वान्मनश्चितः मनसा चीयंते संपाद्यंते इति मनश्चितः तानपश्यदित्यर्थः एवमेव
वागादयोऽपि स्ववृत्तिभिरग्नित्वेनापश्यन्निति प्रतीयते एते केवलमग्निचयनसंपाद्यप्राणप्राणकर्मपदमनुक्तकर्मादिपपर
एतेऽग्नयः कर्मप्रकरणपठिताः तत्र संशयः किमेते मनश्चिदादयोऽग्नयः कर्मांगभूताः उत स्वतंत्रा इति विषयसंगतिफले पूर्व
वदेव पूर्वमेकप्रयोगायोगाद्यापुष्प्राणयोः प्रयोगभेद इत्युक्तं न हि मनश्चिदादीनां प्रकरणात्कर्मांगत्वेनैकप्रयोगसंभवात्प्र
योगैकामिति प्रसुद्दाहरणेन प्राप्तसिद्धांतमुपक्रमते लिंगेति मनश्चिदादयोऽग्नयः स्वतंत्रा एव कुतः लिंगभूयस्त्वात् एम
११५

अज्ञापकलिंगानां भूयसां सत्वादित्यर्थः नत्वाहि यत्किंचेमानि भूतानि मनसा संकल्पयंति तेषामेव सा कृतिरिति तान्हैत
तानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपत इत्यादीनि लिंगानि संति अयमर्थः सर्वाण्यपि भूतानि जंतवो यत्किंचिम
पि मनसा संकल्पयंति तेषामेवाग्नीनां सा कृतिः संपादनं सर्वजंतुमनआदिवृत्तीनामग्नित्वेन ध्येयत्वादित्येकं लिंगं नहि
यत्किंचित्करणा कर्मांगं संभवतीति एवंविदे स्वपते जाग्रतेपि सर्वदा सर्वाणि भूतानि तान्नेतानग्नीन्चिन्वंतीति लिंगांतरं
नहि कर्मांगं सर्वदानुष्ठीयमानं दृष्टं कालविशेषे एव तद्विधानादिति नहि लिंगप्रकरणाद्बलीयः तदपि बलीयस्त्वमप्युक्तं
पूर्वकांडे श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति एतत्सूत्रार्थो विस्तरेण वा
चस्पतिमिश्रैरेतस्या दाशवे धाधिकरणे वर्णितः तेनेह विस्तरभयान्नोच्यते इति ४४ एवं सिद्धांतमुपक्रम्य पूर्वपक्षयति
पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत् ४५ संकल्पात्मकामनश्चिदादयोग्नयो न स्वतंत्राः किंतु इष्टकाभिरग्निं चिनु
त इति प्रक्रांतस्य पूर्वस्मिन्क्रियामयस्याग्नेरयं विकल्पः संकल्पात्मकोग्निः प्रकरणात्स्यान्न लिंगादग्नीनां स्वातंत्र्यं प्रसक्तं तेऽत्र
त्र लिंगस्याप्येवादादिकापदर्शनलक्षणस्यार्थवादस्यत्वेन विहितमानसिकाग्निस्तुतिपरत्वेन विध्येकवाक्यतया स्वा
पर्त्वाभावात्सिद्धिहि स्वार्थनिदर्शनं लिंगमग्नीनां स्वातंत्र्यमगमयत् नत्वस्ति स्वार्थसिद्धिः तस्मात्क्रियानुप्रवेशिन एवैते मा
नसिकाग्नयः तेन ननु सौत्रामण्यापरस्मात्मानसवत् तथाहि द्वादशाहे श्रूयते अनया त्वा पात्रेण समुद्रं रसया प्राजा
पत्यं मनो ग्रहं गृह्णामि इति स्पष्टं तत्र किमिदं मानसं द्वादशाहादहरंतरं उत तन्मध्यपातिनो दशमस्या
न्होंगमिति संदेहे वाग्वै द्वादशाहो मनो मानसमिति भेदव्यपदेशाद्दहरंतरमिति प्राप्ते मानसस्याहरंतरत्वे मानाभावाद्दद
मनोग्रहं गृह्णामीति त्वा त्वां समुद्रं अनया रसया पृथिव्या पात्रेण प्राजापत्यं प्रजापतिदेवताकं ४२

२

सू॰ वृ॰ मपदेशस्यांगांगिभावेनाप्युपपत्तेरिहांतातेद्वादशाहसंज्ञापायोगात्तत्प्रसंगात्सुत्यैसंभवतिगौरणत्वायोगात्तद्वादशाहमध्य
११६ पातिनोदशमस्याहोंगमानसमितिप्रथाग्रतच्चमेमानसिकाग्नयः प्रकृतकर्मशेषाइत्सर्थः ४५ अनिदेशाच्च ४६ मानसिका
ग्नीनामर्थ्यएककाग्नित्वावाग्माचानसोपूर्वइतिपर्वाणष्टकाचिन्तानाग्निनामानसिकाग्नीनातादृशपदेशाद्यतच्चपत्वस
कत्रिपानुप्रवेशातिरिक्तसादृश्यपाभावादित्सर्थः ४६ सिद्धान्तपति विधैवतुनिर्धारणात् ४७ तुरुक्तपक्षनिरासार्थः विद्यात्म
काएतमनग्निरादयःस्वतंत्राएवनकर्मानुप्रवेशिनःकुतःनेहेतिविधाचितःएवंसवधारणादित्सर्थः एवकारश्रुसाकर्मप्रक
रणावाध्यमितिभावः ४७ लिंगादपित्तद्वाध्यमिसाहदर्शनाच्च ४८ मानसिकाग्नीनांस्वातंत्र्यज्ञापकलिंगस्यदर्शनाच्चप्रकरण
वाध्यमित्सर्थःलिंगपूर्वंदर्शितं।नचिदंलिंगनसाधकमित्युक्तमित्यतआह श्रुत्यादिवलीयस्त्वाचनवाधः ४९ श्रुतिरेवकारःआ
दिपदेनलिंगवाक्यपरिग्रहणलिंगमुक्तमेवविधपोहवेत्तएवंविदश्चिन्नाभवंतीसितेषांमानसिकाग्नीनांपुरुषसंबंधमाच
क्षाणवाक्यंस्वातंत्र्यवोधकंतथाचेतेषांश्रुतिलिंगवाक्यानांवलीयस्त्वाद्दुर्बलेनकर्मप्रकरणेनाग्नीनांनस्वातंत्र्यवाधइत्स र
र्थः नचलिंगस्यार्थवादस्थत्वेनासाधकत्वंलिंगप्रदर्शनार्थमुदाहृतवाक्यानांविधिप्रसपसामीप्याभावादपूर्वार्थवोधकत्वा
द्विविधायकत्वेनार्थवादत्वाभावादितिभावः ४९ इतोपिमनश्चिराद्यग्नीनांस्वातंत्र्यमित्साह अनुबंधादिभ्यःप्रज्ञांतरपृथक्त्व
वदृष्टश्चतदुक्तं ५० तेमनसैवाधीयंतमनसाचीयंतमनसैवग्रहाअगृह्यंतमनसास्तुवन्मनसाशंसन्यत्किंचयज्ञेकर्मक्रियते
तेपलिंतपत्नीयंकर्ममनसेव [redacted] ते
मनोमयेषुमनश्चित्सुमनोमयमक्रियतेत्सादिनामनआदिष्वग्निषुकर्मांगानामनुबंधात्संपादनादग्नीनांस्वातंत्र्यंकर्मांग राम ११६

इष्टस्त इदत्राप्यग्नीनां कर्मप्रकरणादुत्कर्ष इ + ए

तेअंगानांप्रसक्तसिद्धेनसंपादनेवैयर्थ्यात् आदिपदेनातिदेशोगृह्यते अतिदेशोहिक्रियामयस्याग्नेर्माहात्म्यमेकेकस्य
म मानसिकाग्नेरंशेपर्यन्तेतत्रमेयादृशोपत्ति फलपर्यतिदेशः पूर्वपक्षानुकूलइति तन्न अग्नित्वसादृश्येनातिदेशस्यसि
द्धेतेष्पुपपत्तेः तत्रैवबहुवचनसिद्ध्यर्थपूर्वोक्तश्रुतिलिंगादिकंवाच्य उत्तश्रुत्यर्थस्तुतेग्नयोमनसैवाधीयन्त आधानकर्मणामस
यादिताः अचीयंतचिताएवाग्नियुग्रहाः पात्राण्युपगृह्यन्तगृहीताः अस्तुवन्स्तोत्रकृतवंतः उद्गातारः अशंसनशंसनंकृतवंतो
होतारः किंबहुनायत्किंचकर्माण्युपकारकंयत्किंचयज्ञेयपदंतन्निष्पत्यर्थसन्निपत्योपकारकंचक्रियतेतत्सर्वमग्निषुमनसैवाक्रि
यतेकृतामितिएवमनुबंधादिभ्योहेतुभ्यःस्यात्तेषांमनश्चिदादीनां यत्तानारृत्यावचन यथाप्रत्तानराणांशांडिल्यादिविद्यानांस्वा
तंत्र्यंतद्वत् तदग्नीनांसांतंत्र्यकर्मप्रकरणादुत्कर्षःक्राप्यदृष्टःकल्पितःस्यात्तत्राह दृष्टश्चेति एनासराग्न्यकामोराजसूयेनय
जेतेतिराजसूयप्रकरणेपाठोऽवकपालोहिरण्यदक्षिणासाहिनाप्युनायाअवेष्टेरौक्षणादिकत्वेकापारानमात्रकर्तृकाराजस
यप्रकरणादुत्कर्षोस्यपेःइसवैधम्र्यमतेत्रैउक्तामसार तद्गुणमिति ५९ यद्युक्तंमानसवदग्नीनांक्रियाशेषत्वमिति नद्रूपप
तु ति नसामान्यादप्युपलब्धेर्मृत्युवल्लोकापत्तेः ५९ मनश्चिदादीनांमानसेनमानसिकत्वसामान्यादपिक्रियाशेषत्वेनकल्प
३ नंशक्यसादृश्यःस्यात्तत्रापत्यलब्धेर्मृत्युवत् यथासएवमृत्युर्यएषएतस्मिन्मंडलेपुरुषइति अग्निर्वैमृत्युरितिवाऽदसपुरुषस्याग्ने
श्चमृत्युशब्दत्वसाम्येपिपरस्परवैषम्यंयथावायुलोकाग्निर्नत्वस्यादित्यस्य समिद्दसोदीप्तमिदादिसाम्यान्नहिद्युलोकस्याग्नि
त्वापत्तिः किंतुपरस्परवैषम्यंतद्वत्समानसमानसिकाग्न्योर्मानसिकत्वसाम्येपिपरस्परवैषम्यमितिसूत्रार्थः ५९ परेणाचशब्द
स्यतादिध्यंभूयस्त्वात्त्वनुबंधः ५९ मानसिकाग्निब्राह्मणसरस्मिन्ब्राह्मणेश्रयंवाविलोकएषोग्निश्चिनद्दस्यादिशब्दस्यतादि

त्व

ब्राह्मणोविद्याप्राधान्यंदृश्यतेइतिचकारार्थः तथाचतत्समभिव्याहारादस्मिन्नपि+२

धर्मविनेतृत्वेनाश्रयिणीदृष्टिरूपस्वतंत्रविद्याविधित्वमेवबलस्येनेनकर्मांगविद्याविधित्वंनयापदेतन्मंडलंतपतीतिपूर्वस्मिन्न
स॰ह॰ पिंत्राह्मणोविद्यायाःप्राधान्यमितिभावः ननुस्मिन्ब्राह्मणेमानस्तिकाग्निविद्यायाःप्रधानत्वेकिमर्थंकर्मोपक्रमस्तत्राह भूयस्त्वा
११७ दिति कर्मांगानामाग्नेयकाग्निसंर्घपांसंपाघानामे बहुत्वाद्विद्यायास्तदुपक्रमेणानुबंधः प्रतिपादनमित्यर्थः तस्मादिदंमान
सिकाग्निविद्यास्वतंत्रपुरुषार्थहेतुरितिसिद्धं ५२ ननुविद्यायाःपुरुषार्थहेतुत्वमयुक्तंदेहातिरिक्तस्यपुरुषस्याभावादित्याशं त
क्य सिद्धं एक आत्मनःशरीरेभावात् ५३ प्रसंगादस्यपादसंगतिर्बोध्या अत्रकिमात्मादेहएववउतदतिरिक्तइति संशयः पूर्वपक्षेदे वि
हातिरिक्तात्माभावात्स्वर्गापवर्गादिशास्त्रवैयर्थ्यंसिद्धांतेतत्सार्थक्यमितिभागः तत्रएकेदेहात्मवादिनोलोकायतिकादेहाति
रिक्तस्यात्मनोसत्त्वंमन्यमानाःदेहएवात्मेतिवदंतिकुतःशरीरेसतिचैतन्यसुखादीनांभावात्तदभावेचाभावादित्यन्वयव्यतिरे
काभ्यांतेषांदेहधर्मत्वेनातिरिक्तात्मसिद्ध्यभावादितिप्राप्तेसिद्धांतयति व्यतिरेकस्तद्भावाभावित्वान्नतूपलब्धिवत् ५४ नत्वा
त्मनोदेहादव्यतिरेकः किंतुव्यतिरेकएवस्यात्कुतःचैतन्यादीनामात्मधर्माणांतस्यशरीरस्यमरणावस्थायांभावेप्यभा दे
वित्वाद्देहधर्मत्वासंभवात् यथादेहभावेभावाद्देहधर्मत्वंतथादेहभावेप्यभावाद्देहधर्मत्वमेवकुतोनस्यादित्यर्थः किंचनित्य
त्वान्वयव्यतिरेकाभ्यांदेहधर्मत्वंवृत्तमेनचात्रदेहाभावेअभावइतिव्यतिरेकनिश्चयःसंभवतिएतद्देहाभावेपिदेहांतरावच्छेदे
नतद्धर्मसत्त्वसंभवादिति उपलब्धिवत् तथाहि अस्तितावद्घटाद्युपलब्धिःसाचनदेहधर्मःरसुक्ताकिंचदेहधर्मत्वेतस्याःप्र
काशकत्वानुपपत्तिःदेहरूपादिवदितियथादेहादिविषयायाउपलब्धेःसत्त्वमंगीक्रियतेतथातस्यादेहादिव्यतिरेकोप्यंगी
कार्यःसैवचोपलब्धिःनःआत्मेतितस्माद्देहातिरिक्तस्यात्मनोस्तित्वमितिसिद्धं ५४ अंगावबद्धास्तुनशाखासुहिप्रतिवेदं ५५ एम
११७

संतिकर्मांगाश्रिताउपासनाः उद्गीथावयवोंकारे प्राणदृष्टिः उक्थे पृथिवीदृष्टिः लोकेषु पंचविधं सामोपासीतेति द्युलोकश
ब्दः पृथिव्यग्निअंतरिक्षादित्यद्युलोकपरः पृथिव्यादिविषयकदृष्ट्या पंचविधं सामोपासीतेत्यर्थः पृथिवी हिंकारः अग्निः प्र
स्तावः अंतरिक्षमुद्गीथः आदित्यः प्रतिहारः द्यौर्निधनमिति हिंकारादिपंचविधसाम्नि पृथिव्यादिदृष्टिरिति भावः अत्र संशयः वि
गतो किमेताउपासना यत्र शाखायां विहितास्तत्रत्योद्गीथाद्यालंबना उत सर्वशाखागतोद्गीथाद्यालंबना इति संदेहे उत्तरपक्षयोः पू
र्वेतरकोटिसिद्धिः फलं उपासनाविचारात्मकत्वात्साक्षात्सपादसंगतिः तत्र यथा शरीरात्मनोर्भेदादात्मधर्माणां शरीरे न सं
भवः तद्वदेकशाखागतोद्गीथावयवेषु शाखांतरगतोद्गीथादेः स्वाभेदेन भेदादेकशाखागतोद्गीथादिधर्माणामुपासनानां
शाखांतरगतोद्गीथादौ न संभव इति दृष्टांतेन प्राप्ते ब्रूमः अंगावबद्धास्तु न शाखासु हि प्रतिवेदं एता अंगाश्रिता उपासनाः प्रति
वेदं तत्तच्छाखासु विद्यमानोद्गीथाद्यालंबना एव न भवंति किंतु शाखांतरोद्गीथाद्यालंबना अपि कुतः उद्गीथमुपासीतेत्यादावु
द्गीथादिश्रुतेरविशेषात् हि शब्दसूचितो हेतुर्बोध्यः ५५ इममर्थं दृष्टांतमुखेनापि साधयति मन्त्रादिवद्वाविरोधः ५६ ए
कशाखाविहितोपासनानां शाखांतरगतोद्गीथादिषु प्राप्तेरविरोधः मंत्रादिवत् नयादि यथा तंडुलपेषणार्थमश्मादाने
मंत्रः कुटरुरसीति सकृदाम्नातः शाखांतरेऽपि प्राप्नोति यथा वाऽप्युपाजा एकत्राम्नाताः शाखांतरेऽपि प्राप्नुवंति तद्वत्तत्राप्यविरोधः
वाशब्दो दृष्टांतप्रदर्शनरूपहेत्वंतरसूचनार्थः तस्मादेकत्र विहितानामप्युपासनानां शाखांतरोद्गीथादिषु प्राप्तिरिति सिद्धं
५६ भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ५७ वैश्वानरात्मोपासनायां प्राचीनशालादिषड्ऋषीणां राज्ञा सह प्रश्नप्रतिवचना
भ्यां द्युलोकसूर्यवाय्वादिषु व्यस्तेषु वैश्वानरोपास्तिः श्रुता तथा समस्तेऽपि वैश्वानरोपासना विकरणोल्लिखिता रूपात्मा पिकात्राप्यनुसं

सू.टी.
११९

धेयान वेति संशयः किमिहाभ्यासम्युपास्तिर्व्यस्तिताउत समस्तोपास्तिरेवेति अत्र पूर्वपक्षे वाक्यभेदः सिद्धान्ते तदेकमिति
बोध्यं तत्रोद्गीथादिषु व्यस्तोपासनविधिप्रासम्यवस्थां बाधित्वाउद्गीथाद्युपास्तीनां सर्वशाखास्थ अवस्थावत्तत्रापि व्यस्तोपास्तीनां
विधिश्रुत्या समस्तोपास्तीनां तन्निधिप्रासस्तु सर्वत्र बाधित्वा विधेयत्वयुक्तमिति दृष्टान्तेन प्राप्ते ब्रूमः भूम्नः समस्तोपासनं
सैवाङ्गिन वाक्येनापत्तेः प्राधान्येन प्रतिपाद्यत्वं न व्यस्तोपास्तीनामपि क्रतुवत् यथा दर्शपूर्णमासादेः क्रतोः साङ्गप्रधान
स्यैकस्यैव प्रयोगो विवक्षितः न व्यस्तानामपि प्रयाजादीनां तद्वत् ननु भूम्नः एव ज्यायस्त्वं कुतः इत्यत आह न व्याहीति प्राचीन
शालादिभिरुक्तानि व्यस्तोपासनानि निन्दित्वा कैकेयेन राज्ञा अव्यस्तोपासनस्योक्तत्वादेकवाक्यता श्रुतेरवगम्यते तथा चैक
वाक्यतामापन्ने यस्यां श्रुतिर्भूम्न एव ज्यायस्त्वं दर्शयतीत्यर्थः ननु तर्हि प्राचीनशालादीन्प्रति हे उपमन्यव कं त्वमात्मा
नं वैश्वानरमुपास्से इति प्रश्ने हे राजन् दिवमेव द्युलोको वैश्वानरोपलब्धवैश्वानरं उपास्ते इत्यादौ व्यस्तोपास्तिषु विधिश्रुती
नां का गतिरिति चेत्प्राचीनशालादिभिरवगतव्यस्तोपास्त्यनुवादेन समस्तोपासनस्य विधेयत्वात्तदनुवादत्वमेव विधिश्रु
तीनां गतिरिति तस्मात्समस्तोपासनमेव ज्याय इति सिद्धं ५७ नाना शब्दादिभेदात् ५८ एकसगुणब्रह्मोपास्यकाः शाण्डिल्य
दहरादिविद्यास्ताः एवमेकमुख्यप्राणविद्या अपि सन्ति तत्र संशयः किमेकोपास्यकविद्यानां भेदो न वेति पाक्षे संगतिः प्र
ले पूर्ववत् तत्र व्यस्तोपास्तिषु विधिश्रुतीनां सत्त्वेपि समस्तोपास्तेरेव ज्यायस्त्ववत् एकोपास्यकोपास्तिषु भेदकविधीनां स
त्वेपि समस्तोपास्तेर्ज्यायस्त्वान्नास्ति विद्यानां भेद इति दृष्टान्तेन प्राप्ते ब्रूमः एकोपास्यकविद्या नानैव कुतः शब्दादिभेदात्
दुपासीत स क्रतुं कुर्वीत इत्यादिशब्दभेदात् आदिपदेनोपास्यगुणभेदो विवक्षितः यथा पापगदा न हामाना कर्मणा

२

एम
११८

पत्नेर्सर्वं जुहुयादिति शाखाभेदाद्भेदस्तत्रापि निर्दिष्टं ५९ विकल्पोऽविशिष्टफलत्वात् ५९ यांसगुणब्रह्मादिविद्या उपास्यसा-
क्षात्कारेण न फलहेतवस्तासां किं समुच्चयो विकल्पसमुच्चयाभ्यामनुष्ठानमुत विकल्प इति संशयः पूर्वपक्षे समुच्चयो विद्यासु प्रक्रान्तेः या-
काश्चिदेकैव विद्या यावज्जीवमनुष्ठेयेति विकल्पोऽपि नास्ति ह्यारम्भो विद्यानां समुच्चये नानुष्ठेया इत्यपि नास्तीत्यनियमः फलं सिद्धान्ते विक-
ल्पस्यैवेति नियम इति भेदः पूर्वाधिकरणे न विद्यानानात्वसिद्धेः अयं विचारः प्रवर्तते नेनोच्चेन्नास्तीति हेतुहेतुमद्भावः संगतिः तत्रानुष्ठान
नियमहेतुत्वाभावाद्यथेष्टमनुष्ठानमिति प्राप्ते ब्रूमः विकल्प एवासां विद्यानां युक्तः कुतः अविशिष्टफलत्वात् अविशिष्टं ह्यासां विद्याना-
मुपास्यसाक्षात्कारलक्षणं फलं न त्वेकया विद्यया उपास्यसाक्षात्कृते विद्यान्तरमफलं विरुद्धा उपास्यरूपसाक्षात्कारस्य युगपदयोगाच्च
विद्यान्तरं व्यर्थं तं तमेवेति कौन्तेय सदा तद्भावभावितः इति भगवद्गीतास्वेकविद्याया एवानुष्ठेयत्वं दर्शयति तस्मादुपास्यसाक्षा-
त्कारद्वारा फलहेतुभूता विद्यैकैवानुष्ठेयेति सिद्धं ५९ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ६० याश्च प्रतीकोपास्तयो त्व
नामब्रह्मेत्युपासीतेत्यस्य यथाकामं चारो भवतीत्यादयः काम्या उपास्यसाक्षात्कारानपेक्षा एवादृष्टद्वारा फलहेतवस्तासु पूर्ववत्संदेह
उपास्तित्वाविशेषात्पूर्ववद्विकल्पनियम इति प्राप्ते ब्रवीति काम्यास्त्विति काम्यास्तु दृष्टद्वारा फलहेतवो विद्याः यथाकामं समुच्चीय समुच्चीयेरन्न
रन्न वा पूर्वहेतोरविशिष्टफलत्वस्य विकल्पनियमप्रयोजकस्यात्राभावादित्यर्थः तथा च प्रतीकोपास्तयो विकल्पेनैवानुष्ठेया उपास्ति- वा ५+
त्वात्पूर्ववत् विद्यावदित्यनुमानं उपास्यसाक्षात्कारहेतुत्वमुपाधिरिति भावः अङ्गेषु यथाश्रयभावः ६१ कर्माङ्गेषूद्गीथादिषूपाश्रि-
ता विद्यास्तासां किं समुच्चयेनैवाङ्गवदनुष्ठानं उत यथाकाममिति संशयः पूर्वपक्षे समुच्चयेनानुष्ठानात्फलबाहुल्यं सिद्धान्ते यथाका-
ममनुष्ठानात्प्रयोगलाघवमिति विवेकः तत्र प्रतीकोपास्तीनामिव तत्र लाघवाद्यथाकाममनुष्ठाने प्राप्ते अङ्गाश्रितोपास्तीनामङ्गवत्तत्र लाघ-

सू॰वृ॰ याश्रयभावः यथाश्रयाणामङ्गानामनुष्ठानस्य भावः तद्वदनुष्ठानस्य भावइतिप्रत्युदाहरणेन पूर्वपक्षः ६१ शिष्टेश्च ६२ शिष्टिः
११९ शासनं विधानमित्यर्थः यथाङ्गानां प्रतिवेदं विधानं तथा तदाश्रितोपास्तीनां विधानाविशेषाद्याङ्गवत्समुच्चयनियमः इत्यर्थः
६२ तन्नैवमेवं स्यात् समाहारात् ६३ ऋग्वेदोक्तप्रणवस्य सामवेदोक्तोद्गीथस्य चैकोपासनेऽङ्गत्राह्मणेन फलमाह श्रुतिः हैन्तृषदना
द्ध्वैवापि दुरुद्गीथमनुसमाहरतीति होतृषदनशब्देन होतृशासनस्थानं वाच्यं होतृकृतं शंसनाख्यं कर्म लक्ष्यते उद्गातृप्रणवो कौथ
योरैक्यज्ञानमाहात्म्यात्तेन कृतं दुरुद्गीथमपि स्वरादिप्रमादाद्दुष्टमप्युद्गानं होत्रा सम्यक्कृतेन शास्त्रसहायादनुसमाहरत्येव हम
[redacted]तिसमाहारश्चासेवरवलुहात्तकर्मसंबन्धोङ्कारस्य ऋग्वेदोक्तस्य सामवेदोद्गीथस्य चैकत्वेन चिन्तितत्वादित्यर्थः तथा चैवे कौ
दृद्वेदोक्तप्रणवोद्गीथयोरैक्यज्ञानस्य दृश्यफलं श्रुत्वा द्वासम सर्ववेदोक्तानामङ्गाश्रितोपासनानां समुच्चयः स्यादिति सर्वोपासनेषु वे
त्व दोक्तोपासनैरस्य वेदान्तरोक्तोद्गीथादिनां संबन्धस्य समानत्वादिति सूत्रकृज्ज्ञासयं ६३ गुणसाधारण्यश्रुतेश्च ६४ उद्गीथोपा
सनाद्यगुणभूतस्योपास्यस्योङ्कारस्य तेन पञ्चम्यै विद्या वर्ततेतेनोङ्कारेण वेदत्रयोक्तं कर्म भवतीति सर्ववेदकर्मणि साधारण्यश्रवणा
त्तदाश्रितोपासनानामपि साधारण्यं समुच्चित्यानुष्ठानमित्यर्थः यद्वा कर्मगुणानामुद्गीथादीनां सर्वेषां समुच्चित्यानुष्ठानात्मक
साधारण्याभावे हि तदाश्रितोपासनानां समुच्चयो न भवेत् नेतद्गतिप्रयोगवचनेन सर्वाङ्गग्राहिणा तेषां साधारण्यश्रुतेः तथा
च तदाश्रितानामुपासनानामपि समुच्चय इत्यर्थः ६४ एवं प्राप्ते सिद्धान्तयति नवा तत्सहभावाश्रुतेः ६५ वाशब्दस्त्वर्थः पक्षव्या
वर्तनार्थः नाङ्गाश्रितोपासनानामङ्गवत्समुच्चयनियमः तत्सहभावाश्रुतेः यथाङ्गानां सहभावः श्रूयते ग्रहं गृहीत्वा चमसं
वोन्नीय स्तोत्रमुपाकुर्यादित्यादिना तथा तेषामुपासनानां सहभावस्याश्रुतेरित्यर्थः नवाङ्गं तत्तत्रस्थत्वादुपासनानां समुच्चय एम
११९

नियमः अंगतंत्रस्यापि योगे दोहनस्यानुष्ठाननियमात् यदुक्तं शिष्टेश्चेति सत्रे अंगावबद्धानां विशेषात्समुच्चय इति तन्नेनेन ही
दमनुमानं लभ्यते उपासनानि समुच्चित्यानुष्ठेयानि विहितत्वादंगवदिति तत्र चकत्वयत्वसुपाधिः परं च सूत्रद्वयोक्तं लिंगद्वयम
प्रयोजकत्वेन दूषणीयं ६१ सर्वाभेदा ६२ ६२ इदंशोपनिषच्छ्रुतिरग्न्याश्रितोपासनानां समुच्चयं एवंविद्वैब्रह्मोपज्ञ यजमानं सर्वांश्च
र्त्विजोभिरक्षतीति ऋग्वेदादिविहितानां गलोपव्याहृते होमप्रायश्चित्ताभिज्ञत्वं ब्रह्मणस्य वैविलसर्वोपासनानां समुच्चयो हि विज्ञा
नवेनाब्रह्मणा परिपाल्यत्वमितरेषामृत्विजां न स्यात् सर्वेषां सर्ववित्त्वात् अस्ति च परिपाल्यत्वकीर्तनं तस्मान्न सर्वोपासनासमुच्च
य इति सिद्ध इति श्रीब्रह्मसूत्रवृत्तौ तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः ३ पुरुषार्थोतः शब्दादिति बादरायणः १ पूर्वस्मि
न्पादे परापरब्रह्मविद्यानां गुणोपसंहारोऽनात्माभिमाणमवधारितं इदानीं कर्मानपेक्षाणामेव पुरुषार्थसाधनत्वं निरूप्यते तत
त्र कर्मानपेक्षाणामासां विद्यानां काम्यगानां साकांक्षाणां यज्ञादीनि बहिरंगाणि शमादीन्यंतरंगाणि च निरूप्यंते इहैक विद्याविष
यकत्वमनयोः पादयोः संगतिं तत्र परब्रह्मविद्यामाश्रित्य विचार्यते किमौपनिषदात्मविद्या कर्मकर्तृद्वारेण क्रत्वनुप्रवेशिनी उत
स्वतंत्रैव पुरुषार्थसाधनमिति अत्र पूर्वोत्तरपक्षयोः पूर्वोत्तरकोट्यसिद्धिः फलं पूर्वपक्षे साधिकरणे कर्मांगविद्योक्तिप्रसंगा
त् अत्मज्ञानस्य कर्मांगत्वमाशंक्य सिद्धांतमुपक्रमते पुरुषार्थो इति अतोऽस्मादौपनिषदात्मज्ञानात्स्वतंत्रात्पुरुषार्थो मोक्षः
सिध्यतीति बादरायण आचार्यो मन्यते कुतः तरति शोकमात्मवित् ब्रह्मवेद ब्रह्मैव भवतीत्यादेः केवलविद्यायामोक्षहेतुत्व
बोधकशब्दादित्यर्थः इदमुपलक्षणं सगुणविद्यानामपि स्वातंत्र्येण फलहेतुत्वं न स्फलश्रुतेरिति बोध्यं एवं सिद्धांतमुपक्र १
म्य पूर्वपक्षयति शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः २ कर्तृत्वेनात्मनः कर्मशेषत्वात्तज्ज्ञानमपि प्रणीतावत्कर्मशे

सू॰ वृ॰ यात्मद्वाराक्रत्वंगं अत्राप्ययं प्रयोगः तत्वज्ञानं कर्मांगं फलश्रुत्वे सति कर्मांगाश्रयत्वात् पर्णतावदिति ननु विशेषणासिद्धो हेतुः तथाहि
१२० शोकमात्मवित् हिंसादिफलश्रुतेः सत्वादित्यत आह पुरुषेति यथान्येषु द्रव्यसंस्कारकर्मसु पर्णमयीत्वयजमानस्याजनादिसंस्का
रप्रपानादिलेपकुष्ठपापश्लोकश्रवणादिफलश्रुतिरर्थवादः न तथात्रापि पुरुषार्थश्रुतिरर्थवाद इति जैमिनिराचार्यो मन्यते न तथाच
नेहेतोर्विशेषणासिद्धिरिति भावः २ आचारदर्शनात् ३ जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे इत्यादौ ब्रह्मविद्यावतां जनकादीनां
विद्यायासह कर्माचारदर्शनाल्लिंगाद्विद्यायाः स्वातंत्र्याभावेन कर्मांगत्वमित्यर्थः विदेहानामधिपतिर्जनको नाम राजा बहुदक्षिण
संज्ञेनाश्वमेधेन वा बहुदक्षिणायुक्तेन यागेन कृतवानित्यर्थः ३ तच्छ्रुतेः ४ यदेव विद्यया करोति तदेव वीर्यवत्तरं भवतीति य
तृतीयया श्रुतायाः विद्यायास्तस्य कर्मशेषत्वस्य श्रवणात् स्वातंत्र्येण मुक्तिफलत्वमित्यर्थः ४ समन्वारंभणात् ५ तं विद्याकर्मणी
समन्वारभेते इति फलारंभे विद्याकर्मणोः साहित्यदर्शनादपि न मुक्तिफलत्वं विद्यायाः किंतु कर्मांगत्वमेवेत्यर्थः तं परलोकं व्रजंतं
विद्याकर्मणी समनुगच्छत इति श्रुत्यर्थः ५ तद्वतो विधानात् ६ आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमा
वृत्य कुटुंबे शुचौ देशे स्वाध्यायमधीयान इति श्रुत्या सकलवेदार्थज्ञानवतः कर्मविधानादपि लिंगात् कर्मांगत्वं वेदार्थब्रह्मविद्याया इ
त्यर्थः यद्यपि वेदमधीत्येत्यध्ययनमात्रं श्रुतं नार्थबोधः तथापि फलपर्यंतवेदार्थबोधपर्यंतमध्ययनमिति बोध्यं आचार्यस्य कुल
रूपं गृहमुपनयनं कृत्वा तदनंतरं गुरोः शुश्रूषायाः कर्मविधायाः तिशेषणाशिष्टेन कालेन यथाविधानं पवित्रमाणि तस्मात्समुत्वादि
विधानमनतिक्रम्य वेदमधीत्यानंतरमभिसमावृत्य व्रतविसर्गं कृत्वा कुटुंबे गार्हस्थ्याश्रमे स्थितः शुचौ देशे स्वाध्यायाध्ययनं कुर्वन् कर्माणि त
ताश्च विहितानि यथाशक्ति कुर्वाणो ब्रह्मलोकमभिसंपद्यत इत्यर्थः ६ नियमाच्च ७ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः राम
१२०

एवंतपिनान्यथेनालिनकर्मलिप्यते नरइसादिकार्ण्यजीवं कर्माचारनियमाद्विद्यायाः कर्मशेषत्वमेवेत्यर्थः इहदेहशांतंसमाः
शतंसंवत्सराननीविषुमिच्छेदितिपक्षतः कर्माणिकुर्वन्नेवेतिनियमविधिः एवंत्वयिनरे वर्तमानेतस्याशुभकर्मणानलिप्यतेनेनतत्वंनलि
प्यसइत्यर्थः इतः प्रकारादन्यथाप्रकारांतरंनास्तिपक्षतः कर्मलेपोनस्यादित्यर्थः तस्माद्ब्रह्मविद्याकर्मांगमेवेतिप्राप्तेसमाधत्ते अधि
कोपदेशात्तुबादरायणस्यैवंतद्दर्शनात् ८ तुः पूर्वपक्षनिरासार्थः यदुक्तं नतत्त्वज्ञानंकर्मांगंफलश्रुत्यसत्त्वात् कर्मांगाश्रयत्वादिति
तत्रहेतोर्विशेषासिद्धेः कुतोविशेषासिद्धिः अधिकोपदेशात् कर्मकर्तुः संसारिणः कर्मांगादधिकस्याकर्तुरसंसारिणईश्वरमात्रस्य
वेदांतेषूपदेशात् तथाचतत्त्वज्ञानेचिन्मात्राश्रयमेवेतिभवतिविशेषासिद्धिः एवंचनतत्त्वज्ञानफलश्रुतेरर्पणार्थवादत्वं तस्मात्पुरु
षार्थोतः शब्दादितियन्मतंबादरायणस्यतदेवमतंपेयमित्यर्थः अधिकोपदेशासिद्धिमाशंक्याह तद्दर्शनादिति तस्याधिकस्यात्मनोयः सर्वे
ज्ञः सर्वविदित्यादिश्रुतिसहस्रेषुदर्शनादित्यर्थः यदुक्तमाचारदर्शनादितितत्राह तुल्यंतुदर्शनं ९ [redacted]
[redacted] विद्यायाः कर्मशेषत्वाभावेप्याचारदर्शनंतुल्यमेवतत्राहि एतद्धस्मवैतत्सर्वंविद्वांसोग्निहोत्रंनजुहवांचक्रिरे
सादिकाश्रुतिर्विदुषः कर्माचाराभावंदर्शयतितुशब्देनाकर्मांगत्वलिंगदर्शनस्याबल्यत्वंसूचितं नहिब्रह्मविद्यावतांजनकादीनां
कर्माचारदर्शनेनविद्यायाः कर्मशेषत्वलिंगंतेषामहमभिमानाभावेनचोदनाप्रसंसंभवात्तत्रतत्कर्मणा आदनालक्षणा आभा
ना वे कर्मानुपानराचारदर्शनस्यविद्यायाः कर्मशेषत्वेबंधने दुर्बलत्वादिति यदुक्तंतच्छ्रुतेरितितत्राह असार्वत्रिकी १० यदेवविद्यय
विद्यया पाकरोतीतिश्रुतिरसार्वत्रिकीसर्वविद्यासुनभवतिप्रकृतोद्गीथविद्यामात्रपरत्वात् तथाचनश्रुतिबलाद्ब्रह्मविद्यायाः कर्मांगत्व
मित्यर्थः यदुक्तंसमन्वारभणादितितत्राह विभागः शतवत् ११ तंविद्याकर्मणीसमन्वारभेते इत्यत्रविभागोबोध्यः विद्यान्यपुरु
१०

कर्म कुर्वत्यपि त्वयि विदुषि न कर्म लेपाय भवति विद्यासामर्थ्यादिति अस्मिन्पक्षे नान्यथेतोऽस्तीत्यस्यायमर्थः
एवं + ८

स॰ह॰ १२१ तमन्वारभेते कर्माण्यमिति शतं वत् यावच्छतमाभ्यांदीयतामित्युक्तो विभ्रमरीयेन पंचाशदेकस्मिन् पंचाशदेकस्मिन्तद्धि स पर्यंव
लुनोऽस्य समन्वारंभवास्यनुमुस्तविषयत्वाभावात् विद्याशब्देन विहितत्वाद्वा यारविद्यामतिषिद्धा च नग्नस्त्रीदर्शनादिरूपा गत
ते तादृशविद्यायाःफलारंभे कर्मसाहित्येऽपि न क्षतिरिति मन्तव्यं यत्तु नहं ... नच्छन्दो विधानादिति तत्राह अध्ययनमात्रवतः १२
आचार्यकुलाद्वेदमधीत्येतिवाक्ये वेदाध्ययनमात्रवतः कर्मविधीयते नात्मज्ञानवतः स यः मात्रपदेनोपनिषदात्मज्ञानमेव
आवर्त्यते न कर्मकाण्डार्थावबोधः कर्मज्ञानं विनानुष्ठानासंभवादिति १२ यद्वाक्तं नियमाच्चेति तत्राह नाविशेषात् १३ कुर्वन्ने
वेह कर्माणीति नियमवाक्यं न ज्ञानिविषयं विद्वानिति विशेषाभावादित्यर्थः १३ अस्य नियमवाक्यस्य ज्ञानिविषयत्वेऽप्यविरो
धः ज्ञानिस्तुत्यर्थत्वादित्याह स्तुतयेऽनुमतिर्वा १४ इयं विदुषः कर्मानुमतिः कर्मानुज्ञा ब्रह्मविद्यास्तुतये स्तानयाऽस्तुतिश्चेवया
यज्जीवं कर्म कुर्वत्यपि त्वयि नो ब्रह्मभावाद्विद्यालम्भादस्य यासंसाराय नित्तेर्नास्तिपत्तोन कर्म लिप्यतइति १४ अपि च ब्रह्मविद्याया
त्र "परोक्षफलं दर्शयन्ती श्रुतिः कालांतरभाविफलककर्मांगत्वं वारयतीत्याह कामकारेणैके १५ एके विद्वांसः प्रत्यक्षीकृतविद्या
फलाः परोक्षफलकर्मसाधनं प्रजादिकं कामकारेण स्वयं त्यक्तवंत इति श्रूयते एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते
किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति विद्यायाः कर्मांगत्वाभावे विदुषः स्वेच्छया कर्मसाधनप्रजादित्यागोऽलिगमने
न स्यात्त्रणस्य ब्यतेरितिवाबोध्यं विद्यायाः कर्मांगत्वे हि कर्मसाधनत्यागो न स्यादिति अस्मत्फलस्य येषां नोऽस्माकमयं परोक्ष आत्मा
अयं लोकः प्रत्यक्षफलं नैव यं किं प्रजया करिष्याम इति निश्चित्य अग्निहोत्रादिकर्म न कृतवंत इति १५ उपमर्दं च १६ किंच कर्मानु
ष्ठानहेतोः क्रियाकारकफलविभागस्य समस्तस्याविद्याकृतस्य विद्यासामर्थ्यादुपमर्दमभावमामनंति यत्र त्वस्य सर्वमात्मैवा रा॰म १२१

भूत्वैकेन केवलं स्वेष्टसिद्ध्यादिनाऽतः पावनब्रह्मविद्यायाः कर्मविरोधित्वान्न कर्माङ्गत्वमिति भावः ॥९॥ विद्यायाः कर्मानङ्गत्वे हेत्वन्तरमाह २
अग्नीन्धनाद्यनपेक्षा ॥१०॥ अग्नीरतस्तु प्रीतिपुत्रब्रह्मविद्यावगन्तानहितस्याः कर्माङ्गत्वं सम्भवति पत्नीनामग्निहोत्रादिकर्माभावान्
तथा चायं प्रयोगः विद्या कर्मणो नाङ्गं भिन्नतेभि योग्यभिचारित्वात् अननुगमनं नैष्ठिकब्रह्मचर्यवदिति ननूपसम्पन्नमस्तद्वेवं किमो
ब्र॰ नमित्यत आह शान्तेरिति वेदः ... रितस्तामनोऽश्रमाः अयं पन्थास्त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयः ब्रह्म
चर्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेतीति ब्रह्मच
र्यादेव प्रव्रजेद्गृहाद्वा मूलधर्मतुल्यधर्मशब्दः आश्रमपरः यज्ञादिधर्मप्रधानो गार्हस्थ्याश्रम एकः तपः प्रधानो वानप्रस्थाश्रमो द्वि
सू॰ तीयः तृतीयः स्पष्टः एतेषामाश्रमिणामनित्यफलभाक्त्वमुक्त्वा ब्रह्मसंस्थस्य संन्यासिनो नित्यफलत्वमाह ब्रह्मेति ब्रह्मणि सम्य
क्स्थितम्यक्तनिष्ठा यस्य स ब्रह्मसंस्थः परिव्राडित्यर्थः तस्माद्ब्रह्मविद्या न कर्माङ्गं किं तु स्वतन्त्रैवामुक्तिफलेति सिद्धं त्रयो धर्मस्कन्धा १७
इत्यादिश्रुतिराश्रमसद्भावप्रमाणमित्युक्तं तदाक्षिपति परामर्शं जैमिनिरचोदनाच्चापवदति हि ॥१८॥ न तज्ज्ञानस्यान्तरङ्गसाधनं
पारिव्राज्यमभ्युपेतं निरूपितं तस्य तु स्वरूपसाधनाभावापत्त्या सङ्गतिः अथ संशयः किं पारिव्राज्यमनुष्ठेयं न वेति पूर्वपक्षे पारिव्राज्यस्या
भावाद्विद्यायाः कर्माव्यभिचारेण कर्माङ्गत्वमिति फलं सिद्धान्ते तस्य तदङ्गत्वाद्ब्रह्मनिरोधः न त्रपारिव्राज्यप्रमाणाभावान्ना याः
नुष्ठेयमित्याह परामर्शमिति त्रयः इति श्रुतौ चतुर्णामाश्रमाणां परामर्शमनुवादमात्रं जैमिनिर्निचोदनामन्यते न विधीयते इत्य रा
र्थः ... अतिरेचनादिलिङ्गादिरन्यथाश्रमाः अनेनाप्रलक्ष्यन्ते ... नास्तीति परत्वं चेति चकारार्थः तथा चान्यपरवाक्यात् अनुष्ठानमाश्रमा
णामस्मिन्निति भावः तपःशब्देन वानप्रस्थस्याश्रमपारनुवादः इति इदं व्यर्थं निषेधमान तात्त्वपारिव्राज्यमनानुष्ठेयमित्या

स॰सू॰ ह अपवदतीति हि वीरहा वा एष देवानां योऽग्निमुद्वासयत इत्यादिश्रुतिरग्न्युद्वासनप्रधानं पारिव्राज्यमपवदतीत्यर्थः यस्मादाश्रमा
१२२ न्तरिताश्रमान्तरमग्निहोत्रादिविधानसामर्थ्यात्सामाणिकमेव त्रय इत्यादिश्रुतावन्यस्येतेपसाश्रमस्तु न श्रुतिसिद्धः किंतु स्मृ
तिसिद्धत्वादनपेक्ष्यते स्मृतिश्च यावज्जीवमग्निहोत्रं जुहुयादित्यादिमसच्छ्रुतिविरोधादप्रमाणमिति पूर्वपक्षाभिमानः यद्य
इति पि ब्रह्मचर्यादेव प्रव्रजेदिति प्रत्यक्षा श्रुतिस्तथापि पौरुषेयश्रुतिर्नास्तीति कृत्वा चेतयमितिमंतव्यं १८ समाधत्ते अनुष्ठेयं बादरायणः
साम्यश्रुतेः १९ पारिव्राज्यमनुष्ठेयं भगवान्बादरायणो मन्यते कुतः त्रय इत्यादिश्रुतौ प्रामाणिकगार्हस्थ्येन साम्यश्रवणादि
त्यर्थः अयं भावः तपःशब्देन वानप्रस्थाश्रमस्यैवानुवादः संन्यासिनां तपः अन्यत्वात् ब्रह्मसंस्थशब्देनैवपसाश्रमानुवादः
आश्रमचतुष्टयानुवादेन ब्रह्मसंस्थतायास्तत्परत्वमेव वाक्यस्य तथा चान्यपरादपि वाक्यात्प्रमाणा आश्रमाः सिध्यन्तीति
वताधिकरणन्यायात् नेमवीरहा इत्यादिश्रुतिर्विरोधः तस्याः श्रुतेरज्ञानाद्यग्न्युद्वासनोद्युक्ताहिताग्निविषयत्वादिति १९ एवं
मस्य वाक्यस्यानुवादत्वमंगीकृत्यानुवादस्य प्रमाणान्तरापेक्षत्वादाश्रमाणां प्रामाणिकत्वमुक्तमिदानीमस्मिन्नेव वाक्ये आश्र
न्य माणां विधिकल्पनमर्थ्यासिनुवादकल्पे आश्रमविधायिवाक्यान्तरकल्पनागौरवप्रसंगान्नेति ह्वाक्ये विधिमात्रकल्पनायाश्च
लघुत्वादित्याह विधिर्वा धारणवत् २० अस्मिन्वाक्ये आश्रमाणां विधिरेव नानुवादः न चानेकाश्रमविधाने वाक्यभेदः स्यादिति वा
च्यं अपूर्वत्वेनाश्रमाणां विधेरावश्यकत्वेन वाक्यभेदस्येष्टत्वात् एकवाक्यतायां तीतावपि स्तुत्यर्गन्तत्वार्थविधोर्दृष्टान्तमाह धार
णवदिति यथाग्निहोत्रप्रकरणे ततोऽपि पितृयज्ञे स्रुचि मासंसिद्धविरोहवनीयं प्रतिपत्तिनोयनतत्र श्रूयते अधस्तात्समिधं धारयन्न
हि नुद्रवेदुपरि हि देवेभ्यो धारयतीति तत्र अधस्ताद्धारणस्य विधानं विधिकवाक्यस्योपरि हीत्यादेरनुवादत्वं प्राप्तितावपि स्तुवि एम
१२९

स्यहविरुत्पत्तिसमिश्राणां स्यात्पूर्ववत्तादेकवाक्यताभंगेन विधिपर्यायकल्पितः न चेहापीसमर्थः वस्तुतस्तुब्रह्मसंस्थत्वमेवपारि-
व्राज्यलक्षणमत्रवाक्येविधीयते आश्रमत्रयानुवादस्त्वनित्यफलत्वेनाश्रमत्रयनिंदयाब्रह्मसंस्थत्वस्यैवनित्यफलत्वेनस्तूय-
मानत्वात् यत्तूक्तंयत्तेतद्विधेयमितिन्यायात् नचब्रह्मसंस्थत्वस्यपौगिकार्थस्यगृहस्थादेरपिसंभवात्कथंब्रह्मसंस्थत्वंपारि-
व्राज्यस्यैवेतिवाच्यम् गृहस्थादीनांस्वस्वकर्मासक्तत्वेनब्रह्मसंस्थतायोगात् शिष्यमाणः परिव्राडेवब्रह्मसंस्थइति नयाव-
ज्य नास्मिन्पक्षेवाक्यभेदइतिनस्मासारिश्रा॰समाप्नामाणिकत्वात्तेषांचकर्माभावात्तस्मिंस्तद्ब्रह्मविद्यायांत्वानंत्य २१ स्तुतिमात्रमु-
पादानादितिचेन्नापूर्वत्वात् उद्गीथादिविद्यासुश्रूयते सएषउद्गीथोरसानांरसतमः परमइत्यादितद्वत्तथापि किमिदंकर्माङ्गोद्गी-
थस्तुतिमात्रंउतोद्गीथोपासनापूर्वगुणविधायकमितिपूर्वपक्षेउद्गीथमुपासीतेत्यादेः सर्वस्यापिस्तुतिमात्रत्वात्कर्माङ्गाश्रि-
तोपासनानुष्ठानासिद्धिः फलेऽसिद्धेनकर्माङ्गाश्रितोपासनानांविधेयत्वात् अनुष्ठानासिद्धिरिति एवंचात्रपरत्वेनाङ्गानामपिवि-
धानामनुष्ठानसमर्थत्वेनपुरुषार्थहेतुत्वात्कर्माङ्गाश्रितब्रह्मविद्यायाः पुरुषार्थहेतुत्वंकिमुवक्तव्यमितिसिद्धः पादसंग-
तिः तत्रानुष्ठेयाश्रमसाम्यश्रुतेः पारिव्राज्यस्यानुष्ठेयत्ववत् इयमेवजुहूरादित्यइत्यादिः कर्माङ्गस्तुत्यारसतमत्वादिवाक्यस्य-
स्याप्यानन्त्यस्तुतिमात्रत्वमितिदृष्टान्तेनपूर्वपक्षयति स्तुतिमात्रमिति रसतमत्वादिवाक्यसर्वमपिकर्माङ्गविधिस्तुतिमात्रंक-
र्माङ्गोद्गीथाद्युपादानादितिचेन्नकुतः अपूर्वत्वात्कर्माङ्गोद्गीथाद्युपासनानांरसतमत्वादिगुणानांचापूर्वत्वान्मानान्तराप्रा-
त प्तत्वात् उपासनादिविधेयत्वमेवास्यार्थः प्रकृतेएवंविधिसंभवेप्रकरणान्तरगतोद्गीथादिविधिस्तुतिलक्षणाकल्पनमन्याय्यतर-
मितिभावः २१ भावशब्दाच्च २२ उद्गीथमुपासीतेत्यादिविधिशब्दाच्चविधेयत्वमेवास्यार्थः २२ पारिप्लवार्थाइ-

त्वं २

स·सू·
१२३

निवेन्नविशेषितत्वात् २२ वेदान्तेषु तत्र तत्र अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी चेत्याद्या आख्यायिकाः
श्रूयन्ते तत्र संशयः । किमेताः पारिप्लवार्था उत सन्निहितविद्यास्तुत्यर्था इति पूर्वपक्षे कथानां मासं पारिप्लवप्रयोगशेषत्वात् कथाभिः सह
एकवाक्यतापन्नशब्दत्वाच्च विद्यायाः प्राधान्याभावेन पुरुषार्थहेतुत्वासिद्धिः फलासिद्धौ नेतरसिद्धिरिति मन्तव्यं एवं फलप
र्यवसानादेवास्य पारिप्लवगतिर्वाच्या न तत्र सतत्त्वमलाद्धृह्य पारिप्लुस पर्तापेक्ष्याउपास्यविषयत्समर्थकत्वस्यनापास्त्व
कथानामपि विद्यास्तुत्यर्थतापेक्षया पारिप्लवशेषत्वस्यापरिहार्यत्वेन पूर्वपक्षयति पारिप्लवेति अश्वमेधप्रकरणे पारि
प्लवाख्यानं श्रूयते पत्नीनां विधेयकथाकथनेन सारिप्लवशब्देनाप्येतेन पारिप्लवोपनिषत्कथायाः सम्बन्धोऽसमर्थः समाधत्ते नेति कुतः वि
त्वात शेषितत्वात् पारिप्लवमाचक्षीतेति तत्प्रकृत्य मनुर्वैवस्वतो राजेत्यादीनां कथानां विशेषकथानां पारिप्लवशेषत्वेन वि
शेषितत्वादित्यर्थः [redacted] तस्मादुपनिषत्कथानां न पा
रिप्लवशेषत्वं २३ ननु तर्हि किमर्था इमाः कथा इत्याशङ्क्य सन्निधिबलादित्यर्थ इत्याह तथा चैकवाक्यतोपबन्धात् २४
न यावत्कथानां पारिप्लवार्थत्वाभावस्तावत्सन्निधिबलादिहिता शेषत्वं कथानां पुनः एकवाक्यतोपबन्धात् सन्निहितमेत्र
विद्यावाक्यतास्तु तात्पर्यैः कथानां विद्यास्तुतिलक्षकत्वेन विद्यासाकाङ्क्षत्वेन चैकवाक्यत्वावगमात् तस्मात्स
न्निहितविद्याशेषत्वमेव कथानामिति सिद्धं २४ एवं पुरुषार्थाधिकरणोक्तस्य विद्यायाः स्वातन्त्र्यप्रतिपादनेन सत्त्वसत्त्वाभ्या
सं विचारं परिसमाप्य पुरुषार्थाधिकरणस्य फलमाह अत एव चाग्नीन्धनाद्यनपेक्षा २५ किं ब्रह्मविद्यायाः फलमोक्षे
शेषत्वेन यज्ञादिकर्माणि अपेक्ष्यन्ते न वेति सन्देहे कथानां विद्याशेषत्वेनापेक्षावत् कर्मणामपि फले विद्याशेषत्वेनापेक्षा

राम
१२३

वेतर्मुमुक्षामिकलेविद्यासेभ्युदेन्नोपेसानाप्यायज्ञादिश्रुता विविदिषायांविनियुक्तयज्ञादीनांविषयप्रतोरर्थलभ्यापानस्या
मनन्यपारिष्ठाविषयज्ञानसाध्यमोक्षेन्वपस्यतंभवारपेसनरतिप्रासे ब्रह्म अथाधिकरणाद्ब्रह्मविद्यायाः यस्तुहृत्याद्य
त्रे हेतुतामुक्तं नरस्तः शब्देनपाम्रूपते आत्मन ब्रह्मविद्यायाःस्तानेऽणपुरुषार्थहेतुता दृष्ट अग्नीधनशब्देनस्तसाम्यमविहिता
निकर्माणोलस्यते विद्याफलमोक्षे कर्मापेक्षानास्तिमुक्तिज्ञानस्यवराजतभ्रमनिवृत्तावित्सर्थः अपेभावः यज्ञादिश्रुत्याविवि
विदिषायामेवकर्मणांविनियोगश्रवणान्नमोक्षेकर्मापेक्षानचविषयप्रतोरर्थलभ्यापानस्यामनन्यपः कर्मणामितिवाच्यं
ब्रह्मज्ञानयासस्तिप्रतिबंधककल्मषनिवृत्तिजननद्वारोपायामन्वयसंभवादिति असाधाधिकरणफलपातानरयनरूपा
य रसंगत्योपेक्षा २४ सर्वापेक्षाचयज्ञादिश्रुतेरश्ववत् २६ ब्रह्मविद्याक्रियासक्तो कर्माण्यपेक्षतेनवेति संदेहे सर्वापेक्षेज्ञाना
र्थयज्ञाद्यनुष्ठानाभावे फलसिद्धावनतरनुष्ठानाचरणभावः अत्रयज्ञादीनांशमादीनांचज्ञानसाधनानांनिरूपणारसंगतिपाद।
संगतिः तत्रपथाब्रह्मविद्यायाःप्रमाणस्युक्तिज्ञानस्यवुत्तफलेकर्मानपेक्षानयायोसक्तावपिनकर्मापेक्षाप्रमाणाद्देवाति
रंशातनप्रासे ब्रह्म विद्यायाःसिसतोसर्वेषामाश्रमकर्मणामपेक्षास्तिकुतः यज्ञादिश्रुतेः तमेतंवेदानुवचनेनब्राह्मणाविवि
विदिषंतियज्ञेनदानेनतपसानाशकेनेत्यत्र सर्वेषामाश्रमकर्मणां सर्वेषांज्ञानसाधनत्वबोधकायाः श्रुतेः यथाश्वत्वविविदिष
तीनिवर्तमानोपयोगः प्रतिभातिनविधिः नयापियज्ञादीनांज्ञानसंयोगस्यापर्वेतन्नाद्विधिः कल्प्यः ब्रह्मानुभवकामोयज्ञा
दिकुर्यादिति नानुभवस्यप्रमाणाधीनत्वान्नयज्ञाद्यपेक्षेति वाच्य मलिनान्तःकरणस्यसत्यपिप्रमाणेनानुभवानुत्पत्तेरनुभवो
त्पत्तिप्रतिबंधकान्तःकरणमालिन्यनिवृत्त्यादिद्वारायाज्ञानस्ययज्ञादिजन्यत्वेननद्यपेक्षायाआवश्यकत्वादिति ननु

स॰टी॰
१२४

थं परप्राज्ञानोत्पत्तौ कर्मापेक्षावत्तोऽपेक्ष्यापेक्षास्मिन्नत्राह अश्ववदिति यथाऽश्वो योग्यतावलाद्रथचर्यायां विनियुज्य
ते न लांगलाकर्षणे तद्वत्कर्मणां मोक्षे योग्यताभावान्नापेक्षेत्यर्थः २६ ज्ञानोत्पत्तौ वहिरंगमुक्त्वांतरंगमाह शमदमाद्युपेतः
स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् २७ यदि कश्चिद्यज्ञादीनां ज्ञानसाधनत्वे विध्यभावात् ब्रह्मविद्यार्थि
कु नानानुष्ठेयत्वमन्यते तथापि शमदमाद्युपेतस्तु ब्रह्मविद्यार्थी स्यादेवं तत्तद्विधेः तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहि च
ति तो भूत्वात्मन्येवात्मानं पश्यतीति अंतरंगतया विद्योत्पत्तौ तेषां शमादीनां विधानाद्विहितानां चैतेषामवश्यानुष्ठेयत्वादित्यर्थः य
ज्ञादीनां ज्ञानसाधनत्वे विधिर्नास्तीति परस्मात्तिमभ्युपेत्यैवमुक्तं भगवता स्वकृतान् यापितितिवस्तुतो विधिरस्त्येव सूक्तमेवेति
बोध्यं यस्मादेवमात्मानं विदित्वा पापेन कर्मणा न लिप्यते तस्मादेवंविच्छमाद्युपेतो विचारयेदि[illegible]ति श्रुत्यर्थः अत एवैवंविदिति
च विद्यासन्निधानाच्छमादीनामंतरंगत्वं विविदिषासन्निधानाद्यज्ञादीनां वहिरंगत्वमिति बोध्यं २७ सर्वान्नानुमतिश्च प्राणात्य
ये तद्दर्शनात् २८ वृहदारण्यके श्रूयते प्राणसंवादे न ह वा अस्यानन्नं जग्धं भवतीति अस्य प्राणोपासकस्य यन्नतु मात्रस्य जग्धम
स्यं न तत्सर्वमनन्नं न भवति ह वा अन्नमेव भवतीत्यर्थः तत्र संशयः किमयं प्राणोपासकस्य सर्वत्रानुमतिः शमादिवदङ्ग्या
ङ्गविधीयते उत न स्तुत्यर्थं कथ्यत इति पूर्वपक्षे प्राणविदो भक्ष्याभक्ष्यविभागासिद्धेः सिद्धान्तस्तु स्तौतीति अत्र ब्रह्मविद्यासा
धनस्य प्राणविद्यायास्तत्र पुरुषार्थहेतोः स्तुत्यर्थं सर्वान्नानुज्ञानमिति निरूपणात्संगतिः अत्र विद्यासन्निधानाच्छ
मादिवदङ्गत्वमेव सर्वान्नानुमतिरिति प्राप्ते ब्रूमः न सर्वान्नानुज्ञानं विद्यांगविधीयते विध्यभावात् श्वादिमर्यादस्यान्नस्य
प्राणोपासकेनानुमशक्यत्वाच्च न स्यश्यो विधिः संभवति तस्मात्प्राणविद्यायां प्राणस्यान्नमिदं सर्वमिति यद्विंतनं विहितं त

प्रशंसार्थोयमर्थवादः इदमभिप्रेत्याह सूत्रकारः सर्वान्नानुमतिश्च प्राणात्यये इति सावधारणमिदं सूत्रं प्राणात्यय एव हि परस्या
मापदि सर्वमन्नं सुरावर्ज्यं विदुषः समविद्वांस प्रतिवादनी यतेनानुमतेन सत्यं भवति तत्तद्दर्शनात् अभक्ष्यभक्षणस्यापत्काल एव
श्रुतौ दर्शनादित्यर्थः तथा हि मटचीहतेषु कुरुषु तस्मिन् ब्राह्मणश्चाक्रायणः किल ऋषिः कुलदेशदुर्भिक्षेण ग्रामात् सुसीडितो दे ह
शात्समागतः कदाचिद्धस्तिपालकदेशं सन्निविष्टः तेन हस्तिपालकेनार्थभक्षितान्कुल्माषान्माषाभक्षितवान् तेनोदपानं गृहाणेत्यु न
क्तः सुच्छिष्टं नमपीनस्यादिति प्रतिषिध्य किं नेमाषा उच्छिष्टा इति हस्तिपकेनोक्ते न सत्रहेत् नुमाह चाक्रायणः कुल्माषभक्षणं प
द्दहनकुर्यां न हि मे जीवनमवनस्यात् उदपानं तत्कामचारो मे भविष्यतीति एवमिम्या उच्छिष्टान्माषान् खादित्वा शिष्टान् जायायै द
दौ तत्पाच भर्तुः सभावज्ञपा निहितानुन्तरेदिने पिभक्षितवानिति श्रुतेः एवं सम्पराच्छिष्टं पर्युषितान्नभक्षणं दर्शयन्त्याः श्रुतेरयंभावः
परस्यामापदि प्राणानिरोहार्थमभक्ष्यमपि भक्षणीयं तस्यापि विदुषापि तन्न कर्तव्यमिति मत्वीशादनपाधाणां हृष्टयोरन्न
वर्णाः स्वरूपविशेषाभावान्नास्याः तस्मात्सर्वान्नानुज्ञानमर्थवादमात्रं २९ अबाधाच्च २९ भक्ष्याभक्ष्यविभागशास्त्रस्याबाधाद्वा
र्थवादमात्रमित्यर्थः अन्यथा सामान्यशास्त्रं विशेषपरतया निपद्यमानं बाधितं स्यादिति भावः २९ अपि च स्मर्यते ३० अपि च प
रस्यामापदि विदुषो विदुषश्च सर्वान्नभक्षणं स्मर्यते जीवितात्ययमापन्नो योन्नमत्ति यतस्ततः लिप्यते न स पापेन पद्मपत्रमिवाम्भ
सेति तथा मद्यं नित्यं ब्राह्मणो वर्जयेदिति तस्मान्न सत्यं न विदुषापि नाभक्ष्यं भक्ष्यमपि तत्र्यं ३१ स्मृतिमूलभूतां श्रुतिमप्याह शब्दश्चा
स्याकामकारे ३१ अस्याभक्ष्यभक्षणस्य प्रतिषेधकः तस्माद्ब्राह्मणः सुरां न पिबेदिति एवंरूपः शब्दश्चाकामकारे स्वेच्छाकृतप्रवृत्तिनि
रासे वर्तत इत्यर्थः तस्मात्प्राणविरः सर्वान्नानुज्ञानमर्थवादमात्रमिति सिद्धं श्रुतौ तस्मादिति सुरापस्य ब्राह्मणस्य मुखे सुराम्

स॰दृ॰ व कस्य मरणं न प्रायश्चित्तस्य सत्वादित्यर्थः ३१ विहितत्वाच्चाश्रमकर्मापि ३२ सर्वापेक्षेत्यत्र सत्याश्रमनित्यकर्मणां न तु ज्ञान

१२५ साधनत्वमुक्तं तानि नित्यकर्माणि मुमुक्षुणा कर्तव्यानि न वेति संदेहः तत्र तमेतं वेदानुवचनेनेत्यादिना विद्यासाधनत्वेनाभिधानात्

कर्तव्यानीति प्राप्ते द्वा सर्वथानुमतेः शास्त्रांतरविरोधात्स्तुतित्ववत् यावज्जीवमित्यादिकर्मनित्यत्वशास्त्रविरोधात् यज्ञादी

नां ज्ञानसाधनत्वश्रुतिः स्तुतिमात्रं अन्यथा नित्यत्वेनावश्यानुष्ठेयत्वज्ञानार्थत्वेन काम्यत्वापातावश्यानुष्ठेयत्वाभावश्चेत्येकस्मिन्क

र्मणि विरुद्धधर्मद्वयस्यासिद्धेरिति प्राप्ते ब्रूमः अमुमुक्षुणाप्याश्रमकर्मानुष्ठेयमेव यावज्जीवमग्निहोत्रमित्यादिना विहितत्वादित्य

र्थः ३२ नन्वेवं सति विद्यासाधनत्वं कर्मणां न युक्तं विरुद्धद्वयापत्तेरित्युक्तमित्यत आह सहकारित्वेन च ३३ विद्यासहकारित्वेना

पि चित्तशुद्ध्यादिद्वारा विद्यासाधनत्वेनापि नित्यकर्माण्यनुष्ठेयानि यज्ञादिश्रुत्या विद्यार्थत्वेन विहितत्वादेवेत्यर्थः यथैकस्यैवा

दिरत्वस्य खादिरो यूपो भवतीति खादिरं वीर्यकामस्येति शास्त्रद्वयात् क्रत्वर्थत्वेन नित्यत्वं पुरुषार्थत्वेनानित्यत्वं चाविरुद्धं तद्वदिहापि

शास्त्रद्वयबलात्कर्मणां नित्यत्वकाम्यत्वाविरुद्धत~~[illegible]~~सिद्धेर्हि वस्तुनि वि

रुद्धधर्मद्वययोगो बाधकः ननु साध्यकर्मणोऽभयथाप्यनुष्ठानसंभवात् न च काम्यत्वे यावज्जीवमिति नित्यत्वश्रुतिविरोधः काम्या

नुष्ठानेनैव नित्यसिद्धेरित्यतासंर्य अत्र पूर्वपक्षे यज्ञादिश्रुतेः स्तुतिपरत्वं फलं सिद्धांते विधायकत्वमिति बोध्य ३४ ननु ज्ञानकांडस्य

यज्ञादिश्रुत्या कर्मकांडस्य यज्ञाद्यनुवादेन ज्ञानसाधनत्वविधाने न युक्तं किंतु पूर्वयज्ञादेर्नामैकप्रकरणाभेदेन कर्मभेदस्यावश्यक

त्वादित्यत आह सर्वथापि त एवोभयलिंगात् ३५ सर्वथापि नित्यत्वे ज्ञानार्थत्वे चानुष्ठेया यज्ञादयो धर्मास्त एव न कर्मभेदोऽस्ति

कुतः उभयलिंगात् श्रुतिलिंगात्स्मृतिलिंगाच्चेत्यर्थः तथाहि श्रुतिलिंगं यज्ञेन विविदिषंतीति यज्ञादिशब्देन प्रसिद्धयज्ञाद्यनुवा

देन विद्यासाधनत्वं विधीयते न तु मासमग्निहोत्रं जुहोतीत्यत्रेव प्रसिद्धाग्निहोत्रात्कर्मांतरं तत्र हि जुहोतीति विधायकाख्यातप्रकृति-
भूतस्य जुहोतेर्योऽग्निहोत्रमिति युक्तस्तस्य प्रसिद्धाग्निहोत्राद्भेदः जुहोतेः साध्यहोमव्यक्तिवचनत्वेन प्रसिद्धाग्निहोत्रपरामर्शानुपपत्तेः
अत्र त्वेवंतरे कार्योऽग्निहोत्रशब्दस्य न निसाग्निहोत्रानुवादकत्वं व्यक्तिवचनतादवप्रकृते न तु न यज्ञादिविधायकाख्यातप्रकृत्यर्थः वि
विदिषायाः एवं तत्र दर्शितात्तस्मादाख्यातप्रकृत्यर्थाद्भिन्नार्थके यज्ञादिशब्दे प्रसिद्धयज्ञाद्यनुवादेन विद्यासंयोगमात्रमपूर्वं विधीयते
इति न कर्मभेदः स्मृतिलिंगमपि अनाश्रितः कर्मफलं कार्यं करोति य इति प्रसिद्धमेव कर्म ज्ञानार्थं दर्शयति तस्मान्न कर्मभेदः ३४ अ
नभिभवं च दर्शयति ३५ रागादिभिः क्लेशैरेवास्यात्मानं न स्पृशति यं ब्रह्मचर्येणानुविंदत इत्याद्या श्रुतिर्ब्रह्मचर्यादाश्रमकर्मणामनःशु
द्धिद्वारा ज्ञानसाधनत्वे आत्मानभिभवं लिंगं दर्शयतीत्यर्थः तस्मात्सर्वेषामाश्रमनित्यकर्मणां ज्ञानार्थत्वमिति सिद्धं ३५ अंतरा चापि
तु तद्दृष्टेः ३६ अंतरा अंतराले वर्तमानो विधुरः तस्य किं ब्रह्मविद्यायामधिकारोऽस्ति न वेति संदेहे यज्ञादिश्रुत्याश्रमकर्मणामेव ज्ञानसा
धनत्वविधानादाश्रमिणामधिकारोऽपि विधुरकृतकर्मणा ज्ञानहेतुत्वाभावान्नास्त्यधिकार इति प्रत्युदाहरणेन प्राप्ते ब्रूमः अंतरा चाप्या
श्रममंतरा वर्तमानस्याप्यस्त्यधिकारः तस्य ब्रह्मविद्याधिकारस्यानाश्रमिणो रैक्वादेः श्रुतौ स्मृतौ च दर्शनादित्यर्थः पूर्वपक्षे अनाश्रमि
कर्मणां जपादीनां विद्याहेतुत्वासिद्धेः फलं सिद्धांते तत्सिद्धिरिति बोध्यं ३६ अपि च स्मर्यते ३७ संवर्तकप्रभृतीनां च नग्नचर्यादियोगाद
नपेक्षिताश्रमकर्मणामपि महायोगित्वं स्मर्यते इति शेषः ३७ ननु रैक्वादीनां जन्मांतरकृतादपि कर्मणो विद्यासंभवान्नैतेषां विद्याद
र्शनमस्तु निकानाश्रमिणां विद्याधिकारे लिंगं विद्याहेतुभूतकर्माभावादित्यत आह विशेषानुग्रहश्च अनाश्रमिणां जपोपवासदेवता
राधनादिभिः कर्मविशेषैर्ज्ञानहेतुभिरस्ति विद्यायामनुग्रह इत्यर्थः तथा हि जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशय इति स्मृतिर्ब्राह्मण।

तै

व्याख्यायामधिकारो दर्शयति तस्मादस्ति रनाश्रमिणोऽधिकारः ॥३८॥ ननु विधुरस्याधि॥१॥ यदि

स०वृ० मात्रसंबंधित्वं जपस्य दर्शयन्तौ विधुरस्यापि प्राप्तौ वर्णमात्रसंबंधिजपादिनैव विद्यासिद्धिः नत्वाश्रमित्वमपेक्षितमत आह अत
९२६ ॥स्त्विति ॥ इतरत्त्वापि लिंगाच्च ३९ अतस्त्वितरादितरदाश्रमित्वं बहुज्ञानसाधनसमानाधिकरण्यात्प्रायः शीघ्रमेव विद्याहेतुः श्रुति
स्मृतिसिद्धत्वात् तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्चेति श्रुतौ पुण्यकृत विशेषणात्पुण्यश्रुतिलिंगाच्चेत्यर्थः तेन ज्ञानेन एति ब्रह्मप्राप्नो
ति ब्रह्मवित्पुण्यकृत्स्वाश्रमोक्तकर्मकृत्तैजससि परमात्मनि आत्मत्वेन वर्तत इति तैजसः न च पुण्यकृत विशेषणादाश्रमित्वं ब्रह्म
त प्राप्तिहेतुत्वात्पापदर्शितिगम्यते ३९ ननु नाश्रमिणामपि कर्म विद्याहेतुरुक्तं उत्तमाश्रमात्पूर्वाश्रमं प्राप्तस्य कर्म विद्याहेतुरिति कि द
मु वाच्यमिति कैमुतिकन्यायप्रसंगसाशंकं सेपसमाधत्ते तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः ४० किमुत्तमा
श्रमात्पूर्वाश्रमं प्राप्तस्य कर्म विद्याहेतुर्वा न वेति संदेहः पूर्वपक्षे आश्रमप्रच्युतस्याश्रमिणः कर्मणो विद्याहेतुत्वाभावे आश्रम-
त्यागपत्तेनस्यारिति फलसिद्धान्ते प्रच्युतः श्रप्रमाणकत्वादाश्रमत्यागपत्तमितिमन्तव्यं तत्राश्रमात्प्रच्युतस्यापि कर्म ज्ञानहेतु
रिति प्राप्ते ब्रूमः तद्भूतस्य प्राप्तोत्तमाश्रमस्यातद्भाव उत्तमाश्रमात्प्रच्युतिर्न कथमपि संभवती जैमिनेरप्याचार्यस्य संमतं अ
स्व पिशब्देन स्वबादरायणस्य संमतं वनिर्दिशति कुतः अरण्यमियादिति पदादिति नियमात् अरण्यपशब्देनैकांतोपलक्षितउत्तमा-
श्रमउच्यते तमियादुछोरिति पंथास्तु मार्गः तस्मादुत्तमाश्रमान्न प्रत्यवरोहेदित्युपनिषद्रहस्यमित्यर्थः अतद्रूपशब्देन प्रत्यव
रोहबोधकश्रुत्यभाव उच्यते अभावशब्देन शिष्टाचाराभाव ननोप्याश्रमप्रत्यवरोहो नयुक्त इत्यर्थः तस्मात्प्रच्युतस्याश्रामारिक-
त्वान्न प्रच्युतस्य कर्म विद्याहेतुरिति सिद्धं ४० एवं प्रत्यवरोहो शास्त्रीय उक्तं परित्रमादात्प्रत्यवरोहो नैष्ठिकब्रह्मचारिणाकृतः तस्य
स्य किं प्रायश्चित्तमस्ति न वेति संदेहे नास्तीति पूर्वपक्षमाह न चाधिकारिकमपि पतनानुमानात्तदयोगात् ४१ पूर्वं प्रच्युतस्य कर्म रम ९२६

मे ५

नाविपाहेतुरित्युक्तं इदानीमनुतस्यापि कृतप्रायश्चित्तस्य कर्मविपाकहेतुरिति पूर्वसिद्धस्योत्सर्गस्यापवादः तत्संगतिः पूर्वपक्षेऽननु
तस्योर्ध्वरेतसः पातित्यमेवेति फलसिद्धान्ते कृतप्रायश्चित्तस्य तस्य फलसिद्धिरिति मंतव्यं ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेते
ति प्रायश्चित्तश्रुतेस्तदधिकारलक्षणो अवकीर्णि पशुश्रुतेस्तद्विधानस्यामासकालत्वादिसत्रनिर्णीते अवकीर्णशब्देन योनौनि
षिक्तरेत उच्यते ततस्तस्मात्तीसवकीर्णीतस्य पः पशुः स लौकिकाग्नौ होतव्यः यथापनयनकाले लौकिकाग्नौ होमस्तद्वत् आधा
मिता नस्य प १ ग्रहोत्तरकालतयापूर्वं अभासकालत्वादिति तदिदमधिकारलक्षणेसिद्धं प्रायश्चित्तमाधिकारकं तदपि नैष्ठिकस्याव
कीर्णिनो नैवास्ति कुतः आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महेति पतनानुमानादि नि
न्दस्य पातित्यश्रुत्यनुमापकस्मरणात्तस्य प्रायश्चित्तस्याप्रापणादित्यर्थः समाधत्ते उपपूर्वमपि त्वेके भावमशनवत्तदुक्तं ४२ नेदं महा
पातकं येनाकृतप्रायश्चित्तताभावः स्यात् अपि त्वेके आचार्या उपपदपूर्वमेवेदं पातकमन्यंत यद्गुरुदाराभ्योऽन्यत्र गमनं तस्मादेतस्यो
प पपातकत्वादुपकुर्वाणस्येव नैष्ठिकस्यापि युक्तं प्रायश्चित्तभावमिच्छंति उभयोर्ब्रह्मचारित्वेन समत्वकीर्णित्वाविशेषात् अशनवत्
यथा ब्रह्मचारिणामधुमांसाशिनो व्रतलोपः पुनः संस्कारश्चेति तद्वत्प्रायश्चित्ताभावस्य शास्त्रप्रसिद्धभावात्प्रायश्चित्तस्य च तत्स्मृत्या
त्प्रायश्चित्तं पुनरयुक्तं अभ्युपगंतु असिन्नर्थे यववराहाधिकरणसमर्तिमाह तदुक्तमिति यवमयश्चरुः वाराही उपानहावुपमुंच
त इत्यत्र यववराहशब्दाभ्यां किं प्रियंगुकृष्णशकुन्यौ ग्राह्ये उत दीर्घशूककसूकरावेति संदेहे उभयत्र प्रयोगवृत्तिभ्यां दिक्कल्परिति।
प्राप्तेऽपि प्रियंगुकृष्णशकुन्याः शास्त्रप्रसिद्धभावाद्दीर्घशूकशूकरयोश्चरणहंगवानुधावंतीत्यादिशास्त्रप्रसिद्धेस्तयोरेव ग्रह
णमिति प्रमाणलक्षणे सिद्धांतितं तथेहापीत्यर्थः तस्मात्प्रायश्चित्तं न पश्यामीति स्मृतिः कृतप्रायश्चित्तेनावकीर्णिनास्तु व्यव

म॰ वृ॰ हाराभावेयत्नोगौरवंस्याद्धिः कर्तव्यमित्येतन्नसौरत्वेदोषः ४२ बहिरङ्गभयस्थापिस्यान्नेत्याचारस्य ४३ कृतप्रायश्चित्तेनसहशिष्टाचारक्ष

१२७ पंकर्मकिंविद्यासाधनंनवेतिसंदेहे प्रागुक्तप्रायश्चित्तेनैवतत्स्वभुद्दत्वाद्विद्यासाधनमिति पूर्वपक्षे सिद्धहेतुमुपजीव्यपूर्वपक्षोसिद्धान्तः।

ऊर्ध्वरेतसांस्वाश्रमात्प्रच्युतिर्महापातकमुपपातकंवास्तु उभयथापितेकृतप्रायश्चित्ताअपिशिष्टैर्बहिः कर्तव्याः प्रायश्चित्तेनप

शमिआहूयपतितंतंविप्रवृद्धाचाध्यापयेत्तान्वोदिह्मनिंदात्स्मृतेः। शिष्टाचारादधनप्रायकीर्तिनासंशिष्टानामध्यापनाद्याचारोस्ति ह

तस्मात्प्रायश्चित्तेनपरलोकशुद्धिनापितेनसहकृतप्रवरणादिकंनविद्यासाधनमितिफलितं ४३ स्वामिनः फलश्रुतेरित्यात्रेयः

४४ किमङ्गाश्रितोपासनानियजमानकर्तृकाणिअहोस्विदृत्विक्कर्तृकाणीतिसंदेहे यः कृतप्रायश्चित्तःससंव्यवहार्यइत्यु

त्सर्गस्यनिरासस्तावाधवदिहाप्यङ्गानुष्ठातुरेवअङ्गाश्रितोपास्तिकर्तृत्वमित्युत्सर्गस्यवर्धतेहास्मैयउपास्तइत्यादिफलश्रुत्या

यायस्फलभोक्तासएवतस्मिन्कर्मणिकर्तेतिन्यायोपवृंहितयावाधेनफलभाजोयजमानस्यैवकर्तृत्वमिति दृष्टान्तेनपूर्वपक्ष।

माह स्वामिनइति स्वामिनोयजमानस्यैवाङ्गाश्रितोपास्तिषुकर्तृत्वमित्यात्रेयआचार्योमन्यतेकर्मणेयंचविधस्वामित्वस्युपा

सकस्यवर्धतेहास्माइत्यादिफलश्रवणादित्यर्थः तस्मात्फलभाजोयजमानस्यैवकर्तृत्वमितिप्राप्ते ४४ समाधत्तआर्त्विज्यमित्यौ

डुलोमिस्तस्मैहिपरिक्रियते ४५ अङ्गोपासनमार्त्विज्यंकर्मत्विक्कर्तृकमेवेत्यौडुलोमिराचार्योमन्यतेतस्मैहिसाङ्गायकर्मणेऋत्वि

क्परिक्रियतेयजमानेननत्वयावत्यजमानगामिफलकमङ्गोपासनंयजमानेनस्वामिगामिफलककर्मार्थंपरिक्रीतत्विक्कर्तृ

कमेवकर्माङ्गोपासनमपिनाश्रितगोदोहनवदितिनफलश्रुतिविरोधः किंचश्रुतेश्चैतद्धस्मएवमुद्गात्रात्समाणादृष्टाविदित्वाव व्या

कनामाकृषिः सत्त्रिणामुद्गाताबभूवेतिश्रुतिरप्याशयाद्युपासनस्यर्त्विक्कर्तृकत्वमेवाह अत्रस्वतन्त्रफलानामुपासनानामृत्विक्क राम

१२७

तं कर्तेति यजमानगामिफलत्वकोक्तेरिति पारसंगतिः पूर्वपक्षे कर्तृत्वभोक्तृत्वयोरेकाधिकरण्यं सिद्धांते ऋत्विजः कर्तृत्वं स्वाम

धीनमिति परंपरयैकाधिकरण्यमिति मंतव्यं ४५ सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ४६ बृहदारण्यके

श्रूयते तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण इ २

ति यस्मात्सर्वं ब्राह्मणा आत्मानं विदित्वा पुत्रैषणाभ्यो व्युत्थायाथ भिक्षाचर्यं चरंति तस्मादधुनातनोपि ब्राह्मणः पांडित्यं पन

ज्ञापात्तब्रह्मधीः तद्धान्युडितत्वस्यैकं सपांडित्यं श्रवणान्निर्विद्य निश्चयेन लब्ध्वा बाल्येन ज्ञानबलभावेन मननेन मुद्धानः कर

णत्वेन वा स्थातुमिच्छेत् तदुपलब्ध्याश्रयश्रवणमननानंतरं मुनिर्मननशीलो निदिध्यासनपरः स्यात् अमौनं श्रवणमनने

मौनं च निदिध्यासनं लब्ध्वा उक्तत्रयस्य ब्रह्मसाक्षात्कारहेतुत्वात्तत्प्राप्त्यनंतरं ब्रह्माविर्गच्छतीति ब्राह्मणः साक्षात्कृतब्रह्माभवतीत्य

र्थः तत्र संशयः किमत्र निदिध्यासनाख्यमौनं विधीयते न वेति पूर्वपक्षे मौनस्यानुवेधफलासिद्धिः सिद्धांते ज्ञानप्रसंतननस्यानु

ष्ठानसिद्धिरिति बोध्यं तत्र तृतीयवाकारालभ्यो विरोधचकारसहनेमिद्धीयानामुद्गातावभ्येति चाकरे पांडहासोपासकस्वक

नाम्नः ऋत्विक्कर्तृत्वबोधकादंगोपासनस्यर्त्विक्कर्तृत्ववदिहाप्यथ ब्राह्मण इति वाक्यशेषादिहि विविधुरयमुनिरित्यत्र न मौनवि

धिरिति दृष्टांतेन प्राप्तभ्रमः तदिति फलभूतसाक्षात्कारश्रवणाद्यपेक्षया सहकार्यंतरस्य मौनस्य निदिध्यासनाख्यस्य विधिरि

त्यर्थः ननु गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थ्यमित्यत्र मौनशब्दस्य पारिव्राज्यपरत्वात्कथमत्र मौनं निदिध्यासनं स्यादत आ

ह तृतीयमिति श्रवणमननद्वयापेक्षया तृतीयं निदिध्यासनमेवात्र मौनं विधेयमित्यर्थः न चेतराश्रमसमभिव्याहारबला

न्निदिध्यासनप्रधानपारिव्राज्ये मौनशब्देन लक्ष्यत इति भावः कस्मात्पुनर्मौनविधिरित्यत आह तद्वत इति ब्रह्मपरो ज्ञानवतः प्र

सू.वृ. देवोसेमंक्षतस्यसंन्यासिनइत्यर्थः ननुसूक्ष्मवस्तुसाक्षात्कारेनिदिध्यासनस्यप्राप्तत्वान्नविधेयत्वमतआह पक्षेणेति यस्मि
१२८ न्पक्षेभेददर्शनप्राप्तिस्तस्मिन्पक्षेप्राप्त्यभावाद्विधेयत्वमित्यर्थः ननुब्रह्मपरवाक्येकथंमौनविधिरित्याशंक्यदृष्टान्तमाह वि
ध्यादिवदिति यथादर्शपौर्णमासप्रधानपरवाक्येकथंमौनविधिरित्याशंक्यदृष्टान्तमाह अन्वाधानादंगजातस्यविधिस्तद्वदि
त्यर्थः प्रधानमात्रस्यअंगपर्यन्तोविधिःतदादिर्विध्यादिः प्रधानमितिपावृत्तअतएवप्रयाजादिर्विध्यन्तइत्युच्यतेब्राह्मण्यस्य
श्रव फलत्वान्नविधिकत्स्नेना[illegible]तिभावः ४६ ननुब्राह्मणादिप्रधानापरिघात्तिसंन्यासः कथंतर्हिच्छांदोग्येगृहिणोप[illegible]संहा
रः अभिसमावृत्यकुटुंबेइत्यत्रेतिनहितरामोक्तः संन्यासानात्मीतिपासतत्राह कृत्स्नभावात्तुगृहिणोपसंहारः ४७ गृ
हिणः कर्मबाहुल्यात्तेनोपसंहारः ननुसंन्यासाश्रमाभावादित्यर्थः कृत्स्नोश्रमकर्मणांशमादीनांचयासंभवंगृहिणिभावादित्य
र्थः ४७ एवंसंन्यासगार्हस्थ्याश्रमद्वयोपादानेऽप्याश्रमाभावशंकासात्तन्निरासार्थमाह मौनवदितरेषामप्युपदेशा
त् ४८ मौनशब्देनसंन्यासगार्हस्थ्यपरिग्रहः तद्वदितरयोरपिब्रह्मचर्यवानप्रस्थयोःतत्पदप्रवद्धितैयोब्रह्मचर्यावाचार्यकुलवासी
व तृतीयइत्यादावुपदेशादनुष्ठेयत्वमित्यर्थः बहुवचनंतुतानरभेदापेक्षयागायत्रीब्राह्मणः प्राजापत्यादिहन्निति ब्रह्मचारिभेदा
नेनपश्यादुवा एवंवानप्रस्थवालखिल्याद्यश्रितवानप्रस्थभेदाइति ४८ अनाविष्कुर्वन्नन्वयात् ४९ पूर्वत्राहतवाक्येमौनंविधेयं
मित्युक्तंतत्रस्ववाल्यंकिमित्यपेक्षायांतत्स्वरूपमत्रनिरूप्यतइतिसंगतिः तत्रोक्तवाल्यशब्देनवालस्यकर्मनिश्नमूत्रत्यागादिकमु
च्यते उतगर्भदम्भरहितत्वादिपत्वापभावरूपभावशुद्धिरितिसंशयः पूर्वपक्षेपूर्वस्मान्नागतेनअनुष्ठानफलंसिद्धान्तेउत्तरस्मात्तुवो
ध्य तत्रप्रथमिरदत्ततान्निश्नमूत्रत्यागादिकवाल्यमितिप्रमः उक्तभावशुद्धिरेवात्रवाल्यंविधेयगतत्वात्सर्वस्यवालकर्मणोविधातुविरो राम
१२८

धिकृत्वादिति तदिदमाह अनाविष्कुर्वन्निति दिध्यासनादिभिरात्मानं प्रख्यापयन् विज्ञापयन् गर्वादिरहितः स्यादिति शेषः इति बाल्येनेति
शेषः इति सूत्रार्थः कुतः अन्वयात् अस्य वाक्यस्य विद्यांगत्वपरत्वेनैव मुक्तभवादिसर्गः ४९ एवं पाण्डित्यादिकर्माख्यबाल्यांतं विद्याहे
त तुमुक्त्वा तत्फलविद्याप्राप्तिकालमाह ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनात् ५० किमिहैव जन्मनि विद्योत्पत्तिः उत कदाचिदमुत्रा
९ पि संशयः पूर्वपक्षे श्रवणादिविद्याहेतुत्वान्नियमः विद्याप्राप्तिरैहिकत्वेन कश्चिद्दर्शनादिति सिद्धांतेत्वप्रतिबद्धश्रवणादेस्तन्नियम
इति मंतव्यं तत्रैहैव जन्मनि विद्याजन्मास्त्विति कामनया श्रवणादिप्रवृत्तौ ऐहिकमेव विद्याजन्मेति भासते ऽन्यः विद्याविरुद्धफल
कृद्देशकालविशेषापेक्षफलोन्मुखकर्मप्रस्तुतत्वेन प्रतिबंधाभावे सत्यैहिकं विद्याजन्म सति श्रवणादिपौष्कल्ये भवत्येव चित्रा
फलप्रभुत्वन्तु सति तु प्रतिबंधे अमुत्रापीत्यनियम एव न त्विहैवेति नियमः कुतः तद्दर्शनात् प्रतिबंधाप्रतिबंधाभ्यामनियमस्य श्रु
तौ दर्शनात् तथा हि श्रुतिः जन्मांतरानुष्ठितश्रवणादेः फलं जन्मांतरे दर्शयति गर्भस्थ एव चैवामदेवः प्रतिबुबुधे ब्रह्मभावमि
ति सति तु प्रतिबंधे विद्या दुर्लभेत्याह श्रुतिः श्रवणायापि बहुभिर्यो न लभ्यः शृण्वंतोपि बहवो यं न विद्युः आश्चर्योस्य वक्ता कु
शलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति आत्मश्रवणमपि बहूनां दुर्लभं कुतः श्रेयोमार्गप्राप्तश्रवणलाभेपि तत्फलज्ञानं दु
र्लभं तत्र हेतुराश्चर्य इति यथा परमात्मनो वक्ता आश्चर्यः अद्भुतवक्ताश्चिरेण संभवति सम्यगाचार्यलाभेपि तस्माच्छ्रुतात्स्याज्जन्मनो
लब्धा तत्साक्षात्कर्ता आश्चर्यः निपुणसाक्षात्कारः कुशलेनाचार्येणानुशिष्टोपि शास्त्रेणात्मनः परोक्षत्वेन ज्ञाता प्याश्चर्य एव
सर्वः तस्मादनियमो विद्याजन्मन इति सिद्धं ५१ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ५२ यथा विद्याप्राप्तिश्र
वणादिसाधनोत्कर्षापकर्षाभ्यामैहिकामुष्मिकत्वरूपोपचयापचयवत्त्वनियमः एवं तत्फले मुक्तावुपचयापचयवत्त्वनियमो

स॰ वृ॰ १२९ 129

स्तिनवेतिसंदेहेपूर्वपक्षेस्वर्गादिवत्कर्मसाध्यत्वंमोक्षस्येतिनसाधनाधिक्यकरणमिहफलेसिद्धांतेतस्यनिर्विशेषस्यज्ञाने
फलस्यत्वमितितत्सिद्धिरितिमंतव्यं तत्रपूर्वोक्तविद्यादृष्टांतेनफलत्वेनहेतुनामोक्षस्यसातिशयत्वनियमेप्राप्तेब्रूमः एव
विद्यावन्मुक्तिरूपफलस्यानियमःनिर्विशेषत्वमेवकुतस्तदवस्थावधृतेः मुक्तिवस्थायानिर्विशेषब्रह्मरूपत्वेनब्रह्मवेदब्र
ह्मैवभवतीत्यादिश्रुतावधारणादित्यर्थः नयाचफलहेतुकानुमानस्यागमबाधः नहिसाक्षात्काररूपविद्यायामुपचयापच
यत्वमस्तिनहिपूर्वोत्तरभाविघटसाक्षात्कारयोश्चिरत्वाचिरत्वमतिशयइतिकश्चिदभ्युपैतितस्मान्निर्विशेषब्रह्मसाक्षा
त्कारस्यैकरूपत्वात्तल्लभ्यमोक्षोनिरतिशयानंदात्मकरूपएवेतिसिद्धं अभ्यासोध्यायसमाप्तिद्योतनार्थः ५१ इतिश्रीब्र
ह्मसूत्रवृत्तौब्रह्मामृतवर्षिण्यांतृतीयस्याध्यायस्यचतुर्थःपादः अध्यायश्चसमाप्तः ४३ पूर्वाध्यायसाधिकरणेमोक्षेवि
शेषनियमाभावउक्तः संप्रतिमोक्षहेतुज्ञानसाधनेषुश्रवणादिष्वाहत्यानुष्ठाननियममाह आवृत्तिरसकृदुपदेशात् १
पूर्वस्मिन्नध्यायेपरापरविद्यासुसाधनविषयोविचारःकृतः अत्रतत्फलविचारःक्रियते अतोनयोरध्याययोर्हेतुहेतुम
द्भावःसंगतिः अत्रप्रथमेपादेश्रवणाद्यावृत्त्यानिर्गुणउपासनयासगुणंवाब्रह्मसाक्षात्कुर्वतःप्रारब्धकर्मातिरिक्तपुण्य
पापनिवृत्तिरूपाजीवतोमुक्तिःप्रतिपाद्यतेद्वितीयपादेम्रियमाणस्योत्क्रांतिः तृतीयपादेसगुणविदोमृतस्योत्तरमार्गश्च
ब्रह्मसंपत्तिरूपस्तेनचतुर्थपादेपूर्वार्द्धेननिर्गुणब्रह्मविदोविदेहकैवल्यमुत्तरार्द्धेनसगुणविदोब्रह्मलोकप्राप्तिश्चनिरूप्यतेइति
ततोद्विचारात्मिकाधिकरणानांतत्साहसंगतिर्बोध्यः तदुक्तंचतुर्थे जीवतोमुक्तिरुत्क्रांतिर्गतिरुत्तराब्रह्मप्राप्तिब्रह्मलोकाविति
पादार्थसंग्रहः पूर्वाध्यायसाक्षात्कुरसाधनविचारःकृतः इदानींफलाध्यायपतिलभ्यस्याहसादरविचारस्तत्रोपशेषश्रवणाभ्ये एम १२९

६

षाधिकरणपर्यन्तं क्षिपेतेन च साक्षात्कारसाधनत्वेन श्रुतं श्रवणादिषु संशयः किं सकृदेव श्रवणादिकर्तव्यमुत श्रवणासा
क्षात्कृतिरिति पूर्वपक्षे श्रवणादीनामदृष्टार्थत्वेन फलसिद्धाने पावकसकलमावृत्तेनीलादवघातादिवदृष्टार्थत्वमिति बोध्यं न तत्रकृ
त्वारमेव श्रवणादिकं प्रयाजादिवत्कर्तव्यमिति प्राप्ते ब्रूमः श्रवणाद्यावृत्तिरेव कर्तव्या कुतः श्रोतव्यो मन्तव्यो निदिध्यासितव्य
इत्यसकृदुपदेशात् नन्वत्र श्रवणाद्यावृत्तिर्न श्रूयत इति चेदुच्यते साक्षात्कारस्यैवाविद्यानिवर्तनसमत्वनाहि विभ्रमोदाहरण
तात्कृत्स्नवत्तु साक्षात्कारस्य चावृत्तिविशिष्टश्रवणादिसाध्यत्वस्य च आदित्वोदृष्टत्वात् दुर्विज्ञेयात्मश्रवणादावपि सकृत्सा
व्या दनन्यसत्वाविद्यानिवर्तनक्षमसाक्षात्कारापादने कर्तव्यादृष्टसम्भवसदृष्टकल्पनानुपपत्तेरिति तात्पर्यं एवमुपास्यसाक्षा
त्कारद्वाराफलहेतूपासनेऽप्यावृत्तिर्बोध्यादृष्टार्थत्वात् वेदउपासीतेत्याश्रुति श्रवणाद्यसम्भवादुपासनत्वात् वेदसस्या
प्युपासनार्थकत्वात् तथाहि संवर्गविद्यायां विदिनोपक्रम्य उपास्तिनोपसंहारादृश्यते प्रसिद्धस्य वेदस्तमेपन्तुक्तरस्युप
क्रम्यानुमस्त्वा भगवो देवतां यामुपास्त इत्युपसंहारात् यत्तोदेकोवरप्राणान्तलससर्वकर्मफलमाप्नोति एवं देका
दन्यापि पपत्तेदृक्कोव्यं वेदसोपितत्पन्न फलमाप्नोतित्स एवं भगवोदेकामपाएत्युक्तरस्यमुक्तवृत्तेहसंमत्तिहस्तान्तरवचनेहेभ
गवो देकपारवृत्तास्मुपासतेतामतामनुशाधीत्युपक्रम्य ज्ञानमश्रुतिवचनेनेतस्मात्साक्षात्कारसाधनवावृत्तिसि
द्धिः १ लिंगाच्च २ तथाहि उद्गीथोपासनं प्रकृत्यादित्यउद्गीथ इत्युपासनमेकपुत्रतादोषेण पर्यावर्तयाद्रश्मींस्त्वं पर्यावर्तयादिति व्या
रश्मिबहुत्वोपासनं बहुपुत्रतायै विदधदावृत्तप्रत्ययं दर्शयतीति सूचयतीति तन्न्यायेन साक्षात्कारसाधने श्रवणाद्यावृत्तिसिद्धिः हे पुत्र
त्वं रश्मीनादित्यं च प्रत्येकं पर्यावर्तयातारमन्त्रेऽभ्यावर्तयतादिति मध्यमपुरुषैकवचनमुपास्तेत्यर्थः २ आत्मेति तु

स॰ वृ॰ १२० पगच्छंति ग्राहयंति च ३ पूर्वं श्रवणमनननिदिध्यासनानामावृत्तिरुक्ता तामुपजीव्य संदिह्यते किं निदिध्यासनादि स्वका-
ले प्रत्यक्त्वेन भेदध्यानं कर्तव्यमुत भिन्नत्वेनेति पूर्वपक्षे श्रुतीनामभेदपराणां गौणत्वापत्तेः सिद्धांते मुख्यार्थत्वेनाध्यभेदश्रु-
तीनां मतत्त्वदृष्टिविरोधपरिहारात्मकमिदमधिकरणमविरोधाध्यायसंगतं तथापि महावाक्यार्थविरोधपरिहारस्य समा-
धावंतरंगत्वात्तत्पादसंगतिः तत्राभेदस्य प्रत्यक्षेण सर्वज्ञत्वाकिंचिज्ञत्वादिविरुद्धधर्मवत्त्वलिंगकानुमानेन च बाधा-
त् भिन्नत्वेन ध्यानमिति प्राप्ते ब्रूमः आत्मेत्येव भेदाध्ययः तथा हि जाबाला आत्मत्वेनेश्वरमभ्युपगच्छंति त्वं वा अहमस्मि
भगवो देवते अहं वै त्वमसीति तथा ग्राहयंति च भ्रमात्मत्वेन न त्वमस्यादिवाक्यानि न चैतेषां नामब्रह्मेत्यादिवत् गौणार्थ-
त्वं प्रतीतिमुख्यार्थत्वसंभवे गौणत्वायोगात् न च प्रत्यक्षादिविरोधासंभवः तेषां मिथ्याभेदगोचरत्वेन पारमार्थिकाभेदाव-
रोधित्वाभावादिति भावः ३ न प्रतीके न हि सः ४ मनो ब्रह्मेत्युपासीत नाम ब्रह्मेत्यादिषु प्रतीकोपासनेषु संशयः किं प्रतीके
मन आदावात्मत्वबुद्धिः कर्तव्या न वेति पूर्वपक्षे प्रतीकोपास्तीनामहंग्रहोपास्तिभ्यो विशेषासिद्धेः सिद्धांते तु विशेषप्रसि-
द्धिरिति बोध्यं एतदारभ्याधिकरणत्रयस्य प्रासंगिकोपास्तिसंगतिः तत्र ब्रह्मणः स्वाभिन्नत्वाद्यथा स्वात्मत्वेन बुद्धिरेवं प्रतीक-
स्य ब्रह्मविकारत्वेन जीवाभिन्नब्रह्माभिन्नत्वादुपासकजीवात्मत्वबुद्धिः कार्येति दृष्टांतेन प्राप्ते ब्रूमः न प्रतीकस्यात्मत्वबुद्धिः
कार्या न हि स उपासकः आत्मत्वेन प्रतीकमनुभवति अत्रायं विकल्पः किमनुभवबलात्प्रतीकस्यात्मत्वेन बुद्धिः कार्या उत
श्रुतत्वात् अहोस्वित्स्वाभिन्नब्रह्माभिन्नत्वाद्वा नाद्यस्तदुक्तं न हि स इति न द्वितीयः अश्रवणात् न तृतीयः प्रतीकस्य स्वरूप-
णाद्ब्रह्माभिन्नत्वापातात् प्रतीकस्य पृथक्कृतस्य बाधे चोपासनाविध्यभावप्रसंगादिति भावः ४ ब्रह्मदृष्टिरुत्कर्षात् ५ पूर्वो- एम १२०

कर्तव्या उत मनआदौ ब्रह्मदृष्टिरिति संशयः पूर्वपक्षे निकृष्टे बुद्धिः
कर्तव्येति न्यायानपेक्षा सिद्धान्ते तदपेक्षेति मतं तद्वारा एकविषयत
मवान्तरसंगतिः तत्र ब्रह्मण एव मनआदिदृष्टिः १

उत्कृष्टे

कृप्रतीकोपासने युक्तमिति मनआदिदृष्टिः ब्रह्मणः प्राधान्येनोपास्यत्वोपपत्तेः कर्तव्येति प्राप्ते ब्रूमः मनआदावेव ब्रह्मदृ
ष्टिः कार्या ब्रह्मण उत्कर्षात् उत्कृष्टदृष्टिर्हि निकृष्टे कर्तव्या यतो निकृष्टस्योत्कृष्टता भवति यथा भृत्ये राजबुद्धिः फलाय न तु रा
जनि भृत्यबुद्धिः नैव ब्रह्मणः प्राधान्याभावः उत्कृष्टत्वादिति भावः आदित्यादिमतयश्चाङ्ग उपपत्तेः य एवासौ तपति तमुद्गी
थमुपासीतेत्यादीन्यङ्गाश्रितान्युपासनानि सन्ति तत्र संशयः किमादित्यादिषूद्गीथादिदृष्टिः कर्तव्या उतोद्गीथादिष्वादि
त्यादिदृष्टिरिति तत्रोद्गीथादीनां कर्मरूपाणां फलहेतुत्वेनोत्कृष्टत्वादादित्यादीनां सिद्धरूपाणां तदभावेन निकृष्टत्वात्स
र्वेन्न्यायेनादित्यादिषूद्गीथादिदृष्टिरिति प्राप्ते ब्रूमः उद्गीथादिकर्माङ्गेषु आदित्यादिमतय एव कर्तव्याः कुतः
उपपत्तेः यथा प्रोक्षणादिना व्रीह्यादिषु संस्कृतेषु प्रकृतकर्मापूर्वं समुत्पद्यते तथा कर्माङ्गेषूद्गीथादिष्वादित्यादिदृष्टिभिः
संस्कृतेषु प्रकृतस्य कर्मणः फलाधिक्यलक्षणा समृद्धिर्भवति अन्यथा न भवेदादित्यादीनामनङ्गत्वात् न चाकर्मसमृ
द्धिरूपफलोपपत्तेरङ्गेष्वनङ्गमतिरिति सिद्धः आदित्याद्युद्गीथादिमतिभ्यः फलासिद्धेरुद्गीथादीनामुत्कर्ष इति भावः ६
आसीनः सम्भवात् ७ किं कर्माङ्गाश्रितान्युपासनानि तिष्ठन्नासीनः शयानो वा कुर्यादिति नियम उतासीन एवेति नियम
इति संशयः पूर्वोक्तरुपासनानां कायिकत्वाभावे फलेन निदिध्यासनादेर्विद्यासाधने आसनानियमोऽतः पादसंगतिः
तत्र पूर्वोक्तकर्माङ्गोपासनेष्वासनानियम इति प्राप्ते ब्रूमः आसीन एव कर्माङ्गोपासनानि कुर्वीत कुतः समानप्रत्ययप्र
वाहात्मकोपासनस्यासीन एवोपासके सम्भवान्नहि तिष्ठतः पुंस उपासनं सम्भवति शरीरधारणप्रयत्नापहृतचित्तविक्षे
पात् नापि शयानस्य निद्राप्रसङ्गात् अङ्गोपासनानां त्वङ्गपारतन्त्र्याद्युक्तत्वान्नियम इति ७ ध्यानाच्च ८ उपासनस्य ध्यायस

स·वृ· सर्वध्यानरूपत्वात्ध्यायतेश्चासीने षु वकादिवृक्षविषयदृष्टिषु प्रयोगादासीनोपासीतेति सर्व्यं ८ अचलत्वं चापेक्ष्य ९ किंच ध्या
१३१ यतीव पृथिवीत्यत्र श्रुतोऽपिध्या अचलत्वमपेक्ष्य ध्यानोपचारो दृष्टः तस्मादपि लिंगादासीन एवोपासीत ९ स्मरंति च १० शुचौ
देशे प्रतिष्ठाप्य स्थिरमासनमात्मन इत्यादिना चासनविधानस्मरणाच्चासीन एवोपासीत यच्च योगशास्त्रेऽपद्मकादीनां शारीरास
नानां स्मरणादासीन एवोपासीतेति सर्वं १० यत्रैकाग्रता तत्राविशेषात् ११ दिग्देशकालेषु संशयः किं मगनाभिनोपासनेषु दिगा
दिनियमोऽस्ति न वेति तत्रासननियमवद्दिग्निनियम इति प्राप्ते ब्रूमः प्राच्यादिदिग्नियमः नदीतीरादिदेशनियमो वा नास्ति कुतः यत्र
दिशि देशे काले वा चित्तस्यैकाग्रता प्रसयप्रवाहोन्मुखं तत्रोपासीत दिगादिविशेषाश्रवणादिति सर्वं तदेवोपासन इष्टायामेकाग्रता
याः सर्वत्राविशेषादिति सर्वं समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिर्मनोनुकूले न तु चक्षुःपीडने गुहानिवाता
श्रयणे नियोजयेदिति श्रुतिरपि चित्तस्यैकाग्र्ये समे पादकेदेश उपासीनेति दर्शयति शर्करासूक्ष्मपाषाणाः जलाश्रयवर्जनं शीततानि
वृत्त्यर्थं चक्षुःपीडनं मशकादिकं तस्मादुपासने दिगादिनियमो नास्तीति सिद्धं ११ आप्रायणात्तत्रापि हि दृष्टं १२ उपास्यसाक्षात्कार
द्वारा फलहेतुषूपासनेष्वहंग्रहनामकेषु संशयः किं कदाचिदुपासनं कृत्वोपरमेत उत यावज्जीवमुपासीनेति पूर्वपक्षे कदाचित्कृ
तेऽप्यसावहेतरदृष्टद्वाराम्ततकाले ध्येयबुद्धिहेतुत्वमिति धारावाहिकोपासनस्य साक्षात्कारे वर्तते तु तत्र मिति विभागः तत्र देशादिनियमा
श्रवणात् एवमावत्यावज्जीवमुपासनाश्रवणात् तदभाव इति प्राप्ते ब्रूमः आप्रायणाद्देहपातपर्यन्तमुपासीत हि यतस्तत्रापि मरण
कालेऽपि सयावत्क्रतुरस्माल्लोकात्प्रैतीति श्रुत्या ध्येयप्रत्ययानुवर्तनं दृष्टं न चान्तरा दृष्टसाध्यं दृष्टं संभवति अदृष्टकल्पनाउपपत्तेः श्रु
तौ सर्वनामार्थ उपासनः क्रतुरुपासनं सदा तद्भावभावित इति स्मृतिश्च यावज्जीवमुपासनां दर्शयति तस्मादहंग्रहोपास्यो पाव एम
१३१

धुकृत्यात्तद्विषयमिदमेकेषां शाखिनां विनियोगवाक्यं तस्याः ज्ञानानुपकारित्वात्तज्ज्ञानानुपकारकत्वमुभयोर्जैमिनिबादरायण
योराचार्ययोः संमतमित्यर्थः नन्वस्याः काम्यसाधुकृत्यापाइनरस्याप्येवमस्तं श्लेषइत्यत्र नाशङ्क्यः कथं तस्या विनियोग इति चे
त् अत्र वक्तव्यमस्तु हन्तः साधुकृत्यामुपयन्तीत्यस्यायमर्थः न तां कृत्यामेव प्राप्नुवन्तीत्यर्थः इत्यादिवृत्तस्याः प्राप्यप्रयोगान्नापि तत्फ
लं प्राप्नुवन्तीत्यर्थः शास्त्रफलं प्रयोक्तरीति न्यायविरोधान्न चैवं भ्वानरेशिन्यायः अश्रवणात्तस्य हृद्यानुदिश्यत्वाच्च तस्मादिदं ते
वाकर्तृत्वं तु इति विद्वन्निःशेषा साधुकृत्या तत्तुल्या जनयितित्वं च ज्ञानान्नश्यतीत्यविरोधः समानः पापकृत्याया मूहः अर्थवा
दत्वान्नातीवाभिनिवेष्टव्यम् १७ यदेव विद्ययेति हि १८ पूर्वं मुमुक्षुणा ज्ञानार्थं नित्यादिकमनुष्ठेयमित्युक्तं तत्किमग्निहोत्रा
सने सहितमेव ज्ञानार्थमनुष्ठेयमिति नियम उतोपास्तिसहितं केवलं वानुष्ठेयमित्यनियम इति संशयः एकविषयत्वसंगतिः
पादसंगतिस्तु प्रासंगिकी वा प्यापूर्वपक्षे केवलस्य नित्यादेर्ज्ञानहेतुत्वासिद्धिः सिद्धान्ते तत्सिद्धिरिति बोध्यं तत्र नियमे प्राप्ते ब्रू
मः नियमो न युक्त इति तथा हि यदेव विद्यया करोति तदेव वीर्यवत्तरं भवतीति श्रुतिर्विद्यासहितस्य कर्मणो वीर्यवत्तरत्वं ब्रुवं
ती विद्याहीनस्य कर्मणो वीर्यवत्त्वं फलहेतुत्वं तद्रूपं दर्शयति न च केवलकर्मणो ज्ञानरूपफलहेतुत्वाभावेन युक्तत्वात्तस्मात्केव
लमपि कर्म ज्ञानहेतुरित्यनियम इति सिद्धं १८ एवमनियमेनाग्निहोत्रादिकर्मणो ज्ञानार्थत्वान्न ज्ञानेन क्षय इत्युक्तं इदानीं
प्रारब्धकर्मणामनारब्धकार्य एव हि सत्र ज्ञानान्निवृत्तस्तेनोक्तानां निवृत्तिप्रकारमाह भोगेन त्वितरे क्षपयित्वा संपद्यते १९ किं
प्रारब्धस्य साक्षात्कारवान्देहपातानन्तरमपि संसरति नेति संदेहः पूर्वपक्षे साक्षात्कारस्य मुक्तिहेतुत्वासिद्धिः सिद्धान्ते तत्सिद्धिरिति
विवेकः तत्र देहपातात्सर्वपर्यायात्साक्षात्कारेपि संसारानुवृत्तिरेवं देहपातानन्तरमपीति अनारब्धाधिकरणदृष्टान्तेन प्राप्ते ब्रूमः सं

ए
फलनिकार्यता
निरूपितकर्म
निष्ठहेतुताव
च्छेदकं फल
हेतुत्वं ५

चितकर्मणां ज्ञानान्नाश उक्तः इतरे त्वारब्धकार्ये पुण्यपापे भोगेन क्षपयित्वा विद्वान्ब्रह्म संपद्यते अथ संपद्यते ब्रह्मैव सन्ब्रह्माप्येति
इत्यादिश्रुतिभ्यो देहपातात्पूर्वं प्रारब्धकर्मणां क्षयात्कुलालचक्रभ्रमिन्यायेन मिथ्याज्ञानरूपनिमित्तनाशेऽपि विद्यालेशानुवृत्तिर्यु
क्ता तद्भोगानन्तरं कस्यचिदपि कर्मणो जन्ममरणात्मकसंसारहेतोरभावान्न संसारः तस्माद्भोगेन प्रारब्धकर्मनाशानन्तरं विद्वान्स्वरू
पेणात्मनावस्थानलक्षणं स्वास्थ्यमोक्षाख्यं लभत इति सिद्धं १९ इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां चतुर्थाध्यायस्य प्रथ
मः पादः १ पूर्वपादे साधिकरणोत्क्रान्तिनपेक्षा निर्गुणप्राप्तिरुक्ता इदानीं सगुणविद्याफलभूतस्य ब्रह्मलोकस्योत्क्रान्तिं विना प्रा
प्ययोगात्तत्फलं निरूपयिष्यन्तद्धेतुभूतामुत्क्रान्तिं निर्गुणब्रह्मविद्व्यतिरिक्तसर्वजनसमानां निरूपयितुं पादमारभते वाङ्मन
सि दर्शनाच्छब्दाच्च १ अस्त्युत्क्रान्तिक्रमबोधिका श्रुतिः अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि
तेजः परस्यां देवतायामिति प्रयतो म्रियमाणस्येत्यर्थः तत्र वाङ्मनसि संपद्यत इत्यत्र संशयः किं वृत्तिमत्या वाच एव मनसि लया
त्मकसंपत्तिरुच्यते उत वाग्वृत्तेरेवेति पूर्वपक्षे स्वोपादाने स्वस्य लय इति न्यायात्सिद्धिः सिद्धान्ते न तत्सिद्धिरिति बोध्यं तत्र श्रुतिबला
द्वाच एव मनसि लय इति प्राप्ते ब्रूमः उक्तिर्वागिति भावव्युत्पत्त्या वाक्शब्देन वाग्वृत्तिरुच्यते मनोवृत्तौ सत्यामेव मनसि वाग्वृत्तिसंप्र
लीयते कुतः दर्शनात् मनोवृत्तौ सत्यामेव लोके वाग्वृत्तिलयस्य दर्शनात् नहि वाङ्मनसीति श्रुतेः का गतिरित्यत आह शब्दाद्वृत्ति
स्वोपादाने इत्यबाधितन्यायानुसारेण वाक्शब्दाद्वृत्तिर्वृत्तिमतोरभेदोपचारेण भाव्युत्पत्त्या वार्थो नेय इत्यर्थः ननु तदुपादाने वृ
त्तिलयो नाकल्पमिति चेन्न अग्निवृत्तिलयस्यानुपादानाप्सु दर्शनादिति १ उक्तश्रुतौ वाच एव श्रवणादिन्द्रियान्तराणां च सुरा
दीनां मनसि वृत्तिलयो नास्तीति भ्रमं वारयति अत एव च सर्वाण्यनु २ यत एव मनसो वागुपादानत्वाभावान्मनसि वाचो वृत्ति

उपादेयभावात्स्वरूपलय इति प्राप्ते सिद्धान्तयति ॥ तन्मनः प्राण उत्तरात्
स्योपादान॥५

लयमात्रमतएव सर्वाणि चक्षुरादीन्यपि स्वानुपादाने मनसि सम्पत्तिके सहवृत्तिलयमात्रेणानुवर्तन्ते प्रलीयन्ते तेन तु स्वरूपेणेत्यर्थः
तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैरिति श्रुतिः सर्वेषामिन्द्रियाणां मनसि वृत्तिलयबोधिका द्रष्टव्या न स्मादुत्क्र
मणादूर्ध्वमुपशान्ततेजो हि स पुनर्जन्म मनसि स्थितैरिन्द्रियैः प्राप्नोतीत्यर्थः २ एवं वाङ्मनसीति वाक्यं विचार्य मनः प्राण इत्युत्तरवा
क्ये किं सर्वेन्द्रियवृत्तिलयाधारस्य मनसः प्राणे स्वरूपलयो वृत्तिलयो वेति संशये अन्नमयं हि सोम्य मन आपोमयः प्राण इति श्रु
तौ प्राणमनसोरबन्नविकारत्वश्रवणात् अन्नस्याब्भ्य उपादाने इत्यादिन्यायाभावादिन्द्रियाणां मनसि वृत्तिलयः इहत्वनुप
सत्वात्स्वरूपलय इति प्रत्युदाहरणसंगतिः अतिदेशत्वात्संगत्यनपेक्षा वा तत्सर्वेन्द्रियवृत्तिलयाधिकरणं मनोऽपि प्राणे स्ववृत्ति
लयेनैव लीयते न स्वरूपेणेति मनः प्राण इत्युत्तरवाक्यादेवं गन्तव्यं सुषुप्तिमूर्छावस्थयोः सवृत्तिके प्राणे सत्येव मनोवृत्तिलयद
र्शनादिति हेत्वनुषंगः न त्वबन्नयोरुपादानोपादेयत्वमात्रेण तद्विकारयोरप्युपादानोपादेयभावो युक्तः हिमघटयोस्तदर्शना
दिति भावः ३ एवं मनः प्राण इति वाक्यं विचार्य प्राणस्तेजसीत्युत्तरवाक्ये किं प्राणस्य वृत्तिलयस्तेजस्युत जीव इति संदेहे श्रुतिबला
त्तेजस्येवेति प्राप्ते सिद्धान्तयति सोऽध्यक्षे तदुपगमादिभ्यः ४ वाक्यक्रमादर्थक्रमो बाधिकरणात्क्रमो बाध्यः सः प्राणोऽध्यक्षे कार्यक
नि रणसंघातस्वामिनि तस्मिन् क्षेत्रिणि वा जीवे निवृत्तिवृत्तिः सन्नवतिष्ठते कुतः तं जीवं प्रति उपगमानानुगमनावस्थानेभ्यः यथा राजा
नं पात्रेयावर्तं संतं भक्त्या अभिमुखेनागच्छन्ति एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्तीति श्रुतिरिन्द्रियाणां मु
ख्यप्राणसहितानां जीवं प्रत्यभिमुखेनागमनं दर्शयति तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीति श्रुतिर्गच्छन्तं जीवं प्रत्यनुगमनं प्रा
णस्य दर्शयति सविज्ञानो भवतीति श्रुतिः करणाध्यक्षस्याविज्ञानशब्दवाच्येन्द्रियज्ञानस्य प्राणसहितस्य मात्स्यकर्मफलज्ञा

स॰सू॰ नचत्तिजीवेवस्थानदर्शपत्ति तस्माज्जीवे एव प्राणस्य वृत्तिलयः ४ ननु कथं तर्हि प्राणस्तेजसीतिश्रुतिरित्यत आह भूतेषु तच्छ्रुतेः
१३३ ५ तच्छ्रुतेः प्राणस्तेजसीतिश्रुतेः सूक्ष्मात्मना विद्यमानेषु तेजःसहितेषु उत्तरदेहारंभकेषु पंचभूतेषूपाधिषूपहितं तेन विद्य-
रा मानेजीवे प्राणस्य वृत्तिलयः स्वर्गत्वमुपगमादिश्रुसंतरानुरात् तथा चोपहितजीवप्राप्तो प्राणस्योपाधितेजआदिभूतप्राप्ते
रर्थसिद्धत्वात्प्राणस्तेजसीतिश्रुत्युपपत्तिरित्यर्थः ५ ननु प्राणस्तेजसीत्येकस्यैव तेजसः श्रवणात्कथं तेजःसहितेषु भूतेष्विति सूत्रमि-
रा त्यत आह नैकस्मिन्दर्शयतो हि ६ एकस्मिन्नेव तेजसि जीवस्योत्क्रान्तिसमये नावतिष्ठते उत्तरदेहस्य पांचभौतिकत्वेन पंचभूतेषु
स्थितेनाएव स्यकत्वात् दर्शयतो हीममर्थं हि सधिकरणे व्याख्याते त्र स्मृहरूपेणापद्य श्रुतिस्मृती इममर्थं दर्शयतः पृथिवीमयपत्रे यामय गे
पवायुमय आकाशमयस्तेजोमय इत्याद्या श्रुतिः अणवोमात्रा विनाशिन्योदशार्धानां तु याः स्मृताः ताभिः सार्धमिदं सर्वं संभवत्यनु
पूर्वश इति स्मृतिः अणवः सूक्ष्मा मीयन्त इति मात्राः प्राक्रमेऽप्यादविनाशिन्यो दशार्धानां पंचानां भूतानामित्यर्थः ननु जीवस्योत्क्रा-
न्तिकाले भूताश्रयत्वेनोह पहूस्तनुः कर्महेतुतद्वत्तनुरिति कर्माश्रयत्वबोधकश्रुतिविरुद्धमिति चेन्न कर्मणो वंधनिमित्तत्वेनाश्रय-
त्वं भूतानां देहोपादानत्वेनाश्रयत्वमित्यविरोधात् नोपाद्धत्वात्तेभागोपजीवाधारभूतम् तनुः तत्कर्मैवेति श्रुतेर्वचनं ६ समा-
ना चासृत्युपक्रमादमृतत्वं चानुपोष्य ७ पूर्वोक्तामुत्क्रान्तिमुपजीव्य संदिह्यते किमुत्क्रान्तिरविदुष एवोत विदुषो दहरादिसगुणब्र-
ह्मोपासकस्यापीति तत्र तत्पार्श्वमापन्नमतत्त्वमेतीति दहरोपासकस्य मोक्षश्रवणादविदुष एवोत्क्रान्तिरिति प्राप्ते ब्रूमः सृतिः सर-
णानुसृतो देवयानमार्गस्तदुपक्रमात् सर्वं भाविनी योत्क्रान्तिः सा सगुणब्रह्मविदविदुषोः समानैवास्य सोम्य पुरुषस्य प्रयतो वाङ्म-
नसि संपद्यत इत्यादिसामान्यश्रवणात् ननु कथं तर्हि सगुणविद्यायाममृतत्वश्रवणमिति तत्राह अमृतत्वं चेति उपदाहृत्यतिष्ठा राम
१३३

ज्जीवमनुष्येइतिसिद्धं १२ एवंज्ञानसाधनानुष्ठानेपलाधिकार्थफलाध्यायेपिसाधनानुष्ठानकर्मविचारपफलाध्यायस्यापफल
चिंतामुपक्रमति तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशात् १३ तथाचास्यफलविचारप्रतिबंधकसाधनजिज्ञासाभा
वरूपावसरसंगतिः लब्धाकिंब्रह्मविद्यायामुत्पन्नायांविदुषोभविष्यत्पापासंबंधः पूर्वपापविनाशोभवतोनवेतिसंदेहः पूर्वपक्षेस ष्
त्यामपिविद्यायांपापफलभोगानंतरमेवविद्यातोमुक्तिःसिद्धांतेविद्योत्पत्त्यनंतरमेवमुक्तिरितिबोध्यं तत्रफलभोगंविनानास्तिविद्य
पापापनाशइति प्राप्तेब्रूमः तदधिगमेब्रह्मसाक्षात्कारेसतिउत्तरपूर्वाघयोरश्लेषविनाशौभवतएवकुतः तयोर्विदुषिश्रुत्याव्यप
देशात् यथापुष्करपलाशआपोनश्लिष्यंतएवमेवंविदिपापंकर्मनश्लिष्यतइतिश्रुतिरविद्यातउत्तरस्यपापस्याश्लेषंदर्शय
तितद्यथेषीकातूलमग्नौप्रोतंप्रदूयेतैवंहास्यसर्वेपाप्मानःप्रदूयंतइतिश्रुतिःविद्यातःपूर्वस्यपापस्यविनाशंव्यपदिशतिएवं
निर्गुणविद्यायामपिपापालेपंव्यपदिशति क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइत्यादिकाश्रुतिः तस्माद्ब्रह्मविद्यावतःपूर्वोत्तर
पापासंबंधइतिसिद्धं १३ इतरस्याप्येवमसंश्लेषःपातेतु १४ पूर्वविद्यावतःपापनाशासंबंधावुक्तौनद्धस्तुपुण्यस्यापिनाशासंबंधौभव
तोनवेति संदेहेतत्रज्ञानपुण्ययोःशास्त्रीयत्वेनाग्निहोत्रदर्शपौर्णमासवदविरोधाभावान्नभवतइत्यभ्यधिकाशंकायांपूर्वन्यायमति
दिशति इतरस्यापिपापादितरस्यपुण्यस्याप्येवमघवदश्लेषविनाशौज्ञानाद्भवतः उभेउहैवैषएतेतरतीत्यादिश्रुतिषुपा
पासंबंधवत्पुण्यासंबंधस्यापिव्यपदेशात् श्रुतावुशब्दोप्यर्थः सचब्रह्मसाक्षात्कारवान् सूत्रेतुशब्दोवधारणार्थः एवंब्रह्मसाक्षा
त्कारवतःउत्पन्नधीरस्यपुण्यपापयोर्बंधहेतोरभावाद्देहपातेमुक्तिरवश्यंभवत्येवेत्यधिकरणद्वयफलमुक्तं अग्निहोत्रदर्शपौ
र्णमासवद्दृष्टफलत्वमुपाधिः अस्मादतिदेशात्तान्यप्येककार्यसाधनापेक्षा १४ अनारब्धकार्येएवतुपूर्वेतदवधेः १५ पूर्वज्ञानात्कर्मक्षयउ

स॰ कु॰
१३९

त्फलस्य प्रारब्धकर्मव्यतिरिक्तविषयत्वेनात्रापवादात् संगतिः ज्ञानजन्यकर्मक्षयः किमविशेषेणाकर्ममात्रस्य भवत्युत प्रारब्धक
र्मव्यतिरिक्तस्यैवेति संशयः पूर्वपक्षे जीवन्मुक्त्यसिद्धिः सिद्धांते तत्सिद्धिरिति बोध्यं तत्र क्षीयन्ते चास्य कर्माणीत्यविशेषश्रवणा
त्कर्ममात्रस्य क्षय इति प्राप्ते ब्रूमः ये पुण्यपापे येन देहावच्छेदेन सुखदुःखानुभवार्थं प्रवर्तिते आरब्धकार्ये तद्व्यतिरिक्ते अनारब्ध
कार्ये पूर्वे अनारम्भवपरं पुण्यपापे ज्ञानोत्पत्तिपर्यंतसंचिते ते एव क्षीयेते कुतः तदवधेः तस्य तावदेव चिरं यावन्न विमोक्षेऽथ संप
त्स्य इति देहपातावधिश्रवणादित्यर्थः तथा च विशेषश्रुत्यनुसाराद् विशेषश्रुतिर्नेतव्येति भावः ब्रह्मात्मत्वसाक्षात्कारवान्या
व वन्न विमोक्षेण न विमोक्ष्यते तस्य तावदेव चिरं तावानेव देहपातरूपो विलम्बः अथ प्रारब्धकर्मभोगाद्देहपातानन्तरं संपत्स्ये ब्रह्म सं
पत्स्य इत्यर्थः १५ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् १६ पूर्वमनारब्धकार्याणां कर्मणां ज्ञानात् क्षय उक्तः तस्मिन्नित्यनैमि
त्तिकातिरिक्तानारब्धकार्यकर्मविषयत्वेनात्रापवादात् संगतिः किं नित्यनैमित्तिककर्मजातमनारब्धकार्यं कर्मवत् ज्ञानात् क्षी
यते नेति संदेहः पूर्वपक्षे काम्यकर्मणा इव मुमुक्षूणां नित्यनैमित्तिकयोरप्यननुष्ठानं पंकप्रक्षालनन्यायात् सिद्धांते तदनुष्ठा
नमिति बोध्यं तत्रानारब्धकर्मत्वाविशेषान्नित्यनैमित्तिककर्मजातं ज्ञानात् क्षीयत इति प्राप्ते ब्रूमः अग्निहोत्रादि नित्यनैमित्ति
ककर्म तत्कार्यायैव तस्य ज्ञानस्य यत्कार्यं मुक्तिरूपं तस्मा एव सत्त्वशुद्ध्यादिपरंपरया कुतः तद्दर्शनात् यज्ञादिश्रुतेर्ज्ञानहेतु
त्वदर्शनादित्यर्थः तथा च ज्ञानरूपफलैकनाश्यत्वं नित्यनैमित्तिककर्मजातस्य नात्र पंकप्रक्षालनन्यायः ज्ञानार्थत्वेनानुष्ठा
नस्यावश्यकत्वादिति भावः १६ ननु नित्याद्यर्ज्ञानार्थत्वं तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति विनि
योगवाक्ये किंविषयकमित्यत आह अतोऽन्यापि ह्येकेषामुभयोः १७ अतोऽग्निहोत्रादेर्नित्यादिरूपादन्यापि फलिकाम्यरूपास्या

राम
१३९

नीलत्वम्

स्वा॰ विशेष्यान्वयि ग्रन्वयि त्वे सति व्यावर्त्तकत्वं विशेषणत्वम् । यथा नीलो घट
मानयेत्यादौ नीलत्व विशेष्यान्वयि ग्रनन्वयि त्वे सति विशेष्यांशे नियमेन
वर्त्तमानत्वे सति व्यावर्त्तकत्वमुपाधित्वं यथा घटे घटत्वम् इत्यत्र घट
त्वम् । स्व विशेष्यान्वयि ग्रन्वयि त्वे सति विशेष्यांशेऽनियमेन वर्त्त
मानत्वे सति व्यावर्त्तकत्वमुपलक्षणत्वम् यथा काकवतो देव
दत्तस्य गृहाः इत्यत्र स्वेन काका ~~[illegible]~~ द्विशेष्या गृहात्
दन्वयि ज्ञानविषयत्वं ॥ स्वाश्रयाश्रित धर्म समर्पकत्वमुपरंजक
त्वम् । यथा ग्रालत्तः पुरुषः इत्यत्र पुरुषत्वम् ॥ किंचिद्धर्माव
च्छिन्नप्रकारतानिरूपकत्वे सति जातिभिन्नत्वमुपाधित्वम् ।

न ज्ञाप्नोति पदादन्त पश्चात्ति विभागानि [illegible] पश्चात् सर्संततो भावस्त
स्मादात्मेति कीर्त्यते १

[illegible] सूच्यते [illegible] ३४ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात् ३५ संस्कारपरामर्शा
[illegible] तदभावनिर्धारणे च प्रवृत्तेः ३७ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ३८ कंपनात्
[illegible] ४० [illegible] त्वादिव्यपदेशात् ४१ सुषुप्त्युत्क्रांत्योर्भेदेन ४२ पत्यादिशब्देभ्यः
[illegible] पादः न्यायसू[illegible] सूत्राणि ४३ आनुमानिकमप्येकेषामिति चेन्न श
[illegible] वत्रुपलब्धेः [illegible] १ [illegible] तु तदर्हत्वात् २ तदधीनत्वादर्थवत् ३ ज्ञेयत्वावगमा॰
[illegible] यतेश्च ३२ ने [illegible] ५ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ६ महद्वच्च ७ चमस
[illegible] ३५ [illegible] तथा ह्यधीयत एके ९ कल्पनोपदेशाच्च मध्वादिवदविरोधः १० न
[illegible] नानाभावात् [illegible] प्राणादयो वाक्यशेषात् १२ ज्योतिषैकेषामसत्यन्ने १३
[illegible] क्तेः १४ समाकर्षात् १५ जगद्वाचित्वात् १६ जीवमुख्यप्राण
[illegible] तम् [illegible] तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके १८ वाक्यान्वया
[illegible] २० उत्क्रमिष्यत एवंभावादित्यौडुलोमिः २१ अवस्थितेरिति का
[illegible] प्रतिज्ञादृष्टांतानुपरोधात् २३ अभिध्योपदेशाच्च २४ साक्षाच्चोभयाम्ना॰
[illegible] तेः परिणामात् २६ योनिश्च हि गीयते २७ एतेन सर्वे व्याख्याता व्याख्याताः २८ इति ना
[illegible] समन्वयाख्यस्य प्रथमाध्यायस्य चतुर्थः पादः न्यायसूत्राणि ८ सूत्राणि २८ समस्ताध्यायन्यायसू
त्राणि ४० सूत्राणि १३४ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्
१ इतरेषां चानुपलब्धेः २ एतेन योगः प्रत्युक्तः ३ न विलक्षणत्वादस्य तथात्वं च शब्दात् ४ अभि राम
२

मानिव्यपदेशस्तु विशेषानुगतिभ्याम् ४ दृश्यते तु ५ असदिति चेन्न प्रतिषेधमात्रत्वात् ७ अपीतौ तद्वत्प्र
संगादसमंजसं ८ न तु दृष्टांतभावात् ९ स्वपक्षदोषाच्च १० तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदे
वमप्यविमोक्षप्रसंगः ११ एतेन शिष्टापरिग्रहा अपि व्याख्याता १२ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्
१३ तद[illegible]त्वमारंभणशब्दादिभ्यः १४ भावे चोपलब्धेः १५ सत्वाच्चावरस्य १६ असद्व्यपदेशान्नेति चेन्न
धर्मांत[illegible]त् १७ युक्तेः शब्दांतराच्च १८ पटवच्च १९ यथा च प्राणादि २० इतरव्यपदेशाद्धिता
[illegible]१ अधिकं तु भेदनिर्देशात् २२ अश्मादिवच्च तदनुपपत्तिः २३ उपसंहारदर्श
[illegible]दपि लोके २५ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा २६ श्रुते
[illegible]हि २८ स्वपक्षदोषाच्च २९ सर्वोपेता च तद्दर्शनात्
[illegible]नवत्वात् ३२ लोकवत्तु लीलाकैवल्यं ३३ वैषम्यनैर्घृ
[illegible]र्मविभागादिति चेन्नानादित्वात् ३५ उपपद्यते चाप्युपल
[illegible]इति द्वितीयाध्यायस्य प्रथमः पादः १ न्यायसूत्राणि १३ सूत्राणि
[illegible]नम् १ प्रवृ[illegible] २ पयोंबुवच्चेत्तत्रापि ३ व्यतिरेकानवस्थितेश्चानपेक्ष
[illegible]न तृणादिवत् [illegible]भ्यु[illegible]र्थाभावात् ६ पुरुषाश्मवदिति चेत्तथापि ७
[illegible]पत्तेश्च [illegible] अन्यथानुमितौ च ज्ञशक्तिवियोगात् ९ विप्रतिषेधाच्चासमंजसम् १० महद०
[illegible]ह्रस्वपरिमंडलाभ्याम् ११ उभयथापि न कर्मातस्तदभावः १२ समवायाभ्युपगमाच्च साम्यादनव
[illegible]१३ नित्यमेव च भावात् १४ नित्यमेव च भावात् १४ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् १५ उभ

...दोषात् ॥ १६ ॥ अपरिग्रहाच्चात्यंतमनपेक्षा ॥ १७ ॥ समुदाय उभयहेतुकेपि तदप्राप्तिः ॥ १८ ॥ इतरेतरप्रत्य
...ति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ १९ ॥ उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥ असति प्रतिज्ञोपरोधो
...ऽन्यथा ॥ २१ ॥ प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ २२ ॥ उभयथा च दोषात् ॥ २३ ॥
...शेषाविशेषात् ॥ २४ ॥ अनुस्मृतेश्च ॥ २५ ॥ नासतोऽदृष्टत्वात् ॥ २६ ॥ उदासीनानामपि चैवं सि
...॥ २८ ॥ वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥ न भावोऽनुपलब्धेः ॥ ३० ॥ क्षणिकत्वाच्च
...संभवात् ॥ ३३ ॥ एवं चात्माकार्त्स्न्यं ॥ ३४ ॥ न च पर्यायादप्यविरोधो
...नित्यत्वादविशेषः ॥ ३६ ॥ पत्युरसामंजस्यात् ॥ ३७ ॥ संबंधानुप
...करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥ अंतवत्त्वमसर्वज्ञता वा ॥ ४
...रणम् ॥ ४३ ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥ विप्रतिषेधा
...स्याध्यायस्य द्वितीयः पादः ॥ २ ॥ न्यायसूत्राणि ८ सूत्राणि ४५ ॥ न वियदश्रुतेः ॥ १ ॥ अ
...संभवात् ॥ ३ ॥ शब्दाच्च ॥ ४ ॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥ प्रतिज्ञाहानिरव्यतिरेकाच्छब्दे°
...ः ॥ ६ ॥ ...वद्विकारं तु विभागो लोकवत् ॥ ७ ॥ एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥ असंभवस्तु सतोऽनुपप
त्तेः ॥ ९ ॥ तेजोऽतस्तथाह्याह ॥ १० ॥ आपः ॥ ११ ॥ पृथिव्यधिकाररूपशब्दांतरेभ्यः ॥ १२ ॥ तदभिध्यानादेव तु
तल्लिंगात्सः ॥ १३ ॥ विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ १४ ॥ अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति
चेन्नाविशेषात् ॥ १५ ॥ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १६ ॥ नात्माश्रुते
र्नित्यत्वाच्च ताभ्यः ॥ १७ ॥ ज्ञोऽत एव ॥ १८ ॥ उत्क्रांतिगत्यागतीनाम् ॥ १९ ॥ स्वात्मना चोत्तरयोः ॥ २० ॥ नाणुर

राम
३

ते

तच्छ्रुतेरिति चेन्नेतराधिकारात् २१ स्वशब्दोन्मानाभ्यां च २२ अविरोधश्चंदनवत् २३ अवस्थितिवै
शेष्यादिति चेन्नाभ्युपगमाद्धृदि हि २४ गुणाद्वालोकवत् २५ व्यतिरेको गंधवत् २६ तथा च दर्शयं
ति २७ पृथगुपदेशात् २८ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् २९ यावदात्मभावित्वाच्च न दोष
स्तद्दर्शनात् ३० पुंस्त्वादिवत्त्वस्य सतोभिव्यक्तियोगात् ३१ नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनि
यमो वान्यथा ३२ कर्ता शास्त्रार्थवत्वात् ३३ विहारोपदेशात् ३४ उपादानात् ३५ व्यपदेशाच्च क्रि
[illegible] र्देशविपर्ययः ३६ उपलब्धिवदनियमः ३७ शक्तिविपर्ययात् ३८ समाध्यभावाच्च ॥
[illegible] तक्षोभयथा ४० परात्तु तच्छ्रुतेः ४१ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः
[illegible] नाना व्यपदेशाद[illegible] चापि दाशकितवादित्वमधीयत एके ४३ मंत्रवर्णाच्च ४४ अपि च
[illegible] ४५ प्रकाशादिवन्नैवं परः ४६ स्मरंति च ४७ अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत्
[illegible] व्यतिकरः ४९ आभास एव च ५० अदृष्टानियमात् ५१ अभिसंध्यादिष्वपि चैवम्
[illegible] दिति चेन्नांतर्भावात् ५३ इति द्वितीयाध्यायस्य तृतीयः पादः ३ न्यायसूत्राणि १७ सूत्रा
[illegible] तथा प्राणाः १ गौण्यसंभवात् २ तत्प्राक्श्रुतेश्च ३ तत्पूर्वकत्वाद्वाचः ४ सप्तगतेर्विं
शेषितत्वाच्च ५ हस्तादयस्तु स्थितेतो नैवम् ६ अणवश्च ७ श्रेष्ठश्च ८ न वायुक्रिये पृथगुपदेशात्
९ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः १० अकरणत्वाच्च न दोषस्तथा हि दर्शयति ११ पंचवृत्तिर्मनोव
द्व्यपदिश्यते १२ अणुश्च १३ ज्योतिराद्यधिष्ठानं तु तदामननात् १४ प्राणवता शब्दात् १५ तस्य च
नित्यत्वात् १६ त इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् १७ भेदश्रुतेः १८ वैलक्षण्याच्च १९ संज्ञामूर्तिक्लृ

सू० ब्र
४

त्रिवृत्कुर्वत उपदेशात् ॥२०॥ मांसादि भौमं यथाशब्दमितरयोश्च ॥२१॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥
२२ इत्यविरोधाख्यो द्वितीयोध्यायः ॥२॥ न्यायसूत्राणि नव ॥९॥ संपूर्णाध्याय न्यायसूत्राणि ॥४७॥ पादसूत्रा
णि २२ ॥ सं १५७ ॥ तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥१॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥२
प्राणगतेश्च ॥३॥ अ[illegible]गतिश्रुतेरिति चेन्न भाक्तत्वात् ॥४॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥५
[illegible]त्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥६॥ भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति ॥७॥ कृतात्य
[illegible]ऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥८॥ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥९
[illegible]र्थक्यमिति चेन्न तदपेक्षत्वात् ॥१०॥ सुकृतदुष्कृते एवेति तु बादरिः ॥११॥ अनिष्टादिकारिणाम
[illegible] ॥१२॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥१३॥ स्मरंति च ॥१४॥ अपि च स
[illegible] अपि च तत्रापि राज्ञो[illegible]धः ॥१६॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥१७॥ न तृतीये तथोपलब्धेः ॥
[illegible]पि च लोके ॥१९॥ दर्शनाच्च ॥२०॥ तृतीयशब्दावरोधः संशोकजस्य ॥२१॥ साभाव्यापत्तिरुपपत्तेः ॥
[illegible]चिरेणाविशेषात् ॥२३॥ अन्याधिष्ठितेषु पूर्ववदभिलापात् ॥२४॥ अशुद्धमिति चेन्न शब्दात् ॥२५
रेतःसिग्योगोऽथ ॥२६॥ योनेः शरीरं ॥२७॥ इति तृतीयाध्यायस्य प्रथमः पादः ॥१॥ न्यायसूत्राणि ६ सूत्राणि
२७ संध्ये सृष्टिराह हि ॥१॥ निर्मातारं चैके पुत्रादयश्च ॥२॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥३
सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥४॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययौ ॥५॥ देहयोगाद्वासो
पि ॥६॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥७॥ अतः प्रबोधोऽस्मात् ॥८॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः
॥९॥ मुग्धेऽर्द्धसंपत्तिः परिशेषात् ॥१०॥ न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि ॥११॥ न भेदादिति चेन्न प्रत्येक

राम
४

मतद्वचनात् १२ अपिचैवमेके १३ अरूपवदेवहितत्प्रधानत्वात् १४ प्रकाशवच्चावैयर्थ्यात् १५ आह
चतन्मात्रं १६ दर्शयतिचाथोअपिस्मर्यते १७ अतएवचोपमासूर्यकादिवत् १८ अंबुवदग्रहणात्तुनतथा
त्वम् १९ वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवम् २० दर्शनाच्च २१ प्रकृतैतावत्त्वंहिप्रतिषेधति
ततोब्रवीतिचभूयः २२ तदव्यक्तमाहहि २३ अपिसंराधनेप्रत्यक्षानुमानाभ्याम् २४ प्रकाशवच्चावैशे
ष्यं प्रकाशश्चकर्मण्यभ्यासात् २५ अतोनंतेनतथाहिलिंगम् २६ उभयव्यपदेशात्त्वहिकुंडवत् २७ प्रकाशा ल
श्रयवद्वातेजस्त्वात् २८ पूर्ववद्वा २९ प्रतिषेधाच्च ३० परमतःसेतून्मानसंबंधभेदव्यपदेशेभ्यः ३१ सामा
न्यात्तु ३२ बुद्ध्यर्थःपादवत् ३३ स्थानविशेषात्प्रकाशादिवत् ३४ उपपत्तेश्च ३५ तथान्यप्रतिषेधात् ३६
[illegible] र्वगतत्वमायामशब्दादिभ्यः ३७ फलमतउपपत्तेः ३८ श्रुतत्वाच्च ३९ धर्मंजैमिनिरतएव ४
[illegible] यणोहेतुव्यपदेशात् ४१ इति तृतीयस्यद्वितीयःपादः २ न्यायस्तत्राणि ८ सूत्राणि ४१
[illegible] यं चोदनाद्यविशेषात् १ भेदान्नेतिचेन्नैकस्यामपि २ स्वाध्यायस्यतथात्वेनहिसमाचारेधिक ।
[illegible] रात्सववच्चतन्नियमः ३ दर्शयतिच ४ उपसंहारोर्थाभेदाद्विधिशेषवत्समानेच ५ अन्यथात्वंशब्दादि
ति चेन्नाविशेषात् ६ नवाप्रकरणभेदात्परोवरीयस्त्वादिवत् ७ संज्ञातश्चेत्तदुक्तमस्तितुतदपि ८ व्या
प्तेश्चसमंजसम् ९ [illegible] भेदादन्यत्रेमे १० आनंदादयःप्रधानस्य ११ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचय
योहिभेदे १२ इतरेत्वर्थसामान्यात् १३ आध्यानायप्रयोजनाभावात् १४ आत्मशब्दाच्च १५ आत्मगृ
हीतिरितरवदुत्तरात् १६ अन्वयादितिचेत्स्यादवधारणात् १७ कार्याख्यानादपूर्वम् १८ समानएवंचाभे
दात् १९ संबंधादेवमन्यत्रापि २० नवाविशेषात् २१ दर्शयतिच २२ संभृतिद्युव्याप्त्यपिचातः २३ पुरुष

विद्यायामिश्चेतरेषाम नाम्नानात् २५ वेधाद्यर्थभेदात् २५ हानौतूपायनशब्दशेषत्वात्कुशाछंदस्तुत्युप
गानवत्तदुक्तम् २६ सांपराये तर्त्तव्याभावात्तथाह्यन्ये २७ छंदत उभयाविरोधात् २८ गतेरर्थवत्वमुभयथा
न्यथाहिविरोधः २९ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ३० अनियमः सर्वासामविरोधः शब्दा
नुमा[illegible] ३१ [illegible]धिकारमवस्थितिराधिकारिकाणाम् ३२ अक्षरधियांत्ववरोधः सामान्यतद्भावे
भ्यामौ[illegible] ३३ [illegible]दामननात् ३४ अंतराभूतग्रामवत्स्वात्मनः ३५ अन्यथाभेदानुपपत्तिरि
तिचेन्नोपदेशांतरवत् ३६ व्यतिहारो विशिंषंति हीतरवत् ३७ सैव हि सत्यादयः ३८ कामादीतरत्र त
त्र चायतनादिभ्यः ३९ आदरादलोपः ४० उपस्थितेतस्तद्वचनात् ४१ तन्निर्धारणानियमस्तद्दृष्टेः
[illegible]प्रतिबंधः फलं ४२ प्रधानवदेव तदुक्तं ४३ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि ४४ पूर्व
[illegible]प्रकरणात्स्यात्क्रियामानसवत् ४५ अतिदेशाच्च ४६ विद्यैव तु निर्धारणात् ४७ दर्शना
च्च ४८ श्रुत्यादि[illegible]बाधः ४९ अनुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववद्दृष्टश्च तदुक्तं ५०
नसामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः ५१ परेणच शब्दस्यताद्विध्यंभूयस्त्वात्त्वनुबंधः ५२
एकआत्मनः शरीरेभावात् ५३ व्यतिरेकस्तद्भावाभावित्वान्नतूपलब्धिवत् ५४ अंगावबद्धास्तुन
शाखासुहि प्रतिवेदम् ५५ मंत्रादिवद्वाऽविरोधः ५६ भूम्नः क्रतुवज्ज्यायस्त्वं तथाहिदर्शयति ५७ २
नानाशब्दादिभेदात् ५८ विकल्पोविशिष्टफलत्वात् ५९ काम्यास्तुयथाकामंसमुच्चीयेरन्नवापू
र्वहेत्वभावात् ६० अंगेषुयथाश्रयभावः ६१ शिष्टेश्च ६२ समाहारात् ६३ गुणसाधारण्यश्रुते
श्च ६४ नवातत्सहभावाश्रुतेः ६५ दर्शनाच्च ६६ इति तृतीयाध्यायस्य तृतीयःपादः ३ न्यायसू राम ५

त्राणि ॥ ३६ सूत्राणि ॥ ६६ पुरुषार्थोतः शब्दादिति बादरायणः १ शेषत्वात्पुरुषार्थवादो यथान्येष्वि
ति जैमिनिः ॥ २ आचारदर्शनात् ३ तच्छ्रुतेः ॥ ४ समन्वारंभणात् ५ तद्वतो विधानात् ॥ ६ नियमा
च्च ७ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ८ तुल्यं तु दर्शनं ९ असार्वत्रिकी ॥ १० वि०
भागः शतवत् ॥ ११ अध्ययनमात्रवतः ॥ १२ नाविशेषात् ॥ १३ स्तुतयेऽनुमतिर्वा ॥ १४ कामकारे
ण चैके १५ उपमर्दं च १६ ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ परामर्शं जैमिनिरचोदना चापवदति हि ॥
१८ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥ विधिर्वा धारणवत् ॥ २० स्तुतिमात्रमुपादानादिति चेन्ना
पूर्वत्वात् २१ भावशब्दाच्च २ रिप्लवार्था इति चेन्न विशेषितत्वात् २३ तथा चैकवाक्यतोपबं
धात् २४ अत एव चाग्नी पेक्षा २५ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् २६ शमदमाद्युपेतः
त्तु तद्विधेस्तदंग मवश्यानुष्ठेयत्वात् २७ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्श
अबाधाच्च स्मर्यते ३० शब्दश्चातोऽकामकारे ३१ विहितत्वाच्चाश्रमकर्मापि
त एवोभयलिंगात् ३४ अनभिभवं च दर्शयति ३५ अंतरा चापि तु
विशेषानुग्रहश्च ३८ अतस्त्वितरज्ज्यायो लिंगाच्च ३९ तद्भूतस्य
द्रूपाभावेभ्यः ४० न चाधिकारिकमपि पतनानुमानात्तदयोगात् ४१
दुक्तम् ४२ बहिस्तूभयथापि स्मृतेराचाराच्च ४३ स्वामिनः फलश्रुते
त्यौडुलोमिस्तस्मै हि परिक्रीयते ४५ श्रुतेश्च ४६ सहकार्यंतरविधिः पक्षे
वत् ४७ कृत्स्नभावात्तु गृहिणोपसंहारः ४८ मौनवदितरेषामप्युपदेशात् ॥ दे

…वात् ॥५०॥ ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनात् ॥५१॥ एवमुक्तिफलानियमस्त
…॥५२॥ इति साधनाख्यतृतीयाध्यायस्य चतुर्थः पादः ॥४॥ सूत्राणि ५२ ॥ न्याय
…सूत्राणि ६१ ॥ समस्ताध्यायसूत्राणि ॥१८६॥ आवृत्तिरसकृदुपदेशात् ॥
…ति ग्राहयंति च ॥३॥ न प्रतीके न हि सः ॥४॥ ब्रह्मदृष्टिरुत्कर्षात् ॥५॥ आ
…आसीनः संभवात् ॥७॥ ध्यानाच्च ॥८॥ अचलत्वं चापेक्ष्य ॥९॥ स्मरंति च
…ति… आप्रायणात्तत्रापि हि दृष्टम् ॥१२॥ तदधिगम उत्तरपूर्वाघयोरश्ले
…तद्व्यपदेशा… रस्याप्येवमसंश्लेषः पाते तु ॥१४॥ अनारब्धकार्ये एव पूर्वे तदवधेः
…होत्रादि तु तत्का… दर्शनात् ॥१६॥ अतोऽन्यापि ह्येकेषामुभयोः ॥१७॥ यदेव विद्ययेति हि
[illegible] …तरे क्षपयित्वा… द्यते ॥१९॥ इति चतुर्थाध्यायस्य प्रथमः पादः ॥१॥ न्यायसूत्राणि ॥१४
सूत्राणि ॥१९॥ वाङ्मनसि दर्श… ब्दाच्च ॥१॥ अत एव च सर्वाण्यनु ॥२॥ तन्मनः प्राण उत्तरात् ॥३॥
…ऽध्यक्षे तदुपगमादिभ्यः ॥४॥ भूतेषु तत्श्रुतेः ॥५॥ नैकस्मिन्दर्शयतो हि ॥६॥ समाना चासृत्युपक्रमाद
मृतत्वं चानुपोष्य ॥७॥ तदापीतेः संसारव्यपदेशात् ॥८॥ सूक्ष्मं परिमाणतश्च तथोपलब्धेः ॥९॥ नोपमर्देना
तः ॥१०॥ अस्यैव चोपपत्तेरेष ऊष्मा ॥११॥ प्रतिषेधादिति चेन्न शारीरात् ॥१२॥ स्पष्टो ह्येकेषाम् ॥१३॥ स्मर्यते
च ॥१४॥ तानि परे तथा ह्याह ॥१५॥ अविभागो वचनात् ॥१६॥ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्या॰
सामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥१७॥ रश्म्यनुसारी ॥१८॥ निशि नेति
चेन्न संबंधस्य यावद्देहभावित्वाद्दर्शयति च ॥१९॥ अतश्चायनेऽपि दक्षिणे ॥२०॥ योगिनः प्रति च स्मर्यते राम ६

स्मार्ते चैते ॥ २१ ॥ इति चतुर्थाध्यायस्य द्वितीयः पादः ॥ २ ॥ न्यायसूत्राणि ११ सूत्राणि २१ अर्चिरादिना तत्प्र
थितेः ॥ १ ॥ वायुमब्दादविशेषविशेषाभ्याम् २ तडितोऽधि वरुणः संबंधात् ३ आतिवाहिकास्तल्लिंगात्
४ उभयव्यामोहात्तत्सिद्धेः ५ वैद्युतेनैव ततस्तच्छ्रुतेः ६ कार्यं बादरिरस्य गत्युपपत्तेः ७ विशेषितत्वाच्च
८ सामीप्यात्तु तद्व्यपदेशः ९ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् १० स्मृतेश्च ११ परं जै
मिनिर्मुख्यत्वात् १२ दर्शनाच्च १३ न च कार्ये प्रतिपत्त्यभिसंधिः १४ अप्रतीकालंबनान्नयतीति बादरा
यण उभयथा दोषात्तत्क्रतुश्च १५ विशेषं च दर्शयति १६ इति चतुर्थाध्यायस्य तृतीयः पादः ३ न्यायसू
त्राणि ६ सूत्राणि १६ संपद्याविर्भावः स्वेन शब्दात् १ मुक्तः प्रतिज्ञानात् २ आत्मा प्रकरणात् ३ अ
विभागेन दृष्टत्वात् ४ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ५ चितितन्मात्रेण तदात्मकत्वादित्यौडुलो
मिः ६ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ७ संकल्पादेव च तच्छ्रुतेः ८ अत एव चानन्या
धिपतिः ९ अभावं बादरिराह ह्येवम् १० भावं जैमिनिर्विकल्पामननात् ११ द्वादशाहवदुभयविधं
१२ तन्वभावे संध्यवदुपपत्तेः १३ भावे जाग्रद्वत् १४ प्रदीपवदावेशस्तथा हि दर्शय
ति १५ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि १६ जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च
१७ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमंडलस्थोक्तेः १८ विकारावर्त्ति च तथा हि स्थितिमाह १९
दर्शयतश्चैवं प्रत्यक्षानुमाने २० भोगमात्रसाम्यलिंगाच्च २१ अनावृत्तिः शब्दादनावृत्तिः शब्दात्
इति चतुर्थाध्यायः न्यायसूत्राणि ७ सूत्राणि २२ समस्तशारीरकस्य न्यायसूत्राणि १९२
समस्तसूत्राणि ५५५ अधिकरणानि न्यायसूत्राणि कियंति संपूर्णसूत्राणि चेत्यौदार्याणि यस्तत्क्रमोऽलिख्यते कौ

तृ॰म्
१

प्रथमाध्याये सूत्रक्रमः ॥
प्रथमपादस्य न्यायसूत्राणि ॥ ६ ॥ सूत्राणि ॥ २७ ॥
द्वितीयपादस्य न्यायसूत्राणि ॥ ८ ॥ सूत्राणि ॥ ४१ ॥
तृतीयपादस्य न्यायसूत्राणि ॥ ३६ ॥ सूत्राणि ॥ ६६ ॥
चतुर्थपादस्य न्यायसूत्राणि ॥ १७ ॥ सूत्राणि ॥ ५२ ॥
प्रथमाध्यायस्य समस्तन्यायसूत्राणि ॥ ६७ ॥ सूत्राणि ॥ १८६ ॥

द्वितीयाध्याये सूत्रक्रमः ॥
प्रथमपादस्य न्यायसूत्राणि ॥ १३ ॥ सूत्राणि ॥ ३७ ॥
द्वितीयपादस्य न्यायसूत्राणि ॥ ८ ॥ सूत्राणि ॥ ४५ ॥
तृतीयपादस्य न्यायसूत्राणि ॥ १७ ॥ सूत्राणि ॥ ५३ ॥
चतुर्थपादस्य न्यायसूत्राणि ॥ ९ ॥ सूत्राणि ॥ २२ ॥
द्वितीयाध्यायस्य समस्तन्यायसूत्राणि ॥ ४७ ॥ सूत्राणि ॥ १५७ ॥

तृतीयाध्याये सूत्रक्रमः ॥
प्रथमपादस्य न्यायसूत्राणि ॥ ६ ॥ सूत्राणि ॥ २७ ॥
द्वितीयपादस्य न्यायसूत्राणि ॥ ८ ॥ सूत्राणि ॥ ४१ ॥
तृतीयपादस्य न्यायसूत्राणि ॥ ३६ ॥ सूत्राणि ॥ ६६ ॥
चतुर्थपादस्य न्यायसूत्राणि ॥ १७ ॥ सूत्राणि ॥ ५२ ॥
तृतीयाध्यायसमस्तन्यायसूत्राणि ॥ ६७ ॥ सूत्राणि ॥ १८६ ॥

चतुर्थाध्यायस्य सूत्रक्रमः ॥
प्रथमपादस्य न्यायसूत्राणि ॥ १४ ॥ सूत्राणि ॥ १९
द्वितीयपादस्य न्यायसूत्राणि ॥ ११ ॥ सूत्राणि ॥ २१
तृतीयपादस्य न्यायसूत्राणि ॥ ६ ॥ सूत्राणि ॥ १६
चतुर्थपादस्य न्यायसूत्राणि ॥ ७ ॥ सूत्राणि ॥ २२
चतुर्थाध्यायसमस्तन्यायसूत्राणि ॥ ३८ ॥ सूत्राणि ॥ ७८

शारीरकग्रंथस्याध्यायचतुष्टयात्मकस्याधिकरणसूत्राणि द्विनवत्युत्तरैकशतसंख्यात्मकानि ॥ १९२ ॥
एतस्यैवाध्यायचतुष्टयात्मकग्रंथस्य सूत्राणि पंचपंचाशदधिकपंचशतपरिमितानि ॥ ५५५ ॥ रामायनमः ॥ राम
१